Almira 2
Shelf 3
36

क्र नं. १६६५२

मूल्य — ११०।—

द. नं. १६८०८२

तन्त्रसारःप्रारभ्यते

श्रीकाशीविश्वनाथपुरीमेमहल्लाछोटकीपिअरिपर बाबूकौलेश्वरसिंहकेमकानमें बाबूकिशुन
दयालसिंहके गणेशप्रभाकरछापाखानेमे तन्त्रसार छापागया जिस्कोलेनाहोयसोनईसड़क
पर बाबूकौलेश्वरसिंहकेदुकानपर मिलैगा शोधाबालशास्त्रीप्रभुणेने वो काशीनाथशास्त्री
प्रभुणेने लिखाह्मारंगानिवारि ॥ ॥ ॥ ॥ ॥ ६ ॥ ६ ॥

ह. ११०

२

जनंकराउ १८५६।

तं॰सा॰ ॥श्रीगणेशायनमः॥ ॥नत्वाकृष्णपदद्वन्द्वंब्रह्मादिसुरवन्दितम्॥गुरुंचज्ञानदातारंकृष्णानन्देनधीमता॥तन्त्रग्रंथकृतांव्याक्याज्ञानार्थंप्रतिपत्यच॥
१ सौकर्यार्थंचसंक्षेपात्तन्त्रसारःप्रतन्यते॥उच्यतेप्रथमंतत्रलक्षणंगुरुशिष्ययोः॥तत्रप्रथमंगुरुलक्षणमाह॥गकारःज्ञानसंपत्तीरकारस्तत्प्रकाशकः
॥उकाराच्छिवतादात्म्यंदयादितिगुरुःस्मृतः॥शान्तोदान्तःकुलीनश्चविनीतःशुद्धवेषवान्॥शुद्धाचारःसुप्रतिष्ठःशुचिर्दक्षःसुबुद्धिमान्॥आश्रमीध्यान
निष्ठश्चमंत्रतन्त्रविशारदः॥निग्रहानुग्रहेशक्तोगुरुरित्यभिधीयते॥ज्ञानार्णवे॥गुरौमनुष्यबुद्धिस्तुमंत्रेचाक्षरभावनाम्॥प्रतिमासुशिलाबुद्धिंकुर्वाणोनरकं
व्रजेत्॥जन्महेतूहिपितरौपूजनीयौप्रयत्नतः॥गुरुर्विशेषतःपूज्योधर्माधर्मप्रदर्शकः॥गुरुःपितागुरुर्मातागुरुर्देवोगुरुर्गतिः॥शिवेरुष्टेगुरुस्त्रातागुरौरु
ष्टेनकश्चन॥गुरोर्हितंप्रकर्तव्यंवाङ्मनःकायकर्मभिः॥अहिताचरणाद्देविविष्ठायांजायतेकृमिः॥मंत्रत्यागाद्भवेन्मृत्युर्गुरुत्यागाद्दरिद्रता॥गुरुमंत्रपरि मेनुः
त्यागात्रौरवंनरकंव्रजेत्॥गुरौसन्निहितेयस्तुपूजयेदन्यदेवतां॥सयातिनरकंघोरंसापूजाविफलाभवेत्॥श्रीक्रमे॥उत्पादकब्रह्मदात्रोर्गरीया
न्ब्रह्मदःपिता॥तस्मान्मन्येतसततंपितुरप्यधिकंगुरुं॥गुरुवत्गुरुपुत्रेषुगुरुवत्तत्सुतादिषु॥मंत्राणांदेवताप्रोक्तादेवतागुरुरूपिणी॥तेषांभेदोनकर्त्त॰
व्योयदीच्छेच्छुभमात्मनः॥आगमकल्पद्रुमे॥अविद्योवासविद्योवागुरुरेवतुदैवतम्॥अमार्गस्थोऽपिमार्गस्थोगुरुरेवसदागतिः॥आयान्तमग्रतो
गच्छेद्गच्छन्तन्तमनुव्रजेत्॥आसनेशयनेवापिनतिष्ठेदग्रतोगुरोः॥अनुज्ञांप्राप्यतिष्ठेच्चनैवंप्राप्यमवाप्नुयात्॥गुरुर्मातापितास्वामीबांधवःसुहृदः
शिवः॥इत्याधायमनोनित्यंभजेत्सर्वात्मनागुरुम्॥ निंद्यगुरुमाह॥क्रियासारसमुच्चये॥श्वित्रीचैवगलत्कुष्ठीनेत्ररोगीचवामनः॥कुनखी॰
श्यावदंतश्चस्त्रीजितोह्यधिकांगकः॥हीनांगःकपटीरोगीबह्वाशीबहुजल्पकः॥एतैर्दोषैर्विहीनोयःसगुरुःशिष्यसम्मतः॥ इतिगुरुलक्षणम्॥ ए॰
॥शिष्यलक्षणमाह॥शान्तोविनीतःशुद्धात्माश्रद्धावान्धारणक्षमः॥समर्थश्चकुलीनश्चप्राज्ञस्सच्चरित्रोयती॥एवमादिगुणैर्युक्तःशिष्योभवति १
शिवोनदि॥७॥

नान्यथा ॥ निंद्यशिष्यमाह ॥ पापिने क्रूरचेष्टाय शठाय कृपणाय च ॥ निर्दकाय च मूर्खाय तीर्थद्वेषपराय च ॥ भक्तिहीनाय देवेशि न देया मरिनाय च ॥ गुरुता शिष्यता वापि तयोर्वत्सरवासतः ॥ तथा चोक्तं सारसंग्रहे ॥ सद्गुरुः स्वाश्रितं शिष्यं वर्षमेकं प्रतीक्षयेत् ॥ स्वप्ने तु न कालनियमः स्वप्ने तु नियमो न हीति नारदवचनात् ॥ तत्रैवम् ॥ राज्ञि चामात्यजो दोषः पत्नी पापं स्वभर्त्तरि ॥ तथा शिष्यार्ज्जितं पापं गुरुः प्राप्नोति निश्चितं ॥ देव्यागमे शिववाक्यम् ॰॥ गुरुशय्यासनं यानं पादुकोपानपीठकम् ॥ स्नानोदकं तथा छायां लंघयेन्न कदाचन ॥ गुरोरग्रे पृथक्पूजामौद्धत्यं च विवर्जयेत् ॥ दीक्षां व्याख्यां प्रभुत्वं च गुरोरग्रे परित्यजेत् ॥ इति शिष्यलक्षणं तथा च योगिनीतंत्रे ॥ पितुर्म्मंत्रं न गृह्णीयात्तथा मातामहस्य च ॥ सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च ॥ तथा गणेशविमर्शिन्याम् ॥ यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः ॥ विविक्ताश्रमिणो दीक्षा न सा कल्याणदायिका ॥ रुद्रयामले ॥ न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत्सुतं ॥ न पुत्रं च तथा भ्राता भ्रातरं नैव दीक्षयेत् ॥ सिद्धमंत्रो यदि पतिस्तदा पत्नीं स दीक्षयेत् ॥ शक्तित्वेन वरारोहे न च सा पुत्रिका भवेत् ॥ मंत्राः सर्वे देवता ज्ञेया देवता गुरुरूपिणी ॥ तेषां निन्दा न कर्त्तव्या यदीच्छेच्छुभमात्मनः ॥ गुरुसन्निहिते यस्तु पूजयेदग्रतो नतम् ॥ सद्गुर्गतिमवाप्नोति पूजा च विफला भवेत् ॥ अविद्यो वा सविद्यो वा गुरुरेव तु दैवतम् ॥ वर्षैकेन भवेद्योग्यो विप्रो गुणसमन्वितः ॥ वर्षद्वयात्तु राजन्यो वैश्यस्तु वत्सरैस्त्रिभिः ॥ चतुर्भिर्वत्सरैः शूद्रः कथिता शिष्ययोग्यता ॥ इत्यादिनिषेधवचनात् ॥ एभ्यो मंत्रं न गृह्णीयादिदं तु सिद्धेतरविषयम् ॥ सिद्धमंत्रो न दुष्यतीति वचनात् ॥ तथा च सिद्धयामले ॥ यदि भाग्यवशाद्देवि सिद्धविद्यां लभेत्प्रिये ॥ तदैव तां तु दीक्षेत त्यक्त्वा गुरुविचारणम् ॥ प्रमादाच्च तथाऽज्ञानात् पितुर्दीक्षां समाचरन् ॥ प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत् ॥ पितुरित्युपलक्षणम् मातामहादीनामपि ॥ प्रायश्चित्तं तु अयुतसावित्रीजपः ॥ सर्वत्र तथादर्शनात् ॥ दशसाहस्रजाप्येन सर्वकल्मषनाशिनी ॥ तथा च मत्स्यसूक्ते ॥ निर्बीजं तु पितुर्मंत्रं शैवे शाक्ते न दुष्यतीति वचनं कौलि

कमंत्रदीक्षापरम्॥ योगिनीतंत्रे शक्तिविद्यामधिकृत्यदीक्षानिषेधात्॥ यद्वाशाक्तेतारादिविद्यायाम् मत्स्यसूक्ते तथाप्रतिपादनात्। तथाचतारावि
लासे। कथमपिमनुमेनंप्राप्यशिष्यायकस्मै द्विजकुलतिलकायज्येष्ठपुत्रायदद्यात्॥ श्रीक्रमे॥ मनुर्विमृश्यदातव्योज्येष्ठपुत्रायधीमते॥ पुत्राय
किंसुतान्यस्मैविगोत्रायस्वपौरुषं॥ इतिवचनात्तारादौनदोषः॥ महातीर्थेउपरागेसति सर्वत्रमंत्रमात्रेपित्रादितोपिग्रहणेनदोषः॥ तथाचवि
ष्णुमंत्रमधिकृत्य॥ साधुपृष्टंत्वयाब्रह्मन् वक्ष्यामिसकलंतव॥ ब्रह्मणाकथितंपूर्वंवसिष्ठायमहात्मने॥ वसिष्ठोपिस्वपौत्रायमत्पित्रेदत्तवान्स्व
यं॥ प्रसन्नहृदयःस्वच्छःपितामेकरुणानिधिः॥ कुरुक्षेत्रेमहातीर्थेसूर्य्यपर्वणिदत्तवान् इत्यादि॥ वैशंपायनसंहितायाम् शौनकंप्रतिव्यासवा
र्थं क्यम्॥ योगिनीतंत्रे०॥ निर्बीजंचपितुर्मंत्रंतथामातामहस्यच॥ स्वप्नलब्धंस्त्रियादत्तंसंस्कारेणैवशुध्यति॥ यत्तु॥ साध्वीचैवसदाचारागुरुभक्ता
जितेन्द्रिया॥ सर्वमंत्रार्थतत्त्वज्ञासुशीलापूजनेरता॥ गुरुयोग्याभवेत्साहिविधवापरिवर्ज्जिता॥ स्त्रियोदीक्षाशुभाप्रोक्तामातुश्चाष्टगुणास्मृता॥ इदंतु
गुरोरुपासितमंत्रपरम्॥ तथाचभैरवीतंत्रे॥ स्त्रीमंत्रोपदेशेतुनकुर्य्याद्गुरुचिन्तनम्॥ मातुरिति उपासितेत्वष्टगुणम् अनुपासितेशुभफलमित्यर्थः
॥ सिद्धमंत्रविषयंवेतिकेचित्॥ वस्तुतस्तु॥ योगिनीहृदयेचस्त्रियादत्तमित्यत्रस्त्रीपदंविधवापरम् एकवाक्यताबलात्॥ स्वप्नलब्धेतुकलशेगुरोः
प्राणंनिवेशयेत्॥ वटपत्रेकुंकुमेनलिखित्वाग्रहणंशुभं॥ ततःशुद्धिमवाप्नोति अन्यथाविफलंभवेत्॥ इदंतुसद्गुरोरभावे॥ तत्संभवेतस्मादेवगृह्णीया
त्॥ स्वप्नेतुनियमोनहीतिनारदवचनात्॥ वैष्णवेवैष्णवोग्राह्यःशैवेशैवश्चशाक्तिके॥ शैवःशाक्तश्चसर्वत्रदीक्षास्वामीनसंशयः॥ तथाविद्याधरा
चार्य्यधृतम्॥ मध्यदेशेकुरुक्षेत्रेनाटकेक्किलसंभवाः॥ अन्तर्वेदिप्रतिष्ठांचआवन्त्याश्चगुरूत्तमाः॥ मध्यदेशआर्य्यावर्त्तः॥ गौडाःशाल्वोद्भवाश्चैव
॥ ॥

अज [illegible] संज्ञकंसूर्यमंत्रविशेषः ॥५॥

मागधाःकेरलास्तथा ॥ कोशलाश्चदशार्णाश्चगुरवःसप्तमध्यमाः ॥ कालोटनर्मदाराष्ट्रकच्छातीरोद्भवास्तथा ॥ कलिंगाश्चकलम्बाश्चकाम्बोजाश्चाधमामताः ॥ दीक्षांविनाजपस्यदुष्टत्वात् प्रथमंसानिरूप्यते ॥ दिव्यंज्ञानंयतोदद्यात् कुर्य्याच्चपापसंक्षयम् ॥ तस्माद्दीक्षेतिसाप्रोक्तामुनिभिस्तत्त्ववेदिभिः ॥ सर्वाश्रमेषुदीक्षायाआवश्यकत्वम् ॥ तथा ॥ दीक्षामूलंजपंसर्वंदीक्षामूलंपरंतपः ॥ दीक्षामाश्रित्यनिवसेत्यत्रकुत्राश्रमेवसन् ॥ शूद्रस्यनिषेधमाह ॥ तन्त्रान्तरे ॥ गृहीतमंत्रस्त्यक्तव्योगुरुश्चेद्दोषसंयुतः ॥ महापातकयुक्तोवादेवतागुरुनिंदकः ॥ शूद्रस्यमंत्रविशेषदानेनिषेधमाह ॥ प्रणवाद्यंनदातव्यंमंत्रंशूद्रायसर्वथा । आत्ममंत्रंगुरोर्मंत्रंमंत्रंचाजपसंज्ञकं ॥ शूद्रोनिरयमाप्नोतिब्राह्मणोयात्यधोगतिम् ॥ अदीक्षितायेकुर्वंतिजपपूजादिकाःक्रियाः ॥ नभवंतिप्रियेतेषांशिलायामुप्तबीजवत् ॥ देविदीक्षाविहीनस्यनसिद्धिर्नचसद्गतिः ॥ तस्मात्सर्वप्रयत्नेनगुरुणादीक्षितोभवेत् ॥ अदीक्षितोपिमरणेरौरवंनरकंव्रजेत् ॥ तस्माद्दीक्षांप्रयत्नेनसदाकुर्य्याच्चतान्त्रिकाम् ॥ कस्येदृष्ट्वातुमंत्रंवैयोगृह्णातिनराधमः ॥ मन्वंतरसहस्रेषुनिष्कृतिर्नैवजायते ॥ नदीक्षितस्यकार्य्यंस्यात्तपोभिर्नियमैर्व्रतैः ॥ नतीर्थगमनेनापिनचसावीरयन्त्रणैः ॥ एवंयदृच्छयाश्रुतंमंत्रंछद्मनाथबलेनवा ॥ पत्रेस्थितंतुगाथांचप्रजप्तमपिनिष्फलं ॥ अतःसद्गुरोराहितदीक्षःसर्वकर्म्माणिसाधयेत् ॥ तत्राप्यनुकूलंमंत्रंगृह्णीयात् ॥ तथाच ॥ स्वनामराशिकोष्ठानामनुकूलान्भजेन्मनून् ॥ वाराहीतंत्रे ॥ ताराचक्रंराशिचक्रंनामचक्रंतथैवच ॥ तत्रचेत्सगुणोमंत्रोनान्यचक्रंविचारयेत् ॥ इतितुप्राथम्यतयाबोद्धव्यम् ॥ तथाच ॥ धनिमंत्रंनगृह्णीयात् अकुलंचतथैवच ॥ इत्यादिदर्शनात्तत्तच्चक्रस्यावश्यकत्वात् प्रथमंतन्निरूप्यते ॥ तत्रसिद्धसारस्वते ॥ नृसिंहार्कवराहाणांप्रासादप्रणवस्यच ॥ सपिंडाक्षरमंत्राणांसिद्धादीन्नैवशोधयेत् ॥ स्वप्नलब्धेस्त्रियादत्तेमालामंत्रेचत्र्यक्षरे ॥ वैदिकेषुचमंत्रेषुसिद्धादीन्नैवशोधयेत् ॥ एकाक्षरस्यमंत्रस्यमालामंत्रस्यपार्वति ॥ वैदिकस्यचमंत्रस्यसिद्धादीन्नैवशोधयेत् ॥ विंशत्यर्णाधिकामंत्रामालामंत्राःप्रकीर्ति

ताः॥नपुंसकस्यमंत्रस्यसिद्धादीन्नैवशोधयेत्॥हंसस्याष्टाक्षरस्यापितथापंचाक्षरस्यच॥एकद्व्यादिबीजस्यसिद्धादीन्नैवशोधयेत्॥चामुंडातंत्रे॥का
लीतारामहाविद्याषोडशीभुवनेश्वरी॥भैरवीच्छिन्नमस्ताचविद्याधूमावतीतथा॥बगलासिद्धविद्याचमातंगीकमलात्मिका॥एतादशमहाविद्याःसि
द्धविद्याःप्रकीर्त्तिताः॥नात्रसिद्ध द्यपेक्षास्तिमनस्तत्रविचारणा॥कालादिशोधनंनास्तिनचामित्रादिदूषणं॥सिद्धविद्यातयानात्रयुगसेवापरिश्रमः
॥नास्तिकिंचिन्महादेविदुःखसाध्यंकथंचन॥गवाक्षतंत्रे॥नदाविद्यांपरीक्षेन्नयदित्रिपुरसुंयजेत्॥इत्यादिवचनादेषुविचारोनास्ति॥वस्तुतस्तुइदंप्र
शंसापरम्॥सावित्र्यादिवैदिकमंत्रादन्यत्रविचारस्यावश्यकत्वम्॥दुर्दैववशात्कदाचिद्वैरिमंत्रस्यस्वप्नादौप्राप्त्यातत्तद्दोषस्यदृष्टत्वात्इतितुसांप्रदायिकाः
॥तत्रकुलाकुलस्यभेदंहिवक्ष्यामिमंत्रिणामिह॥तथाचनिबन्धे॥वाय्वग्निभूजलाकाशाःपंचाशल्लिपयःक्रमात्॥पंचह्रस्वाःपंचदीर्घाबिंद्वन्ताःसं
धिसंभवाः॥कादयःपंचशःषसलसहान्ताःसमीरिताः॥अआएकचटतपयषामारुताः॥इईऐखछठथफरक्षाआग्नेयाः॥उऊओगजडदबन
लाःपार्थिवाः॥ऋॠऔघझढधभवसावारुणाः॥ऌॡअंङञणनमशहानाभसाः॥साधकस्याक्षरंपूर्वंमंत्रस्यापितदक्षरम्॥यद्येकभूतदैवत्यं
जानीयात्स्वकुलंहितत्॥भौमस्यवारुणंमित्रंआग्नेयस्यापिमारुतम्॥मारुतंपार्थिवानांचशत्रुराग्नेयमंभसां॥चकारादाग्नेयंपार्थिवानांचशत्रु॥तथा
चरुद्रयामले॰पार्थिवेवारुणंमित्रंतैजसंशत्रुरीरितमित्यादि॥नाभसंसर्वमित्रंस्याद्विरुद्धंनैवशीलयेत्॥इतिकुलाकुलविचारः॥अथराशिचक्रम्
॥कल्पद्रुमे॥रेखाद्वयंपूर्वपरेणकुर्यात्तन्मध्यतोयाम्यकुबेरभेदात्॥एकैकमीशाननिशाचरेद्वहुताशवाय्वोर्विलिखेत्ततोऽस्मिन्॥वेदा४ग्नि
३वह्नि३युगल२श्रवणा२क्षि२संख्यान्पंचे५षु५बाण५शर५पंच५चतुष्ट४यार्णान्॥मेषादितःप्रविलिखेत्सकलांस्तुवर्णान्कन्यागता एम
न्प्रविलिखेद्यशादिवर्णान्॥चतुर्भिर्यादिभिःसार्धस्यात्क्षकारस्तुमीनगइतिप्रपंचसारे॥अआइईमेषः॥उऊऋवृषः॥ॠऌॡमिथुनम्३

तैजसं ।५

॥एऐकर्कटः॥ओऔसिंहः॥अंअः शषसहाः कन्यका॥कवर्गस्तुला॥चवर्गोवृश्चिकः॥टवर्गोधनुः॥तवर्गोमकरः॥पवर्गः कुंभः॥यवर्गोमीनः॥स्वराशीनामनुकूलंमंत्रंभजेत्॥तथाच॥स्वताराराशिकोष्ठानामनुकूलान्भजेन्मनून् इतिवचनात्॥राशीनांशुद्धताज्ञेयात्यजेच्चतुर्मृतिंव्ययम्॥स्वराशेर्म्मंत्रराश्यंतंगणनीयंविचक्षणैः॥यदातुस्वराशेरज्ञानंतदासाधकनामाद्यक्षरसंबंधिनंराशिंगृहीत्वागणयेत्॥साध्याक्षरराश्यंतंगणयेत्॥साधकाक्षरादितिरामार्च्चनचन्द्रिकाधृतवचनात्॥नारायणीयेच॥अज्ञातेराशिनक्षत्रेनामाद्यक्षरराशितइति॥रामार्च्चनचंद्रिकायम्॥एकपंचनवबांधवाः स्मृताः द्वौचषड्दशमाश्चसेवकाः॥वह्निरुद्रमुनयस्तुपोषका द्वादशाष्टचतुरस्तुघातकाः॥चतुरस्तुघातकाइतिविष्णुविषयम्॥रामार्च्चनचंद्रिकाधृतत्वात्॥शत्रुत्वादोषश्चवर्ज्जनीयम्॥षष्ठाष्टमद्वादशानिवर्ज्जनीयानियत्नतइतिवचनात्॥तंत्रान्तरे॥लग्नधनभ्रातृबंधुपुत्रशत्रुकलत्रकाः॥मरणंधर्म्मकर्म्मायव्ययद्वादशराशयः॥नामानुरूपमेतेषांशुभाशुभफलंदिशेत्॥वैष्णवेतुशत्रुस्थानेबंधुः॥बंधुस्थानेशत्रुरितिपाठः॥तथाचतंत्रराजे॥तेनमंत्रादिवर्णेननाम्नांचाद्याक्षरेणच॥गणयेद्यदिषष्ठंवाप्यष्टमंद्वादशंतुवा॥रिपुर्म्मंत्राद्यवर्णःस्यात्तेनतस्माद्धितंभवेत्॥इतिराशिचक्रम्॥अथनक्षत्रचक्रम्॥अआअश्विनीदेवगणः॥इभरणीमानुषः॥ईउऊकृत्तिकाराक्षसः॥ऋॠऌॡरोहिणीमानुषः॥एमृगशिरोदेवः॥ऐआर्द्रामानुषः॥ओपुनर्वसुर्देवः॥कःपुष्योदेवः॥खगाअश्लेषाराक्षसः॥घङमघाराक्षसः॥चपूर्वाफाल्गुनीमानुषः॥छजउत्तराफाल्गुनीमानुषः॥झञहस्तोदेवः॥टठचित्राराक्षसः॥डस्वातीदेवः॥ढणविशाखाराक्षसः॥तथदअनुराधादेवः॥धज्येष्ठाराक्षसः॥नपफमूलराक्षसः॥बपूर्वाषाढामानुषः॥भउत्तराषाढामानुषः॥मश्रवणोदेवः॥यरधनिष्ठाराक्षसः॥लशतभिषाराक्षसः॥

॥ ॥

वशपूर्वाभाद्रपदामानुषः॥षसहउत्तराभाद्रपदामानुषः॥अंअःलंक्षरेवतीदेवः॥निबंधे॥पापलोभानपट्टःप्राज्यंरुद्रस्याद्रिरुरुःकरम्॥लोकलोपपटुप्राप्यंखलोयोमेषुमेदिताः॥वर्णाःक्रमात्स्वरान्त्यौतुरेवत्यंशगतौनद्रा॥तथाचपिंगलातंत्रे॥उत्तरादक्षिणाग्रंतुरेखांकुर्य्याच्चतुष्टयीं॥दशरेखाःपश्चिमाग्राःकर्त्तव्यावरवर्णिनि॥अश्विन्यादिक्रमेणैवविलिखेत्तारकाःपुनः॥वक्ष्यमाणविधानेनतन्मध्येवर्णकान्लिखेत्॥पक्षैकत्र्यब्धिरूपावनिभुजशशियुक्युग्मभूयुग्मपक्षायुग्मैकद्वित्रिरूपानलशशि शशिभूद्व्येकपक्षाग्निवेदाः॥वर्णाःक्रमात्स्वरान्त्यौतुरेवत्यंशगतावुभौ॰॥तथाचनिबंधे॰॥पूर्वोत्तरात्रयंचैवभरण्यार्द्राचरोहिणी॥इमानिमानुषाण्याहुर्नक्षत्राणिमनीषिणः॥ज्येष्ठाशतभिषामूलधनिष्ठाश्लेषकृत्तिका॥चित्रामघाविशाखाःस्युस्ताराराक्षसदेवताः॥अश्विनीरेवतीपुष्यःस्वातीहस्तःपुनर्वसुः॥अनुराधामृगशिरःश्रवणादेवतारकाः॥तथाच॥स्वजातौपरमाप्रीतिर्मध्यमाभिन्नजातिषु॥देवराक्षसयोर्वैरंनाशोमानुषराक्षसः॥जन्मसंपद्विपत्क्षेमप्रत्यरिःसाधकोवधः॥मित्रंपरममित्रंचजन्मादीनिपुनःपुनः॥जन्मतृतीयपंचसप्तवर्जनीयानिनक्षत्राणि॥तथाच॥रसाष्टनवभद्राणियुगयुग्मगतान्यपि॥इतराणिनक्षत्राणिपरित्याज्योमनीषिभिः इत्यादि॥स्वनक्षत्रादेवनक्षत्रंगणनीयम्॥स्वनक्षत्राज्ञानेस्वनामाद्यक्षरसंबंधिनक्षत्रादेवनक्षत्रंगणनीयमिति॥प्रादक्षिण्येनगणयेत्साधकाद्यक्षरात्सुधीः॥इतिनक्षत्रचक्रम्॥अथअकथहचक्रम्॥चतुरस्रेलिखेद्वर्णांश्चतुष्कोष्ठसमन्विते॥चतुष्कोष्ठेषोडशकोष्ठेइतियावत्॥चतुरस्रंलिखेत्कोष्ठंचतुष्कोष्ठसमन्वितं॥पुनश्चतुष्कंतत्रापिलिखेद्धीमान्क्रमेणतु॥इतिविश्वसारवचनात्॥तत्रषोडशकोष्ठेअकारादिवर्णान्प्रादक्षिण्येनलिखेत्॥तत्रक्रमः॥इन्द्राग्निरुद्रनववनेत्रयुगार्कदिक्षु ऋत्वष्टषोडश चतुर्दशभौतिकेषु॥

॥ ॥

पातालपंचदशवह्निहिमांशुकोष्ठेवर्णान्लिखेल्लिपिभवान्क्रमतस्सुधीमान्॥नामाद्यक्षरमारभ्ययावन्मंत्रादिमाक्षरं॥चतुर्भिःकोष्ठैरेकैकमि
तिकोष्ठचतुष्टयम्॥पुनःकोष्ठगकोष्ठेषुसव्यतोनाम्नआदितः॥सव्यतोदक्षिणतः॥तथाचबिम्बसारे॥दक्षिणावर्त्तयोगेनकोष्ठेवर्णान्लिखे
त्क्रमात्॥येनैवलिखनंकुर्यात्तेनैवगणनंस्मृतं॥सिद्धःसाध्यःसुसिद्धोऽरिःक्रमान्ज्ञेयोविचक्षणैः॥सिद्धःसिद्ध्यतिकालेनसाध्यस्तुजपहोम
तः॥सुसिद्धोग्रहणादेवरिपुर्मूलंनिकृन्तति॥सिद्धार्णाबांधवाःप्रोक्ताःसाध्यास्तेसेवकाःस्मृताः॥सुसिद्धाःपोषकाज्ञेयाःशत्रवोघातकाःस्मृताः॥जपेन
बंधुःस्यात्सेवकोऽधिकसेवया॥पुष्णातिपोषकोभीष्टंघातकोनाशयेद्ध्रुवम्॥कोष्ठगकोष्ठेषुसिद्धादीनां विशेषफलमाह॥सिद्धःसिद्धोयथोक्ते
सिद्धः
नद्विगुणात्सिद्धसाध्यकः॥सिद्धःसुसिद्धोऽर्द्धजपात्सिद्धारिर्हंतिबांधवान्॥साध्यःसिद्धोद्विगुणकःसाध्यसाध्योनिरर्थकः॥तत्सुसिद्धोद्विगुण
जपात्साध्यारिर्हंतिगोत्रजान्॥सुसिद्धःसिद्धोऽर्द्धजपात्तत्साध्योद्विगुणाधिकात्॥तत्सुसिद्धोग्रहादेवसुसिद्धारिःस्वगोत्रहा॥अरिसिद्धःसु
तान्हन्यात्अरिसाध्यस्तुकन्यकाः॥तत्सुसिद्धस्तुपत्नीघ्नस्तदरिर्हंतिसाधकं॥एषुदोषेषुसर्वत्रमायांकामययापिवा॥क्षिप्त्वावादौश्रियंदद्यात्दू
षणविमुक्तयइतिपिंगलायाम्॥वैरिमंत्रत्यागप्रकारमाहतंत्रे॥गवांक्षीरेद्रोणमितेजपेन्मंत्रंशताष्टकम्॥पीत्वाक्षीरंजलेतद्वत्समुज्झ्यार्थंत्यजे
तथा॥अनेनैवविधानेनवैरिमंत्राद्विमुच्यते॥रुद्रयामले॥वटपत्रेलिखित्वारिमंत्रंस्रोतसिनिःक्षिपेत्॥एवंमंत्रविमुक्तःस्यादित्याहभग
वान्शिवः॥इतिअकथहचक्रम्॥अथाकडमचक्रंरेखाद्वयंपूर्वपरेणकुर्यात्तन्मध्यतोयाम्यकुबेरभेदात्॥महेशरक्षोऽधिपति
क्रमेणतिर्यक्तथावायुहुताशनेन॥अकारादिक्षकारान्तान्क्लीबहीनान्लिखेत्ततः॥एकैकक्रमतोलेख्यान्मेषादिषुद्वेषान्तकान्॥गण ज्ञ
येत्क्रमशोभद्रेनामादिवर्णकादिमान्मेषादितोहिमीनांतंगणयेत्क्रमशःसुधीः॥जन्तुःस्वनामतोमंत्रीयावन्मंत्रादिमाक्षरं।सिद्धःसाध्यः

तं० सुसिद्धारीन्पुनः सिद्धादयः पुनः॥ नवैकपंचमे सिद्धः साध्यः षड्दशयुग्मके॥ सुसिद्धस्त्रिसप्तके रुद्रे वेदाष्टद्वादशे रिपुः॥ एतत्ते कथितं देवि
सा० अकडमादिकमुत्तमम्॥ इदन्तु गोपालविषयकमेव॰ गोपाले अकडमः स्मृतः इति वचनात्॥ वाराहीतंत्रे॥ ताराशुद्धिर्वैष्णवानां कोष्ठशुद्धिः शिवस्य च
५ ॥राशिशुद्धिस्त्रिपुरे च गोपाले कडमं स्मृतं॥ इति यामलीयवचनात्॥ कोष्ठशुद्धिर्वराहे च महालक्ष्म्याः कुलाकुलं॥ नामादिचक्रे सर्वेषां भूतचक्रे तथैव
च॥ शैवेपि अकडमविचार आवश्यकः॥ अथ ऋणिधनिचक्रम्॥ तद्यथा॥ कोष्ठान्येकादशान्येव वेदेन पूरितानि च॥ अकारादि हकारान्तं लिखेत्त
कोष्ठेषु तत्त्ववित्॥ प्रथमं पंचकोष्ठेषु ह्रस्वदीर्घक्रमेण तु॥ द्वयं द्वयं लिखेत्तत्र विचारे खलु साधकः॥ शेषेष्वेकैकशो वर्णान्क्रमतस्तु लिखेत्सुधीः
षट्कालकालवियदग्निसमुद्रवेदखाकाशशून्यदहनाः खलु साध्यवर्णाः॥ युग्मद्विपंचवियदम्बरयुक्शशांकव्योमाधिवेदशशिनः खलु साध
कार्णाः॥ नामाज्झलादकठबाहुजभक्षशेषं त्यक्त्वोभयोरधिकशेषमृणं धनं स्यात्॥ मन्येऋणी शुभफलोथ शुभो धनी च तुल्यं यदा शुभफलः कथितो
मुनीन्द्रैः॥ अस्यार्थः॥ साध्यवर्णान् स्वरव्यंजनरूपेण पृथक्कृतान् षट्काला‌द्यङ्कैर्गुणितान्कृत्वा॥ तथा साधकनामाक्षराणि स्वरव्यंजन
रूपेण पृथक्कृतानि युग्माद्यैरङ्कैर्गुणयित्वा अष्टसंख्याभिर्हृत्वा उभयोः साध्यसाधकयोरधिकं ऋणं शेषं धनं ज्ञात्वा मंत्रं दद्यात्॰ मंत्रश्चे
दृणी भवति तदा मंत्रः शुभदायको भवति धनी चेन्न॥ तंत्रान्तरे॰ शून्ये मृत्युमवाप्नोति धने च विफलं भवेत्॥ ऋणे तु प्राप्तिमात्रे च सर्वसिद्धि
प्रजायते॥ तथा च रुद्रयामले॥ मंत्रो यद्यधिकाङ्कः स्यात्तदा मंत्रं जपेत्सुधीः॥ समेपि च जपेन्मंत्रं न जपेत्तु ऋणाधिके॥ शून्ये मृत्युं विजानीयात्त
स्माच्छून्यं विवर्जयेत्॥ तथा च॥ इन्द्वक्षिनेत्ररविपंचदशर्तुवेदवह्न्यासुधाष्टनवभिर्गुणितांश्च साध्यान्॥ दिग्भूगिरीक्षितिगजाग्निमुनीषुवेदषड्व राम
ह्निभिस्तु गुणितान्नथ साध्यकार्णान् षट्कालेत्यादिवचनं तु विष्णुविषयं॥ रत्नाकरेन चन्द्रिकाधृतत्वादिति केचित्॥ वस्तुतस्तु पूर्वमस्यैव विवरणम्॥ त ५

थाहि॥ इन्द्रर्क्षनेत्रेत्याद्यनंतरं नामार्णान्तु कोष्ठांकमथाभिहन्यादेकादिरुद्रांकगणांक्रमेण॥ यथोक्तं रुद्रयामले॥ साध्याङ्कान् साधकाङ्कांश्च पूरयेद्रुद्रसंख्यया॥ गुणिते तु हृतेष्टाभिर्यच्छेषं जायते स्फुटं॥ तदंकं कथयाम्यत्र एकादशगृहस्थितम्॥ इत्युक्ता षट्कालेत्याद्युक्तम्॥ प्रकारांतरं यथा॥ नामाद्यक्षरमारभ्य यावन्मंत्रादिमं भवेत्॥ त्रिधा कृत्वा स्वरैर्भिन्नं तदन्यद्विपरीतकम्॥ अस्यार्थः॥ साधकनामाद्यक्षरतो गणनया यावन्मंत्रादिमाक्षरम् तावत्संख्यं त्रिधा कृत्वा सप्तभिर्हृत्वा अधिकं ऋणं शेषं धनं स्यात् तदन्यदिति मंत्राद्यक्षरमारभ्य यावत्साधकाद्यक्षरं भवेत्॥ तावत्संख्यं सप्तगुणं कृत्वा त्रिभिर्हरेत्॥ अन्यच्च॥ साध्यनाम द्विगुणितं साधकेन समन्वितं॥ अष्टभिस्तु हरेच्छेषं तदन्यद्विपरीतकम्॥ अस्यार्थः॥ साध्यनाम स्वरव्यंजनभेदेन द्विगुणीकृत्य साधकनाम्ना स्वरव्यंजनभेदेन मिलितं कृत्वा अष्टभिर्हरेत् तदन्यदिति साधकनामस्वरव्यंजनभेदेन द्विगुणीकृत्य साध्ययुक्तं कृत्वा अष्टभिर्हरेत्॥ सनत्कुमारीये। पितृमातृकृतं नाम मन्त्रस्याश्व्यादि देवकान्॥ श्रीवर्णचनतो विद्वान् चक्रेषु योजयेत्क्रमात्॥ अथ दीक्षाकालः॥ मंत्रारंभस्तु चैत्रे स्यात् समस्तपुरुषार्थदः॥ वैशाखे रत्नलाभः स्यात् ज्येष्ठे तु मरणं भवेत्॥ आषाढे बंधुनाशः स्यात् पूर्णार्थः श्रावणे भवेत्॥ प्रजानाशो भवेद्भाद्रे आश्विने रत्नसंचयः॥ कार्तिके मंत्रसिद्धिः स्यात् मार्गशीर्षे तथा भवेत्॥ पौषे तु शत्रुपीडा स्यात् माघे मेधाविवर्द्धनम्॥ फाल्गुने सर्वकामाः स्युः मलमासं विवर्जयेत्॥ चैत्रे तु गोपालविषयम् गौतमस्योक्तत्वात्॥ मधुमासे भवेद्दीक्षा दुःखाय मरणाय चेति वचनात्त्वन्यत्र॥ तत्र मासः सौर एव॥ सौरे मासि शुभा दीक्षा न चान्द्रेण च तारके इति गौतमीयात्॥ अथ वारनियमः॥ रविवारे भवेद्वित्तं सोमे शांतिर्भवेत् किल॥ आयुरङ्गारके हन्ति तत्र दीक्षां विवर्जयेत्॥ बुधे सौन्दर्य्यमाप्नोति ज्ञानं स्यात्तु बृहस्पतौ॥ शुक्रे सौभाग्यमाप्नोति यशोहानिः शनैश्चरे ॥ ६ ॥

॥अथतिथिनिर्णयः॥प्रतिपदिकृतादीक्षाज्ञाननाशकरीमता॥प्रतिपत्तिर्द्वितीयायांतृतीयायांशुचिर्भवेत्॥चतुर्थ्यांवित्तनाशःस्यात्पंचम्यांबुद्धिवर्द्धनम्॥षष्ठ्यांज्ञानस्यंसौख्यंलभतेसप्तमीदिने॥ अष्टम्यांबुद्धिनाशःस्यान्नवम्यांवपुषंक्षयः॥दशम्यांराजसौभाग्यं एकादश्यांशुचिर्भवेत्॥द्वादश्यांसर्वसिद्धिःस्यात्त्रयोदश्यांदरिद्रता॥तिर्य्यग्योनिश्चतुर्दश्यांह्यानिर्मासावसानके॥पक्षान्तेधर्मबुद्धिः स्यादस्वाध्यायंविवर्जयेत्॥संध्यागर्ज्जितनिर्घोषभूकम्पोऽल्कानिपातने॥एतानन्यांश्चदिवसान्श्रुत्युक्तान्परिवर्ज्जयेत्॥द्वितीयापंचमीचैवषष्ठीचैवविशेषतः॥द्वादश्यामपिकर्तव्यंत्रयोदश्यामथापिवा॥इतियत्षष्ठीत्रयोदशीविधानंतद्विष्णुविषयं॥रामार्च्चनचंद्रिकाधृतत्वात्॥पंचमीसप्तमीषष्ठीद्वितीयापूर्णिमासिता॥त्रयोदशीचदशमीप्रशस्ताःसर्वकामदाः॥इतिसनत्कुमारवचनात्॥शिवविषयेदशमीसप्तम्योर्निषेधमाहशिवागमे॥शुक्लपक्षस्यदशमीसप्तमीचविशेषतः॥निंद्यासदैवपक्षस्यादितिशैवागमांतरे॥अथनक्षत्रनिर्णयः॥अश्विन्यांसुखमाप्नोतिभरण्यांमरणंभवेत्॥कृत्तिकायांभवेद्दुःखीरोहिण्यांवाक्पतिर्भवेत्॥मृगशीर्षेसुखावाप्तिरार्द्रायांबंधुनाशनं॥पुनर्वसौधनाढ्यःस्यात्पुष्येशत्रुविनाशनं॥आश्लेषायांभवेन्मृत्युर्म्मघायांदुःखमोचनं॥सौन्दर्य्यंपूर्वफाल्गुन्यांप्राप्नोतिचनसंशयः॥ज्ञानंचोत्तरफाल्गुन्यांहस्तायांचधनीभवेत्॥चित्रायांज्ञानसिद्धिःस्यात्स्वात्यांशत्रुविनाशनं॥विशाखायांसुखंचानुराधायांबंधुवर्द्धनम्॥ज्येष्ठायांसुतहानिःस्यान्मूलायांकीर्तिवर्द्धनम्॥पूर्वाषाढोत्तराषाढेभवेतांकीर्तिदायिके॥श्रवणायांभवेद्दुःखीधनिष्ठायांदरिद्रता॥बुद्धिःशतभिषायांस्यात्पूर्वभाद्रेसुखीभवेत्॥सौख्यंचोत्तरभाद्रेचरेवत्यांकीर्त्तिवर्द्धनम्॥तथायोगादिनिर्णयोविश्वसारे॥शुभःसिद्धिश्चआयुष्मान्ध्रुवयोगस्ततःपरं॥प्रीतिःसौभाग्ययोगश्चवृद्धियोगस्ततःपरम्॥हर्षणश्चतथायोगःसर्वतंत्रेशुभावहः॥रत्नावल्यांयोगः॥सौभाग्यःप्रीतिरायुष्मान्सौभाग्यःशोभनोधृतिः॥वृद्धिर्ध्रुवःसुकर्माचसाध्यःशुक्लश्चहर्षदः॥वरीयांश्चशिवःसिद्धोब्रह्मऐंद्रश्चषोडश॥

शुभानि करणानि शुर्दीक्षायां च विशेषतः ॥ अथ करणानि ॥ बवबालवकौलवतैतिलस्तदनंतरम् ॥ करणानि शुभान्येव सर्वतंत्रे शुभामिनि ॥ अथ लग्ननिर्णयः ॥ वृषे सिंहे च कन्यायां धनुर्मीनाख्यलग्नके ॥ चन्द्रतारानुकूले च कुर्याद्दीक्षाप्रवर्तनम् ॥ स्थिरलग्नं वैष्णुमंत्रे शिवमंत्रे चरं शुभम् ॥ द्विस्वभावकं लग्नं शक्तिमंत्रे प्रशस्यते ॥ विशेषस्तु महादेवि दीक्षाग्रहणकर्मणि ॥ शुक्लपक्षे भवेद्दीक्षा कृष्णेस्यात्पंचमादिनात् ॥ निषिद्धमासे तु तत्र तिथिविशेषो मुनिभेदतः ॥ षष्ठी भाद्रपदे ईषेत श्याः कृष्णा चतुर्दशी ॥ कार्तिके नवमी शुक्ला मार्गे शुक्लतृतीयिका ॥ पौषे च नवमी शुक्ला माघे शुक्ला चतुर्थिका ॥ फाल्गुने नवमी शुक्ला चैत्रे कामचतुर्दशी ॥ त्रयोदशी तिके चित् ॥ वैशाखे चाक्षया चैव ज्येष्ठे दशहरा तिथिः ॥ आषाढे नवमी शुक्ला श्रावणे शुक्लपंचमी ॥ एतानि देवपर्वाणि तीर्थकोटिफलं लभेत् ॥ तत्र दीक्षा प्रकर्तव्या न मासं च परीक्षयेत् ॥ नवारं न च नक्षत्रं न च तिथ्यादिदूषणं ॥ दग्धयोग करणं चैव शंकरेण च भाषितम् ॥ अन्यच्च मतम् ॥ चैत्रे त्रयोदशी शुक्ला वैशाखे कादशी सिता ॥ ज्येष्ठे चतुर्दशी कृष्णा आषाढे नागपंचमी ॥ श्रावणे कादशी भाद्रे रोहिणीसंयुताष्टमी ॥ आश्विने च महापुण्या महाष्टम्यपि भीष्टदा ॥ कार्तिके नवमी शुक्ला मार्गशीर्षे तथा सिता ॥ षष्ठी चतुर्दशी पौषमाघेप्येकादशी सिता ॥ फाल्गुने च सिता षष्ठी चेति कालविनिर्णयः ॥ योगिनीतंत्रे ० ॥ अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः ॥ रविसंक्रांतिदिवसे युगाद्यायां सुरेश्वरि ॥ मन्वन्तरासु सर्वासु महापूजादिने तथा ॥ चतुर्थी पंचमी चैव चतुर्दश्यष्टमी तथा ॥ निययः शुभदाः प्रोक्ता इत्यादिवचनात् ॥ चतुर्दश्यष्टमीति शक्तिविषयम् ॥ चतुर्थीति गणेशविषयम् ॥ तत्तत्कल्पोक्तत्वात् ॥ निन्दितेष्वपि कालेषु दीक्षोक्ता ग्रहणे शुभा ॥ सूर्यग्रहणकालस्य समानो नास्ति भूतले ॥ विशेषतो महादेवि दीक्षाग्रहणकर्मणि ॥ रुद्रयामले ॥ न कुर्याच्छाक्तिकीं दीक्षामुपरागे विभावसोः ॥ न कुर्याद्वैष्णवीं तां तु यदि चंद्रमसो ग्रहः ॥ एतच्च गोपालश्रीविद्येतरविषयम् ॥ अन्ये तु पुण्ययोगेषु ग्रहणे चन्द्रसूर्ययोरिति गौतमीयात् ॥

सूर्य्यग्रहणकालेतु नान्यदन्वेषितं भवेदिति योगिनीहृदयाच्च॥ तत्र यद्यत् कृतं सर्वमनंतफलदं भवेत्॥ रविसंक्रमणे चैव सूर्य्यस्य ग्रहणे तथा॥ तत्र लग्नादिकं किंचिन्न विचार्य्यं कथंचन॥ रविसंक्रमणे चैव नान्यदन्वेषितं भवेत्॥ न वार तिथि मासादि शोधनं सूर्य्यपर्व्वणि॥ एवं चंद्रग्रहणेपि॥ तथा॥ अमावास्या सोमवारे भौमवारे चतुर्द्दशी॥ सप्तमी रविवारे च सूर्य्यग्रहशतैः समाः॥ शिष्यानाहूय गुरुणा कृपया दीयते यदा॥ तदा लग्नादिकं किंचिन्न विचार्य्यं कथंचन॥ तथा॥ सर्व्वे वारा ग्रहाः सर्व्वे नक्षत्राणि च राशयः॥ यस्मिन्नहनि संतुष्टो गुरुः सर्वे शुभावहाः॥ विष्णुयामले॥ देवीबोधं समारभ्य यावत्स्यान्नवमी तिथिः॥ कृता तासु बुधैर्दीक्षा सर्वाभीष्टफलप्रदा॥ तथा॥ बोधने चैव दुर्गायाः कालाकालं न शोधयेत्॥ अशोकास्याष्टमी यत्र रामस्य नवमी तिथिः॥ लग्ने वाप्यथवा लग्ने यत्र तत्र तिथावपि॥ गुरोराज्ञानुरूपेण दीक्षा कार्या विशेषतः॥ योगिनीतंत्रे॥ ग्रहणे च महातीर्थे नास्ति कालस्य निर्णयः॥ गंगायां भास्करक्षेत्रे विरजे चंद्रपर्वणि॥ चट्टले च मतंगे च तथा किन्याश्रमेषु च॥ न गृह्णीयात्ततो दीक्षां तीर्थेष्वेतेषु पार्वति॥ वाराहीतंत्रे॥ शुक्रोस्तो यदि वा वृद्धो गुर्व्वादित्यो भवेद्यदि॥ तदा लग्नादिकं किंचिन्न विचार्यं कथंचन॥ मेषवृश्चिकसिंहेषु तदा दोषो न विद्यते॥ महाविद्यासु सर्वासु कालादिविचारो नास्ति॥ तदुक्तं मुंडमालातंत्रे॥ कालादिशोधनं नास्ति न चामित्रादिदूषणम्॥ अथ मालानिर्णयः॥ तर्ज्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात्॥ तिस्रोऽङ्गुल्यस्त्रिपर्वाणो मध्यमा चैकपर्व्विका॥ पर्व्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत्॥ सनत्कुमारसंहितायां क्रममाह॥ अनामा मध्यमारभ्य कनिष्ठादित एव च॥ तर्ज्जनीमूलपर्य्यंतं दशपर्व्वसु संजपेत्॥ सनत्कुमारसंहितायाम्॥ अनामामूलमारभ्य कनिष्ठादित एव च॥ तर्ज्जनीमध्यपर्य्यंतमष्टपर्वसु संजपेत्॥ एतद्वचनन्त्वष्टोत्तरशतविषयम्॥ शक्तिविषये पुनः॥ अनामिकात्रयं पर्व्व कनिष्ठा च त्रिपर्व्विका॥ मध्यमायाश्च त्रितयं तर्ज्जनीमूलप[illegible]णि॥ तर्ज्जन्यग्रे तथा मध्ये यो जपेत्स तु पापकृत्॥ तथा॥ अनामामूलमारभ्य प्रदक्षिण

क्रमेण च॥ मध्यमामूलपर्य्यन्तं जपेदष्टसु पर्व्वसु॥ इदमपि त्वष्टोत्तरशतविषयम्॥ इति श्रीक्रमस्तववचनात्॥ हंसपारमेश्वरे॰॥ पर्व्वद्वयमनाम्या
याः परिवर्त्तेन वै क्रमात्॥ पर्वत्रयं मध्यमायास्तर्ज्जन्येकं समाहरेत्॥ पर्वद्वयं तु तर्ज्जन्या मेरुं तद्विद्धि पार्वति॥ शक्तिमाला समाख्याता सर्वमं
त्रप्रदीपिका॥ श्रीविद्यायामयं विशेषः "अनामामूलमारभ्य प्रदक्षिणक्रमेण च" मध्यमामूलपर्य्यन्तं करमाला प्रकीर्त्तिता॥ अनामायां मध्यमायामू
लाग्रं च द्वयं द्वयं॥ कनिष्ठायाश्च तर्जन्यास्त्रयं पर्वसु रेश्वरि॥ अनामायां मध्यास्या ज्यं द्वयं शुभे॥ प्रदक्षिणक्रमादेवं विजपेत् त्रिपुरसुंदरीमिति यामलवचनात्
॥ अङ्गुलीर्न्न वियुंजीत किंचिदाकुंचिते तले॥ अङ्गुलीनां वियोगाच्च छिद्रे च स्रवते जपः॥ अन्यत्रापि॥ अङ्गुल्यग्रे च यज्जप्तं यज्जप्तं मेरुलंघने॥ पर्व
संधिषु यज्जप्तं तत्सर्वं निष्फलं भवेत्॥ गणनाविधिमुल्लंघ्य यो जपेत्तज्जपं यतः॥ गृह्णंति राक्षसास्तेन गणयेत्सर्वथा बुधः॥ जपसंख्या तु कर्त्तव्या
नासंख्यातं जपेत्सुधीः॥ नसंख्याकारकः स्यात्तस्य सर्वं भवति निष्फलं॥ हृदये हस्तमारोप्य तिर्य्यक् कृत्वा कराङ्गुलीः॥ आच्छाद्य वाससा हस्तौ दक्षिणे
न सदा जपेत्॥ सनत्कुमारे॥ क्रमोत्क्रमगतैर्माला मातृकार्णैः सुमेरुकैः॥ सबिंदुकैः साष्टवर्गैरंतर्यजनकर्म्मणि॥ अष्टवर्गो यथा॥ आदितः कु
चुटुतुपुयुषवोऽष्टौ प्रकीर्त्तिताः॥ तद्यथा॥ अकारादिवर्णान् प्रत्येकं सबिंदून् कृत्वा शतं संजप्य अकारादीनां वर्णानां कवर्गादीनां चांतिमं वर्णं सानु
स्वारं कृत्वा पूर्वमुच्चार्य्य मंत्रजपः कार्य्यः॥ अनेन प्रकारेणाष्टोत्तरशतसंख्यो जपो भवति॥ अन्तर्यजनेत्युपलक्षणम्॥ सबिंदुं वर्णमुच्चार्य्य पश्चान्मं
त्रं जपेद्बुधः॥ अकारादिक्षकारान्तं बिंदुयुक्तं विभाव्य च॥ वर्णमाला समाख्याता अनुलोमविलोमिका॥ इति नारदवचनात्॥ सिद्धेश्वरतन्त्रे॥ अनुलोम
विलोमेन वर्गाष्टकविभेदतः॥ मंत्रेणांतरितान् वर्णान् वर्णेनांतरितान् मनून्॥ कुर्य्याद्वर्णमयीं मालां सर्वतंत्रप्रकाशिनीं॥ तरुमौलिनी विजपेत्सूत्रनिय
मः॥ अन्तर्विद्रुमभाषमानभुजगीं शोन्यवर्णोज्वलां आरोहप्रतिरोहतः शतमयीं वर्गाष्टकाष्टोत्तरां॥ अथ मालायां मणिनिर्णयः॥ पञ्चबीजादिभि

र्मालाबहिर्यागे शृणुष्वताः॥ रुद्राक्षशंखपद्माक्षपुत्रजीवकमौक्तिकैः॥स्फाटिकैर्मणिरत्नैश्च सौवर्णैर्विद्रुमैस्तथा॥राजतैः कुशमूलैश्च गृहस्थस्या
क्षमालिका॥ अंगुलीगणनादेकं पर्वणष्टगुणं भवेत्॥पुत्रजीवैर्दशगुणं शतं शंखैः सहस्रकं॥प्रवालैर्मणिरत्नैश्च दशसाहस्रकं स्मृतं॥तदेव
स्फटिकैः प्रोक्तं मौक्तिकैर्लक्षमुच्यते॥पद्माक्षैर्दशलक्षं स्यात्सौवर्णैः कोटिरुच्यते॥कुशग्रंथ्या कोटिशतं रुद्राक्षैः स्यादनंतकं॥सर्वैर्विरचिता
मालानृणां मुक्तिफलप्रदा॥ कालिकापुराणे॥रुद्राक्षैर्वा यदि जपेदिन्द्राक्षैः स्फाटिकैस्तथा॥नान्यन्मध्ये प्रयोक्तव्यं पुत्रजीवादिकं च यत्॥ य
द्यन्यत्तु प्रयुज्येत मालायां जपकर्मभिः॥तस्य कामं च मोक्षं च ददाति नाप्रियंकरी॥पद्माक्षैरिति विष्णुविषयं॥कामनाभेदे तु॥पद्माक्षैर्विहिता मा
ला शत्रूणां नाशिनी मता॥कुशग्रंथिमयी माला सर्वपापप्रणाशिनी॥पुत्रजीवफलैः क्लृप्ता कुरुते पुत्रसंपदम्॥निर्म्मिता रूप्यमणिभिर्ज्जपमाने
प्सितप्रदा॥प्रवाले विहिता माला प्रयच्छेद्विपुलं धनम्॥भैरवीविद्यायां तु॥वाराहीतंत्रे॥सुवर्णमणिभिर्मालां स्फाटिकीं शंखनिर्म्मिताम्॥प्रवालैरेव
वा कुर्यात्पुत्रजीवं विवर्ज्जयेत्॥पद्माक्षं चैव रुद्राक्षमिंद्राक्षं च विशेषतः॥त्रिपुरामंत्रजपादौ रक्तचंदनबीजादिभिरतिप्रशस्ता॥तथा च तंत्रांतरे
रक्तचंदनमाला तु भोगदा मोक्षदा भवेत्॥तथा वैष्णवे तुलसीमाला गजदंतैर्गणेश्वरे॥त्रिपुरायाजपे शस्ता रुद्राक्षै रक्तचंदनैः॥सं[illegible]माला
याम्॥श्मशानधूस्तूरैर्माला ज्ञेया धूमावतीविधौ॥नरांगुल्यास्थिभिर्माला ग्रथिता सर्वकामदा॥नाड्या संग्रथनं कार्यं रक्तेन वाससा तथा॥स
दा गोप्या प्रयत्नेन जनन्या जारवत्प्रिये तथा॥महाशंखमयी माला नीलसारस्वते मता॥महाशंखस्तु तंत्रांतरे। नृणां ललाटखंडे नरचिता जपमालिका
॥महाशंखमयी माला तारादेव्या जपे प्रिये॥अथवा कर्णनेत्रास्थि महाशंखः प्रकीर्तितः॥मालानियमस्तु मुंडमालायाम्॥अन्योन्यसमरूपाणि नातिस्थू
लकृशानि वै॥कीटादिभिरदुष्टानि न जीर्णानि नवानि वै॥तथा गौतमीये॥पंचाशल्लिपिभिर्माला विहिता सर्वकर्मसु॥अकारादिक्षकारांताश्चाक्ष

मणि

धत्तूर
ज्ञेया

मालाप्रकीर्त्तिता॥सान्तुंमेरुमुखंतत्रकल्पयेन्मुनिसत्तम॥अनयासर्व्वविद्यानांजपःसर्वसमृद्धिदः॥चामुंडातंत्रे॥नित्यंजपंकरेकुर्य्यातनतुकाम्यमबोधनात्॥काम्यमपिकरेकुर्य्यान्नमालाभावेप्रियम्वदे॥तेनमालायाएवप्राधान्यम्॥कामनाभेदेतु गौतमीये॥समासेनाक्षसूत्रस्यविधानमिहकथ्यते॥पंचविंशतिभिर्मोक्षस्त्रिंशद्भिर्द्धनसिद्धये॥सर्व्वार्थाःसप्तविंशत्यापंचदश्याभिचारिके॥पंचाशद्भिःकाम्यसिद्धिःस्यात्तथाचतुरुत्तरैः॥अष्टोत्तरशतैःसर्व्वास्सिद्धिरुक्तामनीषिभिः॥अथासनभेदाः॥हंसमाहेश्वरे॥कम्बलंकोमलंकौशदारवंकर्म्मसाधनम्॥एतेषामासनंग्राह्यंचर्म्मासनंसुरेश्वरि॥लोम्निचैवदयासीनस्तदासर्व्वंविनश्यति॥लोमस्पर्शनमात्रेणसिद्धिहानिःप्रजायते॥काम्यार्थंकम्बलंचैवश्रेष्ठंचरक्तकंबलं ॥ ॥कृष्णाजिनेज्ञानसिद्धिर्मोक्षश्रीव्याघ्रचर्म्मणि॥कुशासनेमंत्रसिद्धिर्न्नात्रकार्याविचारणा॥धरण्यांदुःखसंभूति दौर्भाग्यंदारुजासने॥वंशासनेदरिद्रःस्यात्पाषाणेव्याधिपीडनं॥तृणासनेयशोहानिःपल्लवेचित्तविभ्रमः॥जपध्यानतपोहानिवस्त्रासनंकरोतिहि॥अतोवस्त्रासनंकेवलमेवनिषिद्धम्॥वस्त्रासनंरोगहरमित्यादिवचनेन विशिष्टस्यफलजनकत्वाभिधानात्॥चैलाजिनकुशोत्तरमितिभगवद्वचनात्॥तथाचगौतमीये॥तथाकृष्णासनेमन्त्रीपटाजिनकुशोत्तरइति॥योगिनीहृदये॰॥नदीक्षितोविशेज्ज्ञातुकृष्णाजिनासनेगृही॥विशेद्यतिर्वनस्थश्चब्रह्मचारीचभिक्षुकः॥आगमकल्पद्रुमे॥मेषव्याघ्रगजोष्ट्रर्क्षखगर्द्दभैर्वाषट्कर्मसुक्रमेणविहितानि॥शांतिवश्यस्तंभनविद्वेषोच्चाटनमारणांतानीति॥अथमालासंस्कारः॥ सनत्कुमारीये॰॥कार्प्पाससंभवंसूत्रंधर्म्मकामार्थमोक्षदम्॥तच्चविप्रेन्द्रकन्याभिर्निर्म्मितंचसुशोभनम्॥शुक्लंरक्तंतथाकृष्णंपट्टसूत्रमथापिवा॥शांतिवश्याभिचारेषुमोक्षैश्वर्य्यजपेषुच॥तथा॥शुक्लंरक्तंतथापीतंकृष्णंवर्णेषुचक्रमात्॥सर्वेषामेववर्णानांरक्तंसर्वेप्सितप्रदम्॥त्रिगुणंत्रिगुणीकृत्यग्रथयेच्छिल्पशास्त्रतः॥एकैकंमात्

प्राणस्थापनमाचरेत् ॥

कावर्णं सतारं प्रजपेत्सुधीः ॥ मणिमाहाय सूत्रेण ग्रथयेन्मध्यभागतः ॥ ब्रह्मग्रंथिं विधायेत्थं मेरुं च ग्रंथिसंयुतं ॥ ग्रथयित्वा पुरो मालां ततः
संस्कारमाचरेत् ॥ कस्यचिन्मते मूलविद्यया ग्रथयेत् ॥ तथा च एकवीरकल्पे ॥ मातृकामंत्रतो ग्रंथिं विद्यया वाथ कारयेत् ॥ सुवर्णादिगुणैर्वा
पि ग्रथयेत्साधकोत्तमः ॥ ब्रह्मग्रंथिं ततो दद्यान्नागपाशं तथापि वा ॥ कवचेनावबध्नीयान्मालां ध्यानपरायणः ॥ सर्वशेषे ततो मेरुं सूत्रद्वय
समन्वितम् ॥ ग्रथयेत्तारयोगेन बध्नीयात्साधकोत्तमः ॥ एवं निष्पाद्य देवेशि प्रतिष्ठां च समाचरेत् ॥ उच्चाटने मार्कटमेव सूत्रं लोहस्य सूत्रं खलु
मारणे तु ॥ पट्टस्य सूत्रं तु महद्दृशीये कार्पाससूत्रं खलु सर्वसिद्धौ इति मुंडमालायाम् ॥ गौतमीये ॥ मुखे मुखं तु संयोज्य पुच्छे पुच्छं नियोजयेत् ॥ गो
पुच्छसदृशी माला यद्वा सर्पाकृतिः शुभा ॥ एवं निर्माय मालां वै शोधयेन्मुनिसत्तमः ॥ मुखपुच्छनियमस्तु स्वच्छंदमाहेश्वरे ॥ रुद्राक्षस्योन्न
तं प्रोक्तं मुखं पृष्ठं च निर्म्मलं ॥ कमलाक्षस्य सूक्ष्मांशं सबिंदु द्वितयं मुखम् ॥ सबिंदुकस्य स्थूलांशं पृष्ठं श्लक्ष्णमिति स्मृतम् ॥ एवं ज्ञात्वा मुखं पृ
ष्ठं रुद्राक्षाम्भोरुहाक्षयोः ॥ तत्सजातीयमेकाक्षं मेरुत्वेनाग्रतो न्यसेत् ॥ एकैकमणिमादाय ब्रह्मग्रंथिं प्रकल्पयेत् ॥ एकैकमातृकावर्णं ग्रंथ्यंत
रे तु संजपेत् ॥ ग्रंथिनियमोपि तत्रैव ॥ त्रिवृत्तिग्रंथिनैकेन तथार्द्धेन विधीयते ॥ सार्द्धद्व्यावर्तनेन ग्रंथिं कुर्याद्यथा दृढं ॥ इत्येताभ्यामिच्छाविक
ल्पः ॥ स्वच्छंदमाहेश्वरे ॥ द्वादश्यां वैष्णवी माला कर्तव्या सोपवासकैः ॥ शक्तौ नामपि कर्तव्या रात्रौ मुक्ता यथाविधि ॥ अष्टम्यां च चतुर्दश्यां नवम्यां वा विशे
षतः ॥ त्रयोदश्यां तथा कुर्याच्छिवस्यापि महेश्वरि ॥ अश्वत्थपत्रनवकैः पद्माकारं तु कल्पयेत् ॥ तन्मध्ये स्थापयेन्मालां मातृकां मूलमुच्चरन् ॥ क्षा
लयेत्पंचगव्येन सद्योजातेन तज्जलैः ॥ सद्योजातमंत्रस्तु ॥ ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ॥ भवे भवे नातिभवे भवस्व मां
भवोद्भवाय नमः ॥ चंदनागुरुपुष्पाद्यैर्वामदेवाय वर्षयेत् ॥ वामदेवमंत्रस्तु ॥ ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय

नमःकल विकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूतदमनायनमोमनोन्मनायनमः॥ धूपयेन्नाम
घोरेण॥ अघोरमंत्रस्तु॥ ॐअघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्ते अस्तु रुद्ररूपेभ्यः॥ लेपयेत्तत्पुरुषेणतु॥ तत्पु
रुषमंत्रस्तु॥ ॐतत्पुरुषायविद्महेमहादेवायधीमहि॥ तन्नोरुद्रःप्रचोदयात्॥ मंत्रयेत्पंचमेनैवप्रत्येकंतुशतंशतम्॥ मेरुंचमंत्रयेत्तेनमं
तुनाचशतंशतम्॥ पंचममंत्रस्तु॥ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्माशिवोमे अस्तु सदाशिवोम्॥
प्रत्येकंतुसकृत्सकृन्वाइतिपाठः॥ तथाचतत्रैव॥ प्रत्येकंमंत्रयेन्मंत्रीपंचमेनसकृत्सकृदिति॥ तथाच॰ गौतमीये॰॥ समुदायमालामधिकृत्य॥
पंचमेनैवसूक्तेनशतान्यूनेनमंत्रयेत् इतिदर्शनान्मालायांवाशतजपः॥ तत्रावाह्ययजेद्देवंयथाविभवविस्तरैः॥ मालायाःप्राणप्रतिष्ठानं
तरंदेवतांपूजयेत्॥ तथाचसनत्कुमारसंहितायाम्॥ संस्कृत्यैवंबुधोमालांतत्प्राणांस्तत्रस्थापयेत्॥ मूलमंत्रेणतांमालांपूजयेत्द्विजस
तमः॥ वाराहीतंत्रे॥ ॐमालेमालेमहामालेसर्वतत्त्वस्वरूपिणि॥ चतुर्वर्गस्त्वयिन्यस्तस्तस्मा—न्मेसिद्धिदाभव॥ अष्टोत्तरशतंहुत्वासं।
पाता—ज्यंविनिःक्षिपेत्॥ होमकर्मण्यशक्तश्चेद्द्विगुणंजपमाचरेत्॥ नान्यमंत्रंजपेन्मंत्रीकम्पयेन्नविधूनयेत्॥ कम्पनात्सिद्धिहानिःस्या
द्धूननंबहुदुःखदम्॥ शब्देजातेभवेद्रोगःकरभ्रष्टाविनाशकृत्॥ छिन्नेसूत्रेभवेन्मृत्युस्तस्माद्यत्नपरोभवेत्॥ जपान्तेकर्णदेशेवाउच्च।
स्थानेथवान्यसेत्॥ ॐत्वंमालेसर्वदेवानांसर्वसिद्धिप्रदामता॥ तेनसत्येनमेसिद्धिंदेहिमातर्नमोस्तुते॥ मायाबीजादिकंकृत्वारक्तपुष्पैःसमर्च्च
येत् इतिशक्तिविषयम्॥ वैष्णवेतु॥ वाग्भवंतुतथालक्ष्मीमस्रादिमालिकांततः॥ ङेन्तांहृदयवर्णान्तांमंत्रेणानेनपूजयेत्॥ मंत्रयेन्मूलमंत्रे।
णक्रमेणोत्क्रमयोगतः। तथैवमातृकावर्णैर्मंत्रयेत्तांतुमंत्रवित्॥ योगिनीतंत्रे॰॥ होमकर्मततःकुर्य्याद्देवताभावसिद्धये॥ इत्युक्त्वापरिपूज्याथ

गोपयेद्यत्नतोसुधीः॥तथा॥आत्मयंत्रंचमालांचगुरोरपिनदर्शयेत्॥क्षालयेत्पंचगव्येनपुनरीशानसूक्ततः॥पुनर्विलिप्यगंधेनजपेन्मंत्रंयदृच्छया"
मालासंस्कारस्यनित्यतामाह॥रुद्रयामले॥अप्रतिष्ठितमालाभिर्मंत्रंजपतियोनरः॥सर्वंतद्विफलंविद्यात्क्रुद्धाभवतिदेवता॥कामनाभेदेतुअं
गुलिनियमः॥तथाह॥तर्जन्यंगुष्ठयोगेनशत्रूच्चाटनमुत्तमम्॥अंगुष्ठमध्यमायोगान्मंत्रसिद्धिस्तुनिश्चितम्॥अंगुष्ठानामिकायोगादुच्चाटोच्चा
टनेमते॥ज्येष्ठाकनिष्ठायोगेनशत्रूणांनाशनंमतम्॥ वैशंपायनसंहितायाम्॥अंगुष्ठमध्यमाभ्यांचचालयेन्मध्यमध्यतः॥
तर्जन्यानस्पृशेदेनांमुक्तिदोगणनक्रमः॥जीर्णेसूत्रेपुनःसूत्रंग्रथयित्वाशतंजपेत्॥प्रमादात्पतितेहस्ताच्छतमष्टोत्तरंजपेत्॥जपनिषिद्ध
संस्पर्शेक्षालयित्वायथोदितम्॥छिन्नेप्यष्टोत्तरशतजपः॥करभ्रष्टच्छिन्नयोस्तुल्यत्वात्॥प्रकारांतरंआगमकल्पद्रुमे॥भूतशुद्ध्यादिकांपू
जां समाप्यतत्रपूजयेत्॥गणेशसूर्य्यविष्णीशानदुर्गांचावाह्यमंत्रवित्॥पंचगव्येततःक्षिप्त्वाहैमींमंत्रेणमंत्रवित्॥तस्मात्ततोस्यतांमालांस्व
र्णपात्रेनिधायच॥पयोदधिघृतंक्षौद्रंशर्कराद्यैरनुक्रमात्॥तोयधूपांतरैःकृत्वापंचामृतविधिंबुधः॥क्रमात्तत्रैवसंस्थाप्यस्थापयेच्छीत
लेजले॥ततश्चन्दनसौगंधिकस्तूरीकुंकुमादिभिः॥तामालिप्यह्सौंमंत्रमष्टोत्तरशतंजपेत्॥तस्यांनवग्रहांश्चैवदिक्पालांश्चप्रपूजयेत्
॥ततःसंपूज्यचगुरुंगृह्णीयान्मालिकांशुभामिति॥अथपुरश्चरणम्"योगिनीहृदये॥गुरोराज्ञांसमादायशुद्धांतःकरणोनरः॥ततःपुर
स्क्रियांकुर्य्यान्मंत्रसिद्धिप्रकाम्यया॥जीवहीनोयथादेहीसर्वकर्मसुनक्षमः॥पुरश्चरणहीनोपितथामंत्रःप्रकीर्तितः॥तस्मादादौ
स्वयंकुर्य्याद्गुरुंवाकारयेद्बुधः॥योगिनीहृदये॥गुरोरभावेविप्रंतुसर्वप्राणिहितेरतम्॥स्निग्धशास्त्रविदंमित्रंनानागुणसमन्वितम्॥स्त्रियंवा
सद्गुणोपेतांसपुत्रांविनियोजयेत्॥आदौपुरस्क्रियांकर्त्तुंस्थाननिर्णयउच्यते॥योगिनीहृदये॥पुण्यक्षेत्रंनदीतीरंगुहापर्वतमस्तकम्॥ ॥

तीर्थप्रदेशाः सिन्धूनां संगमः पावनं वनम्॥ उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः॥ तुलसीकाननं गोष्ठं वृषशून्यं शिवालयम्॥ अश्व
त्थामलकीमूलं गोशाला जलमध्यतः॥ देवतायतनं कूलं समुद्रस्य निजं गृहं॥ तथा॥ गृहे शतगुणं विद्याद्गोष्ठे लक्षगुणं भवेत्॥ कोटिर्देवालयेपु
ण्यमनंतं शिवसन्निधौ॥ म्लेच्छदुष्टमृगव्यालशंकातंकविवर्ज्जिते॥ एकांते पावने निंदारहिते भक्तिसंयुते॥ स्वदेशे धार्म्मिके देशे सुभिक्षे निरुपद्र
वे॥ रम्ये भक्तजनस्थाने निवसेत्तापसप्रिये॥ गुरूणां सन्निधाने च चित्तैकाग्रस्थले तथा॥ प्रेतभूम्यादिकं चैव तत्तत्कल्पप्रकाशितं॥ एषामन्यतमं स्थान
माश्रित्य जपमाचरेत्॥ यत्र ग्रामे जपेन्मंत्री तत्र कूर्म्मं विचिन्तयेत्॥ गोतमीये॰ पर्वते सिंधुतीरे वा पुण्यारण्ये नदीतटे॥ यदि कुर्य्यात्पुरश्चर्य्यां त
त्र कूर्म्मं न चिन्तयेत्॥ ग्रामे वा यदि वा वास्तौ गृहे वांच विचिंतयेत्॥ अथ पुरश्चरणे भक्ष्यादिनियमः॥ ॥ गौतमीये॥ पुरश्चरणकृन्मंत्री भक्ष्याभ
क्ष्यं विचारयेत्॥ अन्यथा भोजनाद्दोषात्सिद्धिहानिः प्रजायते॥ शस्तान्नं च समश्नीयान्मंत्रसिद्धिसमीहया॥ तस्मान्नित्यं प्रयत्नेन शस्तान्नाशी भवेन्नरः॥
अथागस्त्यसंहितायाम्॰॥ दधि क्षीरं घृतं गव्यमैक्षवं गुडवर्जितम्॥ तिलाश्चैव सिता मुद्गाः कंदः केमुकवर्ज्जितः॥ नारिकेलफलं चैव कदली
लवली तथा॥ आम्रमामलकं चैव पनसं च हरीतकीं॥ व्रतांतरे प्रशस्तानि हविष्यमन्यते बुधैः॥ व्रतांतरइति हैमंतिकं॥ सिताश्विन्नमित्यादि॥ भुं
जानो वा हविष्यान्नं शाकं यावकमेव वा॥ पयो मूलं फलं वापि यत्र यत्रोपलभ्यते॥ यत्तु योगिनीतंत्रे॥ चिंचां चनालिकाशाकं कलायं लकुचं त
था कदम्बं नारिकेलं च व्रते कूष्मांडकं त्यजेत्॥ इति व्रतांतरे बोद्धव्यम्॥ अथ वर्ज्याणि॥ वर्ज्जयेन्मधु काक्षारलवणं तैलमेव च॥ ताम्बूलं कास्यपा
त्रं च दिवाभोजनमेव च॥ तथा॥ क्षारं च लवणं मांसं गृंजनं कांस्यभोजनम्॰॥ माषाढकीमसूरांश्च कोद्रवांश्चणकानपि॥ कौटिल्यं क्षौरमभ्यंगमनिवे
दितभोजनं॥ अन्नं पर्युषितं चैव निःस्नेहं कीटदूषितं॥ असंकल्पितकृत्यं च वर्ज्जयेन्मर्दनादिकम्॥ स्नायाच्च पंचगव्येन केवलामलकेन वा॥ मंत्र ज

स्नान्नपानीयैः स्नानाचमनभोजनं॥ कुर्य्याद्यथोक्तविधिना त्रिसंध्यं देवतार्च्चनम्॥ अपवित्रकरो नग्नः शिरसि प्रावृतोऽपि वा॥ प्रलपन् प्रजपेद्या
वत्तावन्निष्फलमुच्यते॥ जठरं पूरयेदर्धमन्नैर्भागं तथा जलैः॥ वायोः संचारणार्थाय तुरीयमवशेषयेत्॥ मृदुस्रोष्णं सुपक्वं च कुर्याद्वै लघुभोजनं॥ नेंद्रि
याणां यथा वृद्धिस्तथा भुंजीत साधकः॥ कुलार्णवेपि॥ यस्यान्नपानपुष्टांगः कुरुते धर्म्मसंचयम्॥ अन्नदातुः फलस्यार्द्धं कर्तुश्चार्द्धं न संशयः
॥ तस्मात्सर्वप्रयत्नेन परान्नं वर्जयेत्सुधीः॥ पुरश्चरणकाले तु सर्वकर्म्मसु शांभवि॥ जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात्॥ मनो दग्धं पर
स्त्रीभिः कथं सिद्धिर्वरानने॥ परान्नं भिक्षे, तरविषयं॥ भिक्षायां तु स्वस्वस्वात्तोत्पादनात्॥ तथा॥ वेदिकाचारयुक्तानां शुचीनां श्रीमतां सतां॥
सत्कुलस्थानजातानां भिक्षाशी चाग्रजन्मनाम्॥ विहाय वह्निं न हि वस्तु किंचिद्ग्राह्यं परेभ्यः सति संभवे च॥ असंभवे तीर्थबहिर्विशुद्धात्तुप
र्वातिरिक्ते प्रतिगृह्य जप्यात्॥ तत्रासमर्थोऽनुदिनं विशुद्धाद्याचेत तावद्दिनमात्रभक्ष्यम्॥ गृह्णाति वान्याद्धिकं न सिद्धिः प्रजायते कल्पशतैर
मुष्य॥ सकृदुच्चरिते शब्दे प्रणवं समुदीरयेत्॥ प्रोक्ते पारशरे शब्दे प्राणायामं सकृच्चरेत्॥ बहुप्रलापी आचम्यान्यस्याज्ञानितो जपेत्॥ क्षुते थ्ये
वत्तथा स्पृश्यस्यानानां स्पर्शनेन च॥ एवमादींश्च नियमान् पुरश्चरणकृच्चरेत्॥ विण्मूत्रोत्सर्गशंकादियुक्तः कर्म करोति यः॥ जपार्चनादिकं स
र्वमपवित्रं भवेत्प्रिये॥ मलिनाम्बरकेशादिमुखदौर्गन्ध्यसंयुतः॥ यो जपेत्तं दहत्याशु देवतागुप्तिसंस्थिता॥ आलस्यं जृंभणं निद्रां क्षुतं नि
ष्ठीवनं भयम्॥ नीचांगस्पर्शनं कोपं जपकाले विवर्जयेत्॥ एवमुक्तविधानेन विलम्बत्वरितं विना॥ उक्तसंख्यं जपं कुर्यात्पुरश्चरणसिद्धये॥ देव
तागुरुमंत्राणामैक्यं संभावयन्धिया॥ जपेदेकमनाः प्रातःकालं मध्यंदिनावधि॥ यत्संख्यया समारब्धं तत्न कर्तव्यमहर्न्निशं॥ यदि न्यूनाधिकं कु
र्यात्तत्न भ्रष्टो भवेन्नरः॥ मुंडमालायाम्॥ यत्संख्यया समारब्धं तज्जप्तव्यं दिनेन तथा॥ न्यूनाधिकं न कर्तव्यमासमाप्तं सदा जपेत्॥ प्रजपेदुक्तसंख्या

स्याच्चतुर्गुणजपः कलौ॥अन्यत्रापि॥कृतेजपस्तु कल्पोक्तस्त्रेतायां द्विगुणो जपः॥द्वापरे त्रिगुणः प्रोक्तश्चतुर्गुणजपः कलौ॥कुलार्णवेपि॥न्यूनातिरिक्तकर्म्माणि न फलंति कदाचन॥यथाविधिकृतान्येव तत्कर्म्माणि फलंति हि॥भूशय्या ब्रह्मचारित्वं मौनमाचार्य्यसेविता॥नित्यं त्रिषवणं स्नानं क्षुद्रंकर्म्मविवर्ज्जितं॥नित्यपूजा नित्यदानं देवतास्तुतिकीर्तनम्॥नैमित्तिकार्च्चनं चैव विश्वासो गुरुदेवयोः॥जपनिष्ठा द्वादशैते धर्म्माः स्युर्मंत्रसिद्धिदाः॥स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणम्॥असत्यभाषणं जिह्मभाषणं परिवर्ज्जयेत्॥सत्येनापि न भाषेत जपहोमार्च्चनादिषु॥अन्यथानुष्ठितं सर्वं भवत्येव निरर्थकं॥पुरश्चरणकाले तु यदि स्यान्मृतसूतकं॥तथापि कृतसंकल्पो व्रतं नैव परित्यजेत्॥योगिनीहृदये॥शयीत कुशशय्यायां शुचिवस्त्रधरः सदा॥प्रत्यहं क्षालयेत् शय्यामेकाकी निर्भयः स्वपेत्॥असत्यभाषणं वाचं कुटिलानां विवर्जयेत्॥वर्जयेद्गीतवाद्यादिश्रवणं नृत्यदर्शनम्॥अभ्यंगं गंधलेपं च पुष्पधारणमेव च॥त्यजेदुष्णोदकस्नानमन्यदेवप्रपूजनम्॥तत्रैव॥नैकवासा जपेन्मंत्रं बहुवासाकुलोपि वा॥वैशंपायनसंहितायाम्॥विपर्य्यासं न कुर्य्याच्च कदाचिदपि मोहतः॥उपर्य्यधो बहिर्वस्त्रे पुरश्चरणकृन्नरः॥पतितानामन्त्यजानां दर्शने भाषणे श्रुते॥क्षुतेऽधोवायुगमने जृंभणे जपमुत्सृजेत्॥तथाचम्य च तत्प्राप्तौ प्राणायामं षडंगकम्॥कृत्वा सम्यग्जपेच्छेषं यद्वा सूर्य्यादिदर्शनम्॥आदिशब्दाद्वह्निब्राह्मणं च॰॥तंत्रांतरे॥मनःसंहरणं शौचं मौनं मंत्रार्थचिन्तनम्॥अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः॥उष्णीषी कंचुकी नग्नो मुक्तकेशो गलावृतः॥अपवित्रकरोऽशुद्धः प्रलपन प्रजपेत्क्वचित्॥अनाशनः शयानो वा गच्छन्भुंजान एव वा॥अप्रावृतो करौ कृत्वा शिरसा प्रावृतोपि वा॥चिंताव्याकुलचित्तो वा क्रुद्धो भ्रांतः क्षुधान्वितः॥रथ्यायामशिवस्थाने न जपेत्तिमिरांतरे॥उपानद्गूढपादो वा यानशय्यागतस्तथा॥प्रसार्य न जपेत्पादावुत्कटासन एव वा॥न यज्ञकाष्ठे पाषाणे न भूमौ नासने स्थितः॥मार्ज्जारं कुक्कुटं क्रौंचं श्वानं शूद्रं कपिं खरम्॥दृष्ट्वाचम्य जपे

स्पृशेत्कर्णं

स्पृष्ट्वास्नानंविधीयते॥सर्वत्रजपेअयंनियमः॥मानसेतुनियमोनास्ति॥तथाच॥अशुचिर्वाशुचिर्वापिगच्छंस्तिष्ठन्स्वपन्नपि॥मंत्रैकशरणो
विद्वान्मनसैवं समभ्यसेत्॥नदोषोमानसेजापेसर्वदेशेपिसर्वदा॥जपनिष्ठोद्विजश्रेष्ठोऽखिलयज्ञफलंलभेत्॥श्यामादिमंत्रजाप्ये
तुतत्तन्मंत्रेविशेषोवक्तव्यः॥जपफलमाहशिवधर्मोत्तरे॥सर्वेषामेवयज्ञानांजायतेसौमहाफलः॥जपेनदेवतानित्यंस्तूयमानाप्रसीदति॥प्रस
न्नाविपुलान्भोगान्दद्यान्मुक्तिंचशाश्वतीम्॥यक्षरक्षःपिशाचाश्चग्रहाःसर्पाश्चभीषणाः॥जापिनंनोपसर्पंतिभयभीताःसमंततः॥
पाद्मनारदीययोः॥यावन्तःकर्मयज्ञाःस्युःप्रदिष्टानितपांसिच॥सर्वेतेजपयज्ञस्यकलांनार्हंतिषोडशीं॥माहात्म्यंवाचिकस्यैतज्जपयज्ञ
स्यकीर्तितम्॥तस्माच्छतगुणोपांशुःसहस्रोमानसःस्मृतः॥मानसःसिद्धिकामानांपुष्टिकामैरुपांशुकः॥वाचिकोमारणेचैवप्रशस्तोजप
ईरितः॥गौतमीये॥शक्त्यात्रिषवणस्नानंअन्यथाद्विःसकृच्चवा॥त्रिसंध्यंप्रजपेन्मंत्रंपूजयेत्तत्समंभवेत्॥संध्यात्रयेपूजांगत्वाज्जपमष्टो
त्तरशतमित्यर्थः॥एकदावाभवेत्पूजानजपेत्पूजनंविना॥जपांतेवाभवेत्पूजापूजांतेवाजपेन्मनुं॥प्रातःकालेसमारभ्यजपेन्मध्यंदिनावधि॥
मध्यंदिनावधीतितुननियमपरंकिन्त्वधिककालव्यवच्छेदपरम्॥अन्यथानतुसमयेजपनियमेकदाचिज्जिह्वायाजाड्याजाड्येनवाप्र
तिनियतदिवसीयजपसंख्यायाअपूर्णत्वेऽधिकत्वेवानियमभङ्गःस्यात्॥मनःसंहृत्यविषयान्मंत्रार्थगतमानसः॥नद्रुतंनविलंबंचजपेन्मौ
क्तिकहारवत्॥जपःस्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः॥धियायदक्षरश्रेणींवर्णस्वरपदात्मिकाम्॥उच्चरेदर्थमुद्दिश्यमानसः
सजपःस्मृतः॥जिह्वोष्ठौचालयेत्किंचिद्देवतागतमानसः॥किंचित्श्रवणयोग्यःस्यात्उपांशुःसजपःस्मृतः॥विशुद्धेश्वरतंत्रे॥६॥
निजकर्णागोचरोयःसमानसोजपःस्मृतः॥उपांशुर्निजकर्णस्यगोचरःपरिकीर्तितः॥निगदस्तुजनैर्वेद्यस्त्रिविधोजपईरितः॥मंत्रमु

च्चारयेद्वाचा वाचिकः स जपः स्मृतः ॥ उच्चैर्जपाद्विशिष्टः स्यादुपांशुर्दशभिर्गुणैः ॥ जिह्वाजपः शतगुणः सहस्रो मानसः स्मृतः ॥ तंत्रांतरे ॥ उच्चैर्जपोऽधमः प्रोक्त उपांशुर्मध्यमः स्मृतः ॥ उत्तमो मानसो देवि त्रिविधः कथितो जपः ॥ जिह्वाजपस्तु ॥ जिह्वाजपः स विज्ञेयः केवलं जिह्वया बुधैः ॥ इति ॥ कूटादौ तु विशेषमाह श्रीक्रमे ॥ दीर्घप्लुतं तथा ह्रस्वं व्यंजनं च स्वरैः सह ॥ क्रमेणोच्चारयेद्धीमान् यदीच्छेच्छ्रियमात्मनः ॥ अतिह्रस्वो व्याधिहेतुरतिदीर्घो वसुक्षयः ॥ अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत् ॥ मनसा यः स्मरेत्स्तोत्रं वचसा वा मनुं जपेत् ॥ उभयं निष्फलं याति भिन्नभांडोदकं यथा ॥ गौतमीये ॥ पशुभावस्थिता मंत्राः केवलं वर्णरूपिणः ॥ सौषुम्नध्वन्युच्चरिताः प्रभुत्वं प्राप्नुवंति ते ॥ मंत्राक्षराणि चिच्छक्तौ प्रोतानि परिभावयेत् ॥ तामेव परमव्योम्नि परमानंदबृंहिते ॥ दर्शयत्यात्मसद्भावं पूजाहोमादिभिर्विनेति ॥ गौतमीये ॥ मूलमंत्रं प्राणबुद्ध्या सुषुम्नामूलदेशके ॥ मन्त्रार्थं मन्त्रचैतन्यं जीवं ध्यात्वा पुनः पुनः ॥ कुलार्णवेऽपि ॥ मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र मारुतः ॥ न सिद्ध्यति वरारोहे कल्पकोटिजपादपि ॥ जात सूतकमादौ स्यादन्ते च मृतसूतकम् ॥ सूतकद्वयसंयुक्तो यो मंत्रः स न सिद्ध्यति ॥ गुरोस्तत्र हितं कृत्वा मंत्रं यावज्जपेद्धिया ॥ सूतकद्वयनिर्मुक्तः स मंत्रः सर्वसिद्धिदः ॥ तत्रैव ॥ तस्माद्देवि प्रयत्नेन ध्रुवेण पुटितं ध्रुवम् ॥ अष्टोत्तरशतं वापि सप्तवारं जपादितः ॥ जपांते च ततो जप्त्वा चतुर्वर्गफलाप्तये ॥ तत्रैव ॥ ब्रह्मबीजं मनोर्दत्वाद्यंते च महेश्वरि ॥ सप्तवारं जपेन्मंत्रं सूतकद्वयमुक्तये ॥ मंत्रार्थं मंत्रचैतन्यं योनिमुद्रां न वेत्ति यः ॥ शतकोटिजपेनापि तस्य सिद्धिर्न जायते ॥ लुप्तबीजाश्च ये मंत्रा न दास्यंति फलं प्रिये ॥ मंत्राश्चैतन्यसहिताः सर्वसिद्धिकराः स्मृताः ॥ चैतन्यरहिता मंत्राः प्रोक्ता वर्णास्तु केवलम् ॥ फलं नैव प्रयच्छंति लक्षकोटिजपैरपि ॥ मंत्रोच्चारे कृते यादृक्स्वरूपं प्रथमं भवेत् ॥ शतसहस्रे लक्षे वा कोटिजापेन तत्फलं ॥ हृदयग्रंथिभेदश्च सर्वावयववर्द्धनः ॥ ऽ ॥ ॥ ॥

आनंदाश्रूणिपुलकोदेहावेशः कुलेश्वरि॥गद्गदोक्तिश्च सहसा जायते नात्र संशयः॥सकृदुच्चरितेप्येवं मंत्रे चैतन्यसंपुटे॥दृश्यंते प्रत्य
या यत्र पारंपर्य्यंतदुच्यते॥ मासमात्रं जपेन्मंत्रं भूतलिप्यानुसंपुटं॥ क्रमोत्क्रमात् सहस्रं तु तस्य सिद्धो भवेन्मनुः॥ तत्र भूतलिपिः॥
पंच ह्रस्वाः संधिवर्णा व्योमेवाग्निजलंधराः॥ अन्त्यमाद्यं द्वितीयं च चतुर्थं मध्यमं क्रमात्॥ पंचवर्गाक्षराणि स्युर्वान्तश्वेतेन्दुभिः सह॥
एषा भूतलिपिः प्रोक्ता द्विचत्वारिंशदक्षरैः॥ मंत्रस्तु॥ अ इ उ ऋ लृ ए ऐ ओ औ ह य र व ल ङ· क ख घ ग ञ च छ झ ज ण ट ठ ढ ड न त थ ध द म
प फ भ ब श ष स॥ एतदंते मूलमंत्रः पुनः सकारमारभ्य अकारांतं तूत्क्रमेण जपेदिति॥गौतमीये॥ एवं जपं पुराकृत्वा तेजोरूपं समर्पयेत्॥दे
वस्य दक्षिणे हस्ते कुशपुष्पार्घ्यवारिभिः॥सकलं तद्विभाव्यैव प्राणायामं समाचरेत्॥जपस्यादौ जपांते च त्रितयं त्रितयं चरेत्॥शक्तिविषये वा
महस्ते॥तथा॥एवं जपं पुराकृत्वा गंधाक्षतकुशोदकैः॥जपं समर्पयेद्देव्या वामहस्ते विचक्षणः॥जपांते प्रत्यहं मंत्री होमयेत्तद्दशांशतः॥तर्पणं
चाभिषेकं च तत्तद्दशांशतो मुने॥प्रत्यहं भोजयेद्विद्वान्न्यूनाधिकप्रशांतये॥अथवा सर्वपूर्णे च होमादिकमथाचरेत्॥मुंडमालायाम्॥ य
स्य यावान् जपः प्रोक्तस्तद्दशांशमनुक्रमात्॥तत्तद्द्रव्यैर्जपांते च होमं कुर्याद्दिने दिने॥पुरश्चरणचंद्रिकायां॥ततो जपं दशांशेन होमं कुर्याद्दिने दिने
इत्यादि च॥तथा होमाद्यशक्तौ च सनत्कुमारीये॥यद्यदंगं भवेद्भग्नं तत्संख्याद्विगुणो जपः॥होमाभावे जपः कार्य्यो होमसंख्याचतुर्गुणः॥विप्रा
णां क्षत्रियाणां च रससंख्यागुणः स्मृतः॥वैश्यानां वसुसंख्याकमेषा स्त्रीणामयं विधिः॥यं वर्णमाश्रितः शूद्रः स च तस्य विधिं चरेत्॥अनाश्रितस्य
शूद्रस्य दिक्संख्याकः समीरितः॥शूद्रस्यापि प्रभृत्यस्य तत्पत्न्याः सदशो जपः॥अत्राप्यशक्तश्चेत् योगिनीहृदये॥होमकर्मण्यशक्तानां विप्रा
णां द्विगुणो जपः॥इतरेषां तु वर्णानां त्रिगुणादिः समीरितः॥त्रिगुणादिः होमसंख्यात्रिगुणजपः क्षत्रियेण कार्य्यः वैश्येन चतुर्गुणः शूद्रेण

तुल्यः संमतो २

पंचगुणः ॥ तदुक्तं कुलप्रकाशे ॥ यद्यदंगं विहीनं स्यात् तत्संख्याद्विगुणो जपः ॥ कुर्वीत त्रिचतुःपंचयथासंख्यं द्विजानयः ॥ एतेन स्त्रीशूद्राणां होमाधिकारः ॥ तथा च ॥ शूद्राणामसमितिकुंडप्रकरणे शारदायां स्त्रीणां होमाधिकारश्च ॥ तत्र ॥ लाजैस्त्रिमधुरोपेतैर्होमः कन्यां प्रयच्छति ॥ अनेन विधिना कन्या वरमाप्नोति वांछितं ॥ तच्च ब्राह्मणद्वारा ॥ तथा च तंत्रे ॥ ॐकारोच्चारणाद्धोमात् शालग्रामशिलार्च्चनात् ॥ ब्राह्मणीगमनाच्चैव शूद्रश्चांडालतां व्रजेत् ॥ इति सामान्यनिषेधात् स्त्रीणामपि सर्ववैदिककर्माणि शूद्रतुल्यत्वप्रतिपादनात् ॥ स्त्रीशूद्रकरसंस्पर्शो वज्रपातसमो मम इति भगवद्वचनात् । तथा च नारायणकल्पे ॥ अष्टाक्षरस्य यो मंत्रः सप्राणीः शूद्रयोषितोः ॥ प्रणवादिश्च यो मंत्रो न स्त्रीशूद्रे प्रशस्यते इति सर्वत्र स्त्रीणां शूद्रवद्व्यवहारः ॥ सर्वेषां वा द्विगुणो जपः ॥ तथा च तन्त्रे ॥ यद्यदंगं विहीयेत तत्संख्याद्विगुणो जपः ॥ कर्त्तव्यश्चांगसिद्ध्यर्थं तदशक्तेन भक्तितः ॥ नचेदंगं विहीयेत तद्विशिष्टमवाप्नुयात् ॥ तथाऽगस्त्यसंहितायाम् ॥ यदि होमेप्यशक्तः स्यात् पूजायां तर्प्पणेपि वा ॥ तावत्संख्यजपेनैव ब्राह्मणाराधनेन च ॥ भवेदंगद्वयेनैव पुरश्चरणमार्य्यवै ॥ अत्र ब्राह्मणभोजनमावश्यकमेव ॥ उक्तं हि ॥ विप्राराधनमात्रेण व्यंगं सांगं भवेद्ध्रुवं ॥ इति वचनाच्च ॥ कुलसारे ॥ दीक्षाहीनान्नमश्नन्यस्तु भोजयेत्तामसं दिरे ॥ स याति पक्ष्मकेशानि नरकानेकविंशतिं ॥ एवं यः कुरुते देवि पुरश्चर्यादिकं प्रिये ॥ सर्वपापविनिर्मुक्तो देवीसायुज्यमाप्नुयादिति ॥ ततश्च ॥ गुरवे दक्षिणां दद्यात् भोजनाच्छादनादिभिः ॥ गुरुसंतोषमात्रेण मंत्रसिद्धिर्भवेद्ध्रुवम् ॥ सम्यक्सिद्धैकमंत्रस्य पंचांगोपासनेन च ॥ सर्वे मंत्राश्च सिद्ध्यंति तत्प्रसादात् सुरेश्वरि ॥ गुरुमूलमिदं सर्वमित्याहुस्तंत्रवेदिनः ॥ एकग्रामस्थितो नित्यं गत्वा वंदेत वै गुरुम् ॥ गुरुरेव परं ब्रह्म तस्मादादौ तमर्च्चयेत् ॥ तदंते महतीं पूजां कुर्यात्साधकसत्तमः ॥ सुवासिनीं कुमारीं च भूषणैरपि भूषयेत् ॥ मिष्टान्नं बहुशः कार्य्यं भुंजीत बांधवैः सह ॥ एवं सिद्धमनुर्मंत्री साधयेत्सकलेप्सितान् ॥ तन्त्रे ॥ अथवान्यप्रकारेण पुरश्चरणमिष्य

ते॥ ग्रहणेऽर्कस्यचेन्दोर्वाशुचिःपूर्वमुपोषितः॥ नद्यांसमुद्रगामिन्यांनाभिमात्रोदकेस्थितः॥ स्पर्शाद्विमुक्तिपर्य्यंतंजपेन्मंत्रमनन्यधीः॥ नद्यभावेतु॥ यद्वापुण्योदकेस्नात्वाशुचिःपूर्वमुपोषितः॥ ग्रहणादिविमोक्षांतंजपेन्मंत्रंसमाहितः॥ उपवासासमर्थेतु॥ पूर्वदिनेहविष्यंभुक्त्वापरदिने जपेत्॥ तदुक्तंतंत्रांतरे॥ अथवान्यप्रकारेणपौरश्चारणिकोविधिः॥ चंद्रसूर्योपरागेचस्नात्वाप्रयतमानसः॥ स्पर्शाद्विमुक्तिपर्य्यंतंजपेन्मंत्रंसमाहितः॥ जपाद्दशांशतोहोमंतथाहोमात्तुतर्पणं॥ एवंकृत्वातुमंत्रस्यजायतेसिद्धिरुत्तमा॥ दृष्ट्वास्नात्वाससंकल्पोविमोक्षांतंजपंचरेत्॥ तावद्यज्ञादिकंकुर्य्याद्[illegible]स्नातेशुचिःपुमान्॥ एवंजपान्मंत्रसिद्धिर्भवत्येवनसंशयः॥ ग्रहणेजपस्यावश्यकत्वम्॥ श्राद्धादेरनुरोधेनयदिजाप्यंत्यजेन्नरः॥ सप्तवैदेवताह्नोहीपितॄन्सप्तनयत्यधः॥ इतिसनत्कुमारीयवचनात्॥ कुलार्णवे॥ चंद्रसूर्योपरागेचयेशाक्ताःपरसेविनः॥ तेषांविद्यानसिध्यंतिपरेनरकगामिनः॥ सूर्याचंद्रमसोःपर्वप्राप्यापिचपुरस्क्रियां॥ येमूढानचकुर्वंतितेभवंतिकुलद्रुहः॥ कुलद्रोहेसमुत्पन्नेपरद्रोहेचदुःखिनः॥ वस्तुतस्त्वारब्धपुरश्चरणविषयम्॥ आरब्धेपुरश्चरणेयदिचग्रहणंभवेत्॥ तदाश्राद्धानुरोधेनजपंनैवचसंत्यजेत्॥ एवंरात्रावपिपुरश्चरणविशेषोबोद्धव्यइतिसर्वंसमंजसम्॥ योगिनीहृदये॥ कल्पोक्तविधिनामंत्रीकुर्य्याद्धोमादिकंततः॥ अथवातद्दशांशेनहोमादींश्चसमाचरेत्॥ तथा॥ अनंतरंदशांशेनक्रमाद्धोमादिकंचरेत्॥ गोपालमंत्रतर्पणेतुहोमसमसंख्यात्वं॥ यथा॥ इहगोपालमंत्रस्यतर्पणंहोमसंख्यया॥ वर्णानामिहसर्वेषामित्यागमविदोविदुः॥ तदंतेमहतीपूजांकुर्य्याद्ब्राह्मणभोजनम्॥ ततोमंत्रस्यसिद्ध्यर्थंगुरुंसंपूज्यतोषयेत्॥ एवंचमंत्रसिद्धिःस्याद्देवताचप्रसीदति॥ क्रियासारे॥ दीक्षाहीनान्पशून्यस्तुभोजयेद्वास्वमन्दिरे॥ सयातिपरमेशानिनरकानेकविंशतिं॥ यद्यपिपुरश्चरणपदंपंचांगपरम्॥ तथाच॥ जपहोमौतर्प्पणंचाभिषेकोविप्रभोजनम्॥ पंचांगोपासनंलोकेपुरश्चरणमिष्यते॥ तथापिग्रहणादौपुरश्चर

णपदंजपमात्रपरम्॥सूर्य्योदयंसमारभ्ययावत्सूर्य्योदयांतरम् इत्यादौदर्शनात्॥तत्रहोमादेरभावात्तर्हिकथंग्रहणपुरश्चरणेहोमा
दिरितिचेद्वचनादेवजायते॥नचपुरश्चरणस्यपंचांगत्वात्सर्वत्रतदेवस्यादितिवाच्यम्॥ग्रहणेपुनर्विधानमनर्थकंस्यात्॥किंचग्रहणे।
होमादिनियमान्नान्यत्रहोमादिः॥ग्रहणपुरश्चरणेहोमादिविधानन्तुप्रकृतीभूतपंचांगपुरश्चरणतुल्यताबोधनाय॥अतएवग्रहणेपंचांग
स्वरूपपुरश्चरणेकृतेमुख्यप्रयोगेप्यधिकारइतिप्रकटीकृतं॥तदकरणेपुनःकेवलजपमात्रपुरश्चरणेकृतेनाधिकारइतिसर्वसम्मतम्
॥पुरश्चरणकालस्तुवाराहीतंत्रे॥चन्द्रतारानुकूलेचशुक्लपक्षेशुभेहनि॥आरभेत्तुपुरश्चर्य्यांहरौसुप्तेनचाचरेत्॥इति॥प्रतिप्रसवश्चरुद्रया
मले॰कार्त्तिकाश्विनवैशाखमाघेऽथमार्गशीर्षके॥फाल्गुनेश्रावणेदीक्षापुरश्चर्य्याप्रशस्यते॥ग्रहणेचमहातीर्थेनकालमवधारयेत्॥अथ
पुरश्चरणप्रयोगः॥तत्रतावद्भूमेःपरिग्रहंकृत्वापुरश्चरणप्राक्तृतीयदिवसेक्षौरादिकंविधायशुद्धःसन् वेदिकायाश्चतुर्दिक्षुक्रोशंक्रोशद्व
यंवाक्षेत्रंचतुरस्रमाहारादिविहारार्थंएतिकस्यतत्रकूर्म्मस्वरुपंमुंडपंविधायैकभक्तंकुर्य्यात्॥ततःपरदिनेउषसिस्नानादिकंविधायशु
द्धःसन्वेदिकायाश्चतुर्दिक्षु अश्वत्थोदुम्बरप्लक्षाणामन्यतमस्यवितस्तिमात्रान्दशकीलकान्॥ॐनमःसु— दर्शनायास्त्रायफडिति
मंत्रेणाष्टोत्तरशताभिमंत्रितान्वेदिकायांदशदिक्षु॥ॐयेचात्रविघ्नकर्त्तारोभुविदिव्यन्तरिक्ष गाः॥विघ्नभूतास्तथायेचान्येमममंत्रस्यसि
द्धिषु॥मयैतत्कीलितंक्षेत्रंपरित्यज्यविदूरतः॥अपसर्पन्तुतेसर्वेनिर्विघ्नंसिद्धिरस्तुमे॥इत्यनेननिखन्यतेषुॐसुदर्शनास्त्रायफडि
तिमंत्रेणास्त्रंसंपूज्यपूर्वादिक्रमेणेन्द्रादिलोकपालान्ॐभूर्भुवःस्वरिन्द्रादिलोकपालाइहागच्छतेत्यावाह्यपंचोपचारैःपूजयेत्॥तथा
चमुंडमालायाम्॥पुण्यक्षेत्रादिकंगत्वाकुर्य्याद्भूमेःपरिग्रहम्॥तथाह्यमुकमंत्रस्यपुरश्चरणसिद्धये॥ममेयंगृह्यतेभूमिर्म्मंत्रोयंसिद्ध्यतामि

तं॰ सा॰ ति॥ तथा॥ ग्रामे क्रोशमितं स्थानं नद्यादौ स्वेच्छयामतम्॥ नगरादावपि क्रोशं क्रोशयुग्ममथापि वा॥ क्षेत्रं वा यावदिष्टं तु विहारार्थं प्रकल्पये
१५ त्॥ आहारादि विहारार्थं तावतीं भूमिमाक्रमेत्॥ क्षीरिद्रुमोद्भवान्कीलानस्त्रमंत्राभिमंत्रितान्॥ निखनेद्दशदिग्भागे तेष्वस्त्रं च प्रपूजये
त्॥ लोकपालान्पुनस्तेषु गंधाद्यैः पूजयेत्सुधीः॥ ततो मध्यस्थाने क्षेत्रपालं वास्तीशं च संपूज्य सर्वविघ्नविनाशार्थं गणेशं पूजयेत्॥ य
था॥ ॐ अद्येत्यादि अमुकगोत्रः श्री अमुकदेवशर्म्मा मत्कर्त्तव्यामुकमंत्रपुरश्चरणकर्म्मणि विघ्ननाशार्थं गणेशपूजनमहं करिष्ये इ
ति संकल्प्य वेदिकामध्ये पंचोपचारैर्गणेशं पूजयेत्॥ तदुक्तम्॥ क्षेत्रपालादिकं तत्र पूजयेद्विधिवत्ततः॥ क्षेत्रेशं वास्तुनामानं विघ्नेशं च सम
र्च्चयेत्॥ दिक्पतिभ्यो बलिं दद्यात् ततः क्षेत्रं समाविशेत्॥ ततो माषभक्तादिबलिना पूजितदेवताभ्यो बलिं दद्यात्॥ तत्र ॐ ये रौद्रा रौद्रक
र्म्माणो रौद्रस्थाननिवासिनः॥ मातरोप्युग्ररूपाश्च गणाधिपतयश्च ये॥ विघ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः॥ सर्वे ते प्रीतमनसः प्र
तिगृह्णन्त्विमं बलिम्॥ इत्यनेन दशदिक्षु भूतेभ्यो बलिं दद्यात्॥ ततो गायत्रीं जपेत्॥ तथा च॥ प्रातः स्नात्वा तु गायत्र्याः सहस्रं प्रयतो जपे
त्॥ ज्ञाताज्ञातस्य पापस्य क्षयार्थं प्रथमं ततः इति विद्याधराचार्य्यः॥ यत्तु॥ प्रातः स्नात्वा तु गायत्र्या अयुतं प्रयतो जपेत् इति तत्पुनरत्यन्त
पापशंकया॥ ॐ अद्येत्यादि अमुकगोत्रः श्री अमुकदेवशर्म्मा ज्ञाताज्ञातपापक्षयकामो अष्टोत्तरसहस्रसावित्रीजपमहं करिष्ये इ
ति संकल्प्य जपेत्॥ तत उपवासं हविष्यं वा कृत्वा परदिने उषसि स्नानादिकं विधाय स्वस्तिवाचनपूर्वकम् संकल्पं कुर्यात्॥ ॐ अ
द्येत्यादि अमुकगोत्रः श्री अमुकदेवशर्म्मा अमुकदेवतायाः अमुकमंत्रसिद्धिप्रतिबंधकाशेषदुरितक्षयपूर्वकामुकमंत्रसिद्धिकामोऽद्या राम
रभ्य यावता कालेन सेत्स्यति तावत्कालममुकमंत्रस्येयत्संख्यजपतद्दशांशहोमतद्दशांशतर्प्पणतद्दशांशाभिषेकतद्दशांशब्राह्मण

भोजनरूपपुरश्चरणमहं करिष्ये इति संकल्प्य ॥ भूतशुद्धिप्राणायामादिकं कृत्वा स्वस्यमुद्रां बध्वा स्वस्वपद्धत्युक्तक्रमेण देवतां
संपूज्य दीपे प्रज्वलिते देवतां हृदये कृत्वा प्रातःकालमारभ्य मध्यंदिनं यावज्जपं कुर्य्यात् ॥ ततो होमस्ततस्तर्प्पणम् ॥ कुलार्णवे ॥ तर्प्पणं तु ततः कुर्य्या-
त्तीर्थोदैश्चन्द्रमिश्रितैः ॥ जले देवं समावाह्य पाद्याद्यैरुदकात्मकैः ॥ संपूज्य विधिवद्भक्त्या परिवारसमन्वितम् ॥ एकैकमंजलिं तोयं परिवारान्प्रत-
र्प्पयेत् ॥ ततो होमदशांशेन तर्प्पयेत् परदेवतम् ॥ तर्प्पणवाक्यं तु स्नानप्रकरणे बोद्धव्यम् ॥ अभिषेकवाक्यं तु ॥ नमोन्तमूलमुच्चार्य्यामुकमंत्रे मह-
मभिषिंचामीति कलशमुद्रया स्वमूर्द्धन्यभिषेचयेत् ॥ तथा च नमोन्तं मंत्रमुच्चार्य्यान्ते देवताभिधाम् ॥ द्वितीयां तामहं पश्चादभिषिंचाम्यनेन तु ।
॥ अभिषिंचे स्वमूर्द्धानं तोयैः कुंभाख्यमुद्रया ॥ शक्तिविषये नीलतन्त्रे ॥ मंत्रान्ते नाम चोच्चार्य्याभिषिंचामीति नमः परम् ॥ ततो नानाभक्ष्यभोज्यपायसान्ना-
दिभिर्ब्राह्मणान् यथोक्तान् भोजयेत्तेभ्यो दक्षिणां च दद्यात् ततः स्वेष्टपूजनं नानोपचारैः कुर्यात् ॥ इति ॥ ततो गुरुदक्षिणा ॥ अद्यकृतैतत् अमुकदे-
वतामुकमंत्रपुरश्चरणकर्म्मणः सांगतार्थं दक्षिणामिदं कांचनं वह्निदैवतं अमुकगोत्राय गुरवे तुभ्यमहं सम्प्रददे ततोऽच्छिद्रावधारणं कुर्य्या-
त् ॥ अथ ग्रहणपुरश्चरणसंकल्पः ॥ तद्यथा ॥ ॐ अद्येत्यादि राहुग्रस्ते निशाकरे दिवाकरे वा अमुकगोत्रः श्री अमुकदेवशर्म्मा अमुकदेव-
तायाः अमुकमंत्रसिद्धिकामो ग्रासाद्विमुक्तिपर्य्यंतं अमुकमंत्रस्य जपरूपपुरश्चरणमहं करिष्ये ॥ इति संकल्प्य जपेत् ॥ ततस्तद्दिने परदिने वा
स्नानादिकं विधाय ॐ अद्येत्यादि अमुकमंत्रस्य कृतैतत् ग्रहणकालीने यत्संख्यजपतद्दशांशहोमतद्दशांशतर्प्पणतद्दशांशाभिषेकतद्दशां-
शब्राह्मणभोजनकर्म्माहं करिष्ये इति संकल्प्य होमादिकं कुर्य्यात् ॥ दक्षिणादिकं तु पूर्ववत् ॥ अथ कूर्म्मचक्रम् ॥ दीपस्थानसमाश्रित्य कृतं
कर्म्मफलप्रदम् ॥ दीप्यते पुरुषो यत्र दीपस्थानं तदुच्यते ॥ चतुरस्रां भुवं भित्वा कोष्ठानां नवकं लिखेत् ॥ पूर्वकोष्ठादि विलिखेत् सप्तवर्गाननुक्र-

देवतां
मूलं

मात्॥लक्ष्मीशेमध्यतोष्टस्वरान्युग्मक्रमाल्लिखेत्॥दिक्षुपूर्वादितोयत्रसेत्राद्यक्षरसंस्थितिः॥मुखंतत्तुविजानीयाद्धस्तावुभयतःस्थितौ॥कोष्ठेकुक्षीउभेपादौद्वेशिष्टेपुच्छमीरितम्॥क्रमेणानेनविभजेन्मध्यस्थमपिभागतः॥मुखस्थोलभतेसिद्धिंकरस्थःस्वल्पजीवनः॥उदासीनःकुक्षिसंस्थःपादस्थोदुःखमाप्नुयात्॥पुच्छस्थःपीड्यतेमंत्रीबंधनोच्चाटनादिभिः॥कूर्म्मचक्रमिदंप्रोक्तंमंत्राणांसिद्धिदायकम्॥पिंगलायाम्॥कूर्म्मचक्रमविज्ञाययःकुर्य्याज्जपयज्ञकम्॥तस्ययज्ञफलंनास्तिसर्वानर्थायकल्पते॥पर्वतेसिंधुतीरेवापुण्यारण्येनदीनदे॥यदिकुर्य्यात्सुरश्रेष्ठेनत्रकूर्मंनचिंतयेत्॥अथमंत्राणांदशसंस्काराः॥गौतमीये॥जननंजीवनंपश्चात्ताडनंबोधनंतथा॥अभिषेकोथविमलीकरणाप्यायनेपुनः॥तर्पणंदीपनंगुप्तिर्दशैतामंत्रसंस्क्रियाः॥स्वर्णादिपात्रेसंलिख्यमातृकामंत्रमुत्तमं॥काश्मीरचंदनेनापिभस्मनावाथसुव्रते॥काश्मीरंशक्तिसंस्कारेचंदनंवैष्णवेमतौ॥शैवेभस्मसमाख्यातंमातृकामंत्रलेखने॥शैवादिमंत्रभेदेनप्रोक्तंद्रव्यत्रयंशुभे॥मंत्राणांमातृकामध्यादुद्धारोजननंस्मृतम्॥यंत्रस्यदिक्षुवंविदिक्षुठंलिखेत्॥तथाचगौतमीये०॥कादिमांताःपंचवर्गाःपूर्वादितोन्यसेत्॥यादिवांताःशादिहांताळक्ष्मीशेप्रविन्यसेत्॥चतुरस्रंचतुर्द्वारंदिक्षुवंठंविदिक्षुच॥मातृकायंत्रंयथा॥व्योमेन्दोरसनार्णकर्णिकमचांद्वन्द्वैःस्फुरत्केशरम् वर्गोल्लासिवसुच्छदंवसुमतीगेहेनसंवेष्टितम्॥अंतस्त्रस्वष्टसुलांतलांगलियुजाक्षोणीपुरेणावृतं यंत्रंवर्णतनोःपरंनिगदितंसौभाग्यसम्पत्करम्॥मातृकायंत्रम्॥पंक्तिक्रमेणविधिनामुनिभिस्तत्रनिश्चितम्॥प्रणवांतरितान्कृत्वामंत्रवर्णान्जपेत्सुधीः॥प्रत्येकंशतवारंतुजीवनंतदुदाहृतम्॥मंत्रवर्णान्समालिख्यताडयेच्चंदनांभसा॥प्रत्येकंवायुबीजेनपूर्ववत्ताडनंमतं॥विलिख्यमंत्रवर्णांस्तुप्रसूनैःकरवीरजैः॥तन्मंत्रवर्णसंख्याकैर्हन्याद्रेफेणबोधनम्॥तत्तन्मंत्रोक्तविधिनाअभिषेकःप्रकीर्तितः॥अश्वत्थपल्लवैःसिंचेन्मंत्रीमंत्रार्णसंख्यया॥संचिन्त्यमनसामंत्रंसुषुम्णाम्

ल मध्यतः ॥ ज्योतिर्मंत्रेण विधिवद् हेन्मलत्रयं यती ॥ तारं व्योमाग्निमनुयुक् दंडी ज्योतिर्मनुर्मतः ॥ मनुरौकारः ॥ दंडी अनुस्वारः ॥ व्योम हकारः ॥ अग्नी रेफः ॥ स्वर्णेन कुशतोयेन पुष्पतोयेन वा तथा ॥ तेन मंत्रेण विधिवद्दाप्यायनविधिः स्मृतः ॥ मंत्रेण वारिणा मंत्रे तर्प्पणं तर्प्पणं मतम् ॥ मधुना शक्तिमंत्रेषु वैष्णवे चेत्तु मज्जले ॥ शैवे घृतेन दुग्धेन तर्प्पणं सम्यगीरितं ॥ तारादिमंत्रभेदेन प्रोक्तं द्रव्यत्रयं शुभं ॥ अभिषेकोपि तथा ॥ तारमायारमायोगो मनोदीपनमुच्यते ॥ जप्यमानस्य मंत्रस्य गोपनं त्वप्रकाशनं । संस्कारा दश संप्रोक्ताः सर्वतंत्रेषु गोपिताः ॥ यान् कृत्वा संप्रदायेन मंत्री वांछितमाप्नुयात् ॥ मलत्रयमिति० आल[illegible]मायिकं कार्म्मणं च ॥ प्रपंचसारे ॥ मायिकं नाम योगोत्थं पौरुषं कार्म्मणं मलम् ॥ आलव्यं तद्‌ यं प्रोक्तं निषिद्धं तन्मलत्रयम् ॥ तारमायारमायोग इति ॥ तारमायारमाबीजपुटितं मंत्रमष्टोत्तरशतं जपेदित्यर्थः ॥ तथा च विश्वसारे ॥ तारमायारमाबीजपुटितेन जपेन्मनुं ॥ अष्टोत्तरशतं चैव दीपयेत् साधकोत्तम इति ॥ अथ कलावती दीक्षाप्रयोगः ॥ तत्र शिष्यः पूर्वमुपोषितः कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं संकल्पं कुर्य्यात् ॥ त[illegible]था ॥ ॐ अद्येत्यादि अमुकगोत्रः श्री अमुकदेवशर्म्मा धर्म्मार्थकाममोक्षप्राप्तिकामोऽमुकदेवतायाः अमुकमंत्रदीक्षामहं करिष्ये इति संकल्प्य गुरुं वृणुया[illegible]था साधु भवान् आस्ताम् साध्वमासं इति ॥ अर्च्चयिष्यामो भवंतम् ॐ अर्च्चय ॥ ततो गंधपुष्पवस्त्रालंकारादिभिर्गुरुमभ्यर्च्य दक्षिणजा[illegible]धृत्वा पठेत् ॥ ॐ अद्येत्यादि अमुकगोत्रः श्री अमुकदेवशर्म्मा अमुकदेवताया मत[illegible]र्व्यामुकमंत्रदीक्षाकर्म्मणि अमुकगोत्रममुकदेवशर्म्माणमेभिः पाद्यादिभिरभ्यर्च्य गुरुत्वेन भवंतमहं वृणे ॥ ॐ वृतोस्मीत्युत्तरम् ॥ यथाविहितं कर्म्म कुरु यथाज्ञानतः करवाणीति प्रतिवचनम् ॥ ततो गुरुराचम्य द्वारदेशे सामान्यार्घं कुर्य्यात् तद्यथा ॥ वामे त्रिकोणवृत्तं भूबिम्बं विलिख्य ॥ ॐ आधारशक्तये नमः इति संपूज्य फडिति मंत्रेण पात्रं प्रक्षाल्य साधारं शंखं तत्र निधाय विम

लोदकेन नमइति मंत्रेण जलेनापूर्य्य क्रोमिति अंकुशमुद्रया सूर्य्यमंडलाद् गंगेचेत्यादिना तीर्थमावाह्य प्रणवेन गंधादिनिःक्षिप्य धेनुमुद्रांप्रदर्श्य ॐमित्यष्टधाजपित्वा रक्षधावा फडिति मंत्रेण जलेन द्वारमभ्युक्ष्य द्वारपूजामारभेत्॥ तथाच॥ त्रिकोणवृत्तं भूबिम्बं मंडलंरचयेत्ततः॥ आधारमग्निं संपूज्य तत्राधारं विनिःक्षिपेत्॥ अस्त्रेण पात्रं संशोध्य हृन्मंत्रेण प्रपूरयेत्॥ निक्षिपेत्तीर्थमावाह्य गंधादीन्प्रणवेन तु॥ दर्शयेद्धेनुमुद्रांवै सामान्यार्घमिदं स्मृतम्॥ मंत्रयेत्प्रणवेनैव सामान्यार्घमिदं स्मृतम्॥ इति गौतमीयवचनात्॥ अष्टधा प्रणवजपः॥ विशेषार्घे तथादर्शनात्॥ सत्यादौ दशधा तदर्घे तथादर्शनात्० फडिति मंत्रजलेन द्वारमभ्युक्ष्य द्वारपूजां कुर्य्यात् तद्यथा० ऊर्द्धोदुम्बरे। ॐविघ्नायनमः। ॐमहालक्ष्म्यैनमः। ॐसरस्वत्यैनमः। दक्षिणशाखायां। ॐविघ्नायनमः। वामशाखायां। ॐक्षेत्रपालायनमः। तयोःपार्श्वयोः। ॐगंगायैनमः। ॐयमुनायैनमः। अधोयोगिनीभ्योनमः। देहल्यां। ॐअस्त्रायनमः इति पूजयेत् पुष्पवारिभिः। अशक्तश्चेत् द्वारदेवताभ्योनमः इत्येतावन्मात्रम्। त्रिपुरादिपूजादिषु॥ स्वतंत्रतंत्रे॥ गणेशं क्षेत्रपालं च योगिनीबटुकं तथा॥ गंगां च यमुनां चैव लक्ष्मीवाणीं ततो यजेत्। इति विशेषः॥ वैष्णवे च०॥ नंदसुनन्दश्चंडश्च प्रचंडो बल एव च॥ प्रबलो भद्रनामा च सुभद्रो विघ्नवैष्णवाः। प्रणवादिनमोन्तेन नाममंत्रेण पूजयेत्॥ ततो दक्षिणपादपुरःसरं वामशाखां स्पृशन्दक्षिणांगं संकोचयन् मण्डपांतः प्रविश्य नैर्ऋत्यां॥ ॐवास्तुपुरुषायनमः ॐब्रह्मणेनमः इति पूजयेत्॥ ततो दैवमंत्रेण दिव्यदृष्ट्यावलोकयन् दिव्यान्विघ्नानुत्सार्य्य अस्त्रायफडिति मंत्रेण जलेनांतरिक्षगान्विघ्नानुत्सार्य्य वामपार्ष्णिघातत्रयेण भौमान्विघ्नानुत्सार्य्य फडिति सप्तजप्तान् विकिरानादाय ॐअपसर्पंतु ते भूता ये भूता भुवि संस्थिताः॥ [illegible]म ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया इति विकिरेत्॥ लाजाचन्दनसिद्धार्थभस्मदूर्वाकुशाक्षताः॥ विकिरा इति संदिष्टाः सर्वविघ्नौघना

शकाः॥ अनंतरं देशिकेन्द्रो दिव्यदृष्ट्यावलोकनैः॥ दिव्यानुत्सारयेद्विघ्नानस्त्राभिश्चांतरिक्षगान्॥ पार्ष्णिघातैस्त्रिभिर्भौमानिति विघ्नान्निवारयेत्॥ ततोऽक्षतान्ससार्षपदक्षे नाराचमुद्रया॥ प्रक्षिपेदस्त्रमंत्रेण गृहांतर्विघ्नशांतये॥ अपसर्प्पंतु इति शारदीयात्॥ संमोहनतंत्रे॥ विकिरान् विकिरेत्तत्र सप्तवारानुशराणुना इति॥ ततो ह्रीं आधारशक्तिकमलासनाय नमः इत्यासनं संपूज्य धृत्वा पठेत्॥ अस्यासनमंत्रस्य मेरुपृष्ठऋषिः सुतलं छंदः कूर्मो देवता [illegible]सनपरिग्रहणे विनियोगः॥ ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता॥ त्वं च धारय मां नित्यं पवित्रं कुरु चासनं इति पठित्वा स्वस्ति[illegible]क्रमेणोपविशेत् उपविश्य वा विघ्नानुत्सारयेत्॥ तंत्रांतरे॥ आदौ विघ्नसमुत्सार्य पश्चादासनकल्पनं॥ अथवा चासने स्थित्वा विघ्नानुत्सारयेत्सुधीः॥ ततः पंचगव्येन मंडपं परिशोधयेत्॥ तथा गौतमीये॥ पंचगव्येन तद्गेहं मंडपं च विशोधयेत्॥ पंचगव्यप्रमाणं तु तत्रैव॥ पलमात्रं दु[illegible]रं गोमूत्रं तावदिष्यते॥ घृतं च पलमात्रं स्याद्गोमयं तोलकद्वयम्॥ दधि प्रसृतिमात्रं स्यात्पंचगव्यमिदं स्मृतं॥ अश[illegible]पंचगव्यानां समानो[illegible] इष्यते॥ मूलमंत्रेण सं[illegible]तेनैव परिशोधयेत्॥ तेन सर्वविशुद्धिः स्यात् सर्वपापनिकृन्तनं॥ ततः॥ स्वदक्षिणभागे पूजाद्रव्याणि वामपार्श्वे सुवासितताम्बूलपूर्णकुंभ पश्चात् हस्तक्षालनार्थं पात्रांतरं पृष्ठदेशे स्थापयेत्॥ सर्वदिक्षु घृतप्रदीपांश्च स्थापयित्वा कृतांजलिर्भूत्वा वामे ॐ गुरुभ्यो नमः [illegible]परमगुरुभ्यो नमः ॐ परापरगुरुभ्यो नमः ॐ दक्षिणे गणेशाय नमः मध्ये अमुकदेवतायै नमः॥ तथा॥ कृतांजलिपुटो भूत्वा वामे गुरुत्रयं यजेत्॥ गुरुं च परमादिं च परापरगुरुं तथा॥ दक्षिणे च गणेशं च मूर्ध्नि देवं विभावयेत्॥ ततः फडिति मंत्रेण गंधपुष्पाभ्यां करौ संशोध्य ऊर्ध्वोर्ध्वतालत्रयं दत्वा छोटिकाभिर्दशदिग्बंधनं कुर्यात्॥ ततो रमिति जलधारया वह्निप्राकारं चिंतयेत्॥ ततो भूतशुद्धिः॥ ततो मातृकान्यासः॥ ततः प्राणायामः॥ ततः पीठन्यासः॥ ततऋष्यादिन्यासः॥ ततो मंत्रन्यासः॥ ततो मुद्रा

दर्शनम्॥ ततो ध्यानम्॥ ततो मानसी पूजा॥ ततो विशेषार्घ्यस्थापनम्॥ तद्यथा॥ अर्घ्यस्य त्रीणि पात्राणि पाद्यस्यापि त्रयं भवेत्॥ तथैवाचमनीयानि पात्राणि च विभागशः॥ तथाकरणदौर्बल्यादेकमेव प्रशस्यते॥ किंतु सामान्यार्घ्य विशेषार्घ्य द्वयस्यावश्यकत्वम्॥ तथा च नवरत्नेश्वरे॥ एकपात्रं न कर्तव्यं यदि साक्षान्महेश्वरः॥ मंत्राः पराङ्मुखा यांति आपदश्च पदे पदे॥ इह लोके दरिद्रः स्यान्मृते च पशुतां व्रजेत्॥ एव वमदृष्टतम्॥ सर्वत्रैव प्रशस्तोऽब्जः शिवसूर्यार्चनं विना॥ अब्जः शंखः॥ स्ववामे त्रिकोणमंडलं कृत्वा तदुपरि त्रिपदीमारोप्य फडिति शंखं प्रक्षाल्य तदुपरि संस्थापयामि नम इति मंत्रेण गंधपुष्पाक्षतदूर्वादि निक्षिप्य विमलजलेन विलोममातृकावर्णैर्मूलेन पूरयेत्॥ क्षं ळं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अं॥ इत्यनेन" वह्निमंडलाय दशकलात्मने नमः॥ इति त्रिपदिकायां अं सूर्यमंडलाय द्वादशकलात्मने नम इति शंखे॥ उं सोममंडलाय षोडशकलात्मने नम इति जलेन संपूज्य॥ ॐ गंगे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिंधु कावेरि जलेऽस्मिन्सन्निधिं कुरु इत्यनेनांकुशमुद्रया सूर्यमंडलात्तीर्थमावाह्य॥ अमुकि देवि इहागच्छागच्छ इति पुरस्वहृदयाद्देवतां तत्रावाह्य हूमिति तर्जनीभ्यामवगुंठ्य वमित्यमृतीकृत्य वषडिति गालिनीमुद्रां प्रदर्श्य वौषडिति तज्जलं वीक्ष्य पुनः षडंगमंत्रैः सकलीकृत्य गंधपुष्पाभ्यां देवतां संपूज्य तदुपरि मत्स्यमुद्रामाच्छाद्य मूलमंत्रमष्टधा जपेत्॥ तथा च गौतमीये॥ गंधपुष्पैः समभ्यर्च्य कृत्वा रव्यं धाम योजयेत्॥ अष्टकृत्वो जपेन्मंत्रं शिखायां गालिनीं न्यसेत्॥ अत्र कृत्स्नपदं तत्र देवतापरम्॥ ततो वमिति मंत्रेण धेनुमुद्रां प्रदर्श्यास्त्रेण संरक्ष्य तस्मात् किंचिज्जलं प्रोक्षणीपात्रे निःक्षिप्य तेनोदकेनात्मानं पूजोपकरणं चाभ्युक्ष्य पीठन्यासक्रमेण शरीरे धर्मादीन्पूजयेत्॥ तद्यथा॥ दक्षिणस्कंधे॥ ॐ धर्माय नमः॥ वामे ज्ञानाय नमः॥ एवं वामोरौ वैराग्या

य। दक्षिणे ऐश्वर्य्याय। मुखे अधर्म्माय। वामपार्श्वेऽज्ञानाय। नाभौ अवैराग्याय। दक्षिणपार्श्वे अनैश्वर्य्याय॥ सर्वत्र प्रणवादिनमोऽन्तेन पूजये
त्॥ तथा च शारदायाम्॥ अंसोरुयुग्मयोर्विद्वान् प्रादक्षिण्येन देशिकः॥ धर्म्मं ज्ञानं च वैराग्यमैश्वर्य्यं चाप्यनुक्रमात्॥ मुखपार्श्वनाभि
पार्श्वेष्वधर्म्मादीन् प्रकल्पयेत्॥ हृदयेऽनन्ताय नमः। एवं पद्माय नमः॥ अं अर्कमंडलाय द्वादशकलात्मने नमः॥ ॐ सोममंडलाय
षोडशकलात्मने नमः। ॐ मं वह्निमंडलाय दशकलात्मने नमः। सं सत्त्वाय नमः। रं रजसे। तं तमसे। आं आत्मने। अं अन्तरात्मने। पं परमात्मने।
ह्रीं ज्ञानात्मने नमः सर्वत्र। शारदायाम्॥ न्यासक्रमेण देहेषु धर्म्मादीन् परिपूजयेत्॥ पुष्पाद्यैः पीठमन्त्रं तमस्मिंश्च परदेवताम्॥ ततो
हृत्पद्मस्य पूर्वादिकेशरेषु पीठशक्तीः संपूज्य मध्ये पीठमनुं यजेत्॥ हृदये मूलदेवतां नैवेद्यं विना गंधाद्यैः पूजयेत्॥ तथा च निबंधे॥ वि
ना नैवेद्यं गंधाद्यैरुपचारैः समर्चयेत्॥ ततउत्तमांगहृदयमूलाधारपादसर्वांगकेषु मूलेन पंचपुष्पांजलिं दत्वा यथाशक्ति मंत्रं ज
प्त्वा ॐ गुह्यातिगुह्यगोप्त्रीत्व मित्यादिना जपं समर्प्पयेत्॥ [illegible] च निबंधे॥ पंचकृत्वस्ततः कुर्य्यात्पुष्पांजलिमनन्यधीः॥ उत्तमां
गहृदाधारपादसर्वांगके क्रमात्॥ सर्वं ततः प्रोक्षणीपात्रस्थवारिणा विदध्यात्॥ ततः प्रोक्षण्यास्तोयं विसृज्य पूर्ववदापूज्य बहिःपूजा
मारभेत्॥ ततो वक्ष्यमाण शारदोक्त सर्वतोभद्रमंडलाद्यन्यतमं विधाय तत्र स्थापयेत्॥ ॐ मंडलाय नमः इति मंडलं संपूज्य शालिभिः कर्णि
कामापूर्य्य तदुपरि तंडुलानास्तीर्य तेषु दर्भानास्तीर्य्य विष्टरं चाक्षतसंयुक्तं तदुपरि न्यसेत्॥ ततो मंडले एताः पूजयेत्॥ तद्यथा पीठमध्ये ॐ
आधारशक्त्यै नमः इत्यादि पीठमन्त्रं तत्तत्पटलोक्तां पूजां कुर्य्यात्॥ मंडले प्रादक्षिण्येन यं धूम्रार्चिषे नमः इत्यादिवक्ष्यमाणवह्नेर्दशकला विन्यस्य सं

पूज येत्॥ततोहेमादिरचितंकुंभंफडितिप्रक्षाल्यचन्दनागुरुकर्पूरैःपूरयित्वात्रिगुणतन्तुनासंवेष्ट्य ॐकुंभायनमः इतिगंधपुष्पाभ्यांसंपू
ज्यविष्टराक्षतेनवरत्नानिचप्रक्षिप्यप्रणवमुच्चरन्कुंभपीठयोरैकंविभाव्यपीठेस्थापयेत्॥गौतमीये॥कुंभंध्यानंतु॥हैमंरूप्यंतथाताम्रंमा
र्त्तिकंवास्वशक्तितः॥छिन्नभग्नंनकर्त्तव्यंकृतेनिष्फलमाप्नुयात्॥पंचाशदंगुलंकुंभंविस्तारोन्नतिशालिनम्॥षोडशंद्वादशंवापिततोन्यूनं
नकारयेत्॥कुंभेप्राग्दक्षिण्येनसूर्यस्यकंभंतपिन्यैनमः इतिद्वादशकलाविन्यस्यसंपूजयेत्॥ततःक्षीरद्रुमकषायेणमूलाश्वत्थभवेनवा॰
॥तीर्थोदकैर्वाकर्पूरगंधपुष्पसुवासितैः॥आत्माभेदेनविधिवन्मातृकांप्रतिलोमतः॥जपन्मूलमंत्रंतद्वत्पूरयेद्देवताधिया॥ततश्चंद्रस्यामृतादि
षोडशकलाजलेप्रादक्षिण्येनविन्यस्य ॐअंअमृतायैनमः इत्यादिनासंपूज्यशंखानन्तरंक्षीरकषायादिद्रव्यैरापूर्यगंधाष्टकंविलोड्यतस्मिन्
जलेसकलाःकलाआवाह्यपूजयेत्॥शारदायां॥गंधाष्टकंतुत्रिविधंशक्तिविष्णुशिवात्मकम्॥चंदनागुरुकर्पूरचोरकुंकुमरोचना॥जटामां
सीकपियुताशक्तेर्गंधाष्टकंविदुः॥चंदनागुरुह्रीवेरकुष्ठकुंकुमसेव्यकाः॥जटामांसीमुरमितिविष्णोर्गंधाष्टकंस्मृतम्॥चन्दनागुरुकर्पूरत
मालजलकुंकुमं॥काश्मीरंकुष्ठसंयुक्तंशैवंगंधाष्टकंस्मृतं॥अस्यार्थः॥चंदनागुरुकर्पूरकृष्णशठीकुंकुमरोचना॥जटामांसी गाठिआनाश
क्तेर्गंधाष्टकं॥चंदनागुरुवालाचकुंकुमम्ब्वनवीरणमूलजटामांसीदेवदारु इतिविष्णोः॥चंदनागुरुकर्पूरतमालवालाकुंकुमरक्तचं
दनकुड्यमितिशिवस्य॥तत्रादौवह्नेर्दशकलाःपूजयेत्॥ वह्नेर्धूम्रार्चिरादिदशकलाइहागच्छत२इहतिष्ठत२इहसंनिहिताभवत
इत्यावाहयेत्॥ततोमूलमंत्रंप्रतिलोमेनजपन्मंत्रस्यदेवतांमनसाध्यायन्आंसांप्राणप्रतिष्ठांकुर्य्यात्॥तद्यथा॥आंह्रींक्रोंहंसःधूम्रार्चिरा

दिवन्हेर्दशकलानां प्राणा इह प्राणाः ॐ ५ धूम्रार्च्चिरादिवन्हेर्दशकलानां जीव इह स्थितः ॥ ॐ ५ धूम्रार्च्चिरादिवन्हेर्दशकलानां सर्वेन्द्रिया
णि ॥ ॐ ५ धूम्रार्च्चिरादिवन्हेर्दशकलानां वाङ्मनश्चक्षुश्श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ इति प्राणान्प्रति ष्ठाप्य गंधा
दिभिः पूजयेत् ॥ धूम्रार्च्चिरादिभ्य एष गंधो नमः इत्यादिना पंचोपचारैः पूजयेत् ॥ ततः प्रत्येकेन पूजयेत् ॥ तद्यथा यं धूम्रार्च्चिषे नमः ॥ रं ऊ
ष्मायै लं ज्वलिन्यै वं ज्वालिन्यै ॥ शं विस्फुलिंगिन्यै ॥ षं सुश्रियै ॥ सं सुरूपायै ॥ हं कपिलायै लं हव्यवहायै ॥ क्षं कव्यवहायै नमः सर्वत्र ॥ शक्तश्चेत्प्रत्येक
मावाह्य पाद्यादिभिः पूजयेत् ॥ ततः सूर्यस्य तापिन्यादि द्वादशकलाः पूर्ववत् प्राणप्रतिष्ठावाहनादि कृत्वा पूजयित्वा च प्रत्येकं तु पूजये
त् ॥ तद्यथा ॥ कं भं तपिन्यै ॥ खं बं तापिन्यै ॥ गं फं धूम्रायै ॥ घं पं मरीच्यै ॥ ङं नं ज्वालिन्यै ॥ चं धं रुच्यै ॥ छं दं सुषुम्णायै ॥ जं थं भोगदायै ॥ झं तं वि
श्वहायै ॥ ञं णं बोधिन्यै ॥ टं ढं धारिण्यै ॥ ठं डं क्षमायै ॥ इति प्रत्येकं पूजयेत् ॥ नमः सर्वत्र ॥ शक्तश्चेत्प्रत्येकमावाह्य पाद्यादिभिः पूजयेत् ॥ तथा ॥
च निबन्धे ॥ कभाद्या वसुराः सौराः ठडान्ता द्वादशेरिताः ॥ ततश्चन्द्रस्यामृतादिषोडशकलाः प्राणप्रतिष्ठादिकं कृत्वा पूर्ववत्पूजयेत् ततः प्रत्येके
न पूजयेत् ॥ तद्यथा ॥ अं अमृतायै ॥ आं मानदायै ॥ इं पूषायै ॥ ईं तुष्ट्यै ॥ उं पुष्ट्यै ॥ ऊं रत्यै ॥ ऋं धृत्यै ॥ ॠं शशिन्यै ॥ ऌं चंद्रिकायै ॥ ॡं कान्त्यै ॥ एं ज्यो
त्स्नायै ॥ ऐं श्रियै ॥ ओं प्रीत्यै ॥ औं अंगदायै ॥ अं पूर्णायै ॥ अः पूर्णामृतायै ॥ नमः सर्वत्र ॥ शक्तश्चेत्प्रत्येकमावाह्य गंधादिभिः पूजयेत् ॥ ततः पंचाश
कलाः पूज्याः ॥ यथा सृष्ट्यादिकचवर्गा दशकलाः पूर्ववत्प्राणप्रतिष्ठां कृत्वा पूजयेत् ॥ प्रत्येकं पूजनं तु ॥ कं सृष्ट्यै नमः ॥ खं ऋद्ध्यै नमः ॥ गं स्मृ
त्यै ॥ घं मेधायै ॥ ङं कान्त्यै ॥ चं लक्ष्म्यै ॥ छं धृत्यै ॥ जं स्थिरायै ॥ झं स्थित्यै ॥ ञं सिद्ध्यै नमः सर्वत्र ॥ शक्तश्चेत्प्रत्येकमावाह्य पाद्यादिभिः पूजयेत् ॥ तथा च ॥
हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहदिति जप्त्वा वा

त्यशंखे प्रपूजयेत्॥ ततो[illegible]रादिटतवर्गाद्दशकलाः पूर्वतत्प्राणप्रतिष्ठादिकं कृत्वा पूर्ववत्पूजयेत्॥ प्रत्येकं तु॥ टं जरायै। ठं पालिन्यै। डं शान्त्यै। ढं ऐश्वर्य्यै। णं रत्यै। तं कालिकायै। थं वरदायै। दं ह्लादिन्यै। धं प्रीत्यै। नं दीर्घायै। नमः सर्वत्र॥ शक्तश्चेत्प्रत्येकमावाह्य पूजयेत्॥ तत ॐ प्रतद्विष्णुः स्तवते वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु[illegible]क्रमणेष्वधिक्षियंति भुवनानि विश्वा इति जप्त्वावाह्य पूजयेत्॥ तथा च तंत्रे॥ प्रतद्विष्णुस्त[illegible]ते ---- मृगो न भीम इत्यपि॥ कुचरोपदतः [illegible]गिरिष्ठा परतो लिखेत्॥ यस्योरुषु त्रिषु स[illegible] ततो विक्रमणेष्वधि॥ क्षियंति भुवना[illegible]ति विश्वापरं समुद्धरेत्॥ ततस्तीक्ष्णादिपयवर्गाद्दशकलाः पूर्ववत्प्राणप्रतिष्ठां कृत्वा पूजयेत्॥ पं तीक्ष्णायै। फं रौद्र्यै। बं भयायै। भं निद्रायै। मं मंत्र्यै। यं क्षुधायै। रं क्रोधिन्यै। लं क्रियायै। वं उत्कारिण्यै। शं मृत्यवे नमः सर्वत्र॥ शक्तश्चेत्प्रत्येकमावाह्य पाद्यादिभिः पूजयेत्॥ ततः ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनम्। उर्वारुकमिव बंधनान्मृत्योर्मूक्षीय मामृतादिति जप्त्वावाह्य पूजयेत्॥ ततः पीतादिषवर्गापंचकलाः पूर्ववत् प्राणप्रतिष्ठां कृत्वावाह्य॰ पाद्यादिभिः पूजयेत्॥ तद्यथा॥ षं पीतायै नमः॥ सं श्वेतायै नमः। हं अरुणायै। ळं असितायै। क्षं अनंतायै। नमः सर्वत्र। श[illegible]श्चेत्प्रत्येकमावाह्य पूजयेत्॥ ततस्तद्विष्णोः परमं पदं सदा पश्यंति सूरयः॥ दिवीव चक्षुराततं॥ इत्यादि जप्त्वावाह्य पूजयेत्॥ ततो निवृत्यादिस्वरषोडशकलाः पूर्ववदावाहनादिकं कृत्वा पूजयित्वा च प्रत्येकेन पूजयेत्॥ तद्यथा॥ अं निवृत्यै। आं प्रतिष्ठायै। इं विद्यायै। ईं शान्त्यै। उं इंधिकायै। ऊं दीपिकायै। ऋं रेचिकायै। ॠं मोचिकायै। ऌं परायै। ॡं सूक्ष्मायै। एं सूक्ष्मामृतायै। ऐं ज्ञानामृतायै। ॐ आप्यायिन्यै। औं व्यापिन्यै। अं व्योमरूपायै। अः अनंतायै नमः सर्वत्र॥ शक्तश्चेत्प्रत्येकमावाह्य पाद्यादिभिः पूजयेत्॥ ॐ तद्विप्रासो विप

न्यवो जागृवांसः समिंधते ॥ विष्णोर्यत्परमं पदम् ॥ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ॥ आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते ॥ गर्भं धेहि सिनीवाली गर्भं धेहि सरस्वती ॥ गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा विति जप्त्वा ह्यपूजयेत् ॥ ततः कलात्मकं तत्तु शंखस्थंकांथं कुंभे निक्षिपेत् ॥ ततोऽश्वत्थपनसचूतपल्लवैरिंद्रअपराजितावल्लीवेष्टितैः कल्पद्रुस्तुद्ध्या कुंभवक्त्रं पिधाय तस्मिन्कुंभवक्त्रे सफलाक्षतं चषकं कल्पद्रुस्तबुद्ध्या स्थापयेत् ॥ ततः कुंभं निर्मलेन क्षौमयुग्मेन संवेष्ट्य मूलेन कुंभे मूर्तिं प्रकल्प्य यथोक्तरूपां देवतां ध्यात्वा तत्सामावाहनं कृत्वा पूजयेत् ॥ मूलमंत्रमुच्चार्य अमुक इहागच्छागच्छ इह तिष्ठ तिष्ठ इह सन्निधेहि इह सन्निरुध्यस्व इत्यावाहनादिकं कृत्वा हूमित्यवगुंठ्य देवतांगे षडंगन्यासं कृत्वा वं इति धेनुमुद्रयामृतीकृत्य परमीकरणमुद्रया परमीकुर्यात् ॥ ततः प्राणप्रतिष्ठां कृत्वा षोडशोपचारैः पूजयेत् ॥ यथा मूलमुच्चार्य एतत्पाद्यं अमुकदेवतायै नमः इति पादांबुजे ॥ एतत् श्यामाकदूर्वाब्जविष्णुक्रान्ताभिरीरितं ॥ अर्घ्यं स्वाहा इति गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वात्मकमर्घ्यं शिरसि दद्यात् ॥ वैष्णवे तु ॥ अर्घ्यादिक्रमेणैव देयमिति वदन्ति ॥ जातीलवंगकक्कोलात्मकं आचमनीयं वदने दद्यात् ॥ सुधामंत्रेण वदने दद्यादाचमनीयकमित्यत्र सुधापाठं कुर्वन्तः सुधाशब्दस्यामृतवाचकत्वात् अमृतशब्दस्य जलवाचकत्वात् इदमाचमनीयमिति वदन्ति ॥ तथा च ॥ मधुपर्कं ततो दद्याज्जलमंत्रेण देशिकः इति वचनात् ॥ न च मधुपर्कमात्रविषयमिदम् सुधान्ता ॥ ततः कुर्यान्मधुपर्कं मुखांबुजे ॥ तेनैव मंत्रेण कुर्याददद्भिराचमनीयकमिति वचनात् ॥ तथा वारुणेन च मंत्रेण दद्यादाचमनीयकम् ॥ एतद्वचनेऽप्युभयविषयकमिति केचित् ॥ वस्तुतस्तु इच्छाविकल्पः ॥ मैथिलास्तु स्वधापाठं कुर्वंति ॥ सुधेति वकारस्य त्यागबोधकत्वात् ॥ किंच त्यागात्मकस्वाहाशब्देनार्घ्यदानात्तत्समभिव्याहृताचमनीयदाने त्यागार्थबोधकत्वेन स्वधामंत्रो युज्यते न तु वमिति ॥ तथा च

नमः स्वाहा स्वधा वषट् वौषडिति यथाक्रमाभिधानात्॥ जलमंत्रेपोतिवचनं प्रमाणशून्यमिति तान्त्रिकाः॥ तेनाचमनीयं स्वधेति॥ तथा॥ स्वधेत्याचमनीयं च त्रिवारं मुखपंकजे॥ स्वधेति मधुपर्कं च पुनराचमनीयकमिति सोमशंभुधृतवचनात्॥ एके पुनर्ज्जलमंत्रेण देशिकः वारुणेन च बीजेन इत्यत्र सहार्थे तृतीयां वदंति इदमाचमनीयकम् अमुकदेवतायै स्वधेति मन्यंते॥ ततो मधुपर्कः स्वधा॥ आज्यं दधिमधून्मिश्रं मधुपर्कं विदुर्बुधाः॥ एवं पुनराचमनीयं स्वाहेति॥ ततः स्नानीयं निवेदयामि॥ ततो वस्त्रयज्ञोपवीतानि दद्यात्॥ ततश्चाभरणं नमः एष गंधो नमः॥ सच गंधश्चंदनकर्पूरकालागुरुभिरीरितः॥ ततो संपुटितमातृकावर्णैर्न्यस्ततत्न्यासस्थाने पूजयित्वा एतानि पुष्पाणि वौषट्॥ ततः आवरणपूजा॥ सर्वत्र दाने मूलमंत्रोच्चारणम्॥ ततो गुग्गुलु अगुरु उशीर शर्करा चंदन घृतात्मकं धूपं दद्यात्॥ तथा च गुग्गुल्वगुरूशीरशर्करामधुचन्दनैः॥ धूपयेदाज्यसंमिश्रैर्नीचैर्देवस्य देशिकः॥ विशेषस्तु तत्रैव॥ सिताज्यमधुसंमिश्रं गुग्गुल्वगुरुचन्दनम्॥ षडंगं धूपमेतत्तु सर्वदेवप्रियं सदा॥ रोगरोगहरो गदकेशाः सुरतरुजतुलघुपत्रविशेषाः॥ वक्रविवर्जितवारिजमुद्रा धूपवर्त्तिरिहसुरभिद्रा॥ अस्यार्थः॥ कुड हरीतकी गुड जटामांसी देवदारु लाक्षा अगरु तेजपत्र सरलेसुश्या॥ तथा॥ गुग्गुलुं सरलं दारु पत्रं मलयसंभवम्॥ ह्रीवेरं अगुरुं कुष्ठं गुडं सर्ज्जरसं घनम्॥ हरीतकी नखं वीलासां जटामांसीं च शैलजं॥ षोडशांगं विदुर्धूपं देवे पैत्रे च कर्म्मणि॥ मधुमुस्तं घृतं गंधो गुग्गुल्वगुरुशैलजं॥ सरलं सिल्ह सिद्धार्थं दशांगो धूप इष्यते॥ ततः कर्पूरगर्भिण्या वर्त्तिकया दीपं दद्यात्॥ तथा च॥ वर्त्त्या कर्पूरगर्भिण्या सर्पिषा तिलजेन वा॥ आरोप्य दर्शयेद्दीपानुच्चैः सौरभशालिनः॥ इति शारदाधृतम्॥ विशेषस्तु तत्रैव॥ तत्र तत्र जलं दद्यात् उपचारान्तरान्तरे॥ ततो नैवेद्यादीनि दद्यात्॥ गंधादिदाने विशेषस्तु॰॥ तंत्रांतरे॥ मध्यमानामिकांगुष्ठै रंगुल्यग्रेण पार्वति॥ दद्याच्च विमलं गंधं मूलमंत्रेण साधकः॥ अंगुष्ठतर्ज्जनीभ्यां तु चक्रे पुष्पं निवेदयेत्॥

॥ यथागंधं तथा देवि धूपं दद्याद्विचक्षणः॥ मध्यमानामिकाभ्यां तु मध्यपर्वणि देशिकः॥ अंगुष्ठाग्रेण देवेशि धृत्वा धूपं निवेदयेत्॥ उत्तोलनं त्रिधा कृत्वा गायत्र्या मूलयोगतः॥ तत्वाख्यमुद्रया देवि नैवेद्यं तु निवेदयेत्॥ मूलेनाचमनं दद्यात्ताम्बूलं तेन मुद्रया॥ तथा॥ ततः समर्पयेद्धूपं घंटां वाद्य जयस्वनैः॥ तथा॥ धूपभाजनमंत्रेण प्रोक्ष्याभ्यर्च्य हृदाणुना॥ अस्त्रेण पूजितां घंटां वादयन् गुग्गुलं दहेत्॥ तथा॥ जयध्वनिं ततो मंत्रमातः स्वाहेत्युदीर्य्य च॥ अभ्यर्च्य वादयेद्घंटां सुधूपैर्धूपयेत्ततः॥ तंत्रे॥ न भूमौ वितरेद्धूपं नासने न घटे तथा॥ तथा च गौतमीये॥ उत्तार्य्य दक्षिपर्य्यन्तं घंटां वामदिशि स्थितां॥ वादयन् वामहस्तेन दक्षहस्तेन चार्पयेत्॥ एवं दीपदानेपि घंटावादनम्॥ जामले॥ निवेदयेत्पुरोभागे गंधं पुष्पं च भूषणम्॥ दीपं दक्षिणतो दद्यात् पुरतो वा न वामतः॥ वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे॥ नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः॥ वामदक्षिणभागस्तु देवताया एव न तु साधकस्य॥ धूपदीपौ सुभोज्यं च देवताग्रे निवेदयेत् इति दर्शनात्॥ घृतयुक्तं दक्षिणे तैलयुक्तं च वामतः॥ एवं सितावर्त्तिस्तु दक्षिणे रक्तावर्त्तिस्तु वामे॥ संमुखे तु न निषेधः॥ पक्वं च देवता वामे आमान्नं चैव दक्षिणे इति तु सांप्रदायिकाः॥ एतदपि प्रमाणशून्यं॥ तथा च जामले॥ दीपं घृतयुतं दक्षे तैलयुक्तं च वामतः॥ दक्षिणे च सितावर्त्तिं वामतो रक्तवर्त्तिकं॥ पक्वापक्वविभेदेन नैवेद्येष्विति तत्स्थितिः॥ पुरतो नियमो नास्ति दीपनैवेद्ययोः क्वचित्॥ ततो दंडवत्प्रणामादिना वंदनम्॥ ततोऽष्टोत्तरसहस्रं शतं वा संजप्य ॐ गुह्यातीत्यादिना जपं समर्पयेत्॥ अस्य मंत्रस्य दश संस्कारान् पूर्वोक्तप्रकारेण कृत्वा गुरुः शिष्यमानीय वौषडिति मंत्रेण शिष्यनेत्रं वस्त्रेणाच्छाद्य शिष्यांजलिं पुष्पैः पूरयित्वा गुरुः स्वयमेव मंत्रमुच्चरन् कलशे देवताप्रीत्यै क्षेपयेत्॥ ततो नेत्रबंधं दूरीकृत्य दर्भास्तरे आसने शिष्य आत्मयागक्रमात् भूतशु

ततो२

तं·सा· ध्यादिकं विधाय ततन्मंत्रोक्तन्यासान् शिष्यस्य देहे कुर्य्यात्॥ कुंभस्थां देवतां पुनः पंचोपचारैः संपूज्यालंकृतं शिष्यमन्यस्मिन्नुपवेशयेत्॥ ततो मंग-
२२· लाचारपूर्वकं ततः कुंभं समुद्धृत्य तन्मुखस्थान् सुरद्रुमरूपान् पल्लवान् शिष्यस्य शिरसि निधाय मातृकां मनसा न्यस्य मूलेन साधितैस्तोयैर्वसिष्ठ-
संहितोक्ताभिषेकमंत्रैस्तमभिषिंचेत्॥ शिष्योऽवशिष्टजलेनाचम्य वाससी परिधाय गुरोः सन्निधावुपविशेत्॥ तामेव गुरुरात्मनो देवतां शिष्य-
संक्रांतां तयोरैक्यं संभावयन् गंधादिभिः पूजयेत्॥ ॐ सहस्रारे हुं फडिति मंत्रेण शिष्यस्य शिखां बद्ध्वा संरक्ष्य कलान्यासं कुर्य्यात्। तद्यथा॥ कुशत्रये-
ण पादतलाज्जानुपर्य्यंतम् ॐ निवृत्त्यै नमः॥ जानुनोर्नाभिपर्य्यन्तं ॐ प्रतिष्ठायै नमः॥ नाभेराकंठं ॐ विद्यायै नमः॥ कंठाल्ललाटं ॐ शा-
न्त्यै नमः॥ ललाटाद्ब्रह्मरंध्रांतं ॐ शान्त्यतीतायै नमः॥ पुनर्ब्रह्मरंध्राल्ललाटं ॐ शान्त्यतीतायै नमः॥ ललाटादाकंठं ॐ शान्त्यै नमः॥ कं-
ठान्नाभिपर्य्यंतं ॐ विद्यायै नमः॥ नाभेर्जानुपर्य्यंतं ॐ प्रतिष्ठायै नमः॥ जानुनोः पादपर्य्यंतं ॐ निवृत्त्यै नमः॥ ततः शिष्यस्य शिरसि हस्तं
धृत्वा अष्टोत्तरशतं जप्त्वा अमुकमंत्रं तेऽहं ददामीति शिष्यहस्ते जलं दद्यात्॥ तथा वासिष्ठे॥ ततस्तच्छिरसि स्वस्य हस्तं दत्त्वा शतं जपेत्॥ अ-
ष्टोत्तरं ततो मंत्रं दद्यादुदकपूर्वकम्॥ आवयोस्तुल्यफलदो भवत्त्वेवमुदीरयेत्॥ ततो ददस्वेति शिष्यो ब्रूयात्॥ ततऋष्यादिसंयुक्तं मंत्रं गु-
रुः शिष्यदक्षिणकर्णे त्रिः श्रावयेत्॥ तथा च गौतमीये॰॥ न्यासजालं तस्य देहे गुरुः संन्यस्य यत्नतः॥ दक्षकर्णे वदेन्मंत्रं त्रिवारं पूर्णमानसः॥ दक्षे-
ति द्विजातिविषयम्॥ तथा च तन्त्रे॥ दक्षकर्णे त्रिशो विद्यामेकोच्चारेण चोच्चरेत्॥ एष विधिर्द्विजातीनां स्त्रीशूद्राणां च वामतः॥ रुद्रयामले॥ गु- म·
रुस्तु प्राङ्मुखो भूत्वा शिष्यं प्रत्यङ्मुखस्थितम्॥ त्रिवारं दक्षिणे कर्णे वामे चैव तथा सकृत्॥ विपरीतमतो ज्ञेयं स्त्रीशूद्राणां च वामत इति॰ ॥ २२

॥विश्वसारे॥दक्षकर्णे वदेन्मंत्रं ऋष्यादिकसमन्वितम्॥तथा तस्मिन्क्षणे देवि जपेन्मंत्रं शताष्टकम्॥शारदायाम्॥गुरोर्लब्ध्वा पुनर्विद्यामष्टकृत्वो जपेत्सुधीः॥गुरुमंत्रदेवतानामैक्यं संभावयन्धिया॥एतद्वचनं तत्त्वभावनापरजपविषयम्॥ततो गुरुश्चरणे पतितः एव तिष्ठेत्॥ततो गुरुः॥उत्तिष्ठ वत्स मुक्तोसि सम्यगाचारवान्भव॥कीर्तिः श्रीः कांतिर्दीर्घायुर्हैनारोग्यं सदास्तु ते इत्यु स्थापयेत्॥ततः शिष्यः॥कुशतिलजलान्यादाय ॐ अद्य कृतैतत् अमुकमंत्रग्रहणप्रतिष्ठार्थं दक्षिणामिदं सुवर्णं कांचनं वा वह्निदैवतं अमुकगोत्रायाऽमुकदेवशर्म्मणे गुरवे तुभ्यमहं संप्रददे॥शरीरमर्थं प्राणांश्च सर्वं तस्मै निवेदयेत्॥ततः प्रभृति कुर्वीत गुरोः प्रियमनन्यधीः॥यद्यदिष्टतमं लोके गुरवे तन्निवेदयेत्॥स्वतंत्रतंत्रे दक्षिणानियमो यथा॥गुरवे दक्षिणां दद्यात्प्रसन्नः स्याद्यथा शिवात्मने॥सर्वस्वं वा तदर्द्धं वा तदर्द्धं वा तदाज्ञया॥न चेत्संचारिणी शक्तिः कथमस्य भविष्यति॥तथा कुलामृते॥वित्तशाठ्यं निहंत्याशु पुत्रानायुर्यशोधनम्॥गुरुं देवं वंचयित्वा यः कुर्याद्धनसंचयम्॥तेन तद्भुज्यते नैव ह्रीयते राजतस्करैः॥अन्यत्र॥सर्वस्वं दक्षिणां दद्यात्गाश्च दद्यात्पयस्विनीः॥भूमिं वृत्तिकरीं दद्यात्पुत्रपौत्रानुगामिनीं॥गुरवे दक्षिणां दद्यात्स्वर्णवस्त्रसमन्विताम्॥गुरुसंतोषमात्रेण दुष्टमंत्रोपि सिद्ध्यति॥अन्यथा नैव सिद्धिः स्यादभिचाराय कल्पते॥दीक्षाग्रहणसामग्री गुरवेऽथ निवेदयेत्॥अन्यांश्च ब्राह्मणांस्तत्र यत्नतः परितोषयेत्॥तंत्रांतरे॥मंत्रं जपेत्तदग्रस्थो निकटे त्रिदिनं वसेत्॥नो चेत्संचारिणी शक्तिर्गुरुमेति न संशयः॥विश्वसारे॥अष्टाधिकसहस्रं वै शतं वापि विधानतः॥स्वशक्तिरक्षणार्थाय गुरुर्मंत्रं तदा जपेत्॥तथा च॥दत्वा मंत्रं जपेद्देवि शतमष्टोत्तरं ततइति॥ततो मिष्टान्नपानादिना ब्राह्मणान्परितोष्य स्वयं भुंजीत॥दीक्षादिवसे गुरुशिष्ययोरुपवासे दोषमाह. योगिनीतंत्रे॥मंत्रं दत्वा गुरुश्चैव उपवासं यदा

तं·सा·
२३

चरेत्॥महांधकारनरकेक्रिमिर्भवतिनान्यथा॥दीक्षांकृत्वायदामंत्रीचोपवासंसमाचरेत्॥तस्यदेवःसदारुणःशापंदत्वाव्रजेत्पुरम्॥यद्यत्रहो
मःक्रियतेतदातद्विधानंवक्ष्यामः॥इतिकलावतीदीक्षा॥अथपंचायतनीदीक्षा॥जामले॥भवानीन्तुयदामध्येऐशान्यामच्युतंयजेत्॥आग्नेय्यां
पार्वतीनाथंनैर्ऋत्यांगणनायकं॥१॥वायव्यांतपनंचैवपूजाक्रमउदाहृतः॥यदामध्येतुगोविन्दमैशान्यांशंकरंयजेत्॥२॥अग्नेय्यांगणनाथंचनैर्ऋ
त्यांतपनंतथा॥वायव्यामम्बिकांचैवभोगमोक्षैकभूमिकाम्॥३॥शंकरंचयदामध्येऐशान्यामच्युतंयजेत्॥आग्नेय्यांतपनंचैवनैर्ऋत्यांगणनायकं॥
४॥वायव्यांपार्वतींचैवभोगमोक्षप्रदायिनीं॥आदित्यंचयदामध्येऐशान्यांशंकरंयजेत्॥५॥आग्नेय्यांगणनाथंचनैर्ऋत्यांकेशवंयजेत्॥वायव्याम
म्बिकांदेवीस्वर्गसाधनभूमिकां॥६॥गणनाथंयदामध्येऐशान्यांकेशवंयजेत्॥आग्नेय्यामीश्वरंचैवनैर्ऋत्यांतपनंतथा॥७॥वायव्यांपार्वतीं
चैवपूजयेन्मोक्षसाधनीं॥स्वस्थानवर्जितादेवादुःखशोकभयप्रदाः॥८॥तथाचगणेशविमर्शिन्याम्॥शंभौमध्यगतेहरीनहरभूदेव्योहरौ
शंकरे भास्येनागसुतारवौहरगणेशाजाम्बिकास्थापिताः॥देव्यांविष्णुहरैकदंतवलयोलम्बोदरेजेश्वरे नार्य्योःशंकरभागतोऽतिसुखदाव्य
स्तास्तेहानिदाः॥रामार्चनचंद्रिकायाम्गौतमीयेच॥देवाग्रेस्वस्यचैवाग्रेप्राचीप्रोक्तामनीषिभिः॥तस्याग्नेयेगणेशानंसूर्यंनैर्ऋतकोणके॥वायव्ये
चांबिकामीशमीशानेहरिपूजने॥तथा॥पंचात्मिकायांदीक्षायांगणेशादिक्रमाद्यजेत्॥यदातुमध्येगोविन्दमाग्नेय्यांगणनायकं॥नैर्ऋत्यांहंसमभ्यर्च्यवाय
व्यामर्च्चयेच्छिवां॥ऐशान्यांशंकरंचैवभोगमोक्षफलाप्तयेइति॥षडंगदेवतायाः पूजनेगणेशादिपूजनमुक्तम्॥तद्रामगोपालविषयमितिकेचिद्
वस्तुतोवैकल्प्यमितिसंप्रदायः॥एतेषांपूजनंतुगौतमीये॥गंधादिभिरथाभ्यर्च्यषडंगार्चनमेवच॥विशकुलोजपेन्मंत्रंनमस्कृत्यसमापयेत्॥अंगदेव

राम·
२३

तापूजाकालस्वरूपीठपूजानंतरं॥ तथाचसनत्कुमारतंत्रे॥ पीठस्यार्चनमंगदेवयजनंप्राणप्रतिष्ठं तथा आह्वानंनिजमुद्रिकाविरचनंध्यानंप्र
भोःपूज नमिति॥ यत्तु॥ देवेपुष्पांजलिंदत्वा अंगदेवान्समर्चयेत्॥ ॥तत्तुप्रतिष्ठितयंत्रादिविषयम्॥ यंत्रातिरिक्ताधारेपूजनेतुकुलावल्याम्
एकपीठेपृथक्पूजाविनायंत्रंकरोतियः॥ अंगांगित्वंपरित्यज्यदेवताशापमाप्नुयात्॥ एवंचआवाह्यदेवतामन्यामर्चयंस्त्वन्यदेवतां॥ उभाभ्यांलभते
शापंमंत्रीतुबलदुर्मतिः॥ तदेतदतिरिक्तविषयं॥ सर्वेषामंगमंत्राणांसिद्धादिविचारोनास्ति॥ तथाच॥ सिद्धादिशोधनंनैषामंगत्वेसतिराजते॥ श्या
माद्येतुपंचायतनभावः॥ तथाचरुद्रयामले॥ श्यामयांभैरवीतारावैच्छिन्नमस्तासुभैरवी॥ मंजुघोषेतथारौद्रेपंचांगानेष्यन्तेबुधैः॥ उपविद्यासुसर्वासु
षट्कर्मादिषुसाधने॥ नात्रदीक्षाद्यपेक्षास्तिनात्रांगादिप्रपूजनं॥ तत्वसारे॥ उपविद्यासुसर्वासुतथाप्रयोगसाधने॥ दीक्षांविनैवकर्तव्यउपदेशःसदै
वहि॥ अथसंक्षेपदीक्षा॥ सुमुहूर्तेसर्वतोभद्रेनवंकुंभंनिधायच॥ सोदकंगंधपुष्पाभ्यामर्चितंवस्त्रसंयुतम्॥ सर्वौषधीनवरत्न — पंचपल्लवसंयुत
म्॥ ततोदेवार्चनंकृत्वाहुनेदष्टोत्तरंशतम्॥ पंचपल्लवमितिपनसाम्राऽश्वत्थवटबकुलानि॥ तथाचवासिष्ठे॥ पनसाम्रंतथाऽश्वत्थवटंबकु
लमेवच॥ पंचपल्लवमित्युक्तंमुनिभिस्तत्त्ववेदिभिः॥ नवरत्नमिति॰ मुक्तामाणिक्यवैडूर्यगोमेदान्वज्रविद्रुमौ॥ पद्मरागंमरकतंनीलंचेतिय
थाक्रमात्॥ निबन्धे॥ शिष्यंस्वलंकृतंवेद्यामुपाग्निमुपवेशयेत्॥ मंत्रितंप्रोक्षणीतोयैःशांतिकुंभजलैस्तथा॥ मूलमंत्रेणाष्टशतैर्मंत्रितैरभि
षेचयेत्॥ अष्टशतैःअष्टोत्तरशतैरित्यर्थः॥ तथासंपादयेन्मंत्रंहस्तंशिरसिधारयन्॥ समोस्त्वित्यक्षतान्दद्यात्ततःशिष्योऽर्चयेद्गुरुम्॥ यद्वादी
क्षांतरं॥ शंखमभ्यर्च्यसाक्षतंतदम्बुनाभिषिंच्याष्टवारंमूलेनशिरसिकरंनिधायअष्टोवारान्मंत्रंकर्णेजपेत्॥ तथाच॥ तत्राप्यशक्तःकश्चिच्चे
दब्जमभ्यर्च्यसाक्षतम्॥ तदम्बुनाभिषिच्याष्टवारम्मूलेनकेवलम्॥ निधायाष्टोजपेत्कर्णेउपदेशेत्वयंविधिः॥ इतिसंक्षेपदीक्षा॥ उपदेशांतर

मस्तके

कर्ण।३

माह॥ विश्वसारे॥ चंद्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये॥ मंत्रमात्रप्रकथनमुपदेशः स उच्यते॥ १॥ विश्वसारे॰॥ महादीक्षा तथा दीक्षा उपदेशस्ततः परम्॥ युगे युगे च कर्त्तव्या उपदेशः कलौ युगे॥ २॥ अथ सर्वतोभद्रमंडलम्॰ शारदायाम्॥ चतुरस्रे चतुःकोष्ठे कर्णसूत्रसमन्विते॥ चतुर्ष्वपि च कोष्ठेषु कोणसूत्रे चतुष्टयं॥ मध्ये मध्ये यथा मत्स्याः भवेयुः पातयेत्तथा॥ पूर्वापरायते द्वे द्वे मंत्री याम्योत्तरायते॥ पातयेत्तेषु मत्स्येषु समं सूत्रचतुष्टयम्॥ पूर्ववत् कोणकोष्ठेषु कर्णसूत्राणि पातयेत्॥ तदुद्भूतेषु मत्स्येषु दद्यात्सूत्रचतुष्टयम्॥ ततः कोष्ठेषु मत्स्याः स्युस्तेषु सूत्राणि पातयेत्॥ यावच्छतद्वयं मंत्री षट्पंचाशत्पदान्यपि॥ तावत्तेनैव विधिना तत्र सूत्राणि पातयेत्॥ दैर्घ्यविस्तारयोः षोडशकोष्ठकं तेन भविष्यति तत्र कर्णसूत्रपातनं कोष्ठानां तुल्यपरिमाणार्थमिति बोद्धव्यम्॥ षट्त्रिंशता पदैर्मध्ये लिखेत्पद्मं सुलक्षणम्॥ बहिः पंक्त्या भवेत्पीठं पंक्तियुग्मेन वीथिका॥ द्वारशोभोपशोभास्रान् शिष्टानां परिकल्पयेत्॥ शास्त्रोक्तविधिना मंत्री ततः पद्मं समालिखेत्॥ पद्मक्षेत्रस्य संत्यज्य द्वादशांशं बहिः सुधीः॥ तन्मध्ये विभजेद्वृत्तैस्त्रिभिः समविभागतः॥ आद्यं स्यात्कर्णिकास्थानं केशराणां द्वितीयकं॥ तृतीयं पद्मपत्राणामुक्तांशेन दलाग्रकम्॥ बाह्यवृत्तांतरालस्य मानेनेन विधिना सुधीः॥ निधाय केशराग्रेषु परितोऽर्द्धनिशाकरान्॥ लिखित्वा संधिसंस्थानि तत्र सूत्राणि पातयेत्॥ दलाग्राणां च यन्मानं तन्मानाद्वृत्तमालिखेत्॥ तदंतरालं तन्मध्ये सूत्रस्योभयतः सुधीः॥ आलिखेद्बाह्यवृत्तेन दलाग्राणि समंततः॥ दलमूलेषु युगशः केश   राणि प्रकल्पयेत्॥ एतत्साधारणं प्रोक्तं पङ्कजं तंत्रवेदिभिः॥ पदानि त्रीणि पादार्थं पीठकोणेषु मार्ज्जयेत्॥ अवशिष्टैः पदैर्विद्वान् पीठगात्राणि कल्पयेत्॥ पदानि वीथिसंस्थानि मार्ज्जयेत्पंक्तिभेदतः॥ दिक्षु द्वाराणि रचयेत् द्विचतुःकोष्ठकैस्ततः॥ पदैस्त्रिभिर

थैकेन शोभाः स्युर्द्वारपार्श्वयोः॥ उपशोभाः स्युरेकेन त्रिभिः कोष्ठैरनंतरं॥ अवशिष्टैः पदैः षड्भिः कोणानां स्याच्चतुष्टयम्॥ रंजयेत्पंचभिर्वर्णैर्मण्डलं तन्मनोहरम्॥ बृहन्मन्त्रस्य सूक्ते॥ पंकजं शुक्लवर्णेन वैष्णवे यागकर्मणि॥ शक्तियागे तु रक्तं स्याच्छैवे पीतं विनिर्दिशेत्॥ प्रतिष्ठासु च सर्वासु शुक्लमेव विनिर्दिशेत्॥ पीतं हरिद्राचूर्णं स्यात् सितं तंदुलसंभवं॥ कुसुंभचूर्णमरुणं कृष्णं दग्धपुलाकजं॥ बिल्वादिपत्रजं श्याममित्युक्तं वर्णपंचकम्॥ अंगुलोत्सेधविस्तारः सीमारेखाः सिताः शुभाः॥ कर्णिकां पीतवर्णेन केशराण्यरुणेन च॥ शुक्लवर्णानि पत्राणि तत्संधीन् श्यामलेन च॥ रजसा मंत्रयेन्मंत्री यद्वा पीतैव कर्णिका॥ केशराः पीतरक्ताः स्युररुणानि दलान्यपि॥ संधयः कृष्णवर्णाः स्युः सितेनाप्यसितेन वा॥ रंजयेत् पीठगर्भाणि पादाः स्युररुणप्रभाः॥ गात्राणि तस्य शुक्लानि वीथीषु चतसृष्वपि॥ आलिखेत्कल्पलतिकाः फलपुष्पदलान्विताः॥ वर्णैर्नानाविधैश्चित्राः सर्वदृष्टिमनोहराः॥ द्वाराणि श्वेतवर्णानि शोभा रक्ताः समीरिताः॥ उपशोभाः पीतवर्णाः कोणान्यसितभानि च॥ तिस्रो रेखा बहिः कार्याः सितरक्तासितैः क्रमात्॥ मंडलं सर्वतोभद्रमेतत्साधारणं स्मृतम्॥ चतुरस्रां भुवं भित्वा दिग्भ्यो द्वादशधा सुधीः॥ पातयेत्तत्र सूत्राणि कोष्ठानां दृश्यते शतं॥ चतुश्चत्वारिंशदाढ्यं पश्चात् षट्त्रिंशतांबुजं॥ कोष्ठैः प्रकल्पयेत्पीठं पंक्त्या नैवात्र वीथिका॥ द्वारशोभा यथापूर्वमुपशोभा न दृश्यते॥ अवशिष्टैः पदैः कुर्यात् षड्भिः कोणानि तंत्रवित्॥ विदध्यात् पूर्ववच्छेषं एवं वा मंडलं स्मृतम्॥ अथ स्वल्पसर्वतोभद्रं॥ चतुरस्रे चतुःषष्टिपदान्यारचयेत्सुधीः॥ पदैश्चतुर्भिः पद्मं स्यान्मध्ये तत्परितः पुनः॥ वीथीश्चतस्रः कुर्वीत मंडलांतावसानिकाः॥ दिग्गतेषु चतुष्केषु मंडलानि समालिखेत्॰ विदिग्गतचतुष्काणि भित्त्वा षोडशधा सुधीः॥ मार्ज्जयेत्स्वस्तिकाकारं श्वेतपीतारुणासितैः॥ रजोभिः पूरयेत्तानि स्वस्तिकानि शिवादितः॥

प्राक्प्रोक्तेनैव मार्गेण शेषमन्यत्समापयेत्॥ नवनाभमिदं प्रोक्तं मंडलं सर्वसिद्धिदम्॥ पंचाब्जमंडलं प्रोक्तमेतत्स्वस्तिकवर्ज्जितम्॥ दीक्षायां देवपूजायां मंडलानां चतुष्टयम्॥ सर्वतंत्रानुसारेण प्रोक्तं सर्वसमृद्धिदम्॥ अथ मंत्रिणां हितार्थाय यत्रि लौही मुद्रा निरूप्यते॥ सोमसूर्य्याग्निरूपाः सुवर्णं लोहत्रयं तथा॥ रौप्यमिन्दुः स्मृतो हेमसूर्य्यस्ताम्रो हुताशनः॥ लौहभागाः समुद्दिष्टाः स्वराद्यक्षरसंख्यया॥ तैर्लौहैः कारयेन्मुद्रामसंकलितसंगताम्॥ एषु स्वराः स्मृताः सौम्याः स्पर्शाः सौराः शुभोदयाः॥ आग्नेया व्यापकाः सर्वे सोमसूर्य्याग्निदेवताः॥ स्वराः षोडश विख्याताः स्पर्शास्ते पंचविंशतिः॥ व्यापका दश ते काम धन धर्म्मप्रदायिनः॥ सा षं स हं सं संजप्य स्पृष्ट्वा तां जुहुयात्ततः॥ तस्यां संपातयेन्मंत्री सर्पिषा पूर्वसंख्यया॥ निःक्षिप्य कुंभे तां मुद्रामभिषेकोक्तवर्त्मना॥ आवाह्य पूजयेद्देवीमुपचारैर्विधानतः॥ अभिषिच्य विनीताय दद्यात्तां मुद्रिकां गुरुः॥ इयं मुद्रा क्षुद्ररोगविषज्वरविनाशिनी॥ व्यालचौरमृगादिभ्यो रक्षां कुर्य्याद्विशेषतः॥ युद्धे विजयमाप्नोति धारयेन्मनुजेश्वरः॥ मंत्रसिद्धिकरी पुंसां चतुर्वर्गफलप्रदा॥ धारयेन्मनुजो नित्यं देवतुल्यो भवेद्भुवि॥ मुद्रः शत्रुः॥ अभिषिच्येति पूर्वोक्तदीक्षापद्धत्युक्तविधिना घटं संस्थाप्य तत्तत्कल्पोक्तदेवतामावाह्य यथोपचारतः संपूज्य साध्यमभिषिच्य तस्मै दद्यादित्यर्थः॥ ततो गुरवे दक्षिणां दत्वा महांतमुत्सवं कुर्य्यात्॥ गोपांगनाकेलिविलासमुग्धं संसारदावानलभंगदक्षं॥ ब्रह्मादिवृंदारकवंदितांघ्रिं वंदे मुकुंदं जगदेकनाथं॥ ॥ इति श्रीकृष्णानंदभट्टाचार्य्यविरचिते तंत्रसारे प्रथमः परिच्छेदः॥ ॥१॥

॥ अथ सामान्यपूजापद्धतिः॥ तत्र ब्राह्मे मुहूर्त्ते उत्थाय मुक्तस्वापः शिरसि सहस्रदलकमलावस्थितं श्वेतवर्णं द्विभुजं वराभयकरं श्वेतमाल्यानुलेपनं स्वप्रकाशरूपं स्ववामस्थितसुरक्तशक्त्या स्वप्रकाशस्वरूपया सहितं गुरुं विभाव्य मानसोपचारैराराध्य ऐं मंत्रं यथाशक्ति जप्त्वा नमस्कुर्य्यात्॥ यथा॥ अखंडमंडलाकारं व्याप्तं येन चराचरं॥ तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥ अज्ञा

नतिमिरांधस्यज्ञानांजनशलाकया॥ चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः॥ ततोमूलादिब्रह्मरंध्रांतंमूलविद्यांविभावयेत्॥ मूलविद्याकुंड
लिनी॥ तथाचयोगिनीहृदये॥ विद्याकुंडलिनीरूपामंडलत्रयभेदिनी ॥अन्यत्रापि॥ ध्यायेत्कुंडलिनींसूक्ष्मांमूलाधारनिवासिनी॥ तामिष्टदेवतारूपांसार्द्ध
त्रिवलयान्वितां॥ कोटिसौदामिनीभासांस्वयंभूलिंग वेष्टिनीं॥ तामुत्थाप्यमहादेवींप्राणमंत्रेणदेशिकः॥ उद्यद्दिनकरद्योतांयावच्छ्वासंदृढासनः
॥अशेषाशुभशांत्यर्थंसमाहितमनाःशिवम्॥ तत्प्रभापटलव्याप्तंशरीरमपिचिंतयेत्॥ भावप्रदीपे॥ ब्राह्मेमुहूर्तेउत्थायकृतमैत्रादिकःशुचिः॥ मृ
दुकंबलमासीनोमंत्रसिद्धिपरःसदा॥ षडंगन्यासमाचर्यप्राणायामत्रयंतथा॥ योनिमुद्रांविधायाथमूलाधारेतुचिंतयेत्॥ शक्तिंकुंडलिनींसूक्ष्मां
जगच्चैतन्यरूपिणीं॥ प्रसुप्तभुजगाकारांसार्द्धत्रिवलयस्थितां॥ वायुनाग्निंसमुत्थाप्यभारतींबोधयेत्ततः॥ ब्रह्मरंध्र पथेनैवपरंब्रह्मणियोजयेत्॥
षट्चक्रभेदनेनैवपरंब्रह्ममयंपुनः॥ एवंकृत्वामृतेनैवसंप्लाव्याधारमानयेत्॥ एवंद्विशोविधायाथदेवींहृत्कमलेस्मरेत्॥ संपूज्यमानसैर्द्रव्यैर्ध्या
येत्कल्पानुसारतः॥ अष्टोत्तरशतंविद्वान्जपेद्वर्णाक्षमालया॥ प्रातःकृत्यानंतरंवामैत्रादिकंकुर्यात्॥ तथाच॥ नमस्कृत्यसमुत्थायबहिरागत्यदेशिकः
॥ततोमैत्रादिकंकृत्वाकुर्याद्दंतविशोधनं॥ तस्यनित्यतामाहगौतमीये॥ इदानींपूर्वकृत्यंचप्रसंगात्कथयामिते॥ कृत्वाधिकारितांयातियंत्रमंत्रार्चना
दिषु॥ येनविनानसिद्धिःस्यान्नरकंचप्रपद्यते॥ यामले॥ प्रातःकृत्यमकृत्वातुयोदेवींभक्तितोयजेत्॥ निष्फलातस्यपूजास्याच्छौंचहीनायथाक्रिया
॥लक्ष्मीकुलार्णवे॥ संध्ययानुविहीनोयोनदीक्षाफलमाप्नुयादिति वचनात्तस्यावश्यकत्वम्॥ वैदिकसंध्यानंतरंतांत्रिकसंध्याकर्तव्या॥ तदुक्तम्
॥ वैदिकींतांत्रिकींसंध्यांयथानुक्रमयोगतइति॥ अथसंध्याप्रयोगः॥ तत्रशक्तिविषये॥ ॐ आत्मतत्वायस्वाहा॥ ॐ विद्यातत्वायस्वाहा॥ ॐ
शिवतत्वायस्वाहा इत्याचामेत् अन्यत्राचमनम्॥ तथाच शाक्ताचमनंस्वतंत्रतंत्रे॥ आत्मविद्याशिवैस्तत्वैराचामेत्साधकाग्रणीः॥ वह्निजायांप

रेद्दत्वा शुद्धेन पाथसा प्रिये॥ मालिनीतंत्रे॥ आचामेदात्मतत्वाद्यैः प्रणवाद्यैर्हृदंतकैरिति॥ मंत्रैस्त्रिधा तथा वंक्त्रं नासास्यश्रोत्रनाभिहृत्॥ कंधौ मूलं स्पृशेन्मंत्री कुर्यात्तीर्थाभिवंदनं॥ ततो जले गंगे चेत्यादिना तीर्थमावाह्य मूलेन कुशेन त्रिवारं भूमौ जलं क्षिपेत्॥ तज्जलेन सप्तधा मूर्द्धानमभिषिंचेत्॥ ततः षडंगन्यासं कृत्वा वामहस्ते जलं निधाय दक्षिणहस्तेन जलमाच्छाद्य हं यं वं लं रं इति त्रिवारमभिमंत्र्य मूलमुच्चरन् गलितोदकबिंदुभिस्तत्वमुद्रया मूर्द्धि सप्तधाभ्युक्षणं कृत्वा शेषं जलं दक्षिणहस्ते समादाय तेजोरूपं ध्यात्वा वामनासापुटेनेडयाकृष्य देहांतः पापं प्रक्षाल्य कृष्णवर्णं तज्जलं पापरूपं ध्यात्वा दक्षनासया पिंगलया विरेच्य पुरः कल्पितवज्रशिलायां फडिति मंत्रेण पापपुरुषरूपं तज्जलं क्षिपेत्॥ इत्यघमर्षणम्॥ तथा च गौतमीये॥ आचम्य विधिवन्मंत्री शुचौ देशे च संविशेत्॥ जले संयोज्य तीर्थानि त्रिवारं मूलमंत्रतः॥ क्षिपेद्भूमौ कुशाग्रेण सप्तधा मूर्द्धि सेचयेत्॥ तंत्रांतरे॥ पुनराचम्य विन्यस्य षडंगमपि मंत्रवित्॥ वामहस्ते जलं गृह्य गलितोदकबिंदुभिः॥ सप्तधाभ्युक्षणं कृत्वा मूर्द्धि मंत्रं समुच्चरन्॥ अवशिष्टोदकं दक्षहस्ते संगृह्य बुद्धिमान्॥ इडयाकृष्य देहांतः क्षालितं पापसंचयं॥ कृष्णवर्णं तदुदकं दक्षनाड्या विरेचयेत्॥ दक्षहस्ते तु तन्मंत्री पापरूपं विचिंतयेत्॥ पुरतो वज्रपाषाणे निःक्षिपेदस्त्रमुच्चरन्॥ अन्यत्रापि॥ षडंगन्यासमाचर्य वामहस्ते जलं ततः॥ गृहीत्वा दक्षिणेनैव संपुटं कारयेद्बुधः॥ शिववायुजलंपृथ्वीवह्निबीजैस्त्रिधा पुनः॥ अभिमंत्र्य च मूलेन सप्तधा तत्वमुद्रया॥ निःक्षिप्य तज्जलं मूर्द्धि शेषं दक्षे निधाय च॥ शरीरांतःस्थितं पापं क्षालयेत्साधकाग्रणीः॥ ततो हस्तौ प्रक्षाल्याचम्य ह्रीं हंसः॥ ॐ घृणिः सूर्यादित्य इति मंत्रेण सूर्यायार्घ्यं दद्यात्॥ तथा च संमोहनतंत्रे॥ शिवबीजं वह्निसंस्थं वामनेत्रविभूषितं॥ बिंदुनादात्मकं देवि हंसः पदमथो लिखेत्॥ अनेन मनुना देवि भास्करस्य प्रियेण तु॥ अर्घ्यं दद्यादिति॥ विशेषस्तु स्नानप्रकरणे बोद्धव्यः॥ तत ॐ सूर्यमंडलस्थायै अमुकदेवतायै

नम इत्यनेन ततद्गायत्र्या त्रिवारं जलं निःक्षिप्य ततद्गायत्रीं जपेत्॥ तथा चार्घ्यानंतरं ज्ञानार्णवे॥ ततश्च प्रजपेद्धीमान् गायत्रीं परमाक्षरीमिति॥ गायत्री तु स्नानप्रकरणे बोद्धव्या॥ नंदिकेश्वरसंहितायाम्॥ यावन्न दीयते चार्घ्यं भास्कराय महात्मने॥ तावन्न पूजयेद्विष्णुं शंकरं वा महेश्वरीमिति॥ गौतमीये॥ एवं ते कथिता मंत्रसंध्या मंत्रफलाप्तये॥ न कुर्य्याद्यदि मोहेन न दीक्षाफलमाप्नुयात्॥ संध्यात्रयं तथा कुर्य्याद्ब्राह्मणो विधिपूर्वकम्॥ तंत्रोक्तविधिपूर्वं तु शूद्रः संध्यां समाचरेत्॥ संक्षेपसंध्यामथवा कुर्य्यान्मंत्री ह्यशक्तितः॥ सायंप्रातश्च मध्याह्ने देवं ध्यात्वा मनुं जपेत्॥ संध्यायां पतिता यां तु गायत्रीं दशधा जपेत्॥ अथ स्नानविधिः॥ तत्र नद्यादौ गत्वा वैदिकस्नानं कृत्वा तांत्रिकस्नानमाचरेत्॥ तथा च गौतमीये॥ अथ स्नानं ततः कुर्य्यात् यथाशास्त्रविधानतः॥ मल प्रक्षालनं स्नानं स्वशाखोक्तं समाचरन्॥ मंत्रस्नानं ततः कुर्य्यात् कर्म्मणां सिद्धिहेतवे॥ तद्यथा॥ ॐ अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुकदेवताप्रीतये स्नानमहं करिष्ये इति संकल्पं कुर्य्यात्॥ तथा च कुलचूडामणौ॥ ताम्रपात्रे संपूर्वं च सतिलं स जलं ततः॥ गृहीत्वामुकदेवस्य प्रीतये स्नानमाचरेत्॰ ततः षडंगन्यासप्राणायामं कृत्वा॥ ॐ गंगे च यमुने चैव गोदावरि सरस्वति॥ नर्म्मदे सिंधु कावेरि जलेऽस्मिन् सन्निधिं कुरु इत्यनेनांकुशमुद्रया सूर्य्यमंडलात्तीर्थमावाह्य वमिति धेनुमुद्रयाऽमृतीकृत्य कवचेनावगुंठ्यास्त्रेण संरक्ष्य मूलेनैकादशधाभिमंत्र्य सूर्य्याभिमुखं द्वादश वारिधारा निक्षिप्य तस्मिन्निष्टदेवताचरणारविंदनिःसृते जले त्रिर्निमज्ज्य देवतां ध्यायन् मूलमंत्रं यथाशक्ति जपन्नुन्मज्ज्य उदकेन त्रिवारजप्तेन कलशमुद्रया त्रिवारमात्मानमभिषिच्य वैदिकसंध्यादिकं कृत्वा सूर्य्यार्घ्यं हुत्वा तांत्रिकाघमर्षणादि वारिधारांतं कर्म कुर्य्यात्॥ तथा च यामले॥ ध्यात्वा जलांजलीन् क्षिप्त्वा तर्प्पयेदिष्टदेवताम्॥ ॐ देवांस्तर्प्पयामि॥ ॐ ऋषींस्तर्प्पयामि॥ ॐ पितॄंस्तर्प्पयामीति संतर्प्य गुरुं परमगुरुं परापरगुरुं परमेष्ठिगुरुं च तर्प्पयेत्॥ तथा च॥ देवानृषीन् पितॄंश्चैव तत्कल्पोक्तविधानतः॥

गुरुपंक्तिं पुरा तर्प्य तर्प्पयेदिष्टदेवतामिति॥ वैष्णवे तु विशेषः॥ नारदं पर्वतं जिष्णुं निशठोद्धवदारुकं॥ विष्वक्सेनं च शैलेयं गुरुं च तर्प्पयेत्त्रिशः॥
ॐ नारदं तर्प्पयामीत्यादिक्रमेण प्रयोगः कर्त्तव्यः॥ ततो मूलमुच्चार्य्य अमुकदेवतां तर्प्पयामि नमः इति विष्णुविषयम्॥ तथा च गौतमीये॥ आदौ
मंत्रं समुच्चार्य्य श्रीपूर्वं कृष्णमित्यपि॥ तर्प्पयामिपदं चोक्ता नमोऽन्तं तर्प्पयेत्ततः॥ अन्यत्र मूलमुच्चार्य्य ॐ अमुकदेवतां तर्प्पयामि॥ तथा च॰
॥ तर्प्पयामिपदं योज्यं मंत्रान्ते स्वेषु नामसु॥ द्वितीयान्तेषु चेत्येवं तर्प्पणस्य मनुर्मतः॥ शक्तिविषये पुनर्मूलमुच्चार्य्य अमुकदेवीं तर्प्पयामि स्वा
हा॥ होमतर्प्पणयोः स्वाहेति तत्तत्तंत्रवचनात्॥ तथा च नीलतंत्रे॰॥ मंत्रान्ते नाम चोच्चार्य्य तर्प्पयामि ततः परम्॥ स्वाहान्ते तर्प्पयेद्देवं पंच
विंशतिसंख्ययेत्यादि॥ विशुद्धेश्वरे॥ विद्यां पूर्वं समुच्चार्य्य तदंते देवताभिधां॥ तर्प्पयामीति संप्रोक्ता स्वाहांतस्तर्प्पणे मनुः॥ पंचविंशतिसंख्या
वा दशधा वा त्रिधापि वा॥ मूलमंत्रं समुच्चार्य्य श्रीकृष्णं तर्प्पयेत्सुधीः॥ इति गौतमीयात्॥ पंचविंशतिवारं दशधा त्रिधा वा संतर्प्पयेत्॥ तत्र श्रीकृ
ष्णमित्युपलक्षणम्॥ शक्तिविषये त्रिधा तर्प्पणम्॥ स्नानकर्म्मणि संप्राप्ते मूर्द्धि मंत्री जलांजलीन्॥ विद्यया वा त्रिशः कुर्य्यात्सृतास्तु त्रिरपः पि
बेत्॥ तर्प्पणं च त्रिधा भूयस्त्रिधा च प्रोक्षणं तनाविति कुलामृते वचनात्॰॥ तत आवरणदेवताप्रत्येकेन सकृत्तर्प्पयेत्॥ तथा च कुलार्णवे॥ ए
कैकमंजलिं तोयं परिवारांश्च तर्प्पयेत्॥ तत्राशक्तश्चेन्मूलमंत्र मुच्चार्य्य इष्टदेवतामात्रं तर्प्पयेत्॥ तथा च॥ अशक्तो मूलमुच्चार्य्य देवीमात्रं प्र
तर्प्पयेत्॥ ततो जलादुत्थाय धौतवाससी परिधायाचम्य ह्रीं हंसः इदमर्घ्यं सूर्य्याय स्वाहा॥ तारादौ तु ह्रीं हंसः मार्तंडभैरवाय प्रकाशश
क्तिसहिताय इदमर्घ्यं स्वाहा॥ तंत्रांतरे॥ सूर्य्यमंत्रं समुच्चार्य्य मार्तंडभैरवाय च॥ प्रकाशशक्तिसहिताय इदमर्घ्यं पठेत्ततः॥ स्वाहांतं मंत्रमुच्चा
र्य्य अर्घ्यं दत्वा जपेन्मनुं॥ श्रीविद्यादौ तु॥ ऐं ह्रीं श्रीं ह्रां ह्रीं सः मार्तंडभैरवाय प्रकाशशक्तिसहिताय [illegible]

परिवारसहितायइदमर्घ्यंस्वाहा० इत्यर्घ्यंदत्वागायत्रीशतधादशधावाजपेत्॥ तथाचतंत्रे॥ अष्टोत्तरशतावृत्या [illegible] प्रजपं [illegible]
पातकयुक्तोपिप्रजपेद्दशधायदि॥ सप्तंसप्तंमहादेविमुक्तोभवतितत्क्षणात्॥ इतिशक्ताशक्तभेदेन॥ गायत्रीजपानन्तरंतर्प्पणंवा०॥ तथाच
॥ सूर्य्यमंडलवासिन्यैदेवतायैनतःपरम्॥ अर्घ्यमंजलिमादायगायत्र्यावात्रिरुत्क्षिपेत्॥ तथाचयामले॥ ध्यात्वाजलांजलिंक्षिप्त्वातर्पयेदिष्ट
देवतां॥ यथाशक्तिजपेद्देवीगायत्रींपरमाक्षरीम्॥ तर्प्पणार्थंसमाचम्यप्राणानायम्यसाधकः॥ गायत्रीस्तु॥ ॐत्रैलोक्यमोहनायविद्महेस्मराय
धीमहि॥ तन्नोविष्णुःप्रचोदयात्॥ इतिविष्णुगायत्री॥ ॐनारायणायविद्महेवासुदेवायधीमहि॥ तन्नोविष्णुःप्रचोदयादितिनारायणगायत्री॥ ॐ
वज्रनखायविद्महेतीक्ष्णदंष्ट्रायधीमहि॥ तन्नोनारसिंहःप्रचोदयादितिनरसिंहगायत्री॥ ॐवागीश्वरायविद्महेहयग्रीवायधीमहि॥ तन्नोहं
सःप्रचोदयादितिहयग्रीवगायत्री॥ ॐश्रीकृष्णायविद्महेदामोदरायधीमहि॥ तन्नोविष्णुःप्रचोदयात्इतिगोपालगायत्री॥ ॐदाशरथायविद्महे
सीतावल्लभायधीमहि॥ तन्नोरामःप्रचोदयादितिश्रीरामगायत्री॥ ॐतत्पुरुषायविद्महेमहादेवायधीमहि॥ तन्नोरुद्रःप्रचोदयादितिशिव
गायत्री०॥ ॐतत्पुरुषायविद्महेवक्रतुंडायधीमहि॥ तन्नोदंतीप्रचोदयादितिगणेशगायत्री॥ दक्षिणामूर्त्तयेविद्महेध्यानस्थायधीमहि॥ तन्नो
धीशःप्रचोदयादितिदक्षिणामूर्तिगायत्री॥ आदित्यायविद्महेमार्त्तंडायधीमहि॥ तन्नःसूर्य्यःप्रचोदयादितिसूर्य्यगायत्री॥ कामदेवायविद्महेपुष्प
बाणायधीमहि॥ तन्नोऽनङ्गःप्रचोदयादितिकामगायत्री॥ सर्वसम्मोहिन्यैविद्महे विश्वजनन्यैधीमहि॥ तन्नः शक्तिःप्रचोदया दितिशक्तिगायत्री॥
त्वरितादेविविद्महेमहानित्यायैधीमहि॥ तन्नोदेवीप्रचोदयादितित्वरितागायत्री॥ ऐंवागीश्वर्य्यैविद्महेक्लींकामेश्वर्य्यैधीमहि॥ सौस्तन्नः
शक्तिःप्रचोदयात् इतिबालागायत्री॥ ऐंत्रिपुरादेविविद्महेक्लींकामेश्वर्य्यैधीमहि॥ सौस्तन्नःक्लिन्नेप्रचोदयादितित्रिपुरसुंदरीगायत्री॥ त्रि

श्यामा ६

पुरायै विद्महे भैरव्यै धीमहि॥ तन्नो देवी प्रचोदयादिति भैरवीगायत्री॥ महादेव्यै विद्महे दुर्गायै धीमहि॥ तन्नो देवी प्रचोदयादिति दुर्गागायत्री॥ नारायण्यै विद्महे दुर्गायै धीमहि॥ तन्नो गौरी प्रचोदयादिति जयदुर्गा गायत्री॥ महालक्ष्म्यै विद्महे महाश्रियै धीमहि॥ तन्नः श्रीः प्रचोदयादिति लक्ष्मीगायत्री॥ वाग्देव्यै विद्महे कामराजाय धीमहि॥ तन्नो देवी प्रचोदयादिति सरस्वतीगायत्री॥ नारायण्यै विद्महे भुवनेश्वर्यै धीमहि॥ तन्नो देवी प्रचोदयादिति भुवनेश्वरीगायत्री॥ भगवत्यै विद्महे माहेश्वर्यै धीमहि॥ तन्नोऽन्नपूर्णे प्रचोदयादिति अन्नपूर्णागायत्री॥ महिषमर्दिन्यै विद्महे दुर्गायै धीमहि॥ तन्नो देवी प्रचोदयादिति महिषमर्दिनीगायत्री॥ वैरोचन्यै विद्महे छिन्नमस्तायै धीमहि॥ तन्नो देवी प्रचोदयादिति छिन्नमस्तागायत्री॥ कालिकायै विद्महे श्मशानवासिन्यै धीमहि॥ तन्नो घोरे प्रचोदयात् इति कालिकागायत्री॥ तारायै विद्महे महोग्रायै धीमहि॥ तन्नो देवी प्रचोदयादिति तारागायत्री॥ गरुडाय विद्महे सुवर्णवर्णाय धीमहि॥ तन्नो गरुडः प्रचोदयादिति गरुडगायत्री॥ ध्यानं तु प्रातः॥ उद्यदादित्यसंकाशां पुस्तकाक्षकरां स्मरेत्॥ कृष्णाजिनधरां ब्राह्मीं ध्यायेत्तारकितेऽम्बरे॥ मध्याह्ने॥ श्यामवर्णां चतुर्बाहुं शंखचक्रलसत्करां॥ गदापद्मधरां देवीं सूर्यासनकृताश्रयां॥ सायाह्ने वरदां देवीं गायत्रीं संस्मरेद्यतिः॥ शुक्लां शुक्लांबरधरां वृषासनकृताश्रयां॥ त्रिनेत्रां वरदां पाशं शूलं च नृकरोटिकाम्॥ सूर्यमंडलमध्यस्थां ध्यायेद्देवीं समभ्यसेत्॥ त्रिपुरायोध्यानविशेषो यथा॥ प्रातराधाकरमले हुतभुङ्मंडलोपरि॥ वाग्बीजरूपां विद्याया विद्युत्पटलभास्वराम्॥ पुष्पबाणेक्षुकोदंडपाशांकुशलसत्कराम्॥ स्वेच्छागृहीतवपुषीं गुरुविद्याक्षरात्मिकां॥ मध्याह्ने हृदयांभोजकर्णिके सूर्यमंडले॥ कामबीजात्मिकां देवीमलक्तकरसारुणां॥ प्रसूनबाणपुष्पेक्षुचापपाशांकुशान्वितां॥ परितः स्वात्मसुख्याभिः षट्त्रिंशत्तत्वशक्तिभिः॥ सायमात्मसरोजस्थे चंद्रे चंद्रसमद्युतिम्॥ शक्तिबीजात्मिकां चापबाणपाशांकुशान्विताम्॥ सुर

नित्यास्फराकारांफटिकावरणान्वितां ॥ चिंतयित्वा भगवतीं नित्याभिः परिवारितां ॥ तारायैतु ॥ ह्रीं हुं स इति सूर्यार्घं दत्वा ताम्रादिपात्रे चंदना-
र्ककुसुमापराजितापुष्पाणि निःक्षिप्य उद्यदादित्यमंडलमध्यवर्तिन्यै नित्यचैतन्योदितायै श्रीमदेकजटायै स्वाहेत्यर्घं दत्वा गायत्रीं जपेत्
इति विशेषः ॥ तदुक्तं नीलतंत्रे ॥ उद्यदादित्यमंडलवर्तिन्यै च समुच्चरेत् ॥ नित्यचैतन्योदितायै स्वाहेति च मनुःस्मृतः ॥ अन्यत्र कालिकातंत्रे ॥ एक-
जटापदस्थाने कालिकापदयोगः ॥ ततः सूर्य्यमंडले देवतां विभाव्य मूलमंत्रं यथाशक्ति जप्त्वा संहारमुद्रया देवतां स्वहृदयमानीय तीर्थं नमस्कृ-
त्य यागस्थानमाविशेत् ॥ इति स्नानविधिः ॥ ततः सामान्यार्घ्यस्थापनाद्यासनोपवेशनान्तं दीक्षापद्धत्युक्तरीत्या कर्म्म समाप्य वामे ॥ ॐ गुरुभ्यो न-
मः ॥ ॐ परमगुरुभ्यो नमः ॥ ॐ परापरगुरुभ्यो नमः ॥ दक्षिणे ॐ गणेशाय नमः ॥ मूर्द्ध्नि मूलमुच्चार्य्यामुकदेवतायै नमः ॥ तथा च गौतमीये ॥ कृ-
तांजलिपुटो भूत्वा वामे गुरुत्रयं यजेत् ॥ गुरुं च परमादिं च परापरगुरुं तथा ॥ दक्षपार्श्वे गणेशं च मूर्द्ध्नि देवं विभावयेत् ॥ ततः फडिति मंत्रेण गंध-
पुष्पाभ्यां करौ संशोध्य उर्द्धोर्द्धं तालत्रयं कृत्वा छोटिकाभिर्दशदिग्बंधनं च कृत्वा रमिति जलधारयाग्निप्राकारं विचिंत्य भूतशुद्धिं कुर्यात् ॥ त-
था ॥ स्वांके उत्तानौ हस्तौ कृत्वा सोहमिति जीवात्मानं हृदयस्थप्रदीपकलिकाकारं मूलाधारस्थितकुलकुंडलिन्या सह सुषुम्णावर्त्मना
मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाख्यषट्चक्राणि भित्वा शिरोअवस्थिताधोमुखसहस्रदलकमलकर्णिकांतर्गतपर-
मात्मनि संयोज्य तत्रैव पृथिव्यप्तेजोवाय्वाकाशगंधरसरूपस्पर्शशब्दनासिकाजिह्वाचक्षुस्त्वक्श्रोत्रवाक्पाणिपादपायूपस्थप्रकृ-
तिमनोबुद्ध्यहंकाररूपचतुर्विंशतितत्वानि लीनानि विभाव्य यमिति वायुबीजं धूम्रवर्णं वामनासापुटे विचिंत्य तस्य षोडशवारजपेन
वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुंभकं कृत्वा वामकुक्षिस्थकृष्णवर्णपापपुरुषेण देहं संशोध्य पापे

नसहदेहंदग्ध्वा तस्यद्वात्रिंशद्वारजपेनदक्षिणनासयावायुंरेचयेत्॥ दक्षिणनासापुटेरमितिवह्निबीजंरक्तवर्णंध्यात्वातस्यषोडशवारज
पेनवायुनादेहमापूर्य्यनासापुटौधृत्वाचतुःषष्टिवारजपेनकुंभकंकृत्वावामकुक्षिस्थितकृष्णवर्णपापेनसहदेहंदग्ध्वातस्यद्वात्रिंशद्वारज
पेनवामनासयाभस्म नासहवायुंरेचयेत्॥ शक्तिविषयेपि॥ चंद्रबीजस्यजपआवश्यकः॥ तदुक्तंविशुद्धेश्वरतंत्रे॥ ठंबीजंशुक्लवर्णंतुजप्त्वाषोड
शधासुधीः॥ भ्रूमध्यस्थितविंदौतुतेनैवचनियोजयेत्॥ ठमितिचंद्रबीजंशुक्लवर्णंवामनासिकायांध्यात्वा तस्यषोडशवारजपेनललाटेचंद्रंनी
त्वानासापुटौधृत्वा वमितिवरुणबीजस्यचतुःषष्टिवारजपेनतस्माल्ललाटेचंद्राद्गलितसुधयामातृकावर्णात्मिकयासमस्तदेहंविरचय्यलमिति
पृथ्वीबीजस्यद्वात्रिंशद्वारजपेनदेहंसुदृढंविचिंत्यदक्षिणेनवायुंरेचयेत्॥ पुनःसुषुम्नावर्त्मनाहंसइतिमंत्रेणजीवादिकंस्थानेस्थापयेत्॥ मात्रा
संख्ययावा॥ तदुक्तंगौतमीये॥ सुषुम्नावर्त्मना सोहमितिमंत्रेणयोजयेत्॥ सहस्रारेशिवेस्थानेपरमात्मनिदेशिकः॥ धूम्रवर्णंततोवायुबीजं
बिंदुलांछितम्॥ पूरयेदिडयावायुंसुधीःषोडशमात्रया॥ मात्रयातुचतुःषष्ट्याकुंभयेच्चसुषुम्णया॥ द्वात्रिंशन्मात्रयामंत्रीरेचयेत्पिंगला॥
ख्यया॥ पूरयेदनयाचैवसंचिंत्यनीलमारुतम्॥ रक्तवर्णवह्निंतेनपूरकयोगेनमात्रयाषोडशाख्यया॥ चतुःषष्ट्यामात्रयाचनिर्दहेत्कुंभकेनतु
॥ वामपार्श्वस्थितंपापपुरुषंकज्जलप्रभं॥ ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुजद्वयम्॥ सुरापानहृदायुक्तंगुरुतल्पकटिद्वयम्॥ तत्संसर्गि
पदद्वंद्वमंगप्रत्यंगपातकं॥ उपपातकरोमाणंरक्तश्मश्रुविलोचनम्॥ खड्गचर्मधरंक्रुद्धमेवंकुक्षौविचिंतयेत्॥ मूलाधारोत्थितेनैववह्नि
नानिर्दहेच्चतं॥ एवंसंदह्यपरितोद्वात्रिंशन्मात्रयाततः॥ भस्मनासहितंमंत्रीरेचयेदिडयापुनः॥ वामनाड्याचंद्रबीजंकुंदेन्दुसदृशप्रभं॥ भा
लेन्दुराजेसंयोज्यततःषोडशमात्रया॥ सुषुम्नयाचतुःषष्टिमात्रयातोयबीजकैः॥ ध्यात्वामृतमयींदृष्टिंपंचाशद्वर्णरूपिणीं॥ तथारे [illegible]
बीजंत्रिकोणस्वस्तिकान्वितं॥५

धन

॥बीजभैरवं॥१

चिंसेवं मनसा पिंगलाध्वना॥ द्वात्रिंशन्मात्रया मंत्री लंबीजेन दृढं नयेत्॥ स्वस्थाने हंसमंत्रेण पुनस्तेनैव वर्त्मना॥ जीवं नत्वा निच: [illegible]
स्थाने स्थापयेत्ततः॥ इति कृत्वा भूतशुद्धिं मातृकान्यासमाचरेत्॥ ततो हंस इति मंत्रेण जीवं हृदयमानीय कुलकुंडलिनीं पृथिव्यादीनि य
थास्थाने स्थापयेत्॥ विशेषस्तु शक्तिविषये॥ हंस इति जीवादिकं परमशिवे संयोज्य सोहमिति मंत्रेण स्वस्थाने स्थापयेत्॥ तथा च तंत्रां
तरे॥ सोहमेवं समाभाष्य जीवं हृदि समानयेत्॥ शूद्रे तु विशेषो वाराहीतंत्रे॥ हंसाख्यं न स्मरेत् शूद्रो भूतशुद्धौ कदाचन॥ स्मरणान्नरकं
याति दीक्षा च विफला भवेत्॥ यत्तु शारदायाम्॥ जीवं तेजोमयं ध्यात्वा नमो मंत्रेण योजयेत्॥ एतच्छूद्रविषयं भूतशुद्धिपरत्वमुपपत्तिमाह विशुद्धेश्व
रे॥ शरीराकारभूतानां भूतानां यद्विशोधनं॥ अव्ययब्रह्मसंयोगाद्भूतशुद्धिरियं मतेति॥ वाराहीये॥ मूलाधारात्ततो जीवं ब्रह्ममार्गेण देशिकः॥ हंसे
न पुष्करस्थाने परमात्मनि योजयेत्॥ ब्रह्ममार्गः सुषुम्णा॥ त्रिपुरासारसमुच्चये॥ संयोज्य जीवमथ दुर्गमध्यनाडीमार्गेण पुष्करनिविष्टशिवे
सुसूक्ष्मे॥ ज्ञानार्णवे॥ प्राणप्रतिष्ठायाः पश्चात् जीवं देहे निधापयेत्॥ मुखवृत्तं समुच्चार्य हंसस्तु विपरीतकः॥ उद्धरेत् परमेशानि विद्येयंन्यस्त
रीमता॥ प्राणप्रतिष्ठामंत्रोयं सर्वकर्माणि साधयेत्॥ तेनैव विधिना देवि स्थिरीकुर्यान्निजां तनुं॥ पुरश्चरणचंद्रिकायाम्॥ अथवान्यप्रकारेण
भूतशुद्धिर्विधीयते॥ धर्मकंदसमुद्भूतं ज्ञाननालं सुशोभनम्॥ ऐश्वर्याष्टदलोपेतं परवैराग्यकर्णिकं॥ स्वीयहृत्कमले ध्यायेत्प्रणवेन विकासित
म्॥ जीवात्मानं हृदि ध्यायेत्प्रणवेन विकासितं॥ जीवात्मानं हृदि ध्यात्वा मूले संचिंत्य कुंडली॥ सुषुम्णावर्त्मनात्मानं परमात्मनि योजयेत्॥ ततो
मातृकान्यासः॥ ॐ अस्य मातृकामंत्रस्य ब्रह्मऋषिर्गायत्रीछंदो मातृका सरस्वती देवता हलो बीजानि स्वराः शक्तयो लिपिन्यासे विनियोगः॥
शिरसि ब्रह्मणे ऋषये नमः॥ मुखे गायत्रीछंदसे नमः॥ हृदि मातृकासरस्वत्यै देवतायै नमः॥ गुह्ये व्यंजनेभ्यो बीजेभ्यो नमः॥ पादयोः स्वरे

भ्यःशक्तिभ्योनमः॥तथाचज्ञानार्णवे॥मातृकांशृणुदेवेशिन्यसेत्पापनिकृन्तनीं॥ऋषिर्ब्रह्मास्यमंत्रस्यगायत्रीछंदउच्यते॥देवता॥मातृकादेवीबी-
जंव्यंजनसंचयम्॥शक्तयस्स्वरादेविषडंगन्यासमाचरेत्॥ततःकरांगन्यासो॥अंकंखंगंघंङं आंअंगुष्ठाभ्यांनमः॥इंचंछंजंझंञं ईंतर्जनी-
भ्यांस्वाहा॥उंटंठंडंढंणंऊंमध्यमाभ्यांवषट्॥एंतंथंदंधंनंऐंअनामिकाभ्यांहुं॥ओंपंफंबंभंमं औंकनिष्ठिकाभ्यांवौषट्॥अंयंरंलंवंशंषंसंहंळंक्षं
अःकरतलकरपृष्ठाभ्यांफट्॥एवंहृदयादि॥अंपृआंहृदयायनमःइत्यादि॥तथाचज्ञानार्णवे॥अंआंमध्येकवर्गंतु ईंईंमध्येचवर्गकं॥उंऊं
मध्येटवर्गंतु एंऐंमध्येतवर्गकं॥ओंऔंमध्येपवर्गंतुबिंदुयुक्तंन्यसेत्प्रिये॥अनुस्वारविसर्गान्तौयशवर्गौषडंगोयंमातृकायाःसर्वपापहरःस्मृ-
तः॥अथान्तर्मातृका॥अकारादिषोडशस्वरान्सबिंदून्षोडशदलकमलेकंठमूलेन्यसेत्॥ककारादिद्वादशवर्णान्सबिंदून्द्वादशकमलेहृ-
दयेन्यसेत्॥डकारादिदशवर्णान्सबिंदून्दशदलकमलेनाभौन्यसेत्॥वकारादिषड्वर्णान्सबिंदून्षड्दलकमलेलिंगमूलेन्यसेत् वका-
रादिचतुरोवर्णान्सबिंदूंश्चतुर्दलकमलेमूलाधारेन्यसेत्॥हक्षवर्णद्वयंद्विदलपद्मेभ्रूमध्येन्यसेत्॥तथाचज्ञानार्णवे॥द्व्यष्टपत्रा-
म्बुजेकंठेस्वरान्षोडशविन्यसेत्॥द्वादशच्छदहृत्पद्मेकादीन्द्वादशविन्यसेत्॥दशपत्राम्बुजेनाभौडकारादीन्न्यसेद्दश॥षट्प-
त्रमध्येलिंगस्थेव कारादीन्न्यसेच्चषट्॥आधारेचतुरोवर्णान्न्यसेद्वादींश्चतुर्दले॥हक्षौभ्रुमध्यगेपद्मेद्विदले विन्यसेत्प्रिये॥इत्यंत-
र्मातृकान्यस्यसर्वांगेन्यासमाचरेत्॥अगस्त्य संहितायां॥एकैकंवर्णमेकैकपत्रान्तर्विन्यसेत्प्रिये॥ एवंमंत्रीप्रविन्यस्यमनसाततोबहिर्न्यसेत्
॥वैस्मवेतु॥एकैकंवर्णमुच्चार्यमूलाधाराच्छिरोऽन्तिकम्॥नमोऽन्तमितिविन्यासश्चान्तरःपरिकीर्तितः॥अथान्तर्मातृकान्यासोमूलाधारे
चतुर्दले॥स्व र्णाभेचवशषसैश्चतुर्वर्णैर्विभूषिते॥षड्दलेविद्युतनिभेस्वाधिष्ठानेनलत्विषि॥बभमैर्यरलैर्युक्तैःवर्णैःषड्भिश्चसुव्रते॥म

त्रु॥८॥सलक्षकौ॥हृदयंचशिरोदेविशिखायांकवचंतथा॥नेत्रमस्त्रंन्यसेत्ङेंतंनमःस्वाहाक्रमेणतु॥वषट्हुंवौषडंतंच ----- फडंतंयोजयेत्प्रिये॥९॥

णिपूरे दशदले नीलजीमूतसन्निभे॥ डादिफांतदलैर्युक्ते बिंदुद्वासितमस्तके॥ अनाहते द्वादशारे प्रवालरुचिसन्निभे॥ कादिठांतदलैर्युक्ते य
नाहृदयंगमे॥ विशुद्धे षोडशदले धूम्राभे स्वरभूमिते॥ आज्ञाचक्रे तु चंद्राभे द्विदले हक्षलांछिते॥ सहस्रारे हिमनिभे सर्ववर्णविभूषिते॥ अ
क थादित्रिरेखात्म हलक्षत्रयभूषिते॥ तन्मध्ये परबिंदुं च सृष्टिस्थितिलयात्मकम्॥ एवं समाहितमना ध्यायेन्न्यासोऽयमांतरः॥ ततो बाह्यमा
तृकाध्यानम्॥ पंचाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षस्थलाम् भास्वन्मौलिनिबद्धचंद्रशकलामापीनतुंगस्तनीम्॥ मुद्रामक्षगुणं सुधा
ढ्यकलशं विद्यां च हस्तांबुजे बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये॥ एवं ध्यात्वा न्यसेत्॥ तत्रांगुलिनियमस्तंत्रे॥ ललाटे नामि
कामध्ये विन्यसेन्मुखपंकजे॥ तर्जनीमध्यमानामावृद्धानामा च नेत्रयोः॥ अंगुष्ठं कर्णयोर्न्यस्य कनिष्ठांगुष्ठकौ नसोः॥ मध्यास्तिस्रो गंडयोश्च म
ध्यमां चोष्ठयोर्न्यसेत्॥ अनामां दंतयोर्न्यस्य मध्यमामुत्तमांगके॥ मुखेऽनामां मध्यमां च हस्तपादेऽथ पार्श्वयोः॥ कनिष्ठानामिकामध्यास्तास्तु पृष्ठे
च विन्यसेत्॥ ताः सांगुष्ठा नाभिदेशे सर्वाः कुक्षौ च विन्यसेत्॥ हृदये च तलं सर्वमंसयोश्च ककुत्स्थले॥ हृत्पूर्वं हस्तपत्कुक्षिमुखेषु तलमे
व च॥ एताश्च मातृकामुद्राः क्रमेण परिकीर्तिताः॥ निरस्त्वमाह तत्रैव। अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य निष्फलः॥ तथा च गौतमीये॥ ल
लाटमुखवृत्ताक्षिश्रुतिघ्राणेषु गंडयोः॥ ओष्ठदंतोत्तमांगास्यदोःपत्संध्यग्रकेषु च॥ पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेंऽसके॥ ककुद्यंसे च हृत्पूर्वं
पाणिपादयुगे तथा॥ जठराननयोर्न्यस्येन्मातृकार्णान् यथाक्रमात्॥ तद्यथा॥ अं नमो ललाटे॥ आं नमो मुखवृत्ते॥ इं ईं च चक्षुषोः॥ उं ऊं कर्णयोः
॥ ऋं ॠं नसोः॥ लृं लॄं गंडयोः॥ एं ओष्ठे॥ ऐं अधरे॥ ओं ऊर्ध्वदंतपंक्तौ॥ औं अधोदंते॥ अं ब्रह्मरंध्रे॥ अः मुखे॥ कं बाहुमूले॥ खं कूर्परे॥ गं मणिबं
धे॥ घं अंगुलीमूले॥ ङं अंगुल्यग्रे॥ एवं चं ५ वामबाहुमूलसंध्यग्रकेषु॥ एवं टं ५ दक्षिणपादमूलसंध्यग्रकेषु॥ तं ५ वामपादमूलसंध्यग्रकेषु॥

रसनाग्रे॥२

पंदक्षिणपार्श्वे॥ फंवामपार्श्वे॥ बंपृष्ठे॥ भंनाभौ॥ मंजठरे॥ यंहृदि॥ रंदक्षबाहुमूले॥ लंककुदि॥ वंवामबाहुमूले॥ शंहृदादिदक्षिणकरे ॥षंहृदादिवामकरे॥ संहृदादिदक्षपदे॥ हंहृदादिवामपदे॥ ळंहृदाद्युदरे॥ क्षंहृदादिमुखे॥ सर्वत्रनमोऽन्तान्न्यसेत्॥ अथसंहारमातृकान्यासः॥ तस्याध्यानम्॥ अक्षस्रजंहरिणपोतमुदग्रटंकविद्याः करैरविरतंदधतींत्रिनेत्राम्॥ अर्द्धेन्दुमौलिमरुणामरविंदवासां वर्णेश्वरीं प्रणमतस्तनभारनम्रां॥ न्यासश्चक्षकाराद्यकारान्तः॥ यथा॥ क्षंनमोहृदादिमुखेइत्यादिन्यासोयमनेकविधः॥ तथाच ॐमाद्यन्तोनमोऽन्तोवासबिंदुर्बिन्दुवर्ज्जितः॥ पंचाशद्वर्णविन्यासः क्रमादुक्तोमनीषिभिरितिभट्टः॥ अपरंच॥ चतुर्द्धामातृकाप्रोक्ताकेवलाबिन्दुसंयुता॥ सविसर्गासोभयाचैवरहस्यंशृणुकथ्यते॥ विद्याकरीकेवलाचसोभया भक्तिदायिनी॥ पुत्रदासविसर्गातुसबिंदुर्वित्तदायिनी॥ विशुद्धेश्वरे॥ वाग्भवाद्याचवाग्सिद्ध्यैरमाद्याश्रीप्रवृद्धये॥ हृल्लेखाद्यासर्वसिद्ध्यैकामाद्यालोकवश्यदा॥ श्रीकंठाद्यानिमान्यस्य सर्वमंत्रःप्रसीदति ॥श्रीविद्याविषयेनवरत्नेश्वरे॥ वाग्भवाद्यानमोन्ताश्चन्यस्तव्यामातृकास्वराः॥ श्रीविद्याविषयेमंत्रीवाग्भवाद्यंप्रसिद्धये॥ यामले०॥ भूतशुद्धिंलिपिन्यासौविनायस्तुप्रपूजयेत्॥ विपरीतफलंदद्याद्भक्त्यापूजनंयथा॥ सामान्यन्यासेअंगुलिनियमस्तु गौतमीये॥ मनसाविन्यसेन्न्यासान्पुष्पेणैवाथवामुने॥ अंगुष्ठानामिकाभ्यांवाचान्यथाविफलंभवेत्॥ विशेषन्यासेतुनायंनियमः॥ श्यामादिविद्यायांविशेषोमातृकान्यासेवक्तव्यः॥ अथप्राणायामेअंगुलिनियमस्तु॥ ज्ञानार्णवे॥ भूतशुद्धिंततःकुर्यात्प्राणायामक्रमेणतु॥ कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणम्॥ प्राणायामःसविज्ञेयस्तर्ज्जनीमध्यमेविना॥ प्राणायामोद्विविधः॥ सगर्भोनिर्गर्भश्च॥ तथाच॥ सगर्भोमंत्रजापेननिर्गर्भोमात्रयाभवेत्॥ मात्राच॥ वामजानुनितैस्तैर्भ्रमणंयावताभवेत्॥ कालेनमात्रासाज्ञेयामुनिभिर्वेदपारगैः ॥ अथप्राणायामः॥

हस्तस्पर्शा॥१

मूलमंत्रस्यबीजस्यप्रणवस्यवाषोडशवारजपेनवामनासापुटादिनावायुपूरणादिकंकुर्य्यात्॥तथाचकालीहृदये॥प्राणायामत्रयंकुर्य्यान्मूले
नप्रणवेनवा॥अथवामंत्रबीजेनयथोक्तविधिनासुधीः॥यथा॥तस्यषोडशवारजपेनवायुंपूरयेत्॥तस्यचतुःषष्टिवारजपेनवायुंकुं
भयेत्॥तस्यद्वात्रिंशद्वारजपेनवायुंरेचयेत्॥पुनर्दक्षिणेनापूर्य्यउभाभ्यांकुंभयित्वावामेनरेचयेत्॥पुनर्वामेनापूर्य्यउभाभ्यांकुंभयित्वाद
क्षिणेनरेचयेत्॥सारसमुच्चये॥विपरीतमतोविदधीतबुधःपुनरेवतु नहिपरीतमिति॥यौगिकेपुनर्म्मात्रानियमः॥तथाचगौतमीये॰मंत्र
प्राणायामःप्रोक्तोयौगिकंकथयामिते॥पूरयेद्वामयाविद्वान्मात्राषोडशसंख्ययेत्यादि॥यद्वाचतुःषोडशाष्टवारजपेनपूरकादिकंकुर्य्या
त्॥तथाचतंत्रांतरे॥पूरयेत्षोडशभिर्वायुंधारयेत्तच्चतुर्गुणैः॥रेचयेत्कुंभकार्द्धेनअशक्यातत्तुरीयकैः॥तदशक्तौतच्चतुर्थमेवंप्राणस्यसंय
मः॥तस्यनित्यतामाहसएव॥प्राणायामंविनामंत्रपूजनेनहियोग्यता॥गोपालेतुविशेषोवक्तव्यः॥ततःपीठन्यासः॥ॐआधारशक्त्येन
मः॥ॐप्रकृत्यैनमः॥एवंकूर्म्मायअनंतायपृथिव्यैक्षीरसमुद्रायश्वेतद्वीपायमणिमंडपायकल्पवृक्षायमणिवेदिकायैरत्नसिंहासनाय
एतन्सर्वंहृदि॥ततोदक्षिणस्कंधेधर्म्मायनमः॥वामस्कंधेज्ञानायनमः॥वामोरौवैराग्याय॥दक्षिणोरौऐश्वर्य्याय॥मुखेअधर्म्माय॥वामपा
र्श्वेअज्ञानाय॥नाभौअवैराग्याय॥दक्षपार्श्वे अनैश्वर्य्याय॥सर्वत्रप्रणवादिनमोऽन्तेनपूजयेत्॥तथाचशारदायाम्॥अंसोरुयुग्मयोर्वि
द्वान्प्राद्दक्षिण्येनसाधकः॥धर्म्मंज्ञानंचवैराग्यंऐश्वर्य्यंक्रमशःसुधीः॥मुखपार्श्वेनाभिपार्श्वेष्वधर्म्मादींश्प्रकल्पयेत्॥इत्यादि॥हृदि ॐ
अनंतायनमः॥एवंपद्माय॰दलेभ्यःकेसरेभ्यःकर्णिकायै॥अंसूर्य्यमंडलायद्वादशकलात्मनेनमः॥उंसोममंडलायषोडशकलात्मनेनमः॥मंव
आंनंदकंदाय।संविन्नालाय॥१॥

तं०सा० ह्निमंडलाय दशकलात्मने नमः॥ सं सत्वाय रं रजसे तं तमसे आं आत्मने अं अन्तरात्मने पं परमात्मने ह्रीं ज्ञानात्मने नमः इत्यंतं विन्यस्य हृत्पद्मस्य पू
३२ र्वादिकेसरेषु पीठशक्तीर्मध्ये पीठमनुं च न्यसेत्॥ तथा शारदायाम्॥ अनंतं हृदये पद्मं तस्मिन्सूर्येन्दुपावकान्॥ एषु स्वस्वकलां न्यस्य नामाद्य
क्षर पूर्ववत्॥ सत्वादीन् त्रिगुणान्न्यसेत्तथैवात्र गुरूत्तमः॥ आत्मानमंतरात्मानं परमात्मानमेव च॥ ज्ञानात्मकं प्रविन्यस्य न्यसेत् पीठमनुं ततः
॥ तत्र ऋष्यादिन्यासः॥ ऋषिस्तु महेश्वरमुखाद् ज्ञात्वा यः साक्षात्तपसा मनुं॥ संसाधयति शुद्धात्मा स तस्य ऋषिरीरितः॥ गुरुत्वान्मस्तके चास्य न्या
सस्तु परिकीर्तितः॥ सर्वेषां मंत्रतत्वानां छादनाच्छंद उच्यते॥ अक्षरत्वात्पदत्वाच्च मुखे छंदः समीरितं॥ सर्वेषामेव जंतूनां भाषणात्प्रेरणात्त
था हृदयांभोजमध्यस्थां देवतां तत्र तां न्यसेत्॥ ऋषिछंदोपरिज्ञानान्न मंत्रः फलभाग्भवेत्॥ दौर्बल्यं याति मंत्राणां विनियोगमजानतां॥ तं चांत
षे॥ ऋषिं न्यसेन्मूर्द्धिदेशे छंदस्तु मुखपङ्कजे॥ देवतां हृदये चैव बीजं तु गुह्यदेशके॥ शक्तिं च पादयोश्चैव सर्वांगे कीलकं न्यसेत्॥ ततस्तन्मंत्रो
क्तन्यासान्कुर्य्यात्॥ तदुक्तं कुलार्णवे॥ आगमोक्तेन विधिना नित्यं न्यासं करोति यः॥ देवताभावमाप्नोति मंत्रसिद्धिः प्रजायते॥ यो न्यासकवचे
छन्नो मंत्रं जपति तं प्रिये॥ विघ्ना दृष्ट्वा पलायंते सिंहं दृष्ट्वा यथा गजाः॥ अकृत्वा न्यासजालं यो मूढत्वात्प्रजपेन्मनुं॥ सर्वविघ्नैः स बाध्यः स्या
द्व्याघ्रैर्मृगशिशुर्यथा॥ अंगन्यासे अंगुलीनियमस्तु॥ त्रिद्व्येकदशकद्वित्रिसंख्यया शैलसंभवे॥ अंगुलीनामिति वचनादिति सर्वसाधार
णं॥ यामले॥ हृदयं मध्यमानामतर्ज्जनीभिः स्मृतं शिरः॥ मध्यमातर्ज्जनीभ्यां स्यादंगुष्ठेन शिखा स्मृता॥ दशभिः कवचं प्रोक्तं तिसृभिर्नेत्रमीरि राम०
तं॥ प्रोक्तांगुलिभ्यामस्त्रं स्यादंगक्लृप्तिरियं मतेति॥ तिसृभिस्तर्ज्जनीमध्यमानामाभिः॥ तर्ज्जनीमध्यमानामा प्रोक्ता नेत्रत्रये क्रमात्॥ यदा नेत्रद्वयं प्रो ३२

ष्ठं तदा तर्ज्जनीमध्यमे इति भट्टधृतवचनात्॥ हृदयादिषु विन्यस्येदंगमंत्रांस्ततः सुधीः॥ हृदयाय नमः पूर्व्वं शिरसे वह्निवल्लभा॥ शिखायै वषडि
त्युक्तं कवचाय हुमीरितं॥ नेत्रत्रयाय वौषट् स्यादस्त्राय फडिति क्रमात्॥ षडंगमंत्रानित्युक्त्वा षडंगेषु नियोजयेत्॥ पंचांगानि मनोर्यत्र तत्र नेत्रमनुं त्य
जेत्॥ इति शारदावचनम्॥ वैस्नवे तु॥ अनंगुष्ठा ऋजवो हस्तशाखा भवेन्मुद्रा हृदये शीर्षके च॥ अधोऽङ्गुष्ठा खलु मुष्टिः शिखायां करद्वन्द्वांगुल
योर्वर्म्मणि स्युः॥ नाराचमुष्ट्युधृतबाहुयुग्मकांगुष्ठतर्ज्जन्युदितो ध्वनिस्त्र॥ विष्वग्विभक्तः कथितास्त्रमुद्रा यत्राक्षिणी तर्ज्जनिमध्यमे च॥ शारदाया
म्॥ न्यासक्रमेण देहेषु धर्म्मादीन् पूजयेत्ततः॥ पुष्पाद्यैः पीठमन्त्रं तेन स्मिंश्च परदेवताम् इति वचनात् शरीरे पीठपूजा॥ अंगहीनस्य मंत्रस्य
स्वेनैवांगानि कल्पयेत्॥ तथा च ब्रह्मयामले॥ स्वनामाद्यक्षरं बीजं सर्व्वेषामभिधीयते॥ ततस्तत्तत्कल्पोक्तमुद्राः प्रदर्श्य ध्यानं कृत्वा मानसैः
संपूज्य शंखस्थापनं कुर्य्यात्॥ तथा च सनत्कुमारतंत्रे॥ अकृत्वा मानसं यागं तत्कुर्य्याद्बहिरर्च्चनं॥ शंखस्थापनं तु दीक्षाप्रकरणे उक्तम्॥ ततः
शरीरे धर्म्मादिपूजा ततः पीठपूजा॥ पीठस्योत्तरे गुरुपंक्तीः पूजयेत्॥ यथा वायव्यादीशपर्य्यन्तं ॐ गुरुभ्यो नमः॥ ॐ परमगुरुभ्यो नमः॥ ॐ परा
परगुरुभ्यो नमः॥ ॐ परमेष्ठिगुरुभ्यो नमः॥ त्रिपुरादौ विशेषगुरुपूजा वक्तव्या॥ पीठस्य दक्षिणे ॐ गणेशाय नमः॥ पीठमध्ये ॐ आधारशक्त्यै
नमः॥ एवं कूर्म्माय शेषाय पृथिव्यै क्षीरसमुद्राय श्वेतद्वीपाय मणिमंडपाय कल्पवृक्षाय मणिवेदिकायै रत्नसिंहासनाय पद्ममालाय पद्मा
य अग्निकोणे धर्म्माय नैर्ऋतीवायव्येशानेषु ज्ञानवैराग्यमैश्वर्य्यं च पूजयेत्॥ ततः पूर्व्वादिचतुर्दिक्षु अधर्म्माज्ञानवैराग्यानैश्वर्य्यान् पूजयेत्
॥ मध्ये अनंतादिं ह्रीं ज्ञानात्मनेनमइत्यंतं प्रपूज्य पूर्व्वादिकेशरेषु मध्येषु च तत्तत्कल्पोक्तपीठशक्तीः संपूज्य पीठमनुं पूजयेत्॥ तारादिविद्यादौ वि
शेषो वक्तव्यः॥ पूर्व्वादिदिङ्नियमस्तु यामले॥ पूज्यपूजकयोर्मध्यं प्राचीति कीर्त्यते बुधैः॥ तद्दक्षिणं दक्षिणं स्यादुत्तरं चोत्तरं मतम्॥ एवं तु पश्चिमं ते प

सर्वत्रैवं प्रयोजयेत्॥ इति पुंदेवतापरम्॥ पुरंदरमुखो मंत्री पद्मायंत्रं प्रपूजयेत्॥ देवी पश्चात्तदा प्राचीप्रतीचीदेवता पुनः॥ एवमुत्तराभिमुखो भूत्वा यदा देवि प्रपूजयेत्॥ उत्तरास्या यदा देवि पूर्वास्येव निगद्यते॥ ईशानकोणं देवेशि तदाग्नेयं प्रचक्षते॥ इति ज्ञानार्णवे श्रीक्रमवचनात्॥ अनेन विधिना मंत्री पूर्वादौ पूजनं चरेत्॥ आवाहने तु विशेषो यथा॥ आगमकल्पद्रुमे॥ मूलमंत्रं समुच्चार्य सुषुम्णावर्त्मना सुधीः॥ आनीय तेजः स्वस्थानान्नासिकारंध्रनिर्गतम्॥ करस्थमातृकांभोजे चैतन्यं पुष्पसंचये॥ संयोज्य यंत्रमध्ये तत् संस्थाप्यावाहयेत्ततः॥ अविशेषे यंत्रनियमस्तु मत्स्यसूक्ते॥ अनुक्तकल्पे यंत्रं तु लिखेत्पद्मदलाष्टकम्॥ षट्कोणकर्णिकं तत्र वेदद्वारोपशोभितम्॥ ततः पुनर्ध्यात्वावाहनादिप्रतिष्ठांतं कर्म कुर्यात्॥ ततः षोडशोपचारैः पंचोपचारैर्वा पूजयेत्॥ षोडशोपचारनियमस्तु मत्स्यसूक्ते॥ आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकं॥ मधुपर्काचमनस्नानवसनाभरणानि च॥ सुगंधिसुमनोधूपदीपनैवेद्यवन्दनं॥ प्रयोजयेदर्चनायामुपचारांस्तु षोडश॥ कालिकापुराणे षोडशोपचारा यथा॥ आसनं पाद्यमर्घ्यं च तथा आचमनीकं॥ मधुपर्कं तथा स्नानं वस्त्रं चंदनभूषणं॥ पुष्पं धूपं च दीपं च नेत्रांजनमतः परं॥ नैवेद्याचमनीयं तु प्रदक्षिणनमस्कृतं॥ एते षोडश निर्दिष्टा उपचारास्तु पूर्वतः॥ अथवा एषामभावे पंचोपचारान् कल्पयेत्॥ गंधादयो नैवेद्यांताः पूजाः पंचोपचारिकाः इति॥ विष्णुविषये तु॥ अर्घ्याद्याः पंच पंचैव गंधाद्या इति भेदतः॥ प्रयोजयेदर्चनायामुपचारान् दशक्रमात्॥ पुष्पपर्यंतमुपचारं तत्तन्मंत्रेण दत्वा षडंगेन पूजयेत्॥ पुष्पदाने तु विशेषः॥ पुष्पं वा यदि वा पत्रं फलं नेष्टमधोमुखम्॥ दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्पणं॥ अधोमुखं फलं नेष्टं पुष्पांजलिविधौ न च॥ विल्वदलदलसमर्पणे तु विशेषः शेवतंत्रे॥ वामपत्रे वसेद्ब्रह्मा पद्मनाभश्च दक्षिणे॥ मध्यपत्रे वसेत्साक्षात्सांबः सर्वार्थदायकः॥ इंद्रादयो लोकपाला वृंताग्रे परिकीर्तिताः॥ यक्षाः पिशाचा रक्षाश्च पृष्ठभागे प्रकीर्तिताः॥ तस्माद्देवि पूर्वभागेन अर्चयेद्गिरिजापतिं॥ ततो मूर्द्धगुह्यपादसर्वांगकेषु मूलेन पंचपुष्पांजलीन् दत्वा तेन तत्कल्पोक्तावरणपूजा

कुर्य्यात्॥ तथाच॥ पंचपुष्पांजलीन्दत्वा परिवारार्च्चनं चरेदिति भट्टः॥ ततो धूपदीपौ दद्यात्॥ तद्यथा॥ जयध्वनिमंत्रमातः स्वाहेति पुष्पाक्षतैर्घंटां संपूज्य वामहस्तेन तां वादयन् तत्तन्मंत्रेण नीचैर्धूपं दद्यादेवं दृष्टिपर्य्यंतं दीपं दद्यात्॥ ततो मूलेन पुष्पांजलित्रयं दत्वा नैवेद्यमानीय फडिति संप्रोक्ष्य चक्रमुद्रयाभिरक्ष्य तदुपरि मूलमंत्रमष्टधा जप्त्वा धेनुमुद्रयामृतीकृत्य मूलमुच्चार्य्य नैवेद्यं दद्यात्॥ तस्मात्राणियामले॥ तैजसेषु च पात्रेषु सौवर्णे राजते तथा॥ ताम्रे वा प्रस्तरे वापि पद्मपत्रेऽथवा पुनः॥ यत्तदारुमये वापि नैवेद्यं कल्पयेद्बुधः॥ सर्वाभावे च माहेये स्वहस्तघटिते यदि॥ तथा॥ यतोयमर्घ्यपात्रस्य तन्निधायनिवेदयेत्॥ अन्यतोयैस्तदुत्सृष्टमर्घ्यपात्रे स्थितेतरैः॥ न गृह्णाति महादेवि दत्तं विधिशतैरपि इतिवचनाद्यावदुपचारं अर्घ्यपात्रस्थजलेनोत्सृज्य दद्यात्॥ ततः पुनराचमनीयं तांबूलादि दद्यात्॥ वैस्नवे तु नैवेद्ये विशेषो वक्तव्यः॥ ततः सपरिवारदेवतां गंधादिभिरभ्यर्च्य नृत्यगीतैर्देवं संतोष्य जपयजपेत्सुस्नाविशेषार्घ्यं दत्वा ततः पुष्पांजलिं दद्यात्॥ दाने तु॥ आदौ मूलं ततो द्रव्योल्लेखः ततः संप्रदानम् ततस्त्यागात्मकं पदमिति सर्वत्र॥ तथाच कुलार्णवे॥ आदौ मंत्रं समुच्चार्य्य पश्चाद्देयं समुच्चरेत्॥ संप्रदान्नतदं तेनुसागार्थ्येकपदं ततः॥ एवं क्रमेण देवेशि उपचारान्प्रकल्पयेत्॥ मंत्रांते कर्म्मसन्निपात इति न्यायाच्च॥ ततश्चुलुकोदकमादाय ॐ इतःपूर्वं प्राणबुद्धिदेहधर्म्माधिकारितो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा हस्ताभ्यामुदरेण शिश्नाय स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्प्पणं भवतु स्वाहा मांमदीयं सकलसम्यगमुकदेवतायै अर्प्पये ॐ तत्सत्॥ नमस्कारानंतरं वा॥ ततोऽष्टोत्तरशतं सहस्रं वा जप्त्वा॥ ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थिते॥ अन्यत्र गोप्त्री देवीति विशेषः॥ इति जपं समर्प्य स्तुत्वाऽष्टांगप्रणामं कुर्य्यात्॥ अष्टांगो यथा॥ पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा॥ वचसा मनसा चेति प्रणामोऽष्टांग ईरितः॥ बाहुभ्यां चैव जानुभ्यां शिरसा वचसा दृशा॥ पंचांगोयं प्रणामः स्यात्पूजासु प्रवराविमौ॥ भूमौ निपत्य यः कुर्य्यात् दंडोऽष्टांगन

त्तिंसुधीः॥सहस्रजन्मजं पापं त्यक्त्वा वैकुंठमाप्नुयात्॥तथा॥वेदविद्भ्यो धरां दत्त्वा यत्फलं लभते नरः॥तत्फलं लभते भक्त्या कृत्वैकत्वाप्रदक्षिणम्॥ कृत्वाइत्युपलक्षणं॥विश्वसारे॥शंखहस्तेन सर्वत्र दक्षिणं परिकीर्त्तितं॥नतिविशेषस्तु यामले॥त्रिकोणकारा सर्वत्र नतिः शक्तेः समीरिता॥दक्षिणाद्वायवीं गत्वा दिशं तस्याश्च शांभवीम्॥ततश्च दक्षिणां गत्वा नमस्कारस्त्रिकोणवत्॥अर्द्धचंद्रं महेशस्य पृष्ठतश्च समीरिता॥शिवप्रदक्षिणे मंत्री अर्द्धचंद्रक्रमेण तु॥सव्यासव्यक्रमेणैव सोमसूत्रं न लंघयेत्॥सोमसूत्रं जलनिःसारणस्थानम्॥स्थावरे विशेषस्तंत्रांतरे॥वृषं चंडं वृषं चैव सोमसूत्रं पुनर्वृषं॥चंडं च सोमसूत्रं च पुनश्चंडं पुनर्वृषम्॥ प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः॥दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिणः ॥ त्रिधा च वेष्टयेत् सम्यक् देवतायाः प्रदक्षिणं॥एकहस्तप्रणामश्च एकं वापि प्रदक्षिणं॥ अकाले दर्शनं विष्णोर्हंति पुण्यं पुराकृतम्॥ततो देवतांगेष्वावरणदेवता विलाप्य क्षमस्वेति विसर्जनं कृत्वा संहारमुद्रयामतेजः पुष्पैः सार्द्धं स्वहृदयमानयेत्॥ तथा च॥ निधाय देवतां पश्चात्स्वीये हृत्सरसीरुहे॥सुषुम्णावर्त्मना पुष्पमाघ्रायोद्वासयेत्ततः॥ततऐशान्यां मंडलिकां कृत्वा निर्म्माल्यशेषं दद्यादिति॥ वैष्णवे तु॥ ॐ विष्वक्सेनाय नमः॥शाक्ते ॐ शेषिकायै नमः॥शिवे चंडेश्वराय नमः॥सूर्ये तेजश्चंडाय नमः॥ गाणेशे उच्छिष्टगणेशाय नमः॥ कालिकादौ उच्छिष्टचांडालिन्यै नमः ॥तथा च॥ विष्वक्सेनः स्मृतो विष्णोस्तेजश्चंडो विवस्वत इत्यादि॥तथा च॥विद्यानंदनिबंधे· सूर्ये गणपतावुग्रे शाक्ते शैवेऽथ वैष्णवे॥तेजश्चंडमथोच्छिष्टसोजोमूच्छिष्टपूर्विकां॥चांडालिनीं शेषिकां च चंडं विष्वक्सेनं क्रमाद्यजेत्। उनाश्च भुनावर्त्तनइति सोदुर्गातेजोगणेशः ततः पादोदकं च पीत्वा नैवेद्यं किंचित्स्वीकृत्यान्यद्यथायोग्याय दत्त्वा यथासुखं विहरेदिति॥मत्स्यसूक्ते॥अनिवेद्य न भुंजीत मत्स्यमांसादिकं तु यत्॥अन्नं विष्ठा पयो मूत्रं यद्विष्णोरनिवेदितम् ॥ विष्णुरितितत्तद्देवताप

रम्॥ तथाभैरवतंत्रे॥ हृदयेचबहिर्देवींसमर्प्यविधिवत्ततः॥ निर्म्माल्यंचशुचौदेशेनैवेद्यंभक्षयेत्सुधीः॥ तंत्रांतरे॰॥ निर्म्माल्यंशिरसाधार्य्यं
सर्व्वांगेचानुलेपनम्॥ नैवेद्यंचोपभुंजीतदत्वातद्भक्तिशालिने॥ देवतार्च्चावशिष्टंयत् सलिलंशंखमध्यगं॥ अंगलग्नंमनुष्याणांब्रह्महत्यां
व्यपोहति॥ इतिसामान्यपूजापद्धतिः॥ ॐनमःपरदेवतायै॥ यामाहुराद्यांप्रकृतिंमुनीन्द्राःपद्मांत्रिशक्तिंगिरमन्नपूर्णाम्॥ नित्यांचदुर्गां
त्वरितांतथान्येभजामिनित्यांभुवनेश्वरीन्तां॥ अथभुवनेश्वरीमंत्राः॥ अथवक्ष्येजगद्धात्रीमधुनाभुवनेश्वरीं॥ ब्रह्माद्योपियांज्ञात्वा
लेभिरेपरमांश्रियं॥ नकुलीशोऽग्निमारूढोवामनेत्रार्द्धचंद्रवान्॥ बीजंतस्याःसमाख्यातंसेवितंसिद्धिकांक्षिभिः॥ नकुलीशोहकारः॥
अग्नीरेफः॥ वामनेत्रमीकारः॥ अर्द्धचन्द्रोऽनुस्वारः॥ भुवनेश्वरीपदार्थमाह दक्षिणामूर्तिसंहितायाम्॥ व्योमबीजंमहेशानि कैलासादिप्रति
ष्ठितम्॥ वह्निबीजात्सुवर्णादि निष्पन्नंबहुधाप्रिये॥ तेनायंवर्त्ततेलोकोभूमिमंडलसंस्थितः॥ तुर्य्यस्वरेणपातालेशेषरूपेणवर्त्तते॥ महाभूमं
डलंतस्मात्पातालस्यापिनास्तिका॥ अतएवमहेशानिभुवनाधीश्वरीप्रिये॥ हकारेव्योमतूर्य्येणस्वरेणानिलसंभवः॥ विकारेसतिरेफेणसा
साद्वह्निस्वरूपिणी॥ वह्निबीजंवसुज्ञेयंतस्माद्रेफंचसुंदरी॥ अतएवमहेशानिसवायोःसमताभवेत्॥ बिंदुचक्रामृतादेवीप्लावयंतीजगत्त्रयम्॥ द्र
वरूपीभवेत्तस्मात्स्रवंतीचार्द्धमात्रया॥ अतएवमहेशानिभुवनेशीतिकथ्यते॥ इयंविद्याशक्रेणशप्ता॥ भुवनेशीमहाविद्यादेवराजेनवैपुरा॥ आराधि
तामाहाविद्याजीवहीनाभवेत्तदा॥ एकाक्षरीजीवहीनावाग्भवेनोज्वलापरा॥ वाग्भवबीजेनपुटिता॥ अस्याःपूजाप्रयोगः॥ सामान्यपूजापद्धत्युक्तः
॥ प्रातःकृत्यादिपीठन्यासांतकर्म्मविधायहृत्पद्मस्यपूर्वादिकेशरेषुमध्येपीठशक्तीर्न्यसेत्॥ तद्यथा॥ जया। विजया। अजिता। अपराजिता। नित्या
विलासिनी। दोग्ध्री। अघोरा। मंगला॥ वाकांतु॥ ॐजयायैनमः इत्यादिक्रमेणकर्णिकायांह्रींसर्वशक्तिकमलासनायनमः॥ ॥ ❋ ॥ ९ ॥

तत ऋष्यादिन्यासः॥भुवनेश्वरीमंत्रस्यशक्तिऋषिर्गायत्रीछंदोहकारोबीजं ईकारःशक्तिःरेफःकीलकंभुवनेश्वरीदेवता चतुर्वर्गसिद्ध्यर्थे विनियोगः॥ शिरसिशक्तये ऋषये नमः॥मुखेगायत्रीछंदसेनमः॥हृदिभुवनेश्वर्यैदेवतायैनमः॥गुह्येहंबीजायनमः॥पादयोःईंशक्तये नमः॥सर्वांगेरंकीलकायनमः॥ततोमंत्रन्यासंकुर्यात्॥शिरसिहृल्लेखायैनमः॥नमःसर्वत्र॥वदनेएंगगनायै॥हृदिउंरक्तायै॥गुह्येईंकरालिकायै॥पादयोःअंमहोच्छुष्मायै॥एवमूर्द्ध्वप्राग्याम्योदीच्य पश्चिमेषुचवक्त्रेषुतान्न्यसेत्॥एतासांबीजानिनिबन्धे॥हृल्लेखांमूर्द्ध्निवदने गगनांहृदयाम्बुजे॥रक्तां करालिकांगुह्येमहोच्छुष्मांपदद्वये॥ऊर्द्ध्वप्राग्दक्षिणोदिच्यपश्चिमेषुमुखेषुताः॥सत्यादिपंचह्रस्वाढ्यान्यस्तव्याभूतसमप्रभाः॥ततःकरांगन्यासोकुर्यात्॥ह्रांअंगुष्ठाभ्यांनमः॥ह्रींतर्जनीभ्यांस्वाहा॥ह्रूंमध्यमाभ्यांवषट्॥ह्रैंअनामिकाभ्यांहुं॥ह्रौंकनिष्ठाभ्यांवौषट्॥ह्रःकरतलकरपृष्ठाभ्यांफट्॥एवंहृदयादिषु॥ह्रांहृदयायनमइत्यादि॥तथाचषड्दीर्घभाजाबीजेनकुर्यादंगक्रियामनोः॥: स्वच्छन्दसंग्रहे॥स्वरंविहायबीजंतंदीर्घषट्केनयोजयेत्॥षडंगानिविधेयानिसर्वत्रायंविधिःस्मृतः॥अंगुलीनियमस्तुपूर्वएवोक्तः॥सर्वत्रकरांगन्यासेएवंक्रमः॥ततोभालेॐगायत्रीसहितब्रह्मणेनमः॥ दक्षिणकपोले ॐसावित्रीसहितविष्णवेनमः॥वामकपोले ॐ वागीश्वरीसहितमहेश्वरायनमः॥वामकर्णोपरिॐश्रीसहितधनपतयेनमः॥मुखे ॐ रतिसहितस्मरायनमः॥ सव्यकर्णोपरि ॐपुष्टिसहितगणपतयेनमः॥दक्षिणकर्णान्तराले ॐशंखनिधयेनमः॥वामगंडकर्णांतराले ॐपद्मनिधयेनमः॥मुखेॐभुवनेश्वर्यैदेवतायैनमः॥एवं राम कंठमूलदक्षिणस्तनवामस्तनवामांसहृदयदक्षिणांसपार्श्वद्वयनाभिषुतान्न्यसेत्॥तथाच॥ब्रह्माणंविन्यसेद्भालेगायत्र्यासहसंयुतं॥सावि

मुखे

संयुतं विघ्नं कपोले दक्षिणे न्यसेत्॥ वागीश्वर्या समायुक्तं वामगंडे महेश्वरम्॥ न्यसेल्लक्ष्म्या धनपतिं वामकर्णांतके पुनः॥ रमास्मरं प्रविन्यस्य पुष्पा गणपतिं न्यसेत्॥ सव्यकर्णोपरि निधी कर्णगंडांतरालयोः॥ न्यस्तव्यं वदने मूलं भूयश्चैतांस्तने न्यसेत्॥ तथा च शारदायाम्॥ कंठमूले स्तनद्वंद्वे वामांसे हृदयांबुजे॥ सव्यांसे पार्श्वयुगले नाभिदेशे च देशिकः॥ तथा वर्णभिन्न्यासेत्तु विश्वसारे॥ ॐकाराद्यं ङेयुतं च नमोऽन्तं च यथास्थितिः॥ विधिना विन्यसेत् सर्वं शंकरस्य मतेन च॥ एवं सर्वत्र॥ ततो भाले ॐ ब्राह्म्यै नमः॥ वामांसे ॐ माहेश्वर्यै नमः॥ नमः सर्वत्र॥ वामपार्श्वे ॐ कौमार्यै॥ जठरे ॐ वैष्णव्यै॥ दक्षिणपार्श्वे ॐ वाराह्यै॥ दक्षिणांसे ॐ इन्द्राण्यै॥ अपरगले ॐ चामुंडायै॥ हृदि ॐ महालक्ष्म्यै॥ इति न्यास मूलेन व्यापकत्रयं कुर्यात्॥ तथा॥ भालांसे पार्श्वे जठरे पार्श्वे अंसे गले हृदि॥ ब्रह्माण्याद्यास्ततो न्यस्या विधिना प्रोक्तलक्षणाः॥ मूलेन व्यापकं देहे न्यस्य देवीं विभावयेदिति॥ ततो ध्यानम्॥ उद्यद्दिनद्युतिमिन्दुकिरीटां तुंगकुचां नयनत्रययुक्ताम्॥ स्मेरमुखीं वरदांकुशपाशाभीतिकरां प्रभजे भुवनेशीम्॥ एवं ध्यात्वा मानसैः संपूज्य बहिः पूजामारभेत्॥ पूजायंत्रम्॥ पद्ममष्टदलं बाह्ये वृत्तं षोडशभिर्दलैः॥ विलिखेत् कर्णिकामध्ये षट्कोणमतिसुंदरम्॥ चतुरस्रं चतुर्द्वारमेवं मंडलमालिखेत्॥ ततो दीक्षापद्धत्युक्तक्रमेण शंखस्थापनं कुर्यात्॥ ततः सामान्यपद्धत्युक्तक्रमेण पीठपूजां विधाय पीठशक्तीः पूजयेत्॥ तद्यथा पूर्वादिकेसरेषु ॐ जयायै नमः॥ एवं विजयायै॥ ॐ अजितायै॥ ॐ अपराजितायै॥ ॐ नित्यायै॥ ॐ विलासिन्यै॥ ॐ दोग्ध्र्यै॥ ॐ अघोरायै॥ मध्ये ॐ मंगलायै॥ तथा च निबंधे॥ ततः संपूजयेत् पीठं नवशक्तिसमन्वितम्॥ जयाख्या विजया पश्चादजिता चापराजिता॥ नित्या विलासिनी दोग्ध्री त्वघोरा मंगलापि च॥ बीजाढ्यमासनं द

त्वामूर्त्तिंमूलेनकल्पयेत्॥सर्वत्रप्रणवादिनमोऽन्तेनपूजयेत्॥तदुपरिह्रींसर्वशक्तिपद्मासनायनमः॥ततःपूर्ववद्ध्यात्वावाहनादिपंचपुष्पां
जलिदानपर्य्यंतंविधायावरणपूजामारभेत्॥यथाह्रांहृदयायनम इत्यादिनाषडंगेनपूजयेत्॥ततःकर्णिकामध्ये ॐहृल्लेखायैनमः॥
पूर्वेएंगगनायैनमः॥दक्षिणेॐरक्तायै॥उत्तरेईंकरालिकायै॥पश्चिमेॐमहोच्छुष्मायै॥षट्कोणेषुपूर्वादिॐगायत्र्यै॥ॐब्रह्मणे॥नै
ऋते॥ॐसावित्र्यै॥ॐविष्णवे॥वायौॐसरस्वत्यै॥ॐरुद्राय॥वह्निकोणेॐश्रियै॥ॐधनपतये॥पश्चिमेॐरत्यै॥ॐस्मराय॥ऐशा
न्यांॐपुष्ट्यैॐगणपतये॥षट्कोणस्योभयपार्श्वयोःॐशंखनिधये॥ॐपद्माय॥नमःसर्वत्र॥केसरेष्वग्निनिर्ऋतिवाय्वीशानेषु मध्ये
दिक्षुच ह्रांहृदयायनम इत्यादिनापूजयेत्॥तथाचनिबंधे॥केसरेष्वग्निकोणादिहृदयादीनिपूजयेत्॥नेत्रमग्रेदिशास्वस्त्रंध्यातव्या
श्चांगदेवताः॥एवंसर्वत्रभैरव्यादौविशेषोवक्तव्यः॥पूर्वाद्यष्टदले ॐअनंगकुसुमायैनमः॥नमःसर्वत्र॥ॐअनंगकुसुमातुरायै ॐ
अनंगमदनायै॥ओंअनंगमदनातुरायै॥ॐभुवनपालायै॥ॐगगनवेगायै॥ॐशशिरेखायै॥ॐगगनरेखायै॥षोडशदलेपूर्वादि ॐ
कराल्यै॥ॐविकराल्यै॥ॐउमायै॥ॐसरस्वत्यै॥ॐश्रियै॥ॐदुर्गायैॐउषायै॥ॐलक्ष्म्यै॥ॐश्रुत्यै॥ॐस्मृत्यै॥एवंधृत्यै॥श्रद्धायै॥मे
धायै॥मत्यै॥कान्त्यै॥आर्य्यायै॥तद्बहिर्भूगृहे अनंगरूपायै॥अनंगमदनायै॥अनंगमदनातुरायै॥भुवनरेखायै॥भुवनपालिकायै॥सर्व
शिशिरायै॥अनंगवेदनायै॥अनंगमेखलायै॥प्रणवादिनमोऽन्तेनपूजयेत्॥तद्बहिश्चतुरस्रे ॐलांइन्द्रायदेवाधिपतयेसायुधायसहवाह
नायसपरिवारायनमः॥ॐरांअग्नयेतेजोधिपतयेसायुधायसहवाहनायसपरिवारायनमः॥ॐयांयमायप्रेताधिपतयेसायुधेत्यादि।

ॐ क्षां निर्ऋतये रक्षोधिपतये सायुधेत्यादि॥ ॐ वां वरुणाय जलाधिपतये सायुधेत्यादि॥ ॐ यां वायवे प्राणाधिपतये सायुधेत्यादि॥ ॐ सां सो
मायताराधिपतये सायुधेत्यादि॥ ॐ हां ईशानाय गणाधिपतये सायुधेत्यादि॥ इन्द्रेशानयोर्मध्ये॥ ॐ आं ब्रह्मणे प्रजाधिपतये सायुधेत्यादि॥ नि
र्ऋतिवरुणयोर्मध्ये ॐ ह्रीं अनंताय नागाधिपतये सायुधेत्यादि॥ तथा च॥ लोकपाला बहिः पूज्याः समस्ताश्चतुरस्रके॥ पुरुहूतेशयोर्मध्ये र
क्षोवरुणयोस्तथा॥ ब्रह्मविष्णू सदा पूज्यौ दिगीशार्चाविदुर्बुधाः॥ इन्द्रादिलोकपालानां ये मंत्रास्ते ध्रुवादिकाः॥ स्वस्वबीजान्विताः सर्वे सचतु
र्थीनमोन्तिकाः॥ इति वचनात् सर्वे प्रणवादि॥ स्वस्वबीजमाह मंत्रदर्शने॥ एष्वग्निपवनायंतवरुणानीलसेम्वरैः॥ अनंतविंदुसंयुक्तै र
र्घ्याः पाशेन मायया॥ तथा॥ अन्ते यजेल्लोकपालान् मूलपारिषदान्वितान्॥ हेतिजास्वधिपोपेतान् दिक्षु पूर्वादितो यजेत्॥ सहवाह
नायेति दीपिका॥ तद्बहिः पूर्वादि॥ वज्राय शक्तये दंडाय। खड्गाय। पाशाय। अंकुशाय। गदायै। शूलाय। पद्माय। चक्राय। प्रणवादिनमोऽन्तेन पू
जयेत्॥ ततो धूपदीपादि विसर्जनान्तं कर्म समापयेत्॥ अस्य पुरश्चरणं द्वात्रिंशल्लक्षजपः॥ तथा च॥ प्रजपेन्मंत्रविन्मंत्रं द्वात्रिंशल्लक्षमान
तः॥ त्रिस्वादुयुक्तैर्जुहुयाच्चाष्टद्रव्यैर्दशांशतः॥ चाष्टद्रव्याणि यथा॥ अश्वत्थोदुम्बरप्लक्षन्यग्रोधसमिधस्तिलाः॥ सिद्धार्थपायसाज्यानि
द्रव्याण्यष्टौ विदुर्बुधाः॥ त्रिस्वाद्विति घृतमधुशर्करेति॥ मंत्रांतरमाह॥ वाग्भवशंभुवनितारमाबीजत्रयात्मकं॥ मंत्रं समुद्धरेन्मंत्री त्रिवर्गफ
लसाधनम्॥ वाग्भवं वाग्भवबीजं॥ शंभुवनिता लज्जाबीजं॥ रमा श्रीबीजं॥ न्यासपूजादिकं सर्वं पूर्ववच्च समाचरेत्॥ षडंगन्यासे तु विशेषः॥ ऐं ह्रीं
अंगुष्ठाभ्यां नम इत्यादि॥ तथा च निबन्धे॥ षड्दीर्घभाजा बीजेन वाग्भवाद्येन कल्पयेत्॥ षडंगानि मनोरस्य जातियुक्तेन कल्पयेत्॥ ध्यानं तु॥ सिंदूरारुणविग्रहां त्रिनयनां माणिक्यमौ

लिस्फुरत्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहां॥ पाणिभ्यां मणिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं सौम्यां रत्नघटस्थसव्यचरणां ध्या
येत्परामम्बिकामिति॥ अस्य पुरश्चरणजपो द्वादशलक्षमानतः॥ तथा च शारदायां॥ रविलक्षं जपेन्मंत्रं पायसैर्मधुरान्वितैः॥ तद्दशांशेन
जुहुयात्पीठे प्रागीरिते यजेदिति वचनात्॥ मंत्रान्तरमाह॥ वाग्बीजपुटिता माया विद्येयं त्र्यक्षरी मता॥ अस्य मंत्रस्य पूर्ववन्न्यासः॥ करां
गन्यासस्तु॥ ऐं ह्रां ऐं अंगुष्ठाभ्यां नमः इति॥ ऐं ह्रां ऐं हृदयाय नम इत्यादि॥ तथा च॥ मध्येन दीर्घयुक्तेन वाक्पुटेन प्रकल्पयेत्॥ षडंगानीत्यादि
॥ध्यानं तु॥ श्यामांगीं शशिशेखरां निजकरैर्दानं च रक्तोत्पलम् रत्नाढ्यं चषकं परं भयहरं संबिभ्रतीं शाश्वतीं॥ मुक्ताहारलसत्पयोधर
नतां नेत्रत्रयोल्लासिनीं वंदेहं सुरपूजितां हरवधूं रक्तारविंदस्थितां॥ एवं ध्यात्वा पूर्ववद्यजेत्॥ अष्टपत्रेषु विशेषः॥ आं ब्राह्म्यै॥ ईं माहे
श्वर्यै। ऊं कौमार्यै। ॠं वैष्णव्यै। लृं वाराह्यै। ऐं इन्द्राण्यै। औं चामुंडायै। अः महालक्ष्म्यै। अं असितांगाय। इं रुरवे। उं चंडाय। ॠं क्रोधाय। लृं उ
न्मत्ताय। एं कपालिने। ऊं भीषणाय। अः संहाराय नमः सर्वत्र॥ यद्वा॥ अं आं असितांगब्राह्मीभ्यां नमः इत्यादि॥ तथा च॥ दीर्घाद्या मातरः प्रोक्ता
ह्रस्वाद्या भैरवाः स्मृताः॥ अन्यत्सर्वं पूर्ववद्बोद्धव्यम्॥ अस्य पुरश्चरणजपो दशलक्षः॥ मधुरान्वितैः पलाशपुष्पैर्दशांशाद्धोमः॥ तथा च॥ तत्त्वल
क्षं जपेन्मंत्रं जुहुयात्तद्दशांशतः॥ पलाशपुष्पैः स्वाद्वक्तैः पुष्पैर्वा राजवृक्षजैः॥ तत्त्वलक्षं दशलक्षं अन्तरंगत्वादिति गुरवः॥ चतुर्विंशतिलक्षमि
ति केचित्॥ मंत्रान्तरं तु॥ अनंतो बिंदुना युक्तो मायाब्रह्माग्नितारवान्॥ पाशादित्र्यक्षरो मंत्रः सर्वकामफलप्रदः॥ अस्यैकाक्षरीवदृषिच्छंदोदे
वतान्यासः॥ अंगमंत्रस्तु॥ ह्रीं अंगुष्ठाभ्यां नम इत्यादि ह्रीं हृदयाय नम इत्यादि च॥ सर्वत्र ह्रींबीजेन करांगन्यासौ कुर्यात्॥ तथा च निबन्धे॰ ॥
ऋष्याद्याः पूर्वमुक्ताः स्युर्बीजेनांगक्रिया मता॥ ध्यानं तु यथा॥ वरांकुशौ पाशमभीतिमुद्रां करैर्वहंतीं कमलासनस्थां॥ बालार्ककोटिप्रति

मांत्रिनेत्रांभजेहमाद्यांभुवनेश्वरींनाम्॥ ॥अस्यपूजाएकाक्षरीवत्॥ ❁ ॥अष्टदलेत्वाद्यादियुगलंपूर्ववत्पूजयेत्॥ षोडशदलेपूजाप्रत्यनु
क्तत्वात् षोडशदलाभावः॥ तथाचनिबंधे॥ अंगानिकेशरेपूज्याःपत्रस्थामातरःक्रमात्॥ अस्यपुरश्चरणजपोदशलक्षजपः॥ दधिमधुघृताक्त
भिरश्वत्थोदुम्बरप्लक्षाणांसमिद्भिस्तिलैर्दुग्धाक्तैर्दशसहस्रहोमः॥ तथाच॥ हविष्यभुग्जपेन्मंत्रंतत्त्वलक्षंजितेन्द्रियः॥ तत्सहस्रंप्रजुहुयाज्ज्व
पांतेमंत्रवित्तमः॥ दधिक्षौद्रघृताक्ताभिःसमिद्भिःक्षीरभूरुहां॥ तत्संख्ययातिलैःशुद्धैःपयोक्तैर्जुहुयात्ततः॥ अत्रचतत्त्वशब्देनदशउच्यन्ते
॥शक्तेर्दशतत्त्वानीतिवचनात्॥ अन्येतुभुवनेश्वरीमंत्राननिबद्धाअप्रसिद्धत्वात्॥ अथाऽन्नपूर्णामंत्राः॥ मायाहृद्भगवत्यंतेमाहेश्वरिपदंततः
॥अन्नपूर्णेठयुगलंमनुःसप्तदशाक्षरः॥ अयंमंत्रःप्रणवादिरष्टादशाक्षरः॥ ॐ ह्रींनमोभगवतिमाहेश्वरिअन्नपूर्णेठःठः॥ श्रीबीजादिर्वा॥ मायांवि
नाप्रणवादिः॥ कामादिर्वाऽभवादिश्चसप्तदशाक्षरः॥ कल्पेकवचेतथाप्रतिपादनात्॥ कल्पेच॥ प्रणवाद्यायदादेवितदासप्तदशाक्षरी॥ अन्न
प्रदामोक्षदाचसदाविभवदायिनी॥ मायाद्याचयदादेवितदासासकलेष्टदा॥ श्रीबीजाद्यायदादेवितदासुखविवर्द्धिनी॥ वाग्बीजाद्यायदा
विद्यावागीशत्वप्रदायिनी॥ कामाद्याचयदाविद्यासर्वकामप्रदायिनी॥ ताराएमायादिकाविद्याभोगमोक्षप्रदायिनी॥ मायाश्रीयुग्मबीजाद्या
सदाविभवदायिनी॥ श्रीमायायुग्मबीजाद्यासर्वसंपत्तिपूरणी॥ मायाबीजंश्रीबीजद्वयं॥ आदौयोजयेत्तेनऊनविंशाक्षरी॥ तथैवश्रीबीजं।
मायाबीजद्वयंआदौयोजयेत्तेनउनविंशाक्षरी॥ अस्यपूजाप्रयोगः॥ प्रातःकृत्यादिपीठन्यासान्तंविधायहृत्पद्मस्थकेसरेषुमध्येचभुवनेश्वरीपीठम
न्वन्तपीठशक्तीर्न्यस्यऋष्यादिन्यासंकुर्यात्॥ तद्यथा॥ शिरसिब्रह्मणेऋषयेनमः॥ मुखेपंक्तिच्छंदसेनमः॥ हृदिअन्नपूर्णायैदेवतायैन
मः॥ गुह्येह्रींबीजायनमः॥ पादयोःस्वाहाशक्तयेनमः॥ सर्वांगेक्लींकीलकायनमः॥ तत्रैव॥ एतेषामन्त्रराशीनामृषिर्ब्रह्माउदाहृतः॥ पंक्तिश्छ

न्दः समाख्यातं देवता चान्नपूर्णिका॥ ततः करांगन्यासौ॥ ह्रीं अंगुष्ठाभ्यां नम इत्यादि॥ ह्रीं हृदयाय नम इत्यादि॥ सर्वत्र मायावीजेन कुर्य्यात्॥ तथा च निबंधे॥ अंगानि मायया कुर्य्यात्ततो देवीं विचिंतयेत्॥ कल्पे च॥ यद्वीजाद्या भवेद्विद्या तद्वीजेनांगकल्पना॥ अथ ध्यानम्॥ रक्तां विचित्रवसनां नवचंद्रचूडामन्नप्रदाननिरतां स्तनभारनम्रां॥ नृत्यन्तमिन्दुसकलाभरणं विलोक्य हृष्टां भजेद्भगवतीं भव दुःखहन्त्रीं॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्य्यात्॥ ततः सामान्योक्तपीठपूजां विधाय भुवनेश्वरीमंत्रोक्तजयादिपीठमन्वन्तां पूजां विधाय पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिदानपर्य्यंतं विधायावरणपूजामारभेत्॥ तद्यथा॥ केशरेष्वग्निकोणे ह्रीं हृदयाय नमः॥ नैर्ऋते ह्रीं शिरसे स्वाहा॥ वायव्ये ह्रीं शिखायै वषट्॥ ऐशान्यां ह्रीं कवचाय हुं॥ मध्ये ह्रीं नेत्रत्रयाय वौषट्॥ चतुर्दिक्षु ह्रीं अस्त्राय फट्॥ अष्टदलेषु पूर्वादि ब्राह्म्यै· माहेश्वर्यै· कौमार्यै वैष्णव्यै· वाराह्यै· इन्द्राण्यै· चामुंडायै· महालक्ष्म्यै· प्रणवादिनमोऽन्तेन पूजयेत्॥ तत्रैव॥ दलेषु पूजयेदेता ब्राह्म्याद्याः क्रमतः सुधीः॥ शूद्रस्य प्रणवश्चतुर्दशस्वरो बिंदुसंयुतः॥ कालिकापुराणे। मंत्रस्य सेतुकरणे उक्तत्वात्॥ तत इन्द्रादीन्वज्रादींश्च पूर्ववत् संपूज्य धूपादि विसर्जनांतं कर्म्म समापयेत्॥ अस्य पुरश्चरणजपः षोडशसहस्रसंख्यः॥ तथा च॥ यथाविधि जपेन्मंत्रं वसुयुग्मसहस्रकम्॥ साज्येनान्नेन जुहुयात्तद्दशांशमनंतरम्॥ अयं मंत्रः प्रणवादिरष्टादशाक्षरः श्रीवीजादिर्वा॥ तथा च॥ मायां विना प्रणवादिः कामादिः श्रीवीजादिर्वाग्भवादिश्च सप्तदशाक्षरः॥ कवचेन तथा प्रतिपादनात्॥ विशेषस्तु॥ यद्यद्वीजादिको मंत्रस्तेनैवांगप्रकल्पना॥ अथ त्रिपुटामंत्रः॥ श्रीमायामदनैः प्रोक्तो मंत्रो वीजत्रयात्मकः॥ अस्य पूजाप्रयोगः॥ तत्र पूजायंत्रं॥ तदुक्तं दशपटल्यां॥ षट्कोणं पूर्वमालिख्य मध्ये विद्यां लिखेत्सुधीः॥ वीप्सयानां तु षट्कोणकोणेषु क्रमतो लिखेत्॥ बाह्ये वसुदलं कुर्यात् दीर्घस्वरविभूषितं॥ चतुरस्रं चतुर्द्वारभूषितं मंडलं लिखेत्॥ मध्ये समावाह्य देवीं ध्याये

सर्वसमृद्धिदं॥ प्रातःकृत्वादिपीठन्यासांतं भुवनेश्वरीमंत्रोक्तजयादिपीठमन्वंतं विन्यस्य ऋष्यादिन्यासं कुर्य्यात्॥ शिरसि सम्मोहनऋषये नमः
॥मुखे गायत्री छंदसे नमः॥ हृदि त्रिपुटायै देवतायै नमः॥ तथा च॥ ऋषिः सम्मोहनश्छंदो गायत्री देवता स्मृता॥ ततः करन्यासे॥ श्रीं अंगुष्ठाभ्यां नमः॥ ह्रीं
तर्ज्जनीभ्यां स्वाहा॥ क्लीं मध्यमाभ्यां वषट्॥ श्रीं अनामिकाभ्यां हुं॥ ह्रीं कनिष्ठाभ्यां वौषट्॥ क्लीं करतलकरपृष्ठाभ्यां फट्॥ एवं श्रीं हृदयाय नमः इत्यादि
॥तथा च निबन्धे॥ त्रिपुटाख्या हृदिरु जौं सें ह्वीं जे रंगानि षट्क्रमात्॥ ततो ध्यानम्॥ पारिजातवने रम्ये मंडपे मणिकुट्टिमे॥ रत्नसिंहासने रम्ये पद्मे षट्को
णशोभिते॥ अधस्तात्कल्पवृक्षस्य निषण्णां देवतां स्मरेत्॥ चापं पाशाम्बुजं सरसिजान्यंकुशं पुष्पबाणान् संबिभ्राणां करसरसिजै रत्नमौलिं त्रिनेत्रां॥ हे
माब्जाभां कुचभरनतां रत्नमंजीरकांचीं ग्रैवेयाद्यैर्विलसिततनुं भावयेच्छक्तिमाद्यां॥ चामरादर्शतांबूलकरंडकसमुद्गकान्॥ वहन्तीभिः कुचानां
भिर्दूतीभिः परिवारिताम्॥ करुणामृतवर्षिण्या पश्यन्तीं साधकं दृशा॥ अम्बुजपद्मननुशंखदृधंतोपद्मयुगलमिति दक्षिणामूर्तिवचनात्॥ एवं
ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्य्यात्॥ ततः सामान्योक्तपीठपूजां विधाय केसरेषु भुवनेश्वरीमंत्रोक्तजयादिपीठमन्वंतं संपूज्य पुनर्ध्या
त्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतं विधायावरणपूजां कुर्य्यात्॥ तद्यथा॥ अग्न्यादिकोणेषु ॐ लक्ष्म्यै नमः॥ एवं हरये नमः॥ गौर्यै शिवाय
रत्यै कामाय षट्कोणस्योभयपार्श्वयोः ॐ शंखनिधये नमः॥ ॐ पद्मनिधये नमः॥ ततः केसरेष्वग्न्यादिकोणचतुष्टयेषु मध्ये दिक्षु च श्रीं हृदयाय
नम इत्यादिना षडंगानि पूजयेत्॥ पत्रेषु ब्राह्म्याद्या मातरः पूज्याः॥ तथा च निबन्धे॥ हृल्लेखाविहिते पीठे पूजयेत्तां विधानवित्॥ अग्न्यादिषट्सु को
णेषु लक्ष्म्याद्याः पूजयेद्ध्रुवम्॥ लक्ष्मीं हेमप्रभां तन्वीं सवराब्जयुगाभयां॥ शंखचक्रगदांभोजधरं हेमनिभं हरिं॥ पाशांकुशाभयाभीष्टधरां गौरीं
जपारुणां॥ मृगटंकाभया भीष्टधरं स्वर्णनिभं हरम्॥ नीलोत्पलधरां सौम्यां रतिं कांचनसन्निभां॥ धृतपाशांकुशेष्वासपुष्पेषुमरुणं स्मरम्॥ पूर्ववन्नि

धिपुरमंनयजेदुभयपार्श्वयोः॥ वह्निरंगानि संपूज्य पूज्याः पत्रेषु मातर इति॥ तद्बहिरिन्द्रादीन्वनितारूपान् पूजयेत्॥ तथा च॥ लोकेशान्वनितारूपा
न् अर्च्चयेत्सौम्यविग्रहान्॥ ततो धूपदीपादिविसर्जनांतं कर्म्म समापयेत्॥ अस्य पुरश्चरणजपो द्वादशलक्षः॥ तथा च भानुलक्षं जपेदेनं मन्त्रं
तावत्सहस्रकं॥ बिल्वारग्वधसंभूतैर्म्मधुराक्तैः समिद्वरैः॥ जवापुष्पैः प्रजुहुयात्तोषयेद्वसुनागुरुम्॥ आरग्वधः शोनालुः॥ अयं मंत्रस्त्रिधा॥
।परादिर्वा भवेद्देवि कामादिर्वा भवेदयमिति दक्षिणामूर्त्तिसंहितावचनात्॥ अथ त्वरिता मंत्रः॥ अथाभिधास्ये त्वरितां त्वरितफलदायिनी॥
॥ तारो माया वर्म्मबीजं ऋद्धिरीशस्वरान्विता॥ कूर्म्मस्तदन्त्यो भगवान् क्ष स्त्रौ दीर्घतनुच्छदम्॥ संवर्त्तो भगवान्माया फडन्तो द्वादशाक्षरः॥
तारः प्रणवः माया भुवनेशी वर्म्म हुं ऋद्धिः खकारः॥ ईश एकारः कूर्म्मश्चकारः तदन्त्यश्छकारः भग एकारः तद्युक्तः क्षः स्त्रीं स्वरूपम् दीर्घतनु
च्छदं हूं संवर्त्तः क्षकारः भग एकारस्तद्युक्तः पुनर्भुवनेश्वरी फट्॥ अस्यार्ज्जुन ऋषिर्विराट्छन्दस्त्वरिता देवता पुरुषार्थचतुष्टयसिद्ध्यर्थे विनियोगः
॥ तथा च निबंधे॥ मुनिरर्ज्जुन आख्यातो विराट्छन्द उदाहृतम्॥ त्वरिता देवता प्रोक्ता पुरुषार्थफलप्रदा॥ अस्य पूजापद्धतिः॥ तत्र पूजायंत्रं॥
दक्षिणामूर्त्तौ॥ अष्टपत्रं लिखेत्पद्मं बहिर्भूबिंबमालिखेत्॥ प्रत्येकं वसुकोणेषु कवचं चाष्टधा लिखेत्॥ मध्ये तु भुवनेशानीं वेष्टयेन्मातृकाक्ष
रैः॥ सर्वरक्षाकरं नाम यंत्रमेतदुदाहृतं॥ तत्रावाह्य महेशानीमुपचारैः समर्च्चयेदिति॥ प्रातःकृत्यादिपीठन्यासांतं कर्म्म समाप्य केसरेषु जया
दिपीठशक्तीर्विन्यस्य मध्ये सं हुं हं वज्रदेह घुरु २ हिंगुलु २ गर्ज्ज २ हं हुं क्षां पंचाननायनमः इति न्यसेत्॥ तथा च निबंधे॥ संवर्त्तको बिंदुयु
तः कवचं सकलं वियत्॥ वज्रदेह घुरु द्वं द्वमाभाष्य हिंगुलु द्वयं॥ गर्ज्ज गर्ज्ज वियत्सेन्दुर्वर्मान्त्यो दीर्घबिन्दुमान्॥ पंचाननाय हृदयं पी
ठमंत्रः प्रकीर्त्तितः॥ ततः ऋष्यादिन्यासः॥ शिरसि अर्ज्जुनऋषये नमः॥ मुखे विराट्छन्दसे नमः॥ हृदि त्वरितायै देवतायै नमः॥ ततो मंत्रन्या

सः॥ मूर्द्धि ॐ नमः॥ भाले हुं नमः॥ गले खे नमः॥ हृदि च नमः॥ नाभौ छे नमः॥ गुह्ये क्षं नमः॥ ऊर्वोः स्त्रीं नमः॥ जान्वोः हूं नमः॥ जंघयोः
क्षे नमः॥ पदद्वये फट् नमः॥ ततो मूलेन व्यापकं कुर्य्यात्॥ तथा च निबंधे मायाविवर्ज्जितान् वर्णान् मूर्द्धि भाले गले हृदि॥ नाभिगुह्योरुयुग्मे
षु जानुजंघापदेषु च॥ विन्यस्य व्यापकं कुर्य्यात्समस्तेनैव साधकः॥ ततः करांगन्यासो॥ यथा॥ च छे अंगुष्ठाभ्यां नमः॥ छे क्षं तर्जनीभ्यां स्वा
हा॥ क्षं स्त्रीं मध्यमाभ्यां वषट्॥ स्त्रीं हूं अनामिकाभ्यां हुं॥ हुं क्षे कनिष्ठाभ्यां वौषट्॥ क्षे फट् करतलकरपृष्ठाभ्यां फट्॥ एवं च छे हृदयाय नम
इत्यादि॥ तथा च निबंधे॥ कूर्म्माद्यैः सप्तभिर्वर्णैः पूर्वपूर्वविवर्जितैः॥ द्वाभ्यां द्वाभ्यां षडंगानि कुर्य्यात्साधकसत्तमः॥ ततो ध्यानं॥ श्यामां बर्हिक
लापशेखरयुतामाबद्धपर्णांशुकाम् गुंजाहारलसत्पयोधरभरामष्टाहिपान् बिभ्रतीं॥ ताडंकांगदमेखलागुणरणन्मंजीरतां प्रापितान् कैरा
तीं वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे॥ १॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्य्यात्॥ ततः सामान्योक्तपीठपूजां विधाय पद्मस्य
केसरेषु पूर्वादिक्रमेण ॐ जयायै ॐ विजयायै ॐ अजितायै ॐ अपराजितायै ॐ नित्यायै ॐ विलासिन्यै ॐ दोग्ध्र्यै ॐ अघोरायै ॐ
मंगलायै॥ नमः सर्वत्र॥ तथा च॥ हृल्लेखाकल्पिते पीठे नवशक्तिसमन्विते॥ पूजयेत्त्वरितां देवीं वक्ष्यमाणविधानतः॥ मध्ये क्षं हं हुं वज्रदेहगुरु
२ हिंगुलु २ गर्ज २ हं हुं सां पंचाननाय नमः॥ ततः पूर्ववद्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतं विधायावरणपूजामारभेत्॥ अ
ग्न्यादिकेसरेषु च छे गायत्र्यै हृदयाय नमः॥ छे क्षः गायत्र्यै शिरसे स्वाहा॥ क्ष स्त्रीं गायत्र्यै शिखायै वषट्॥ स्त्रीं हुं गायत्र्यै कवचाय हुं॥ हुं क्षे
गायत्र्यै नेत्रत्रयाय वौषट्॥ दिक्षु क्षे फट् गायत्र्यै अस्त्राय फट्॥ तथा च निबंधे॥ अंगैः प्रणीतां गायत्रीं केमात्॥ दलेषु पूजयेद्देवताः स्त्रीबीजाद्याः
सुभूषिताः॥ हूंकारी खेचरी चंडा छेदिनी क्षेपणी स्त्रियः॥ हुंकारी क्षेमकारी च लोके सायुधभूषणाः॥ फट्कारी मग्रतो बाह्यकोदंडशरधारिणी

सरेष्वर्चयेत्क २

॥ऐंक्लींनित्यक्लिन्नेमदद्रवेस्वाहा इतिमंत्रः॥ ७

॥वाकांतुह्रींहुंकार्य्यैनमः॥इत्यादिंबाह्येऽग्रतः ॐफट्कारिण्यैनमः॥द्वारस्योभयपार्श्वयोः ॐजयायैनमः॥एवंविजयायै॥तद्वाह्ये किङ्करायरक्षरक्षत्वरिताज्ञास्थिरीभवहूंफट् इतिमंत्रेणकिंकरंपूजयेत्॥तथाचनिबंधे॥द्वारस्यपार्श्वयोःपूज्येहेमवेत्रकराम्बुजे॥जयाख्याविजयाख्याचकिंकरायपदंततः॥रक्षरक्षपदस्यांते त्वरिताज्ञास्थिरोभव॥वर्मास्त्रांतेनमनुनाकिंकरंतद्बहिर्यजेत्॥लगुडंविभ्रतंकृष्णंकृष्णचर्वरमूर्द्धजं॥आरण्यैररुणैःपुष्पैरतिरम्यैःसुगंधिभिः॥पूजयेद्धूपदीपाद्यैर्नृत्यगीतैर्महोत्सवैः॥अत्रनेन्द्रादिपूजाअनुक्तत्वात्॥ततोधूपादिविसर्जनांतकर्म्मसमापयेत्॥अस्यपुरश्चरणजपोलक्षसंख्यः॥तद्दशांशंविल्वस्यसमिद्वरैस्त्रिमध्वक्तैर्होमयेत्॥तथाच॥लक्षंसंजप्यमंत्रज्ञोमंत्रमेनंजितेन्द्रियः॥दशांशंजुहुयाद्विल्वैस्त्रिमध्वक्तैःसमिद्वरैः॥अथनित्यामंत्राः॥वाग्भवंकामवीजंचनित्यक्लिन्नेमदेपुनः॥द्रवेवह्निवधूर्मंत्रोद्वादशार्णोयमीरितः॥अस्यपूजाप्रयोगः॥प्रातःकृत्यादिपीठन्यासांतकर्म्मसमाप्य केसरेषुमध्येपूर्वादिक्रमेणजयादिह्रीं आधारशक्तिकमलासनायनमः इत्यंतंविन्यस्यऋष्यादिन्यासंकुर्य्यात्॥तद्यथा॥शिरसिसम्मोहनऋषयेनमः॥मुखेनिचृच्छंदसेनमः॥हृदिनित्यायै देवतायैनमः॥ततःकराङ्गन्यासौ॥ऐंअंगुष्ठाभ्यांनमः॥ऐंतर्ज्जनीभ्यांस्वाहेत्यादि॥एवंऐंहृदयायनमः इत्यादिहृदयादिषुन्यसेत्॥तथाचनिबंधे॥वाचाकृत्वाषडंगानिनित्यांध्यायेद्यथाविधि॥ततोध्यानम्॥अर्द्धेन्दुमौलिमरुणाममराभिवन्द्यामम्भोजपाशसृणिपूर्णकपालहस्ता॥रक्तांगरागवसनाभरणांत्रिनेत्रांध्यायेच्छिवस्यवनितांमदविह्वलांगीम्॥एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंकुर्य्यात्॥ततःपीठपूजांविधायकेसरेषुजयादिपीठशक्तीःसंपूज्यमध्येह्रीं आसनायनमः इतिसंपूज्यपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतंविधायावरणपूजामारभेत्॥तद्यथा॥अग्न्यादिकोणेषुमध्येदिक्षुच ऐंहृदयायनम इत्यादिनापूजयेत् ततोऽष्टपत्रेषुॐ

॥ऐं ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा इति मंत्रः॥ ४॥

नित्यायै एवं निरंजनायै क्लेदिन्यै क्लिन्नायै मदनातुरायै मदद्रवायै द्रविण्यै द्राविण्यै सर्वत्र नमोऽन्तेन पूजयेत्॥ तथा च निबंधे॥ नित्या निरंजना क्लिन्ना क्लेदिनी मदनातुरा॥ मदद्रवा द्राविणी च द्रविणी त्यष्टशक्तयः॥ नीलोत्पलकपालाढ्यकरा रक्ताम्बुजप्रभा इति॥ तद्बाह्ये इन्द्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपादि विसर्जनान्तं कर्म्म समापयेत्॥ अस्य पुरश्चरणं चतुर्लक्षजपः॥ तथा च॥ चतुर्लक्षं जपित्वा तु मधुराक्तैर्मधूकजैः॥ कुसुमैरयुतं हुत्वा तोषयेद्गुरुमात्मनः॥ अथ वज्रप्रस्तारिणीमंत्राः॥ वाङ्मायानन्तरं नित्यक्लिन्ने भूयो मदद्रवे॥ स्वाहान्तो रविसंख्यार्णो मंत्रो वश्यप्रदायकः॥ अस्य पूजायंत्रम्॥ षट्कोणं द्वादशदलं चतुर्द्वारं चतुरस्रं च॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि पीठन्यासांतं कर्म्म विधाय केसरेषु जयादि पीठमन्वंते विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ यथा॥ शिरसि अंगिरसऋषये नमः॥ मुखे त्रिष्टुप्छंदसे नमः॥ हृदि वज्रप्रस्तारिण्यै देवतायै नमः॥ ततः करांगन्यासौ॥ ऐं अंगुष्ठाभ्यां नमः॥ ऐं तर्जनीभ्यां स्वाहा इत्यादि॥ एवं हृदयादिषु ऐं हृदयाय नमः इत्यादि॥ तथा च निबंधे॥ वाग्भवेन षडंगानि विदध्यान्मंत्रवित्तमः॥ ततो ध्यानम्॥ रक्ताब्धौ रत्नपोतेरविरलकमलाभ्यन्तरे सन्निषण्णां रक्तांगीं रक्तमौलिस्फुरितशशिकलां स्मेरवक्त्रां त्रिनेत्राम्॥ बीजापूरेषुपाशांकुशमदनधनुःसत्कपालानि हस्तैर्बिभ्राणामानतांगीं स्तनभरनमितामम्बिकामाश्रयामः॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा पूर्ववत्पीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्य्यंतं विधायावरणपूजामारभेत्॥ अग्न्यादिकोणेषु मध्ये दिक्षु च ऐं हृदयाय नमः इत्यादिना संपूज्य द्वादशदले पूर्वादिक्रमेण ॐ हृल्लेखायै नमः॥ एवं क्लेदिन्यै· क्लिन्नायै· क्षोभिण्यै· मदनातुरायै· निरंजनायै· रागवत्यै· मदनावत्यै· मेखलायै· द्राविण्यै· वेगवत्यै· स्मरायै· सर्वत्र प्रणवादिनमोऽन्तेन पूजयेत्॥ तथा च निबंधे॥ हृल्लेखा क्लेदिनी क्लिन्ना क्षोभिणी मदनातुरा॥ निरंजना रागवती सप्तमी मदनावती

॥ॐ ह्रीं दुं दुर्गायै नमः इति मंत्रः॥४॥

॥मेखलाद्राविणीपश्चाद्वेगवत्यपरा स्मरेति॥तद्वाह्ये ब्राह्म्यादिमातृकाः पूजयेत्॥तद्बहिरिन्द्रादीन्वज्रादींश्च पूजयेत्॥तथा च निबंधे॥मातरो दिग्विदिक्स्वर्च्याः पुनः पूज्या दिगीश्वराः॥ततो धूपादि विसर्जनांतं कर्म समापयेत्॥अस्य पुरश्चरणं लक्षजपः॥तथा च॥मंत्रे मंत्री जपेल्लक्षं जपांते जुहुयात्ततः॥अयुतं राजवृक्षोत्थैर्घृतसिक्तैः समिद्वरैः॥राजवृक्षः शोनालुः॥अथ दुर्गामंत्राः॥अथ दुर्गामनून्वक्ष्ये हृद्यानिष्टफलप्रदान्॥मायाद्रिःकर्णबिन्द्वाढ्यो भूयो सौ सर्गवान्भवेत्॥पंचांतकः प्रतिष्ठावान्मारुतो भौतिकासनः॥तारादिहृदयान्तोयं मंत्रो वस्वक्षरात्मकः॥अद्रिर्दकारः॥कर्ण उकारः॥पंचांतको गकारः॥प्रतिष्ठा आकारः॥मारुतो यकारः॥भौतिक ऐकारः॥तारो माया स्वबीजं च दुर्गायै हृदयं ततः इति भट्टः॥अस्य पूजाप्रयोगः॥प्रातःकृत्यादि पीठन्यासांतं विधाय केसरेषु मध्ये च पीठशक्तीर्न्यसेत्॥तद्यथा॥ आं प्रभायै ईं मायायै ऊं जयायै एं सूक्ष्मायै ऐं विशुद्धायै ओं नंदिन्यै औं सुप्रभायै अं विजयायै अः सर्वसिद्धिदायै नमः सर्वत्र॥तदुपरि वज्रनखदंष्ट्रायुधाय महासिंहासनाय हूं फट् नमः इति न्यसेत्॥तथा च निबंधे॥प्रभा माया जया सूक्ष्मा विशुद्धा नंदिनी पुनः॥सुप्रभा विजया सर्वसिद्धिदा नवशक्तयः॥ततः ऋष्यादिन्यासः॥तद्यथा॥शिरसि नारदऋषये नमः॥मुखे गायत्रीछंदसे नमः॥हृदि दुर्गादेवतायै नमः॥तथा च निबंधे॥ऋषिः स्यान्नारदश्छंदो गायत्री देवता मनोः॥दुर्गा समीरिता सद्भिर्दुरितापन्निवारिणीति॥ततः करांगन्यासौ॥ह्रां ॐ ह्रीं दुं दुर्गायै अंगुष्ठाभ्यां नमः॥ह्रीं ॐ ह्रीं दुं दुर्गायै तर्जनीभ्यां स्वाहा॥ह्रूं ॐ ह्रीं दुं दुर्गायै मध्यमाभ्यां वषट्॥ह्रैं ॐ ह्रीं दुं दुर्गायै अनामिकाभ्यां हुं॥ह्रौं ॐ ह्रीं दुं दुर्गायै कनिष्ठाभ्यां वौषट्॥ह्रः ॐ ह्रीं दुं दुर्गायै करतलकरपृष्ठाभ्यां फट्॥एवं हृदयादिषु॥ह्रां ॐ ह्रीं दुं दुर्गायै हृदयाय नम इत्यादि॥तथा च निबन्धे॥नमस्कारविमुक्तेन मूलमंत्रेण साधकः॥ह्रामाद्यैः सह कुर्वीत षडंगानि यथाविधि॥आगमकल्पद्रुमे॥नमःस्थाने च दीर्घाढ्यशक्तिबीजं नियोजयेत्॥ षडंगानि

विधेयानिमूलमंत्रेणसाधकः इतिवचनात्॥ ॐ ह्रींदुंदुर्गायैह्रांअंगुष्ठाभ्यांनमइत्याद्यपिवर्त्ति॥ततोध्यानम्॥सिंहस्थाशशिशेखरामरकतप्रख्याचतुर्भिर्भुजैः शंखंचक्रधनुःशरांश्चदधतीनेत्रैस्त्रिभिःशोभिता॥ आमुक्तांगदहारकंकणरणत्कांचीक्वणन्नूपुरादुर्गादुर्गतिहारिणीभवतुनोरत्नोल्लसत्कुंडला॥ एवंध्यात्वामानसैःसंपूज्य शंखस्थापनंकुर्यात्॥ ततःपीठपूजांकृत्वाकेसरेषुमध्येच आंप्रभायै·ईंमायायै·ऊंजयायै·एंसूक्ष्मायै·ऐंविशुद्धायै·ॐनन्दिन्यै·औंसुप्रभायै·अंविजयायै·अःसर्वसिद्धिदायै·तदुपरिवज्रनखदंष्ट्रायुधायमहासिंहायहुंफट्नमः इतिपूजयेत्॥ तथाच॥ अग्निभिर्ह्रस्वत्रयक्लीबरहितैः पूजयेदिमाः॥ प्रणवानंतरंवज्रनखदंष्ट्रायुधायच॥ महासिंहायवर्म्मास्त्रंनतिः सिंहमनुर्म्मतः॥ दद्यादासनमेतेनमूर्तिंमूलेनकल्पयेत्॥ ततःपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतंविधायावरणपूजामारभेत्॥ तद्यथा॥ अग्निनिर्ऋतिवाय्वीशानकोणेषुमध्येदिक्षुच॥ ह्रां ॐ ह्रींदुंदुर्गायैहृदयायनमइत्यादिनापूजयेत्॥ ततःपत्रेषु॥ जंजयायै। विंविजयायै। किंकीर्त्यै। प्रींप्रीत्यै। प्रंप्रभायै। श्रंश्रद्धायै। मंमेधायै। धृंधृत्यै। जयाचविजयाकीर्त्तिःप्रीतिःपश्चात्प्रभापुनः॥ श्रद्धामेधाधृतिःप्रोक्ताःस्वनामाद्यक्षरादिकाः॥ पत्राग्रेषु ॐ शंखायनमः। एवंचक्राय। गदायै। खड्गाय। पाशाय। अंकुशाय। चापाय। शराय। तद्बाह्ये इन्द्रादीन्वज्रादींश्चपूजयेत्॥ ततोधूपादिविसर्ज्जनांतंकर्म्मसमापयेत्॥ अस्यपुरश्चरणमष्टलक्षजपः॥ तथाच॥ वसुलक्षंजपेन्मंत्रंतिलैर्म्मधुरलोडितैः॥ पयोन्धसावाजुहुयात्तत्सहस्रंजितेन्द्रियः॥ तेनवाचनिकोऽष्टसहस्रहोमः॥ अथमहिषमर्द्दिनीमंत्राः॥ ॥ शारदायाम्॥ भान्तंवियत्सनयनंस्वेतोमर्द्दिनिठद्वयम्॥ अष्टाक्षरीसमाख्याताविद्यामहिषमर्द्दिनी॥ नारायणीतंत्रे॥ विषंहिमज्जाकालोग्निरद्रिरिस्थो निठद्वयम्॥ अष्टाक्षरीसमाख्याताविद्यामहिषमर्द्दिनी॥ विष

॥ महिषमर्द्दिनिस्वाहा इतिमंत्रः॥१॥

तं·सं मकारः। हिस्वरूपं मज्ज्ञा षकारः। ॥ कालो मकारः। अग्नी रेफः। अद्रिःदकारः॥ ॥ ॥ इस्य इकारयुक्तः। इति वचनादिकार
४२ युक्तो दकारः। निस्वरूपं। ठद्वयं स्वाहेति। अयमंत्रस्तारादिर्मायादिः कामादिर्वाग्भवादिर्वधूबीजादिः कूर्चादिश्च नवाक्षरः॥ तथा च विश्व
सारे॥ प्रणवाद्यां जपेद्विद्यां मायाद्यां वा जपेत्सुधीः॥ वधूबीजादिकां वापि कवचाद्यां जपेत्तथा॥ सर्वकालेषु सर्वत्र कामाद्यां प्रजपेत्सु
धीः॥ वाग्भवाद्यां जपेन्नो तु देवीं वाक्यविशुद्धये॥ विना बीजैर्महाविद्या निर्वीर्या परिकीर्तिता॥ पुटिता बीजयुग्मेन सुखे युग्मं च देशिकः॥
दशाक्षरी समा नास्ति विद्या त्रिभुवनेश्वरी॥ प्रणवं च तथा मायां भवेद्विद्या पुनर्दश॥ कामं प्रणवमित्युक्तं भवेद्विद्या पुनर्दश॥ अस्य पूजाप्र
योगः॥ प्रातःकृत्यादि पीठन्यासांतं विधाय केसरेषु मध्ये दुर्गामंत्रोक्तपीठशक्तीः पीठमंत्रं च न्यसेत्॥ ततः पूर्वोक्तऋष्यादिन्यासं च
कृत्वा अस्य मंत्रस्य शाकवत्सनारदो वा ऋषिः। पंक्तिश्छंदः महिषमर्दिनी देवता। ह्रीं बीजं। स्वाहा शक्तिः। महिषमर्दिनी
कीलकमिति न्यस्य। करांगन्यासौ कुर्यात्॥ तद्यथा॥ महिषहिंसिके हूं फट् अंगुष्ठाभ्यां नमः॥ महिषशत्रो शाघिं हुं फट् तर्जनीभ्यां
स्वाहा॥ महिषं द्वेषय द्वेषय हूं फट् मध्यमाभ्यां वषट्॥ महिषं हन हन देवि हुं फट् अनामिकाभ्यां हुं॥ महिषसूदनि हूं फट् कनिष्ठाभ्यां वौषट्॥
एवं हृदयादिषु॥ महिषहिंसिके हूं फट् हृदयाय नमः इत्यादि॥ तथा च निबंधे॥ महिषहिंसिके हूं फट् हृदयं परिकीर्तितं॥ महिषशत्रो
शाघिं हुं फट् शिर उदीरितं॥ महिषं द्वेषय द्वेषय हूं हूं फडंतः शिखामनुः॥ महिषं हनयुग्मांते देवि हूं फट् तनुच्छदम्॥ महिषांते सूदनि हूं फड
न्नमस्त्रमीरितम्॥ मंत्रैरेतैर्जातियुक्तैः पंचांगानि प्रकल्पयेत् इति वचनात् षडंगनिषेधः। नेत्ररहितपंचांगं न्यसेत्। एणामारहस्ये पुनः सर्वत्र प्र रम
णवादिः॥ अथ ध्यानम्॥ गारुडोपलसन्निभां मणिमयमुकुटमंडितां नौमि भालविलोचनां महिषोत्तमांगनिषेदुषीं॥ शंखचक्रकृपा ४२

णखेटकबाणकार्मुकशूलकांतर्ज्जनीमपिबिभ्रतींनिजबाहुभिःशशिशेखरां॥ एवंध्यात्वामानसोपचारैःसंपूज्यार्घस्थापनमेवकुर्यात्॥ तत्रशंखनिषेधोविश्वसारे॥ कालींचपूजयेद्देवींतावत्फलमवाप्नुयात्॥ नवैश्मवोयजेद्देवींनतुलस्याकदाचन॥ नशंखेनार्घ्यपात्रंस्यात्कथितंपद्मयोनिना॥ विश्वामित्रस्यपात्रेणमृदावापिशिवांयजेत्॥ ततःपीठपूजांविधायकेसरेषुमध्येचपीठशक्तीःपीठमनुंयजेत्॥ पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतंविधायावरणपूजामारभेत्॥ अग्न्यादिकोणेषुपूर्ववदंगंपूजयेत्॥ ततःपत्रेषुपूर्वादिक्रमाद्दुर्गायैनमः॥ ईंवरवर्णिन्यैनमः॥ ऊंआर्य्यायैनमः॥ एवंॠंकनकप्रभायै॥ लॄंकृत्तिकायै॥ ऐंअभयप्रदायै। औंकन्यायै॥ अःसुरूपायै॥ तथाचतंत्रांतरे॥ आदौदुर्गाततोवरवर्णिनीमार्य्यकाह्वयां॥ कनकप्रभिकांचैवकृत्तिकामभयप्रदाम्॥ कन्यांचैवसुरूपांचयजेत्पूर्वादितःक्रमात्॥ दीर्घाद्यत्वमेतासांतु॥ अष्टपत्रेयजेद्देवींदुर्गाद्यादीर्घपूर्विकाः इतिमंत्रचूडामणिनोक्तत्वात्॥ दीर्घस्वरैःक्रमादितिशारदावचनात्॥ पत्राग्रेषुयंचक्राय·रंशंखाय·लंखड्गाय·वंखेटकाय·शंबाणाय·षंधनुषे·संशूलाय·हंतर्ज्जन्यैनमःसर्वत्र॥ तथाचनिबंधे॥ ॥ यजेद्दलेष्वायुधानिचक्रशंखासिखेटकान्॥ बाणंबाणासनंशूलंतर्ज्जनीयादिभिःक्रमात्॥ पत्राग्रेषुब्राह्म्याद्याःपूजयेत्॥ ततोदिक्षुतद्बहिरिंद्रादीन्वज्राद्रींश्चपूजयेत्॥ ततोधूपादिविसर्ज्जनांतंकर्म्मसमापयेत्॥ तथाचकुलचूडामणौ·॥ ब्राह्म्याद्याश्चततःपश्चाल्लोकपालांस्ततोबहिः॥ तदस्त्राणिसिद्धमंत्रीप्रयोगंचसमाचरेदिति॥ अस्यपुरश्चरणमष्टलक्षजपः॥ अष्टसहस्रंतिलैर्होमः॥ तथाच॥ अष्टलक्षंजपेन्मंत्रंतत्सहस्रंतिलैःशुभैः इत्यादिवचनात्॥ जपसमर्पणात्पूर्वमुत्तरस्यांदिशित्रिकोणमंडलंविलिख्यबलिंदद्यात्॥ बलिमंत्रस्तु॥ एहिएहिपदद्वंद्वंगृह्ण२पदद्वयम्॥ मंदीपंचबलिंदेविलुलायकपदद्वयम्॥ साधयद्वितयंब्रूयात्खादयद्वितयंपुनः॥

वर्णाब्जंशिरसिस्थितंविषगदप्रध्वंसिमृत्युंजयं॥३

तं॰सा॰ धिनाविलिखेद्गुरुः॥ततःषोडशकेसरेषुविलि खेत्षोडशस्वरान्॥अथाष्टदलमध्येचवर्गाष्टकंयथाविधि॥कादिमांताः पंचवर्गाः वर्गास्तुर्यान्तृको
४४ दिताः॥यादिवांताःशादिहांतालक्षमौशे — प्रविन्यसेत्॥चतुरस्रंचतुर्द्वारंदिक्षुवंठविदिक्षुच॥अस्ययंत्रम्॥व्योमेन्दूरसनार्णकर्णिकमचा
द्वंद्वैःस्फुरत्केसरं पत्रांतर्गतपंचवर्गयशलार्णादित्रिवर्गक्रमात्॥आशास्वस्त्रिषुलांतलांगलियुजाक्षोणीपुरेणावृतं यंत्रंवर्णतनोःपरंनिग
दितंधर्म्मार्थसिद्धिप्रदं॥अस्यपूजाप्रयोगः॥प्रातःकृत्यादिपीठन्यासांतंकर्म्मविधायकेसरेषुमध्येषुच ॐमेधायैनमः॥एवंॐप्रज्ञायै।ॐप्र
भायै।ॐविद्यायै।ॐमेधायै।ॐधृत्यै।ॐस्मृत्यै।ॐबुद्ध्यै।ॐविद्येश्वर्यै।मध्येवर्णपद्मासनाय॥नमःसर्वत्र॥ततऋष्यादिन्यासः॥तद्यथा॥शिरसिकण्वऋष
येनमः॥मायापुटितंश्रोत्रं श्रवणयोःदंनमःवंनमः॥चक्षुषोःदंनमःवाङ्मेः॥नासिकयोःवांनमःदिंनमः॥वदनेनिंनमः॥लिंगेस्वांनमः॥गुह्येहांनमः॥मातृ
कान्यासःकरांगन्यासौकृत्वाध्यायेत्॥तथाचनिबंधे॥शिरःश्रवणदृङ्नासावदनांधुगुह्ये ष्विमान्॥न्यस्यवर्णान्षडंगानिमातृकोक्तानिक
ल्पयेत्॥ततोध्यानम्॥तरुणशकल — मिन्दोर्बिभ्रतीशुभ्रकान्तिः कुचभरनमितांगीसन्निषण्णासिताब्जे॥निजकरकमलोद्य
ल्लेखनीपुस्तकश्रीः सकलविभवसिद्ध्यैपातुवाग्देवतानः१एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंकुर्य्यात्॥ततःपीठपूजांकृत्वा
केसरेषुमध्येचमेधादिपीठमन्वंतंसंपूज्यपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतंविधायावरणपूजामारभेत्॥अग्नि कुर्यात्
कोणेअंकं५आंहृदयायनमः॥नैर्ऋतेइंचं५ईंशिरसेस्वाहा॥वायुकोणेउंटं५ऊंशिखायैवषट्॥ईशानेएंतं५ऐंकवचायहुं राम
॥मध्येओंपं५औंनेत्रत्रयायवौषट्॥दिक्षुअंयंअः अस्त्रायफट्॥पत्रेषुपूर्वादि ॐयोगायैनमः।एवंसत्यायै।विमलायै।ज्ञाना ४४

बृहस्पतयेनमः॥मुखेविराट्छंदसेनमः॥हृदिवागीश्वर्यैदेवतायैनमः॥अथमंत्रन्यासः॥शिरसिवंनमः॥पं॰७

यै।बुद्ध्यै।स्मृत्यै।मेधायै।प्रज्ञायै।दलाग्रेषु ब्राह्म्याद्या मातरः पूज्याः॥ तद्बहिरिंद्राद्यान् वज्राद्यांश्च सं[illegible]॥ धूपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं दशलक्षजपः॥ तथा च॥ दशलक्षं जपेन्मंत्रं दशांशं जुहुयात्ततः॥ पुंडरीकैः पयोभ्यक्तैस्तिलैर्वा मधुरप्लुतैः॥ अथ मंत्रांतरम्॥ हृदयांते भगवति वदशब्दयुगं ततः॥ वाग्देवि वह्निजायांते वाग्भवाद्यं समुद्धरेत्॥ मनुः षोडशवर्णाढ्यो वागैश्वर्यफलप्रदः॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादिपीठन्यासांतं कर्म विधाय केसरेषु मध्ये च पीठशक्तीः पीठमनुं च न्यसेत्॥ ततः पूर्वोक्तऋष्यादिन्यासं कृत्वा करांगन्यासौ कुर्यात्॥ यथा॥ ऐं अंगुष्ठाभ्यां नमः॥ नमस्तर्जनीभ्यां स्वाहा॥ भगवति मध्यमाभ्यां वषट्॥ वद वद अनामिकाभ्यां हुं॥ वाग्देवि कनिष्ठाभ्यां वौषट्॥ स्वाहा करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ तथा च निबंधे॥ मनोः षड्भिः पदैः कुर्याज्ज्ञातियुक्तं षडंगकम्॥ ततो ध्यानम्॥ शुभ्रां स्वच्छविलेपमाल्यवसनां शीतांशुखंडोज्वलां व्याख्यामक्षगुणं सुधाढ्यकलशं विद्यां च हस्तांबुजैः॥ बिभ्राणां कमलासनां कुचनतां वाग्देवतां सस्मिताम् वंदे वाग्विभवप्रदां त्रिनयनां सौभाग्यसंपत्करीं १ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः पूर्वोक्तक्रमेण पूजयेत्॥ किंत्वंगमंत्रे विशेषः॥ अस्य पुरश्चरणमष्टलक्षजपः॥ तथा च॥ हविष्याशी जपेन्मंत्रं वसुलक्षमनन्यधीः॥ दशांशं जुहुयादंते तिलैराज्यपरिप्लुतैः॥ अथ मंत्रांतरमाह॥ तारो माया धरो बिंदुः शक्तिस्तारः सरस्वती॥ ङेंतां नत्यंतिको मंत्रः प्रोक्त एकादशाक्षरैः॥ तारः प्रणवः। माया भुवनेशी। अधरो ऐकारः। बिंदुयुक्तः। शक्तिः भुवनेशीबीजं। तारः प्रणवं सरस्वती ङेंता सरस्वत्यै। नतिर्नमः। अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि पूर्वोक्तपीठमन्वंतं विन्यस्य पूर्वोक्तमृष्यादिन्यासं कुर्यात्॥ ततो मंत्रन्यासः॥ ॐ नमो ब्रह्मरंध्रे। ह्रीं नमो भ्रूमध्ये। चक्षुषोः ऐं नमः। ह्रीं नमः। कर्णयोः ॐ नमः सं नमः। नासिकयोः वं नमः स्वं नमः। मुखे त्यै नमः। लिंगे नं नमः। गुह्ये मं नमः॥ ततः करांगन्यासौ॥ ऐं अंगुष्ठाभ्यां नमः॥ ऐं तर्जनीभ्यां स्वाहेत्यादि॥ एवं हृदयादिषु॥ ॥ ऐं हृदयाय नमः इत्यादि॥ तथा च निबंधे॥ ब्रह्मरंध्रे भ्रुवोर्मध्ये नवरंध्रेषु च क्रमात्॥ मंत्रवर्णा

॥ ॐ ह्रीं ऐं ह्रीं ॐ सरस्वत्यै नमः इति मंत्रः॥ ४॥

नांगकल्पना इति॥ ततो ध्यानम्॥ वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुंदप्रभां चंद्रार्द्धांकितमस्तकां निजकरैः संबिभ्रतीमादरात्॥ वीणा
मक्षगुणं सुधाढ्यकलशं विद्यां च तुंगस्तनीम् दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्या
त्॥ ततः पीठपूजां विधाय केसरेषु मध्ये च पूर्वोक्तपीठशक्तीः पीठमनुं च यजेत्॥ ततः पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं वि
धायावरणपूजामारभेत्॥ देव्या दक्षिणे ॐ संस्कृतायै वाङ्मय्यै नमः॥ वामे प्राकृतायै वाङ्मय्यै नमः॥ ततः केसरेष्वग्न्यादिकोणेषु मध्ये
दिक्षु च ऐं हृदयाय नमः॥ नैर्ऋते ऐं शिरसे स्वाहा॥ वायव्ये ऐं शिखायै वषट्॥ ईशाने ऐं कवचाय हुं॥ मध्ये ऐं नेत्रत्रयाय वौषट्॥ दिक्षु ऐं अस्त्रा
य फट्॥ ततः पत्रेषु पूर्वादि प्रज्ञायै मेधायै श्रुत्यै शक्त्यै स्मृत्यै वागीश्वर्यै मत्यै स्वस्त्यै सर्वत्र प्रणवादिनमोऽन्तेन पूजयेत्॥ ततः पत्रेषु ब्रा
ह्म्याद्याः पूजयेत्॥ तथा च निबंधे॥ देव्यास्तु दक्षिणे पूज्या संस्कृता वाङ्मयी शुभा॥ प्राकृता वाङ्मयी पूज्या वामतः सर्वदा शुभा॥ इष्ट्वा पूर्ववदं
गानि प्रज्ञाद्याः पूजयेत्पुनः॥ प्रज्ञा मेधा श्रुतिः शक्तिः स्मृति वागीश्वरी मतिः॥ स्वस्तिश्चेति समाख्याता ब्राह्म्याद्यास्तदनंतरमिति॥ तद्बहिरि
न्द्रादीन्वज्रादींश्च पूजयेत्॥ ततो धूपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं द्वादशलक्षजपः॥ तथा च॥ जपेद्द्वादशलक्षाणि तत्स
हस्रं सितांबुजैः॥ नागचम्पकपुष्पैर्वा जुहुयात्साधकोत्तमः॥ मंत्रांतरं शारदायाम्॥ वाचस्पतेऽमृते भूयः प्लुवः प्लुवे इति कीर्तयेत्॥ वागाद्यो मनुरा
ख्यातो रुद्रसंख्याक्षरोऽपरम्॥ अस्य पूजादिकं पूर्ववत्॥ करांगन्यासौ तु॥ ऐं अंगुष्ठाभ्यां नमः॥ वाचस्पते तर्जनीभ्यां स्वाहा॥ अमृते मध्यमाभ्यां व
षट्॥ प्लुवः अनामिकाभ्यां हुं॥ प्लुवः कनिष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ तथा च निबंधे॥ कुर्यादंगानि विधिवद्वागाद्यैः पंचभिः पदैः॥ ध्यानं तु॥ आसी
ना कमले करैर्जपवटीं पद्मद्वयं पुस्तकम् बिभ्राणा तरुणेन्दुबद्धमुकुटा मुक्तेन्दुकुंदप्रभा॥ भालोन्मीलितलोचना [illegible] च मरस्लं॥ मा नवद्धः

ऐं वाचस्पतेमृते प्लुवः प्लुवः इति मंत्रः॥३॥

स्त्रौं॥ इतिमंत्रः।२॥

भूयाद्वागधिदेवतामुनिगणैरासेव्यमानानिशं॥अस्यपुरश्चरणमेकादशलक्षजपः॥तथाच॥रुद्रलक्षंजपेन्मंत्रंदशांशंजुहुयाद्धुतैः॥तथाचशारदायाम् मंत्रान्तरम्॥तोयस्थंशयनंविष्णोः सकेवलचतुर्मुखं॥ बिंदूर्धीशयुतोवह्निर्विन्दुमत्यांबुमान्भृगुः॥तोयंवकारः॥विष्णोःशयनमाकारः॥केवलेनअकाररहितेनककारेणसहितेनवाग्भवमित्यर्थः॥केचित्तुलक्षितलक्षणाभयादेवंवदंति॥आकारस्तु क्लोवकारः॥केमस्तकेवलतेकेवलोनुस्वारः॥तद्युक्तेनककारेणवर्त्तनेतेनक्कामिति।तल्ल।निरूढलक्षणायाःशक्तितुल्यत्वात्॥वाग्भवमितिपर्य्यायः॥वस्तुतस्तु॥द्वादशस्वरमुद्धृत्यविंदुनादविभूषितं॥विंदुनादसमायुक्तंवह्निबीजंसमुद्धरेत्॥षष्ठस्वरसमायुक्तंद्वितीयंबीजमुद्धरेत्॥चंन्द्रबीजंसमुद्धृत्यवारुणंयोजयेत्ततः॥त्रयोदशस्वरारूढंबिन्दुनादविभूषितमिति विश्वसारवचनात्वाग्भवबीजमेव॥अस्यपूजापूर्ववत्॥करांगन्यासौतु द्विरुक्तैस्त्रिभिर्बीजैर्विधेयौ॥ऐंहृदयायनमः॥स्त्रौंशिरसेस्वाहा इत्यादि॥तथाचनिबंधे॥अंगानिकल्पयेन्मंत्री द्विरुक्तैर्जातिसंयुतैः॥ध्यानंतु॥मुक्ताहारावदातांशिरसिशशिकलालंकृतांबाहुभिःस्वैर्व्याख्यांवर्णासुमालांमणिमयकलशंपुस्तकंचोद्वहन्तीं॥आपीनोत्तुंगवक्षोरुहभरविलसन्मध्यदेशामधीशांवाचामीडेचिरायत्रिभुवननमितांपुंडरीकेनिषण्णां॥अस्यपुरश्चरणंलक्षत्रयजपः॥त्रिलक्षंप्रजपेन्मंत्रीजुहुयात्तद्दशांशतः॥पायसैराज्यसंमिश्रैः संस्कृतेहव्यवाहने॥अथपारिजातसरस्वतीमंत्राः॥मंत्रदेवप्रकाशिकायाम्॥सचप्रणवहृल्लेखासंपुटितहकारसकारौकारबिन्दुयुक्तसरस्वतीङे·न्तानतिश्च॥प्रणवोभुवनेशीचहसौर्बीजंसमुद्धरेत्॥मायाचप्रणवश्चैवसरस्वत्यैनमस्तथा॥इतिवचनात्हसौं॥अस्यपूजाप्रयोगः॥प्रातःकृत्यादिपीठमन्वंतंविन्यस्यऋष्यादिन्यासंकुर्य्यात्॥शिरसिकण्वऋषयेनमः॥मूर्द्ध्नि त्रिष्टुप्छंदसेनमः॥हृदिपारिजातसरस्वत्यैदेवतायैनमः॥ततोमातृकोक्तकरांगन्यासौकुर्य्यात्॥मूर्द्ध्निभ्रूमध्येनेत्रकर्णनासापुटहृदयवदनगुह्यपादेष्वेकादशाक्षरविन्या

॥ॐह्रींह्सौंॐह्रींसरस्वत्यैनमः इतिमंत्रः॥३॥

॥ॐ ह्रीं ह्ल ह्रैं ह्रीं ॐ सरस्वत्यै नमः इति मंत्रः॥२॥

तं·सा· सः॥ततो ह्रां अंगुष्ठाभ्यां नम इत्यादि करांगन्यासौ कुर्य्यात्॥अन्यत्सर्वं पूर्ववत्॥दक्षिणामूर्त्तिसंहितायां तु मंत्रांतरमाह॥संपत्प्रदाया
४६ भैरव्या वाग्भवं बीजमालिखेत्॥तौरैंण परया देवि संपुटीकृत्य मंत्रवित्॥सरस्वत्यै हृदंतोऽयं रुद्रार्णो मनुरीरितः॥प्रपंचसारे॥आद्यन्तप्र
णवशक्तिमध्यसंस्था वाक् भूयो भवति च सरस्वती ङेन्ता॥नत्यन्तो मनुरयमीशसंख्यवर्णः संप्रोक्तो भजमानः पारिजातः॥दक्षिणामू
र्त्तिऋषिः प्रोक्तो गायत्री च्छंद ईरितम्॥पारिजातेश्वरी वाणी देवता परिकीर्त्तिता॥तृतीयं च द्वितीयं च बीजं शक्तिश्च तौ वाणीमंदस्मितत
रमुखीमौलिबद्धेन्दुरेखा॥विद्यावीणामृतमयघटाक्षस्रजादीप्तहस्ता शुभ्राब्जस्था भवदभिमतप्राप्तये भारती स्यात्॥अस्य पूजादि
कं पूर्वोक्तैकादशाक्षरीवत्॥पुरश्चरणं तु द्वादशलक्षजपः॥अर्कपुष्पैर्नागचम्पकैर्वा जुहुयात् द्वादशसहस्रकमिति॥इति सरस्व
ती मंत्राः॥अथ वक्ष्ये गणपतेर्मंत्रान् सर्वार्थसिद्धिदान्॥यज्ज्ञात्वा मानवा नित्यं साधयन्ति मनोरथान्॥पादांबुजध्यानवशेन यस्य विघ्नाः
समस्ता विलयं प्रयान्ति॥सिंदूरकांतं गजराजवक्त्रं तं नौमि लंबोदरमाबिकेयं॥अथ गणेशमंत्राः॥पंचान्तकं शशधरं बीजं गणपतेर्विदुः॥पंचांतकं ग
कारः॥अस्य पूजाप्रयोगः॥प्रातः कृत्यादिपीठन्यासांतं विधाय केसरेषु मध्ये च॥तीव्रायै॥ज्वालिन्यै॥नंदायै॥भोगदायै॥कामरू
पिण्यै॥उग्रायै॥तेजोवत्यै॥सत्यायै॥विघ्ननाशिन्यै॥तदुपरि मध्ये॥सर्वशक्तिकमलासनाय नमः॥सर्वत्र प्रणवादिनमोऽन्तेन पूजयेत्
॥तथा च निबंधे॥तीव्राख्या ज्वालिनी नंदा भोगदा कामरूपिणी॥उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी॥ सर्वादिशक्तिकमला
सनाय हृदयावधि॥पीठमंत्रोयमेतेन प्रदद्यादासनं विभोः॥ततः ऋष्यादिन्यासः॥शिरसि गणक ऋषये नमः मुखे निचृच्छंदसे नमः राम
हृदि गणेशाय देवतायै नमः॥ततः करांगन्यासौ॥गां अंगुष्ठाभ्यां नमः॥गीं तर्जनीभ्यां स्वाहेत्यादि॥एवं हृदयादिषु॥ गां हृदय[illegible]नमः ४६

त्रु॥प १०॥ एकं॥कीलकं परमेशानि महासारस्वतप्रदं॥षड्दीर्घस्वरसंभिन्नबीजेनांगक्रियामता॥ततो ध्यानं॥हंसारूढावरहसितहारेंदुकुंदा[illegible]ता।

इत्यादि। तथा च निबंधे॥ षड्दीर्घभाजा बीजेन कुर्य्यादंगानि षट्क्रमात्॥ ततो ध्यानं॥ सिंदूराभं त्रिनेत्रं पृथु[illegible]रजठरं हस्तपद्मै[illegible]धानं [illegible]पाशांकुशेष्टान्युरुकरविलसत् बीजपूराभिरामं॥ बालेन्दुद्योतमौलिं करिपतिवदनं दानपूर्णार्द्रगंडं भोगीन्द्राबद्धभूषं भजत गणपतिं रक्तवस्त्रांगरागं॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्य्यात्। ततः पीठपूजां विधाय केसरेषु मध्ये दिक्षु च तीव्रादिपीठमन्त्रं तैः पूजयेत्॥ ततो मूलेन मूर्त्तिं प्रकल्प्य पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिदानपर्य्यंतं विधायावरणपूजां कुर्य्यात्॥ कर्णिकायां पूर्वादिदिक्षु ॐ गणाधिपतये गणेशाय गणनायकाय गणक्रीडाय ततः केसरेषु अग्निनिर्ऋतिवाय्वीशानमध्ये दिक्षु च गां हृदयाय नम इत्यादिक्रमेण पूजयेत्॥ पत्रमध्ये पूर्वादिक्रमेण॥ वक्रतुंडमेकदंतं महोदरगजाननौ॥ लम्बोदराख्यं विकटं विघ्नराजमनंतरम्॥ धूम्रवर्णं दलाग्रेषु ब्राह्म्याद्याः पूजयेत्ततः॥ वाक्यं तु॥ ॐ वक्रतुंडाय नम इत्यादिक्रमेण पूजयेत्॥ दलाग्रेषु ब्राह्म्याद्या मातरः पूज्याः पूर्वादिक्रमेण तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं चतुर्लक्षजपः॥ तथा च॥ वेदलक्षं जपेन्मंत्रं दशांशं जुहुयात्ततः॥ मोदकैः पृथुकैर्लाजैः सक्तुभिः सेक्षुपर्वभिः॥ नारिकेलैस्तिलैः शुद्धैः सुपक्वैः कदलीफलैः॥ अष्टद्रव्याणि विघ्नस्य कथितानि मनीषिभिः॥ निबंधे मंत्रांतरमाह॥ श्रीशक्तिस्मरभूविघ्नबीजानि प्रथमं वदेत्॥ ङेन्तं गणपतिं पश्चात् वरांते वरदं पदम्॥ उक्त्वा सर्वजनं मेऽन्ते वशमानय ठद्वयम्॥ अष्टाविंशस्वरोऽयं ताराद्यो मनुरीरितः॥ भूबीजमाह॥ स्मृतिस्थं मांसमौ विंदुयुक्तं भूबीजमीरितम्॥ स्मृतिर्गकारः॥ मांसं लकारः॥ औ औकारः॥ विंदुरनुस्वारः॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि पीठन्यासांतं विधाय पूर्वोक्तपीठमन्त्रं तैः पीठशक्तीर्विन्यस्य कृष्यादिन्या

॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा इति मंत्रः॥ २॥

समाचरेत्॥ शिरसिगणकऋषयेनमः॥ मुखेनिचृद्गायत्रीछंदसेनमः॥ हृदिमहागणपतयेदेवतायैनमः॥ ततःकरांगन्यासो॥ ॐश्रीह्रींक्लींग्लौंगंगां अंगुष्ठाभ्यांनमः॥ ॐश्रीह्रींक्लींग्लौंगंगींतर्जनीभ्यांस्वाहा॥ ईंगूंमध्यमाभ्यांवषट्॥ ईंगैंअनामिकाभ्यांहुं॥ ईंगौंकनिष्ठाभ्यांवौषट्॥ ईंगःकरतलपृष्ठाभ्यांफट्॥ एवंहृदयादिषु॥ केचित्तु ॐगांहृदयायनमः॥ श्रींगींशिरसेस्वाहेति॥ तत्त्वंषड्बीजस्यस्वबीजेनदीर्घभाजाप्रकल्पयेत्०॥ इतिवचनाद्विशिष्टस्यैवग्रहणं॥ ततोध्यानं॥ नवरत्नमयंद्वीपंस्मरेदिक्षुरसाम्बुधौ॥ तद्वीचिधौतपर्यंतंमंदमारुतसेवितं॥ मंदारपारिजातादिकल्पवृक्षलताकुलं॥ उद्भूतरत्नच्छायाभिररुणीकृतभूतलं॥ उद्यद्दिनकरेन्दुभ्यामुद्भासितदिगंतरं॥ तन्मध्येपारिजातंनवरत्नमयंस्मरेत्॥ ऋतुभिःसेवितंषड्भिरनिशंप्रीतिवर्द्धनैः॥ तस्याधस्तान्महापीठेरचितेमातृकांबुजे॥ षट्कोणांतस्त्रिकोणस्थंमहागणपतिंस्मरेत्॥ हस्तीन्द्राननमिन्दुचूडमरुणच्छायंत्रिनेत्रंरसादाश्लिष्टंप्रिययासुपद्मकरया स्वांकस्थयासंततं॥ बीजापूरगदाधनुस्त्रिशिखयुक्चक्राब्जपाशोत्पलंव्रीह्यग्रस्वविषाणरत्नकलशान्हस्तैर्वहंतंभजे॥ गंडपालीगलद्दानपूरलालसमानसान्॥ द्विरेफान्कर्णतालाभ्यांवारयंतंमुहुर्मुहुः॥ कराग्रधृतमाणिक्यकुंभवक्त्रविनिःसृतैः॥ रत्नवर्षैःप्रीणयंतंसाधकंमदविह्वलम्॥ माणिक्यमुकुटोपेतंरत्नाभरणभूषितम्॥ एवंध्यात्वामानसैःसंपूजयेत्॥ अस्यपूजायंत्रम्॥ त्रिकोणंतद्बहिःषट्कोणंचत्वार्यन्यत्सर्वंमातृकायंत्रवत्॥ ततःशंखस्थापनंकृत्वापीठपूजांविधायपूर्ववत्पीठशक्तीःपीठमनुंचपूजयेत्॥ पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतंविधायावरणपूजामारभेत्॥ त्रिकोणबाह्येपूर्वादिचतुर्दिक्षुपूर्वेबिल्ववृक्षाधः श्रियंश्रीपतिंदक्षिणेवटवृक्षाधः॥ गौरींगौरीपतिंपश्चि

मेपिप्पलवृक्षाधः रतिंरतिपतिंउत्तरेप्रियंगुवृक्षाधः महीवराहंदेवतागेलक्ष्मीगणनायकं षट्कोणेषुअग्रकोणेसिद्धिसहितमामोदम् अग्निकोणेसमृद्धिसहितप्रमोदं ईशानकोणेकांतिसहितसुमुखं पश्चिमेमदनावतीसहितदुर्मुखं नैर्ऋत्येमदद्रवा सहित विघ्नं वायव्येद्राविणीसहितविघ्नकर्तारंपूजयेत्॥ षट्कोणस्योभयपार्श्वयोः ॐवसुधासहितशंखनिधयेनमः ॐवसुमती सहितपद्मनिधयेनमः॥ ततःकेसरेष्वग्न्यादिकोणेषुमध्येदिक्षुच षड्बीजस्यगांहृदयायनम इत्यादिनापूजयेत्॥ ततःपत्र मध्येब्राह्म्याद्याःसंपूज्य भूगृहे इन्द्रादीन्वज्रादींश्चपूजयेत्॥ ततोधूपादिविसर्जनान्तंकर्मसमापयेत्॥ अस्यपुरश्चरणंजपश्चतुश्चत्वारिंशत्सहस्राधिकचतुर्लक्षजपः॥ तथाचनिबंधे॥ ध्यायेन्मंत्रंजपेन्मंत्रीचतुर्लक्षंसमाहितः॥ चतुःसहस्रसंयुक्तंचत्वारिंशत्सहस्रकम्॥ दशांशंजुहुयाद्द्रव्येरष्टभिर्मोदकादिभिः॥ मंत्रान्तरमाह॥ शक्तिरुद्धंनिजंबीजंमहागणपतिंवदेत्॥ ङेन्तमग्निवधूप्रोक्तोमंत्रोयंद्वादशाक्षरः॥ अस्यपूजाप्रयोगः॥ प्रातःकृत्यादितोत्राद्विपीठशक्तेः पीठमंत्रसहितपीठन्यासंविधाय ऋष्यादिन्यासंकुर्यात्॥ यथाशिरसिगणकऋषयेनमः॥ मुखेनिचृद्गायत्रीछंदसेनमः॥ हृदिशक्तिगणाऽधिपतयेदेवतायैनमः॥ तथाचनिबंधे॥ गणकस्यऋषिरुक्तोगायत्रीनिचृदादिका॥ उदितादेवतामंत्रेनाम्नाशक्तिर्गणाधिपइति॥ ततःकरांगन्यासौ॥ ह्रींअंगुष्ठाभ्यांनमः॥ गंतर्जनीभ्यांस्वाहा॥ ह्रींमध्यमाभ्यांवषट्॥ महागणपतयेअनामिकाभ्यांहुं॥ स्वाहाकनिष्ठाभ्यांवौषट्॥ समुदायस्वार्थ्यकरतलपृष्ठाभ्यांफट्॥ एवंहृदयादिषु॥ तथाचनिबंधे॥ व्यस्तैःसमस्तैर्मंत्रस्य॥

॥ॐह्रींगंह्रींमहागणपतयेस्वाहा इतिमंत्रः॥५॥

पदैरंगानिकल्पयेत्॥ततोध्यानम्॥मुक्तागौरंमदगजमुखंचंद्रचूडंत्रिनेत्रं हस्तैःस्वीयैर्दधतमरविंदांकुशौरत्नकुंभं॥त्र्यंकस्थायाः
सरसिजरुचलद्भृंगजालम्बिपाणे र्देव्यायोनौविनिहितकरंरत्नमौलिंभजामः॥एवंध्यात्वामानसैःसंपूज्य शंखस्थापनंकुर्यात्॥त
तःपीठपूजांविधायतीव्रादिपीठमन्वंतंपूजयेत्॥पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतंविधायावरणपूजांकुर्यात्॥
पूर्वोक्तचत्वारिमिथुनानिषट्कोणेषु आमोदादीन्केसरेषु अग्न्यादिकोणेषुमध्येदिक्षुच ह्रांहृदयायनमः गंशिरसेस्वाहा ह्रींशि
खायैवषट् महागणपतयेकवचायहुं स्वाहानेत्रत्रयायवौषट् समुदायमुच्चार्यअस्त्रायफट्॥पत्रेषुपूर्वादिब्राह्म्यादिमातृ
कास्तद्बहिरिन्द्रादीन्वज्रादींश्चपूजयेत्॥ततोधूपादिविसर्जनांतंकर्मसमापयेत्॥यंत्रंतुमहागणपतियंत्रवत्॥अस्यपुरश्चर
णंलक्षजपः॥लक्षमेकंजपेद्विद्यांअपूपैस्तद्दशांशतः॥जुहुयादर्चितेवह्नौदिनेशोदेवमर्चयेत्॥मंत्रांतरमाह॥शक्तिरुद्रंनिजंबी
जंवशमानयठद्वयम्॥ताराद्योमनुराख्यातोरुद्रसंख्याक्षरान्वितः॥अस्यपूजापूर्ववत्॥अंगमंत्रस्तु ॐ अंगुष्ठाभ्यांनमः॥ह्रींगंह्रींतर्जनी
भ्यांस्वाहा॥वशंमध्यमाभ्यांवषट्॥आनयअनामिकाभ्यांहुं॥स्वाहाकनिष्ठिकाभ्यांवौषट्॥समस्तमुच्चार्यकरतलकरपृष्ठाभ्यांवौषट्॥
एवंहृदयादिषु॥एकेनत्रिभिर्द्वाभ्यांसमस्तेनप्रकल्पयेत्॥तथाचनिबंधे॥एकेनादौत्रिभिर्द्वाभ्यांत्रिभिर्द्वाभ्यामनंतरं॥समस्तेनास्त्रमाख्या
तमंगक्लृप्तिरुदाहृता॥एतान्यंगुष्ठादिहृदयादिषुन्यसेत्॥ततोध्यानम्॥हस्तैर्बिभ्रतमिक्षुदंडवरदौपाशांकुशौपुष्कर स्पृष्टस्वप्रमदावरांग
मनयाश्लिष्टंध्वजाग्रस्पृशा॥श्यामांग्याविधृताब्जयात्रिनयनंचंद्रार्द्धचूडंजवारक्तंहस्तिमुखंस्मरामिसततंभोगानिलोलंविभुं॥अन्यस्य

॥ॐ ह्रींगंह्रींवशमानयस्वाहा॰ इतिमंत्रः॥५॥

॥ॐ गुं नमः इति मंत्रः॥२

वं पूर्ववत्॥ अस्य पुरश्चरणजपो लक्षत्रयः॥ तथा च॥ लक्षत्रयं जपेन्मंत्रं इक्षुदंडैर्दशांशतः॥ अपूपैराज्ययुक्तैर्वा जुहुयान्मंत्रसिद्धये॥ अथ हेरंबमंत्रः॥ ऊकारस्तु क्रो गकारः सबिंदुः प्रणवादिनमोऽन्तश्चतुरक्षरः॥ चतुर्वर्गफलप्रदः॥ तथा च निबंधे॥ पंचांतको बिंदुयुक्तो वामकर्णविभूषितः॥ तारादिहृदयांतोयं हेरंबमनुरीरितः॥ चतुर्वर्णात्मको नृणां चतुर्वर्गफलप्रदः॥ षड्दीर्घभाजा बीजेन षडंगानि प्रकल्पयेत्॥ अस्य गणक ऋषिर्गायत्री छंदो हेरंबो देवता गकारो बीजं बिंदुः शक्तिः गां गीं गूं गैं गौं गः इत्येतैः षडंगानि॥ ततो ध्यानम्॥ मुक्ताकांचननीलकुंदघुसृणच्छायैस्त्रिनेत्रान्वितैः नागास्यैर्हरिवाहनं शशिधरं हेरंबमर्कप्रभं॥ दृप्तं दानमभीतिमोदकरदान्टंकं शिरोऽक्षात्मिकां मालां मुद्गरमंकुशं त्रिशिखकं दोर्भिर्दधानं भजे॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ गणेशोक्तपीठशक्त्यंतं संपूज्य ॐ हुं हुं महासिंहाय गां हेरंबासनाय नम इति पूजयेत्॥ तथा च निबंधे॥ प्रणवं कवचं हूं हूं महासिंहाय गांततः॥ हेरंबेति पदं पश्चात् आसनाय हृदंततः॥ अथ मानसमंत्रः स्यात् प्रदद्यादमुनासनं॥ न्यासेप्ययं मंत्रः॥ तत्र ॐ गं मंत्रेण मूर्तिं संकल्पयेत्॥ तथा च निबंधे॥ तारादिविघ्नबीजेन मूर्तिमस्य प्रकल्पयेत्॥ ततः पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ यथा अग्न्यादिकोणेषु मध्ये दिक्षु च गां हृदयाय नमः इत्यादिना पूजयेत्॥ पत्रेषु लोकपालांस्तद्बहिरिंद्रादीन्वज्रादींश्च पूजयेत्॥ ततो धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं त्रिलक्षजपः॥ तथा च॥ लक्षत्रयं जपेन्मंत्रं दशांशं जुहुयात्तिलैः॥ होमद्रव्यं पूर्ववत्॥ मंत्रांतरमाह॥ गं क्षिप्रप्रसादनाय हृदयम्॥ तथा च॥ सम्वर्तको नेत्रयुतः पार्श्वो वह्न्यासने स्थितः॥ प्रसादनाय हृन्मंत्रः स बीजाद्यो दशाक्षरः॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादिपीठन्यासांतं कर्म समाप्य ऋष्यादिन्यासं कुर्या

॥गं क्षिप्रप्रसादनाय नमः इति मंत्रः॥१॥

शिरसिगणकऋषयेनमः॥ मुखेविराट्छंदसेनमः॥ हृदिक्षिप्रप्रसादनायदेवतायैनमः॥ तथाच॥ गणकोमुनिरस्यस्याद्विराट्छंदउदीरितं॥ क्षिप्रप्रसादनोविघ्नोदेवतास्यसमीरिता॥ दीर्घयुक्तेनबीजेनषडंगानिप्रकल्पयेत्॥ एकाक्षरवत्करांगन्यासौकृत्वाध्यायेत्॥ पाशांकुशौकल्पलतांविषाणंदधत्स्वशुंडाहितबीजपूरः॥ रक्तस्त्रिनेत्रस्तरुणेन्दुमौलिर्हारोज्वलोहस्तिमुखोऽवतान्नः॥ एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंकुर्यात्॥ ततःपीठपूजांविधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतंविधायावरणपूजामारभेत्॥ अग्न्यादिकोणेषुगांहृदयायनमः इत्यादिनापूजयेत्॥ तथाचनिबंधे॥ अंगानिपूर्वमभ्यर्च्यविघ्नानष्टौयजेत्ततः॥ पत्राग्रेपूजयेद्देवानब्राह्म्याद्यास्तदनंतरं॥ पत्रेषुविघ्नंविनायकंशूरंवीरंवरदसंज्ञकं॥ इभवक्त्रंचैकरदंलंबोदरंचपूजयेत्॥ पत्राग्रेब्राह्म्याद्यास्तद्बहिरिन्द्रादीन्वज्रादींश्चपूजयेत्॥ ततोधूपादिविसर्ज्जनांतंकर्म्मसमापयेत्॥ अस्यपुरश्चरणंलक्षजपः॥ तथाच॥ लक्षंजपेज्जपस्यांतेजुहुयादयुतंतिलैः॥ मधुरत्रितयैर्वापिद्रव्यैरष्टभिरीरितैः॥ अथहरिद्रागणेशमंत्रः॥ पंचांतकोधरासंस्थोविंदुभूषितमस्तकः॥ एकाक्षरोमहामंत्रःसर्वकामफलप्रदः॥ ग्लौं इतिमंत्रः॥ अस्यवसिष्ठऋषिर्गायत्रीछंदोहरिद्रागणपतिर्देवता गकारोबीजं लकारःशक्ति बीजेनैवषडंगकम्॥ ध्यानन्तु॥ हरिद्राभंचतुर्बाहुंहारिद्रवसनंविभुं॥ पाशांकुशधरंदेवंमोदकंदंतमेवच॥ एवंध्यात्वागणपतिंपूजयेत्॥ आवरणपूजाविनियोगादिकमेकाक्षरगणपतिवत्॥ अस्यपुरश्चरणंचतुर्लक्षजपः॥ त्रिमधुयुक्तहरिद्राचूर्णमिश्रितैस्तंडुलैरयुतहोमः॥ तंत्रांतरे॥ मंत्रोद्धारंप्रवक्ष्यामिशृणुष्वकमलानने॥ इन्द्रबीजंसमुद्धृत्यनिजबीजंसमुद्धरेत्॥ चतुर्दशस्वरेणाढ्यंबिंदुभूषितमस्तकं॥ एकाक्षरीमहाविद्याकथितापद्मयोनिना॥ इंद्रबीजंलकारः॥ निजबीजंगं॥ चतुर्दशस्वरऔकारः॥ बिंदुयुतः॥ अस्यपूजादिकंसर्वंमहागणपतिवत्॥ करांगन्यासस्तुस्वबीजेनषड्दीर्घयुक्तेन॥ अस्याभेदांतरम्॥ लक्ष्म्याद्यावाकूर्चोवान्तामा

द्यांवाजपेत्सुधीः॥कामाद्यांवधूबीजाद्यांवाग्भाद्यांवाजपेत्सदा॥ॐकाराद्यांमहाविद्यांनिजबीजादिकांतथा॥ [illegible]
युता॥चतुर्वर्णात्मिकाविद्यावह्निजायावधिप्रिये॥एषाविद्यामहाविद्यात्रैलोक्येचसुदुर्लभा॥चतुर्वर्गप्रदासाक्षान्महापातकनाशिनी॥एतांसापू
जादिकंमहागणपतिमंत्रवत्॥इतिगणेशमंत्राः॥अथास्यधारणयंत्रं॥बीजंषट्कोणमध्येस्फुरदनलपुरेनारगांदिसुलक्ष्मीमायाकंदर्पभूमिस्तदनुर
सपुटेष्वालिखेद्बीजषट्कं॥तत्संधिष्वंगमंत्रान्वसुदलकमलेमूलमंत्रस्यवर्णान्॥शिष्टान्पत्रेषुविद्वान्विलिखतुगुणशश्चान्त्यमंत्रेपलाशे॥आवीतेलि
पिभिःक्रमात्क्रमवशात्पाशांकुशाभ्यामपिभूबिंबहिन्नयेनवेष्टितमिदंयंत्रंगणाधीशितुः॥लाक्षाकुंकुमरोचनामृगमदैर्भूर्जेदरेहेम्निवासंलिख्या॥
सिवहन्नलभेद्भुजतलेसंप्रार्थनीयांश्रियं॥उक्तंमहागणपतेर्विधानंसुरपूजितं॥सर्वसिद्धिकरंपुंसांसमस्तपुरुषार्थदं॥इतियंत्रं॥अथवक्ष्येश्रि
योमंत्रान् श्रीसौभाग्यफलप्रदान्॥यस्याःकटाक्षमात्रेणत्रैलोक्यमपिवर्द्धते॥ अथलक्ष्मीमंत्राः॥वांतंवह्निसमारूढंवामनेत्रेन्दुसंयुतं॥बी
जमेतत्श्रियःप्रोक्तंसर्वकामफलप्रदम्॥वांतःशकारः॥वन्हिसमारूढंरकारयुक्तः॥वामनेत्रईकारः॥इंदुरनुस्वारः॥तद्युतं॥अस्यपूजाप्रयो
गः॥प्रातःकृत्यादिपीठन्यासांतंकर्मविधायऋष्यादिन्यासंकुर्यात्॥शिरसिभृगुऋषयेनमः॥मुखेनिचृच्छंदसेनमः॥हृदिश्रीदेवतायैनमः
॥केसरेषुमध्येच ॐविभूत्यैनमः॥एवंउन्नत्यै।कान्त्यै।सृष्ट्यै॥कीर्त्यै।सन्नत्यै।व्युष्ट्यै।उत्कृष्ट्यै।ऋद्ध्यै।ततः श्रीकमलासनायनमः इ
त्यासनंपूजयेत्॥तथाचनिबंधे॥विभूतिरुन्नतिःकांतिःसृष्टिः कीर्त्तिश्चसन्नतिः॥व्युष्टिरुत्कृष्टिरृद्धीश्च संप्रोक्तानवशक्तयः॥ततःकरांग
न्यासौकुर्य्यात्॥श्रांअंगुष्ठाभ्यांनमः इत्यादि॥एवंश्रांहृदयायनमःइत्यादिनाचन्यसेत्॥तथाचनिबंधे॥अंगानिदीर्घयुक्तेनरमाबीजेनकल्प
येत्॥ततोध्यानम्॥कांत्याकांचनसन्निभांहिमगिरिप्रख्यैश्चतुर्भिर्भुजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानांश्रियं॥बिभ्राणांवरमब्जयुग्मम

भयंहस्तैःकिरीटोज्ज्वलाम्क्षौमाबद्धनितम्बबिम्बललितांवंदेरविंदस्थितां ॥ एवंध्यात्वामानसैः संपूज्य शंखस्थापनंकुर्य्यात् ॥ ततःपीठपूजां
विधायकेसरेषुमध्येदिक्षुच विभूत्यादिपीठमन्वन्तंविधायपुनर्ध्यात्वावाह नादिपंचपुष्पांजलिदानपर्य्यन्तंत्रिधावरणपूजामारभेत् ॥ त
द्यथा ॥ अग्न्यादिकेसरेषुमध्येदिक्षुच श्रांहृदयायनम इत्यादिनासंपूज्य दिग्दलेषुपूर्वादि ॐवासुदेवायनमः एवंसंकर्षणायप्रद्युम्ना
य अनिरुद्धाय ॥ विदिग्दलेषु ॐ दमकायनमः । एवंसलिलाय । गुग्गुलवेकुरुण्टकाय ॥ ततोदेव्यादक्षिणे ॥ ॐ शंखनिधयेनमः ॥ एवंव
सुधायै ॥ वामे । पद्मनिधयेनमः । एवंवसुमत्यै । पत्राग्रेषुपूर्वादि । ॐ बलाकैनमः ॥ एवंविमलायै । कमलायै । वनमालिकायै । विभी
षिकायै । मालिकायै । शांकर्य्यै । वसुमालिकायै । तद्बहिरिन्द्रादीन्वज्रादींश्चपूजयेत् ॥ ततोधूपादिविसर्जनान्तंकर्म्मसमापयेत् ॥ अ
स्यपुरश्चरणंद्वादशलक्षजपः ॥ तथाच ॥ भानुलक्षंजपेन्मन्त्रंदीक्षितोविजितेन्द्रियः ॥ तत्सहस्रंचजुहुयात्कमलैर्मधुरोक्षितैः ॥ ज
पीतंजुहुयान्मंत्रीतिलैर्वामधुराप्लुतैः ॥ बिल्वैःफलैर्वाजुहुयात्त्रिभिर्वासाधकोत्तमः ॥ मंत्रान्तरम् ॥ वाग्भवंवनिताविष्णोर्मायामकर
केतनः ॥ चतुर्बीजात्मकोमंत्रश्चतुर्वर्गफलप्रदः ॥ अस्यपूजादिकं पूर्ववद्बोद्धव्यम् ॥ तथाच ॥ रमायाःकल्पितेपीठेतद्विधानेनपूज
येत् ॥ कुर्य्यात्प्रयोगांस्तत्रस्थान्मूलेसाधकसत्तमः ॥ निधिभिःसेव्यतेनित्यंमूर्तिमद्भिरुपस्थितैः ॥ ध्यानेतुविशेषः ॥ यथा ॥ माणिक्यप्रति
मप्रभांहिमनिभैस्तुंगैश्चतुर्भिर्गजैर्हस्ताग्राहितरत्नकुंभसलिलैरासिच्यमानांसदा ॥ हस्ताब्जैर्वरदानमम्बुजयुगाभीतिर्दधानांहरेःकां
तांकांक्षितपारिजातलतिकांवंदेसरोजासनाम् ॥ अस्यपुरश्चरणजपोद्वादशलक्षः ॥ तथाच ॥ भानुलक्षंहविष्याशीजपेदंतेस
रोरुहैः ॥ जुहुयादरुणैःफुल्लैस्तत्सहस्रंजितेन्द्रियः ॥ मंत्रांतरमाह ॥ नमःकमलान्तेवासिन्यैठद्वयमितिमंत्रो[illegible]दशाक्षरः

ऐंश्रींह्रींक्लीं इतिमंत्रः ॥५

॥नमः कमलवासिन्यै स्वाहा॥ इति मंत्रः॥१॥

च निबंधे॥दीर्घयादिर्विसर्गो नेत्रस्त्वाभानुर्वसुंधरा॥वांते सिन्यै प्रियावह्नेर्मनुः श्रीक्तो दशाक्षरः॥दीर्घानकरः॥यादिर्मकारः विसर्गोयुतः॥ब्रह्माककारः॥भानुर्मकारः॥वसुंधरालकारः॥वा स्वरूपं॥सिन्यै स्वरूपं॥प्रियावन्हेः स्वाहा॥अस्य पूजा पूर्ववत् पीठमन्त्रांते विन्यस्य ऋष्यादिन्यासं कुर्य्यात्॥शिरसि दक्षऋषये नमः॥मुखे विराट्छंदसे नमः॥हृदि श्रियै देवतायै नमः॥तथा च शारदायाम्॥ऋषिर्दक्षो विराट्छंदो देवता श्रीः प्रकीर्तिता॥ततः करांगन्यासौ॥ॐ देव्यै नमो अंगुष्ठाभ्यां नमः॥ॐ पद्मिन्यै नमस्तर्जनीभ्यां स्वाहा॥ॐ विष्णुपत्न्यै नमो मध्यमाभ्यां वषट्॥ॐ वरदायै नमोऽनामिकाभ्यां हुं॥ॐ कमलरूपायै नमः कनिष्ठाभ्यां फट्॥एवं देव्यै नमो हृदयाय नम इत्यादि॥तथा च निबंधे॥देव्यै हृदयमाख्यातं पद्मिन्यै शिर ईरितं॥विष्णुपत्न्यै शिखा प्रोक्ता वरदायै तनुच्छदं॥अस्त्रं कमलरूपायै नमोऽन्ताः प्रणवादिकाः॥ततो ध्यानम्॥ आसीना सरसीरुहे स्मितमुखी हस्तांबुजैर्बिभ्रती दानं पद्मयुगाभये च वपुषा सौदामिनीसन्निभा॥मुक्ताहारविराजमानपृथुलोत्तुंगस्तनोद्भासिनी पायाद्वः कमला कटाक्षविभवैरानन्दयन्ती हरिम्॥एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा पूर्वोक्तपीठशक्तिसहितपीठमन्त्रांतां पूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्य्यन्तं विधायावरणपूजामारभेत्॥अग्न्यादिचतुष्के दिक्षु च ॐ देव्यै नमो हृदयाय नमः॥ॐ पद्मिन्यै नमः शिरसे स्वाहा॥ॐ विष्णुपत्न्यै नमः शिखायै वषट्॥ॐ वरदायै नमः कवचाय हुं॥ॐ कमलरूपायै नमोऽस्त्राय फट्॥ततः पूर्वादिदलेषु पूर्ववत् बलाक्यादि पूजयेत्॥तद्बहिरिन्द्रादीन्वज्रादींश्च पूजयेत्॥ततो धूपादिविसर्जनांतं कर्म समापयेत्॥अस्य पुरश्चरणं जपो दशलक्षः॥तथा च॥दशलक्षं जपेन्मंत्रं मंत्रविद्विजितेन्द्रियः॥दशांशं जुहुयान्मंत्री मधुराक्तैः सरोरुहैः॥अथ महालक्ष्मीमंत्राः॥तारो वाग्भवमायारमाकामः ह्सौः जगत्प्रसूत्यै नमः॥तथा च॥वाग्भवं शंभुवनितारमामकरकेतनः॥तार्त्तीयं च जगत्प्र

श्रीवह्निबीजसमुज्ज्वलः॥अर्धीशाढ्यो भृगुस्त्वेष मंत्रोयंह्युदशाक्षरः॥महालक्ष्म्याः समुद्दिष्टस्ताराद्यः सर्वसिद्धिदः॥अस्य पूजाप्रयोगः॥प्रातः
कृत्यादिश्रीवीजोक्तपीठन्यासं विधाय ऋष्यादिन्यासं कुर्यात्॥शिरसि ब्रह्मणे ऋषये नमः॥मुखे गायत्रीछंदसे नमः॥हृदि महालक्ष्म्यै देवतायै न
मः॥ततो मूलेन करौ संशोध्य॥अंगुष्ठादिक्रमेण प्रत्येकं तारादिनमोऽन्तानि पंचवीजानि न्यसेत्॥यथा॥ॐ ऐं नमः अंगुष्ठा॰॥ॐ ह्रीं नमः तर्जनी॰॥ॐ श्री
नमः मध्यमा॰॥ॐ क्लीं नमः अनामि॰॥ॐ ह्सौः नमः कनिष्ठा॰॥ॐ जगत्प्रसूत्यै नमः करतल॰॥ततो मस्तकादि चरणांतं यावन्मूलेन व्यापकं कुर्यात्॥
ततो मूर्द्धास्यहृदयगुह्यपादेषु पंचबीजानि विन्यसेत्॥शेषाक्षराणि हृदये सप्तधातुषु॥तथा च निबंधे॥हस्तौ संशोध्य मूलेन तारादिहृदयान्तकं।
बीजानां पंचकं न्यसेदंगुलीषु यथाक्रमं॥मंत्रशेषं न्यसेन्मंत्री तलयोरुभयोरपि॥मूर्द्धादिचरणं यावन्मंत्रेण व्यापकं न्यसेत्॥मूर्द्धास्यवक्षोगुह्या
घ्रौ पंचबीजानि विन्यसेत्॥शेषान्न्यसेत्सप्तवर्णान्हृदये सप्तधातुषु॥ततः करांगन्यासौ॥ऐं ज्ञानायांगुष्ठाभ्यां नमः॥ह्रीं ऐश्वर्याय तर्जनीभ्यां स्वा
हा॥श्रीं शक्तये मध्यमाभ्यां वषट्॥क्लीं बलाय अनामिकाभ्यां हुं॥ह्सौः वीर्याय कनिष्ठाभ्यां वौषट्॥जगत्प्रसूत्यै नमस्तेजसे करतलकरपृष्ठाभ्यां
फट्॥एवं हृदयादिषु॥तथा च निबंधे॥अंगानि पंचभिर्बीजैरस्त्रं शेषाक्षरैर्भवेत्॥ज्ञानैश्वर्यादिभिर्युक्तैश्चतुर्थ्यन्तैः सजातिभिः॥ज्ञानमैश्वर्य
शक्तिश्च बलवीर्ये सतेजसी॥ज्ञानैश्वर्यादयः प्रोक्ताः षट्क्रमादंगदेवताः॥ततो ध्यानं॥बालार्कद्युतिमिन्दुखंडविलसत्कोटीरहारोज्ज्वलां रत्ना
कल्पविभूषितां कुचनतां शालेः करे मंजरीं॥पद्मं कौस्तुभरत्नमप्यविरतं संबिभ्रतीं सस्मितां फुल्लांभोजविलोचनत्रययुतां ध्यायेत्परामम्बि
कां॥विस्तरेण तु शारदायाम् द्रष्टव्यम्॥एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥श्रीवीजोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि पं
चपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥यथा॥देव्या दक्षिणे ॐ शंकरनंदनाय नमः॥एवं वामे पुष्पधन्वने॥अग्न्यादिकोणेषु मध्ये दि

दशांशं जुहुयाद्घृतैः।१।

क्षुच॥ ऐं ज्ञानायनम इत्यादिना पूजयेत्॥ तथा च शारदायाम्॥ पूजयेद्दक्षिणे पार्श्वे देव्याः शंकरं तं द[illegible] पतः पुष्पधन्वानं [illegible]ांजलि करं यजेत्॥ अंगानि पूर्वमुक्तेषु स्थानेषु विधिवद्यजेत्॥ पत्रेषु पूर्वादि॥ ॐ उमायै नमः एवं श्रियै। सरस्वत्यै। दुर्गायै। धरण्यै। गायत्र्यै। [illegible]व्यै। उषायै। दक्षिणे जह्नुसुतायै। वामे सूर्यसुतायै। तथा पुनर्दक्षिणे शंखनिधये। पुनर्वामे पद्मनिधये। पश्चिमे धृतातपत्रं वरुणं पूजयेत्॥ तथा च शारदायां॥ उमाद्याः पत्रमध्यस्थाः शक्तिरष्टौ यजेत्क्रमात्॥ अथोमाश्रीसरस्वत्यो दुर्गाधरणि संयुताः॥ गायत्री देव्युषा चेति पद्मह स्ताः सभूषणाः॥ तद्बाह्ये द्वादशराशीन्नवग्रहान्प्रत्येकेन पूजयेत्॥ तद्बाह्ये गजानैरावतपुंडरीकवामनकुमुदांजनपुष्पदंतसार्वभौमसुप्रतीकान्पूजयेत्॥ तथा च निबंधे॥ जह्नुःसूर्यसुते पूज्ये पादप्रक्षालनोद्यते॥ शंखपद्मनिधी पूज्यौ पार्श्वयोर्धृतचामरौ॥ धृतातपत्रं वरुणं पूजयेत्पश्चिमे ततः॥ संपूज्य राशीन्परितो यजेदथ नवग्रहान्॥ अर्चयेद्दिग्गजान्दिक्षु चतुर्दन्तविभूषितान्॥ ऐरावतः पुंडरीको वामनः कुमुदोंजनः॥ पुष्पदंतः सार्वभौमः सुप्रतीकश्च ते क्रमात्॥ तत इन्द्रादीन्वज्रादींश्च संपूज्य धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं द्वादशलक्षजपः॥ तथा च॥ भानुलक्षं जपेन्मंत्रं जुहुयात्सघृतैस्तथा॥ जुहुयाच्छ्रीफलैः पद्मैः प्रत्येकमयुतद्वयम्॥ तर्पयेत्सलिलैः शुद्धैः सुगंधैरयुतद्वयम्॥ अयुतद्वयमित्यत्र वाचनिकाव्यवस्था॥ मंत्रांतरमाह॥ शंभुपत्नीश्रियारुद्धाकमो भगवतीमहो॥ ब्रह्मादित्यो धरादीर्घो लक्षादिर्भगवान्मरुत्॥ प्रसीदयुगलं भूयः श्री रुद्धा भुवनेश्वरी॥ महालक्ष्म्यै नमोन्तः स्यात्प्रणवादिरयं मनुः॥ मही लकारः॥ भगवती एकारवती॥ ब्रह्मा ककारः॥ आदित्यो मकारः॥ धरा लकारः॥ दीर्घ आकारयुक्ता लक्षादिर्लकारः॥ मरुत् यकारः एकारयुक्तः॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि पूर्वोक्तक्रमादृष्यादिन्यासं विधाय करांगन्यासौ च कुर्यात्॥ श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं अंगुष्ठाभ्यां नमः॥ श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं श्रीं तर्जनीभ्यां स्वाहा॥ श्रीं ह्रीं श्रीं

४ अत्र घृतेन दशांशहोमं विधाय तद्दशांशतर्पणादि निर्वर्त्य पश्चादयुतद्वयहोमम् अयुतद्वयं तर्पणं च विदध्यादित्यन्यमंत्रेभ्यो विशेषः॥४॥

३॥ ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः॥ इति मंत्रः॥३॥

तं·सा· प्रसीदश्रीँ ह्रीं श्रीं मध्यमाभ्यांवषट्॥श्रीं ह्रीं श्रीं प्रसीदश्रीं ह्रीँ श्रीँ अनामिकाभ्यांहुं॥श्रीँ ह्रीँ श्रीं महालक्ष्म्यै श्रीं ह्रीँ श्रीं कनिष्ठाभ्यांफट्॥मूलमुच्चार्य
५२ करतलकरपृष्ठाभ्यांफट्॥एवंहृदयादिषु॥तथाचनिबंधे॥॥कमलेहृदयंप्रोक्तंशिरःस्यात्कमलालये॥शिखाप्रसीदेत्येवंकवचंचतुरस्र
रैः॥अस्त्रमेतैः पदैःकुर्यात् त्रिबीजपुटितैःक्रमात्॥ततोध्यानम्॥सिंदूरारुणकान्तिमब्जवसतींसौन्दर्यवारांनिधिं कोटीरांगदहारकुंडल
कटीसूत्रादिभिर्भूषिताम्॥हस्ताब्जैर्वसुपात्रमब्जयुगलादर्शौवहंतींपरा मावीतांपरिचारिकाभिरनिशंध्यायेत्प्रियांशार्ङ्गिणः॥१॥एवंध्या
त्वामानसैःसंपूज्यशंखस्थापनंकुर्यात्॥पूर्ववत्पीठपूजांविधायपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतंविधायावरणपूजांकुर्या
त्॥केसरेष्वग्न्यादिकोणमध्येदिक्षुच श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं हृदयायनमइत्यादिनापूजयेत्॥दलमूले पूर्वादिश्रीधरायनमः एवंहृषीके
शाय वैकुंठाय विश्वरूपाय संकर्षणाय वासुदेवाय प्रद्युम्नाय अनिरुद्धाय॥दलमध्येषुभारत्यै पार्वत्यैचान्द्र्यै शच्यै दमकाय सलिला
य गुग्गुलवेकुरुण्टकाय॥दलाग्रेषु॥अनुरागंविसम्वादंविजयंवल्लभंमदं॥हर्षंबलंतेजइतिलक्ष्मीबाणान्प्रपूजयेत्॥वाक्यंतु अनु
रागायमहालक्ष्मीबाणायनमः॥एवंक्रमेणपूजयेत्॥तथाचनिबंधे॥दलाग्रेष्वर्चयेद्बाणान्महालक्ष्म्याःक्रमादिमान्॥तद्बहिरिन्द्रा
दीन्वज्रादींश्चपूजयेत्॥ततोधूपादिविसर्जनान्तंकर्मसमापयेत्॥अस्यपुरश्चरणंलक्षजपः॥तथाच॥लक्षंजपेत्फलैर्बिल्वैर्जुहुयान्म
धुरोक्षितैः॥दशांशंसंस्कृतेवह्नौप्राक्प्रोक्तेने ववर्त्मना॥इतिलक्ष्मीमंत्राः॥अथसूर्यमंत्राः॥तारोघृणिर्भृगुःपश्चाद्वामकर्णविभूषितः॥व
ह्न्यासनोमरुच्छेषःसनेत्रोऽद्रिस्त्यपश्चिमः॥अष्टाक्षरोमनुःप्रोक्तोभानोरभिमतप्रदः॥ॐघृणिसूर्यआदित्य इतिमंत्रः॥अस्यपूजाप्रयो राम
गः॥प्रातःकृत्यादिप्राणायामांतंविधायपीठन्यासंकुर्यात्॥तत्रविशेषः॥हृदयस्यपूर्वादिदिक्षुमध्ये च प्रभूतविमलसारसमाराध्यपरमसु ५२

खं विन्यस्याधारशक्त्यादिकं सूर्यमंडलाय द्वादशकलात्मने नमः इत्यंतं विन्यसेत् । तथा च निबंधे ॥ पीठह्लृंप्रञ्चप्रथमदिक्षु मध्ये च सम्पजेत् ॥ प्रभूतं विमलं सारं समाराध्यमनन्तरम् ॥ परमादिसु खं पीठस्वबिम्बांतं प्रकल्पयेत् ॥ ततः केशरेषु मध्ये च रां दीप्तायै नमः एवं रीं सूक्ष्मायै रूं जयायै रैं भद्रायै रैं विभूत्यै ॥ रों विमलायै रौं अमोघायै रं विद्युतायै रः सर्वतोमुख्यै ॥ तथा च निबंधे ॥ दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला पुनः ॥ अमोघा विद्युता सर्वतोमुखी पीठशक्तयः ॥ दीप्तादीपशिखाकाराबीज न्यासं विदुः क्रमात् ॥ अक्लीबह्रस्वत्रितयस्वरान् बिन्दूत्तंसयुतान् ॥ ॐ तदुपरि ब्रह्मविष्णुशिवात्मकाय सौराययोगपीठाय नमः ॥ तथा च शारदायाम् ॥ वदेत् पदं चतुर्थ्यंतं ब्रह्मविष्णुशिवात्मकम् ॥ सौराय योगपीठाय नमः पदमनंतरं ॥ पीठमंत्रोयमाख्यातो दिनेशस्य जगत्पतेः ॥ ततः ऋष्यादिन्यासः ॥ शिरसि देवभागऋषये नमः ॥ मुखे गायत्री छंदसे नमः ॥ हृदि आदित्याय देवतायै नमः ॥ तथा च निबंधे॰ देवभागो मुनिः प्रोक्तो गायत्री छंद ईरीतम् ॥ आदित्यो देवता प्रोक्तो दृष्टादृष्टफलप्रदः ॥ ततः करांगन्यासो ॥ सत्याय तेजोज्वालामणे हुं फट् स्वाहा अंगुष्ठाभ्यां नमः ॥ एवं ब्रह्मणे १० तर्जनीभ्यां स्वाहा ॥ विष्णवे १० मध्यमाभ्यां वषट् ॥ रुद्राय १० अनामिकाभ्यां हुं ॥ अग्नये १० कनिष्ठाभ्यां वौषट् ॥ सर्वाय १० करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ तथा च शारदायाम् ॥ सत्याय हृदयं प्रोक्तं ब्रह्मणे शिर ईरीतं ॥ विष्णवे स्याच्छिखा वर्म रुद्राय परिकीर्तितं ॥ अग्नये नेत्रमाख्यातं सर्वायास्त्रमुदाहृतम् ॥ तेजोज्वालामणे हुं फट् द्विवाताः परिकीर्तिताः ॥ ततो मूर्तिन्यासः ॥ यथा शिरसि ॐ आदित्याय नमः ॥ एवं मुखे ॐ रवये ॥ हृदये ॐ भानवे ॥ गुह्ये ॐ भास्कराय ॥ चरणयोः ॐ सूर्याय ॥ तथा च निबंधे ॥ आदित्यं विन्यसेन्मूर्ध्नि रविं मुखगतं न्यसेत् ॥ हृदये भानुनामानं भास्करं गुह्यदेशतः ॥ सूर्यं चरणयोर्न्यसेद्रू स्वैः सत्यादिपंचभिः ॥ ततो मन्त्रन्यासः ॥ शिरसि ॐ नमः ॥ आस्ये घृ नमः ॥ कंठे णि नमः ॥ हृदि सू नमः ॥ कुक्षौ र्य नमः ॥ नाभौ आ नमः ॥ लिङ्गे दि नमः ॥ पादयोस्त्य न

तं.सा.
५३

मः॥तथा च॥मूर्द्धास्यकंठहृदयकुक्षिनाभिध्वजांघ्रिषु॥मंत्रवर्णान्न्यसेदष्टौ प्रत्येकं प्रणवादिकान्॥ततो ध्यानम्॥रक्ताब्जयुग्माभयदान्
हस्तं केयूरहारांगदकुंडलाढ्यं॥माणिकमौलिं दिननाथमीडे वंधूककांतिं विलसत्त्रिनेत्रम्॥एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कुर्या
त्॥अत्र शंखनिषेधः॥सर्वत्रैव प्रशस्तोब्जः शिवसूर्यार्चनं विना॥ततो गुरुपंक्तिं संपूज्य एतन्मंत्रोक्तपीठपूजां कुर्यात्॥ॐ खंखखखोल्कायन
मइति मंत्रेण मूर्तिं संकल्प्य पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥तथा च निबंधे॥तारादि खंखख-
खोल्काय मनुना मूर्तिकल्पना॥साक्षिणं सर्वलोकानां तस्मामावाह्य पूजयेत्॥के सरेष्वग्न्यादिकोणमध्ये दिक्षु च सत्याय तेजोज्वालामणे
हुं फट् स्वाहा हृदयाय नमः॥एवं ब्रह्मणे १० शिरसे स्वाहा॥विष्णवे १० शिखायै वषट्॥रुद्राय १० कवचाय हुं॥अग्नये १० नेत्रत्रयाय वौषट्॥
सर्वाय १० अस्त्राय फट्॥दिक्पत्रेषु पूर्वादि ॐ आदित्याय नमः॥एव एं रवये॥उं भानवे॥ईं भास्कराय॥विदिक्पत्रेषु अग्न्यादि ॐ उषायै
एवं प्रं प्रज्ञायै॥प्रं प्रभायै॥सं संध्यायै॥तथा च॥अंगानि पूजयेद्दैदिक्पत्रे सूर्यमूर्तयः॥आदित्याद्यास्ततस्तोऽर्च्याः शक्तयः कोणपत्रगाः॥स्व
स्वनामादिवर्णयुक्तासबीजान्यनुक्रमात्॥उषाप्रज्ञाप्रभासंध्याः शक्तयः परिकीर्तिताः॥ततः पत्रेषु॥ब्राह्म्याद्याः संपूज्य पुरतोऽरुणमर्चयेत्॥
॥तथा च शारदायाम्॥पत्राग्रसंस्था ब्राह्म्याद्याः पुरतोऽरुणमर्चयेदिति॥तद्बाह्ये पूर्वादि चन्द्रादीन् पूजयेत्॥ॐ चंद्राय नमः॥ॐ मंगलाय न
मः॥एवं बुधाय॥बृहस्पतये॥शुक्राय॥शनैश्चराय॥राहवे॥केतवे॥तथा च शारदायाम्॥चन्द्रादीन्पूजयेत्पश्चाद्ग्रहानष्टौ ततो बहिः॥ततइ
न्द्रादीन्वज्रादींश्च संपूज्य धूपादि विसर्जनांतं कर्म समापयेत्॥अस्य पुरश्चरणमष्टलक्षजपः॥तथा च॥वसुलक्षं जपेन्मंत्रं पाज्येन चरशांशतैः
तिलैर्वा मधुरासिक्तैर्जुहुयाद्विजितेन्द्रियः॥अथ मंत्रांतरमाह॥आकाशमग्निदीर्घेंदुसंयुतं मस्यपा भृगुः॥सविसर्गः॥त[illegible]च॥आकाशमग्निदीर्घेंदु संयुतं

वसुलक्षं जपेन्मंत्रं समिद्भिः क्षीरशाखिनां॥ तत्सहस्रं च जुहुया. क्षीराक्ताभिर्जितेन्द्रि ॥तथापि वा च ।कएवाष्टसहस्र ॥ २॥

राम
५३

भुवनेश्वरी॥सर्गान्वितोभृगुर्भानोस्त्र्यक्षरोमनुरीरितः॥अस्यपूजाप्रयोगः॥प्रातःकृत्यादिपूर्वमंत्रोक्तपीठन्यासंविधायपूर्वोक्तऋष्यादिन्यासंकुर्यात्॥ततोमंत्रन्यासः॥मूलाधारादिपादपर्यंतंह्रांनमः॥कंठाद्याधारपर्यंतंह्रींनमः॥मूर्धादिकंठपर्यंतंसःनमः॥ततःकरांगन्यासौ॥ह्रांअंगुष्ठाभ्यांनमः॥ह्रींतर्जनीभ्यांस्वाहा॥ह्रूंमध्यमाभ्यांवषट्॥ह्रैंअनामिकाभ्यांहुं॥ह्रौंकनिष्ठिकाभ्यांवौषट्॥ह्रःकरतलपृष्ठाभ्यांफट्॥एवंहृदयादि॥तथाचनिबंधे॥आधारादिपदाग्रांतंकंठाद्याधारकावधिः॥मूर्धादिकंठपर्यंतंक्रमाद्बीजत्रयंन्यसेत्॥षड्दीर्घस्वरयुक्तेनमध्येनांगानिकल्पयेत्॥मध्येनदीर्घयुक्तेनेत्यादि॥ततोध्यानं॥रक्तांबुजासनमशेषगुणैकसिंधुंभानुंसमस्तजगतामधिपंभजामि॥पद्मद्वयाभयवरान्दधतंकराब्जैर्माणिक्यमौलिमरुणांगरुचिंत्रिनेत्रं॥एवंध्यात्वामानसैःसंपूज्यअर्घ्यस्थापनंविधायपूर्वोक्तमंत्रक्रमेणमूर्तिंसंकल्प्यपुनर्ध्यात्वाऽवाहनादिपंचपुष्पांजलिदानपर्यंतंविधाया वरणपूजामारभेत्॥केसरेष्वग्नादिकोणेमध्येदिक्षुच॥ह्रांहृदयायनमइत्यादिनापूजयेत्॥पत्रेषुचंद्रादीन्पूजयेत्॥ततइंद्रादीन्वज्रादींश्चपूजयेत्॥ततोधूपादिविसर्जनांतंकर्मसमापयेत्॥अस्यपुरश्चरणंद्वादशलक्षजपः॥तथाच॥भानुलक्षंजपेन्मंत्रंआज्येनतद्दशांशतः॥तिलैर्वामधुरासिक्तैर्जुहुयाद्विजितेंद्रियः॥मंत्रांतरं॥आकाशमग्निपवनसम्यान्ताघीशबिंदुमत्॥मार्तंडभैरवंनामबीजमेतदुदाहृतम्॥पुटितेनबिम्बबीजेनसर्वकामफलप्रदम्॥ठान्तंवदननेत्रेन्दुसहितंतदुदाहृतम्॥अस्यपूजाप्रयोगः॥प्रातःकृत्याद्येतन्मंत्रोक्तपीठन्यासांतंकर्मविधाय·ऋष्यादिन्यासंकुर्यात्॥ततोमूर्तिन्यासः॥ह्रंसूर्यायनमोअंगुष्ठयोः॥ह्रिंभास्करायनमस्तर्जन्योः॥ह्रुंभानवेनमोमध्यमयोः॥ह्रैंरवयेनमोऽनामिकयोः॥ह्रौंदिवाकरायनमःकनिष्ठयोः॥ततःशिरसिवदनेहृदयेगुह्येपाददेशेषुतांस्तत्तद्बीजादिकान्न्यसेत्॥तथाचनिबंधे॥पंचह्रस्वाढ्यबीजेनपंचमूर्तीःप्रविन्यसेत्॥अंगुष्ठादिकनिष्ठांतमंगुलीषुक्रमादिमाः॥सूर्यस्तुभास्करोभानुस्ततोरविदिवाकरौ॥शिरोवदनहृद्गुह्यपाददेशेषुताः

ग्नीहवयऐऊंत्रि॥४॥

शंखं चक्रपाणं॥२

पुनः॥ ततः करांगन्यासो॥ ह्रां अंगुष्ठाभ्यां नमः॥ ह्रीं तर्जनीभ्यां स्वाहा॥ ह्रूं मध्यमाभ्यां वषट्॥ ह्रैं अनामिकाभ्यां हुं॥ ह्रौं कनिष्ठाभ्यां वौषट्॥ ह्रः करतलपृष्ठाभ्यां फट्॥ एवं ह्रां हृदयाय नमः॥ ह्रीं शिरसे स्वाहेत्यादि तथा च निबंधे॥ दीर्घयुक्तेन बीजेन नेत्रांतांगानि विन्यसेत्॥ ततो मूलबीजेन व्यापकं कृत्वा ध्यायेत्॥ तथा॥ व्यापकं मूलबीजेन कुर्वीत तदनंतरं॥ अथ ध्यानम्॥ हेमांभोजप्रवालप्रतिमनिजरुचिं चारुखट्वांगपद्मौ चक्रं शक्तिं सपाशं सृणिमतिरुचिरामक्षमालां कपालम्॥ हस्तांभोजैर्दधानं त्रिनयनविलसद्वेदवक्त्राभिरामं मार्तंडं वल्लभार्द्धं मणिमयमुकुटं हारदीप्तं भजामः॥ एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कुर्यात्॥ ततः पूर्वोक्तपीठक्रमेण पीठं संपूज्य पूर्वादिकर्णिकायाम्॥ ॐ उषायै नमः एवं प्रज्ञायै प्रभायै संध्यायै इति संपूज्य मूर्तिं मूलेन कल्पयेत्॥ ततः पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ तथा च निबंधे॥ पीठे दीप्तादिभिर्युक्ते कर्णिकायामुषादिकाः॥ पूर्वादिदिक्षु संपूज्य मूर्तिं मूलेन कल्पयेत्॥ ततः पूर्वादिदिक्षु सूर्यं भास्करं भानुं रविं च पूजयेत्॥ कोणेषु दिवाकरम्॥ पुनर्दक्षिणे पश्चात्योदीच्यदिक्षु ह्रां हृदयाय नमः इत्यादिना पूजयेत्॥ ईशाने ह्रौं नेत्रत्रयाय वौषट्॥ शारदायाम्॥ सूर्यादिश्चतुरो दिक्षु विदिक्षु च समर्चयेत्॥ अंगपूजा यथापूर्वमीशानादि समाचरेत्॥ ततः पूर्ववच्चंद्रादीन् ग्रहान् संपूज्य भूगृहे लोकपालान् पूजयेत्॥ तथा च निबंधे॥ ग्रहानष्टौ तथा बाह्ये लोकपालांस्ततः परम्॥ ततो धूपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुर श्चरणं जपो लक्षत्रयसंख्यः॥ त्रिमध्वरोपेतैः कमलैर्दशांशहोमः॥ तथा च॥ लक्षत्रयं जपेन्मंत्री बीजं बिल्वपुटीकृतम्॥ दशांशं कमलैः फुल्लैर्जुहुयान्मधुरोक्षितैः॥ इमं मंत्रं जपेन्मर्त्यः कांतिपुत्रान् धनं द्युतिं॥ वाक्सिद्धिममितां — लक्ष्मीं सौभाग्यमपि साधयेत्॥ अथाजपा॥ वियदींदुललितं तदादिः सर्गसंयुतः॥ अजपाख्यो मनुः प्रोक्तो ह्यक्षरः सुरपादपः॥ अस्य पूजाप्रयोगः॥ प्रातः कृत्यादिपीठ

मन्वंतं समाप्य ऋष्यादिन्यासं कुर्यात् ॥ शिरसि ब्रह्मणे ऋषये नमः ॥ मुखे गायत्री छंदसे नमः ॥ हृदि   गिरिजा   वतायै न   ॥ ततः क
रांगन्यासौ ॥ हसां अंगुष्ठाभ्यां नम इत्यादि ॥ एवं हृदयादिषु ॥ तथाच निबंधे ॥ हसा षड्दीर्घयुक्तेन कुर्य्यादंगक्रियां मनोः ॥ ततोध्यानम् ॥ उद्यद्भा
नुस्फुरिततडिदाकारमर्द्धांबिकेशं पाशाभीती वरदपरशुं संदधानं कराब्जैः ॥ दिव्याकल्पैर्नवमणिमयैः शोभितं विश्वमूलं सौम्याग्नेयं वपुर
वतु नश्चन्द्रचूडं त्रिनेत्रम् ॥ १ ॥ एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कुर्य्यात् ॥ ततस्तंत्रोक्तपीठपूजां विधाय पूर्ववद्ध्यात्वावाहनादि पंच
पुष्पांजलिदानपर्य्यंतं विधायावरणपूजामारभेत् ॥ अग्निनिर्ऋतिवाय्वीशानेषु मध्ये दिक्षु च ॥ हसां हृदयाय नमः इत्यादिना पूजयेत् ॥ त
तो दिग्दलेषु ऋतुं वसुं नरं वरम् ॥ विदिग्दलेषु ऋतजा गोजा अब्जा अद्रिजाः पूजयेत् ॥ तद्बाह्ये इन्द्रादीन्वज्रादींश्च पूजयेत् ॥ ॥ ॥ ॥ ॥
ततो धूपादिविसर्जनान्तं कर्म समापयेत् ॥ अस्य पुरश्चरणं द्वादशलक्षजपः ॥ घृतयुक्तपायसेन दशांशहोमः ॥ तथा च ॥ भानुलक्षं जपेन्मं
त्रं पायसेन ससर्पिषा ॥ दशांशं जुहुयान्मंत्री ततः सिद्धो भवेन्नरः ॥ इति सूर्यमंत्राः ॥ अथ विष्णुमंत्राः ॥ क्रीडारतं गोपकुमारसंघैर्नंदांगणे धूलि
विभूषितांगं ॥ गृहे गृहे यं नवनीतचौरं तमादिदेवं शरणं प्रपद्ये ॥ अथ वक्ष्ये महामंत्रान्विष्णोः सर्वार्थसिद्धिदान् ॥ यस्य संस्मरणात् सन्तो भवाब्धेः पारमा
श्रिताः ॥ तत्र वैष्णवाचमनम् ॥ गोतमीये ॥ केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ ॥ द्वाभ्यामोष्ठौ च संमृज्य द्वाभ्यां मृज्यान्मुखं ततः ॥ एकेन हस्तं प्र
क्षाल्य पादावपि तथैकतः ॥ संप्रोक्ष्यैकेन मूर्द्धानं ततः संकर्षणादिभिः ॥ आस्यनासाक्षिकर्णांश्च नाभ्युरस्कं भुजौ क्रमात् ॥ स्पृशेदेवं भवेदाचमनं चैव
ष्णवान्वये ॥ एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ॥ केशवादयस्तु ॥ केशवं नारायणं माधवं गोविंदं विष्णुं मधुसूदनं त्रिविक्रमं वामनं श्रीध
रं हृषीकेशं पद्मनाभं दामोदरं संकर्षणं वासुदेवं प्रद्युम्नांऽनिरुद्धपुरुषोत्तमाधोक्षजनृसिंहाच्युतं जनार्दनं उपेन्द्रं हरिं विष्णवेः ॥ वाक्यं तु केशवाय
नम इत्यादिना ॥ तथा च ॥ सचतुर्थीनमोन्तैश्च नामभिर्विन्यसेत्सुधीः ॥ तारं नमः पदं ब्रूयान्नारो दीर्घसमन्वितो ॥ पवनो णाय मंत्रोयं प्रोक्तो वस्वक्षरः परः

मनुः ॥ ७

हृष्णाः ॥ २ ॐ नमो नारायणाय इति मंत्रः

अस्यपूजाप्रयोगः॥प्रातःकृत्यादिमातृकान्यासांतंकर्मविधायकेशवकीर्त्यादिन्यासंकुर्यात्॥अथऋष्यादिन्यासः॥शिरसिप्रजापतयेऋ
षयेनमः॥मुखेगायत्रीछंदसेनमः॥हृदिअर्द्धलक्ष्मीहरयेदेवतायैनमः॥ततःकरांगन्यासौ॥श्रींअंगुष्ठाभ्यांनम इत्यादि॥तथाचगौतमीये॥
ऋषिःप्रजापतिश्छंदोगायत्रीदेवतापुनः॥अर्द्धलक्ष्मीहरिःप्रोक्तःश्रीबीजेनांगकल्पनेति॥ततोध्यानम्॥उद्यत्प्रद्योतनशतरुचिंतप्तहेमावदा
तं पार्श्वद्वंद्वेजलधिसुतयाविश्वधात्र्याचजुष्टं॥नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं विष्णुंवंदेदरकमलकौमोदकीचक्रपाणिं॥१॥एवं
ध्यात्वान्यसेत्॥वर्णान्मुक्त्वासार्द्धचंद्रानितिदर्शनात्॥सर्वत्रसानुस्वारः॥अंकेशवायकीर्त्यैनमोललाटे॥आंरायणायकान्त्यैनमोमुखे॥इंमाधवायतुष्ट्यै ना
विं नमोदक्षनेत्रे॥ईंगोंदायपुष्ट्यैनमोवामनेत्रे॥नमःसर्वत्र॥उंविष्णवेधृत्यैदक्षकर्णे॥ऊंमधुसूदनायशान्त्यैवामकर्णे॥ऋंत्रिविक्रमायक्रियायैदक्ष
नासापुटे॥ॠंवामनायदयायैवामनासापुटे॥लृंश्रीधरायमेधायैदक्षगण्डे॥लॄंहृषीकेशायदुर्गायैवामगण्डे॥एंपद्मनाभायश्रद्धायैओष्ठे॥ऐं
दामोदरायलज्जायैअधरे॥ओंवासुदेवायलक्ष्म्यैऊर्द्धदंतपंक्तौ॥औंसंकर्षणायसरस्वत्यैअधोदंतपंक्तौ॥अंप्रद्युम्नायधृत्यैमस्तके॥अःअ
निरुद्धायरत्यैमुखे॥कंचक्रिणेजयायै॥खंगदिनेदुर्गायै॥गंशार्ङ्गिणेप्रभायै॥घंखड्गिनेसत्यायै॥ङंशंखिनेचंडायै॥दक्षकरमूलसंध्यग्रके
षु॥चंहलिनेवाण्यै॥छंमुसलिनेविलासिन्यै॥जंशूलिनेविजयायै॥झंपाशिनेविरजायै॥ञंअंकुशिनेविश्वायै॥वामकरमूलसंध्यग्रकेषु॥
टंमुकुंदायविनदायै॥ठंनंदजायसुनंदायै॥डंनंदिनेस्मृत्यै॥ढंनरायऋद्ध्यै॥णंनरकजितेसमृद्ध्यै॥दक्षपादमूलसंध्यग्रकेषु॥तंहरयेशुद्ध्यै॥
थंकृष्णायबुद्ध्यै॥दंसत्यायभुक्त्यै॥धंसात्वतायमत्यै॥नंसौराष्ट्रायक्षमायै॥वामपादमूलसंध्यग्रकेषु॥पंशूरायरमायैदक्षपार्श्वे॥फंजनार्दनायउ
मायैवामपार्श्वे॥बंभूधरायक्लेदिन्यैपृष्ठे॥भंविश्वमूर्त्तयेक्लिन्नायैनाभौ॥मंवैकुंठायवसुदायैउदरे॥यंत्वगात्मनेपुरुषोत्तमायवसुधायैहृदि॥

रंअसृगात्मनेबलिनेपरायैदक्षांसे॥लंमांसात्मनेबलानुजायपरायणायैककुदि॥वंमेदआत्मनेबलायसूक्ष्मायैवामांसे॥शंअस्थ्यात्मनेवृषघ्न
यसंध्यायैहृदादिदक्षकरे॥षंमज्जात्मनेवृषायप्रज्ञायैहृदादिवामकरे॥संशुक्रात्मनेहंसायप्रभायैहृदादिदक्षपादे॥हंप्राणात्मनेवराहायनि
शायैहृदादिवामपादे॥लंजीवात्मनेविमलायअमोघायैहृदाद्युदरे॥क्षंक्रोधात्मनेनृसिंहायविद्युतायैहृदादिमुखे॥इतिमातृकास्थानेषुविन्य
सेत्॥तथाचगौतमीये॥केशवादिरयंन्यासोन्यासमात्रेणदेहिनां॥अच्युतत्वंददात्येवसत्यंसत्यंनसंशयः॥केशवतत्वन्यासयोरितिकृतेऽधि
कृतेहेतिदर्शनान्नित्यत्वं॥तथाच॥इतिकृतेऽधिकृतोभवतिध्रुवंसकलवैष्णवमंत्रजपादिषु॥मातृकार्णसमुच्चार्यकेशवायइतिस्मरेत्॥
कीर्त्यैचनमसायुक्तमित्यादिन्यासमाचरेत्॥केशवायततःकीर्त्यैकान्त्यैनारायणायच॥इत्याद्यऽगस्त्यसंहितावचनाच्चायंक्रमः॥ननुके
शवकीर्तिभ्यांनमइत्यादि॥तथाभुक्तिमुक्तिमिच्छतायंन्यासःकर्तव्यः॥श्रीबीजादिकः॥यथाश्रीं अंकेशवायकीर्त्यैनमइत्यादि॥तथा
चगौतमीये॥एवंप्रविन्यसेन्न्यासंलक्ष्मीबीजपुरःसरम्॥स्मृतिंधृतिंमहालक्ष्मींप्राप्यांतेहरितांव्रजेत्॥ततस्तत्वन्यासः॥मोदिकं
तानथार्णाश्रीबीजान्येकेकशोवदेत्॥नमःपरायेत्युच्चार्यततस्तत्वात्मनेनमः॥इतिगौतमीयवचनात्॥सर्वत्रतत्वप्रयोगः॥य
था॥मंनमःपरायजीवतत्वात्मनेनमः॥भंनमःपरायप्राणतत्वात्मनेनमः॥एतत्द्वयंसर्वगात्रे॥तथाचगौतमीये॥जीवंप्राणद्वयं
चोक्त्वासर्वांगेषुप्रविन्यसेत्॥ततोहृदयमध्येचतत्वत्रयंचविन्यसेत्॥बंनमःपरायमतितत्वात्मनेनमः॥फंनमःपरायाहंकारत
त्वात्मनेनमः॥पंनमःपरायमनस्तत्वात्मनेनमः॥एतत्त्रयंहृदि॥नंनमःपरायशब्दतत्वात्मनेनमोमस्तके॥धंनमःपरायस्पर्शतत्वा
त्मनेनमोमुखे॥दंनमःपरायरूपतत्वात्मनेनमोहृदि॥थंनमःपरायरसतत्वात्मनेनमोगुह्ये॥तंनमःपरायगंधतत्वात्मनेनमःपाद

लिंगे॥४॥

योः॥णंनमः परायश्रोत्रतत्वात्मनेनमः श्रोत्रयोः॥ढंनमः परायत्वक्तत्वात्मनेनमस्त्वचि॥डंनमः परायचक्षुषतत्वात्मनेनमश्चक्षुषोः॥ठंनमः परायजिह्वातत्वात्म—नेनमोजिह्वायाम्॥टंनमः परायघ्राणतत्वात्मनेनमोघ्राणयोः॥ञंनमः परायवाक्तत्वात्मनेनमोवाचि॥झंनमः परायपाणितत्वात्मनेनमः पाण्योः॥जंनमः परायपादतत्वात्मनेनमः पादयोः॥छंनमः परायपायुतत्वात्मनेनमोगुह्ये॥चंनमः परायोपस्थतत्वात्मनेनमउपस्थे॥ङंनमः परायाकाशतत्वात्मनेनमोमूर्द्ध्नि॥घंनमः परायवायुतत्वात्मनेनमोमुखे॥गंनमः परायतेजस्तत्वात्मनेनमोहृदि॥खंनमः परायजलतत्वात्मनेनमोलिंगे॥कंनमः परायपृथिवीतत्वात्मनेनमः पादयोः॥शंनमः परायहृत्पुंडरीकतत्वात्मनेनमोहृदि॥तथाचक्रमदीपिकायाम्॥इत्यच्युतीकृततनुर्विदधीततत्वन्यासंमपूर्वकपराक्षरनत्सुपेतं॥भूयः परायचततदाह्वयमात्मनेचनमंतमुद्धरतुतत्वमनूक्रमेण॥सकलवपुषिजीवंप्राणमायोज्यमध्येन्यसतुमतिमहंकारंमनश्चेतिमंत्री॥कमुखहृदयगुह्यांघ्रिष्वथोशब्दपूर्वंगुणगणमथकर्णादिस्थितं श्रोत्रपूर्वं॥रागादींद्रियवर्गमात्मनिलयेत्वाकाशपूर्वंगणं मूर्द्धास्येहृदयोशिरेवचरणयोर्हृत्तु पुंडरीकंहृदि॥शब्दपूर्वंशब्दस्पर्शरूपरसगंधइत्यर्थः॥आकाशपूर्वंआकाशवायुतेजोजलभूमिरित्यर्थः॥हंनमः परायद्वादशकलाव्याप्तसूर्यमंडलतत्वात्मनेनमोहृदि॥संनमः परायषोडशकलाव्याप्तसोममंडलतत्वात्मनेनमोहृदि॥रंनमः परायदशकलाव्याप्तवह्निमंडलतत्वात्मनेनमोहृदि॥षंनमः परायपरमेष्ठितत्वात्मनेवासुदेवायनमोमस्तके॥पंनमः परायपुरुषतत्वात्मनेसंकर्षणायनमोमुखे॥लंनमः परायविश्वतत्वात्मनेनमोहृदि॥रंनमः परायनिर्वृत्तितत्वात्मनेऽनिरुद्धायनमोलिंगे॥लंनमः परायसर्वतत्वात्मनेनारायणायनमः पादयोः॥क्ष्रौंनमः परायकोपतत्वात्मनेनृसिंहायनमः सर्वगात्रे॥तथाच॥इतिकृतेऽधिकोभवति ध्रुवंसकलवैष्णवमंत्रजपादिष्विति॥दीपिकाद्यनव

चनात्मिसत्वमस्य॥ तथा बिंबानि द्विषडष्टसुगदृशकलाव्याप्तानीति॥ तथा च गौतमीये॥ शं बीजं हृत्पुंडरीकतत्त्वं हृदि प्रविन्यसेत्॥ हं बीजं सूर्य्यमंडलतत्त्वं हृदि प्रविन्यसेत्॥ सं बीजं चंद्रमंडलतत्त्वं हृदि तत्र प्रविन्यसेत्॥ रं बीजं वह्निमंडलतत्त्वं तत्र विन्यसेत्॥ षों बीजं परमेष्ठितत्त्वं वासुदेवं च मूर्द्धनि॥ यं बीजमथ पुंस्त्वतत्त्वं संकर्षणमथो मुखे॥ लं बीजं बिम्बतत्त्वं च प्रद्युम्नं च हृदि न्यसेत्॥ वं बीजं निवृत्तितत्त्वं च अनिरुद्धं सुपस्थके॥ लं बीजं सर्वतत्त्वं च पादे नारायणं न्यसेत्॥ क्ष्रौं बीजं कोपतत्त्वं च नृसिंहं सर्वगात्रके॥ एवं तत्त्वानि विन्यस्य प्राणायामं समाचरेत्॥ फलं तु॥ तत्त्वन्यासं ततः कुर्य्यात् साधकः सिद्धिहेतवे॥ कृतेन येन देवस्य रूपतामेव यात्यसौ॥ ततो यथाविधि प्राणायामं कृत्वा पीठन्यासं विधाय केसरेषु पूर्वादिप्रादक्षिण्येन मध्ये च ॐ विमलायै नमः॥ एवमुत्कर्षिण्यै॥ ज्ञानायै॥ क्रियायै॥ योगायै॥ प्रह्व्यै॥ सत्यायै॥ ईशानायै॥ अनुग्रहायै॥ तदुपरि॥ ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नमः॥ तथा च निबंधे॥ विमलोत्कर्षिणी ज्ञाना क्रिया योगा ततः परा॥ प्रह्वी सत्या तथेशानानुग्रहा नवमी मता॥ नमो भगवते ब्रूयाद्विष्णवेऽथ पदं वदेत्॥ सर्वभूतात्मने वासुदेवायेति वदेत्ततः॥ सर्वात्मसंयोगपदात् योगपद्मपदं ततः॥ पीठात्मने हृदंतोयं मंत्रस्तारादि — रीरित इति॥ अस्य ऋष्यादिन्यासः॥ शिरसि साध्यनारायणऋषये नमः॥ मुखे देवीगायत्रीछंदसे नमः॥ हृदि विष्णवे देवतायै नमः॥ ततः करांगन्यासौ॥ क्रुद्धोल्काय अंगुष्ठाभ्यां नमः॥ महोल्काय तर्जनीभ्यां स्वाहा॥ वीरोल्काय मध्यमाभ्यां वषट्॥ द्युल्कायानामिकाभ्यां हुं॥ सहस्रोल्काय कनिष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ तथा च निबंधे॥ साध्यनारायणः प्रोक्तो मुनिश्छंद उदाहृतम्॥ मंत्रस्य देवीगायत्री देवता विष्णुरव्ययः॥ क्रुद्धोल्काय हृदाख्यातं महोल्काय शिरः स्मृतम्॥ वीरोल्काय शिखा प्रोक्ता द्युल्काय कवचं स्मृतम्॥ सहस्रोल्कायास्त्रमुक्तमंगक्लृप्तिरियं मतेति॥ ततो मंत्रेण षडंगन्यासं कुर्य्यात्॥ ॐ हृदयाय नमः॥ नं शिरसे स्वाहा॥ मों शिखायै वषट्॥ नां कवचाय हुं॥

यंविनापूजनंप्राङ्गासुरंनिष्फलंबुधाः॥३॥

रांनेत्राभ्यांवौषट्॥ यंअस्त्रायफट्॥ णांनमोदक्षपार्श्वे॥ यंनमोवामपार्श्वे॥ तथाच॰॥ भूयोवर्णैर्मनोःषङ्गि॰षडंगानिसमाचरेत्॥ अवशिष्टैःपुनर्वैरौंर्विन्यसेत्कुक्षिपार्श्वयोः ततः ॐ नमःसुदर्शनायास्त्रायफडितिमंत्रेण — दिग्बंधनंकृत्वा मंत्रन्यासंकुर्यात्॥ तथाचकल्पे॥ मंत्रन्यासंततः कुर्यात् सर्वकामफलप्रदम्॥ यंविनानैवतत् सम्यग्गौसुरंनिष्फलंभवेत्॥ यथा॥ आधारे ॐ नमः॥ हृदिनंनमः॥ वक्त्रेमोंनमः॥ दोर्युगेनांनमः॥ रांनमः॥ पादयोः यंनमः णांनमः॥ नाभौ यंनमः॥ एवंकंठे नाभौहृदिकुचयोःपार्श्वयोः पृष्ठेच मूर्ध्नि आस्येनेत्रयोः श्रवणयोर्घ्राणयोर्हस्तयोः संध्यंगुलीषु॥ तथापादयोःसंध्यंगुलीषु॥ हृदयेसप्तधातु प्राणेषु॥ धातवस्तु॥ त्वगसृङ्मांसमेदोऽस्थि मज्जाशुक्राणिधातवः॥ मूर्ध्निनेत्रेआस्ये हृदिकुक्षौ ऊर्वोर्जंघयोः पादयोर्गंडयोरंसयोरूर्वोःपादयोश्चक्रे शंखे — गदायांपद्मेचविन्यसेत्॥ मंत्रवर्णान्न्यसेच्चैवस्थानेष्वेतेषुमंत्रवित्॥ तथाचशारदायाम्॥ बद्धदिक्कचक्रमंत्रेणमंत्रवर्णांस्ततोन्यसेत्॥ आधारेहृदयेवक्त्रे दोःपन्मूलेषुनाभिके॥ कंठेनाभौहृदिकुचेपार्श्वेपृष्ठेचतत्परम्॥ मूर्द्धास्यनेत्रश्रवणघ्राणेषुतदनंतरम्॥ दोःपादसंध्यंगुलिषुधातुप्राणेषुहृत्स्थले॥ मूर्द्धाक्षणास्यंहृत्कुक्षिसोरुजंघापदद्वये॥ एकैकशोन्यसेद्वर्णान् गंडांसोरुपदेषुच॥ चक्रशंखगदांभोजपदेष्वपिहितान्न्यसेत्॥ अथमूर्तिपंजरन्यासः॥ ललाटे ॐ अंकेशवायधात्रेनमः॥ कुक्षौ नं आंनारायणायार्यम्णेनमः॥ हृदि मो इंमाधवायमित्रायनमः॥ गलकूपतले भं ईंगोविंदायवरुणायनमः॥ दक्षपार्श्वेगं उंविष्णवेंऽशवेनमः॥ दक्षिणांसेवं ऊंमधुसूदनायभगायनमः॥ गलदक्षिणभागेतें एंत्रिविक्रमायविवस्वतेनमः॥ वामपार्श्वेवां ऐंवामनायेन्द्रायनमः॥ वामांसेसुं ओंश्रीधरायपूष्णेनमः॥ गलवामभागेदें औंहृषीकेशायपर्जन्यायनमः। पृष्ठेवां अंपद्मनाभायत्वष्ट्रेनमः॥ ककुदियं अः दामोदरायविष्णवेनमः॥ शिरसिद्वादशाक्षरमंत्रंन्यसेत्॥ तथाचनिबंधे॰॥ अष्टार्णोक्तप्रकृत्यात्मा ज्ञेयःस्याज्जनुरात्मनां॥ संयोगात्सुधिभिःप्रोक्तोवि

शिष्टो — द्वादशाक्षरः॥ अतस्तन्मंत्रवर्णाद्या द्वादशाक्षरसंयुताः॥ द्वादशादित्यसहिता मूर्तीर्द्वादश विन्यसेत्॥ केशवाद्याः क्रमादेहे वक्ष्यमाणविधानतः॥ ललाटे केशवं धात्रा कुक्षौ नारायणं न्यसेत्॥ अर्यम्णा हृदि मित्रेण माधवं कंठदेशतः॥ वरुणेन च गोविंदं पुनर्दक्षिणपार्श्वके॥ अंशुना विष्णुमंशस्थे भगेन मधुसूदनम्॥ गले विवस्वता युक्तं त्रिविक्रममनंतरम्॥ वामपार्श्वस्थमित्रेण वामनाख्यमथांसके॥ पूष्णा श्रीधरनामानं गले पर्जन्यसंयुतम्॥ हृषीकेशाह्वयं पृष्ठे पद्मनाभं ततः परम्॥ त्वष्ट्रा दामोदरं पश्चाद्विष्णुना ककुदि न्यसेत्॥ द्वादशार्णमहामंत्रं ततो मूर्ध्नि प्रविन्यसेत्॥ ततः किरीटमंत्रेण व्यापकं विन्यसेत्ततः॥ गौतमीये॥ द्वादशाक्षरमंत्रवर्णं विन्यसेद्ब्रह्मरंध्रके॥ वासुदेवो भवेत्साक्षाद्द्यापितस्तस्य तेजसा॥ त्रिमात्रिकं समुद्धृत्य नमो भगवते लिखेत्॥ वासुदेवं चतुर्थ्यांतु मंत्रोयं सुरपादपः॥ अस्य विज्ञानमात्रेण वासुदेवः प्रजायते॥ न्यासफलन्तु॥ चैतन्यामृतवपुरर्ककोटितेजा मूर्ध्निस्थो वपुरखिलं स वासुदेवः॥ ऊर्ध्वसंसु विमलपाथसीव सिक्तं व्याप्नोति प्रकटितमंत्रवर्णकीर्णं॥ तन्मूर्तिपंजरन्यासोऽभिहितः परमेष्ठिना॥ सकृन्न्यासाद्भवेन्मंत्री विष्णुमूर्तिरनुत्तमो॥ मूर्तिपंजरन्यासस्तु॥ ॐ आं धात्रीसहितकेशवाय नमः इति। केचित्तु ॐ अं केशवधात्रिभ्यां नम इत्यन्ये॥ अं केशवसहितधात्रे नम इत्यन्ये॥ वासुदेवमनोरेकं वर्णं क्लीबविवर्जितम्॥ स्वरैकं बिंदुसंयुक्तं चतुर्थ्यां केशवादिकं॥ तथा धात्रादिकं चोक्त्वा नमो न्यास उदाहृतः॥ इति नारदीयवचनात् उक्तक्रमो ग्राह्यः॥ न तु केशवधातृभ्यां धात्रीसहितकेशवाय नम इत्यादि॥ प्रपंचसारे॥ किरीटकेयूरहारपदान्याभाष्य मंत्रवित्॥ मकरांते कुंडलं च शंखचक्रगदादिकम्॥ पद्महस्त पदं प्रोक्त्वा पीतांबरधरेति च॥ श्रीवत्सांकितमाभाष्य वक्षःस्थलमथो वदेत्॥ श्रीभूमिसहितं आत्मज्योतिर्द्वयपदं वदेत्॥ दीप्तमुक्ताकरायेति सहस्रादित्यतेजसे॥ हृदन्तः प्रणवादिः स्यात् किरीटादिमनुस्त्वयम्॥ एवं न्यासं

पुराकृत्वाध्यायेन्नारायणं परम्॥ततः ॐ किरीटकेयूरहारमकरकुंडलधरशंखचक्रगदांभोजपीतांबरधरश्रीवत्सांकितवक्षःस्थ
लश्रीभूमिसहितआत्माज्योतिर्द्वयदीप्तकरायसहस्रादित्यतेजसेनमइतिमंत्रेणव्यापकंविन्यस्यमुद्राः प्रदर्श्यध्यानंकुर्य्यात्॥उद्यत्को
टिदिवाकराभमनिशंशंखंगदांपंकजंचक्रंबिभ्रतमिन्दिरावसुमतीसंशोभिपार्श्वद्वयम्॥कोटीरांगदहारकुंडलधरंपीतांबरंकौस्तुभोद्दीप्तं
विश्वधरंस्ववक्षसिलसत्श्रीवत्सचिह्नंभजे॥१॥ध्यानमिदंप्रकृतमंत्रदेवतायाः पूर्वोक्तध्यानंतुकेशवकीर्त्यादिन्याससमंत्रदेवतायाइति॥एवं
ध्यात्वामानसैः संपूज्यशंखस्थापनंकुर्य्यात्॥वैष्णवपात्रन्तु॥गौतमीयतंत्रे॥ताम्रपात्रंतुविप्रर्षेविष्णोरतिप्रियंमतं॥तथैवसर्वपात्राणांमु
ख्यंशंखंप्रकीर्तितम्॥मृत्पात्रंतुतथाप्रोक्तंस्वर्णंवाराजतंतथा॥पंचपात्रेहरेःशुद्धेनान्यत्तत्रनियोजयेत्॥नैवेद्यदानेतुतत्रैव॥स्वर्णेवाताम्रपा
त्रेवारौप्येवापंकजेदले॥आगमकल्पद्रुमे॥हैरण्यंराजतंकांस्यंताम्रंमृण्मयमेववा॥पालाशंश्रीहरेःपात्रंनैवेद्येकल्पयेद्बुधः॥त
थाचपुरश्चरणचंद्रिकायाम्॥सौवर्णेराजतेरैत्यइत्यादि॥ततोवैष्णवःसामान्यपीठपूजानंतरंविमलादिशक्तिसहितपीठपूजांकृत्वा
पुनर्ध्यात्वामूलकल्पितमूर्त्तावावाहनादिपंचपुष्पांजलिदानपर्य्यंतंविधायावरणपूजामारभेत्॥तद्यथा॥आग्नेयादिकोणेक्रुद्धोल्का
यहृदयायनमः॥नैर्ऋतेमहोल्कायशिरसेस्वाहा॥वायुकोणेवीरोल्कायशिखायैवषट्॥ईशानेद्युल्कायकवचायहुं॥दिक्षुसहस्रो
ल्कायास्त्रायफट्॥ततः केसरेषुपूर्वादि॰॥⁘॥ॐनमः॥नं नमः॥मोंनमः॥नांनमः॥रांनमः॥यंनमः॥णांनमः॥यंनमः॥ततोदलेषु
पूर्वादिदिक्षु॥ॐवासुदेवायनमः॥एवंसंकर्षणायनमः॥प्रद्युम्नाय॰॥अनिरुद्धाय॥आग्नेयादिकोणदलेषु॥ॐशांत्यैनमः॥एवंश्रियै
॥सरस्वत्यै॥रत्यै॥ततःपत्राग्रेषुपूर्वादिदिक्षु॥ॐचक्रायनमः॥एवंशंखाय॥गदायै॥पद्माय॥कौस्तुभाय॥मुसलाय॥खड्गाय॥वनमाला

ये॥तद्बहिरग्रे॥ॐ गरुडायनमः॥दक्षिणे ॐ शंखनिधयेनमः॥वामेपद्मनिधयेनमः॥पश्चिमेध्वजायनमः॥अ[illegible]नकोणेविघ्नायनमः॥नैर्ऋ
ते ॐ आर्य्यायैनमः॥वायुकोणे ॐ दुर्गायैनमः॥ईशाने ॐ सेनान्येनमः॥तद्बहिरिन्द्रादीन्वज्रादींश्चसंपूज्य धूपदीपौदत्त्वानैवेद्यंदद्यात्॥
यथानैवेद्यमानीय मूलेनदेवतायै पाद्यार्घाचमनीयानिदत्त्वा फडितिमंत्रेणनैवेद्यंसंप्रोक्ष्य चक्रमुद्रयाभिरक्ष्य यमितिमंत्रेणदोषसमूह
संशोष्य रमितिदोषंसंदह्य वामकरसौधधाराभिःपूर्णं वमित्यमृतीकृत विभाव्यमूलमष्टधाजप्त्वाधेनुमुद्रयामृतीकृत्यगंधपुष्पाभ्यांनैवेद्यं
संपूज्य कृतांजलिःसन्हरिंप्रार्थयेत्॥अस्यमुखतोमहःप्रसरेदितिविभाव्यस्वाहांतमूलमुच्चार्य्यनैवेद्येजलंदद्यात्॥ततोमूलमुच्चार्य्यैत
न्नैवेद्यंअमुकदेवतायैनमः॥ततोनैवेद्यंहस्ताभ्यामुद्धृत्य ॐ निवेदयामिभवतेजुषाणेदंहविर्हरे इतिनैवेद्यंसमर्प्य अमुकदेवतायै एतज्ज
लममृतोपस्तरणमसि इतिजलंदत्त्वावामहस्तेनग्रासमुद्रांप्रदर्श्य॥दक्षिणहस्तेनप्राणादिमुद्रांप्रदर्शयेत्॥यथा॥ॐ प्राणायस्वाहा इतिक
निष्ठानामिकेअंगुष्ठेनस्पर्शयेत्॥ॐ अपानायस्वाहेतितर्ज्जनीमध्यमेऽङ्गुष्ठेनस्पर्शयेत्॥ॐ व्यानायस्वाहेतिमध्यमानामेऽङ्गुष्ठेनस्पर्शये
त्॥ॐ उदानायस्वाहेतितर्ज्जनीमध्यमानामांगुष्ठेनस्पर्शयेत्॥ॐ समानायस्वाहेतिसर्वांगुलीरंगुष्ठेनस्पर्शयेत्॥ततोऽङ्गुष्ठानामिकाग्रेस्प
शन् क्ष्रौं नमःपरमात्मनेअनिरुद्धायनैवेद्यंकल्पयामीतिनैवेद्यमुद्रांप्रदर्श्यमूलमुच्चार्य्यामुकदेवतांतर्प्पयामीति चतुर्द्धासंतर्प्यामुकदेवता
यै एतज्जलममृतापिधानमसीतिजलंदत्त्वाचमनीयादिकंदद्यात्॥सर्वत्रवैष्णवेतुनैवेद्यदानेऽयंक्रमः॥ततःसामान्यपद्धत्युक्तक्रमे
णविसर्ज्जनांतंकर्म्मसमापयेत्॥अस्यपुरश्चरणंषोडशलक्षजपः॥तथाच॥विकारलक्षंप्रजपेन्मनुमेनंसमाहितः॥तद्दशांशंसरसिजै
र्जुहुयान्मधराप्लुतैः॥अथश्रीराममंत्राः॥अनन्तोऽग्न्यासनःसेन्दुर्बीजंरामायहन्मनुः॥रांरामायनमः इतिमंत्रः॥षडक्षरोयमादिष्टोभज

नांकामदोमणिः॥अस्यपूजाप्रयोगः॥प्रातःकृत्यादिवैष्णवोक्तपीठमन्वंतंविन्यस्यऋष्यादिन्यासंकुर्यात्॥शिरसिब्रह्मणेऋषयेनमः॥मुखेगायत्रीछंदसेनमः॥हृदिश्रीरामदेवतायैनमः॥ततःकरांगन्यासौ॥रांअंगुष्ठाभ्यांनमः॥रींतर्जनीभ्यांस्वाहा॥रूंमध्य — माभ्यांवषट्॥रैंअनामिकाभ्यांहुं॥रौंकनिष्ठाभ्यांवौषट्॥रःकरतलकरपृष्ठाभ्यांफट्॥एवंहृदयादिषु॥रांहृदयायनमःइत्यादि॥तथाचनिबंधे॥दीर्घभाजास्वबीजेनकुर्यादङ्गानिषट्क्रमात्॥ततोमंत्रन्यासः॥ब्रह्मरंध्रेरांनमः॥भ्रुवोर्मध्येरांनमः॥हृदिमांनमः॥नाभौयंनमः॥लिंगेनंनमः॥पादयोर्मोंनमः॥ततोमूर्तिपंजरादिकंविधायध्यायेत्॥कालांभोधरकांतिकांतमनिशंवीरासनाध्यासितंमुद्रांज्ञानमयींदधानमपरंहस्तांबुजंजानुनी॥सीतांपार्श्वगतांसरोरुहकरांविद्युन्निभांराघवंपश्यंतंमुकुटांगदादिविविधाकल्पोज्ज्वलांगंभजे॥एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंकुर्यात्·ततःपीठपूजांविधायवैष्णवोक्तपीठशक्तीःपीठमनुंचसंपूज्यपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतंविधायावरणपूजामारभेत्॥देववामपार्श्वेश्रींसीतायैनमः॥अग्रेशार्ङ्गायनमः॥दक्षिणवामपार्श्वयोः ॐशरेभ्योनमः ॐचापायनमः॥तद्बहिःकेसरेषुआग्न्यादिकोणेषुमध्येदिक्षुचरांहृदयायनमइत्यादिनाषडंगानिपूजयेत्॥ततोदलेषुपूर्वादिदिक्षु ॐहनूमतेनमः॥एवंसुग्रीवायभरतायविभीषणायलक्ष्मणायअंगदायशत्रुघ्नायजाम्बवते॥दलाग्रेषु· ॐधृष्टायनमः एवंजयंतायविजयायसुराष्ट्रायराष्ट्रवर्द्धनायअकोपायधर्म्मपालनायसुमन्त्राय॥ततइन्द्रादीन्वज्रादींश्चसंपूज्यधूपादिविसर्जनान्तंकर्म्मसमापयेत्·अस्यपुरश्चरणंषट्लक्षजपः॥ तथाच॥०ऋतुलक्षंजपे — न्मंत्रंदशांशंकमलैःशुभैः॥जुहुयादर्चितेवह्नौब्राह्मणानपिभो — जयेत्॥अयंमंत्रःषड्विधः॥तथाच॥स्वकामशक्तिवाक्लक्ष्मीताराद्यःपंचवर्णकः॥षडक्षरःषड्विधःस्याच्चतुर्वर्गफलप्रदः॥ब्रह्मासंमो

वर्ण॥५॥

हनः शक्तिर्दक्षिणा मूर्तिरव्ययः ॥ अगस्तिः श्रीशिवः प्रोक्तो मुनयोत्र क्रमादिमे ॥ अथवा कामबीजादेर्विश्वामित्रो मुनिर्मनोः ॥ छंदो गायत्री सं
त्तं च श्रीरामश्चैव देवता ॥ ध्यानपूजादिकं सर्वं पूर्ववत्कार्य्यम् ॥ जानकीवल्लभायाथ भवेत्पावकवल्लभा ॥ हुमादिरेष कथितो रामचंद्रो दशाक्षरः ॥
जानकीवल्लभं ङेंतं वह्निजाया हुमादिकम् ॥ दशाक्षरोयं मंत्रस्याद्वसिष्ठस्यादृषिर्विराट् ॥ छंदश्च देवता रामः सीतापाणिपरिग्रहः ॥ आद्यं बीजं द्विठः
शक्तिः कामेनांगक्रिया मता ॥ शिरोललाटभ्रूमध्यतालुकंठेषु हृद्यपि ॥ नाभ्यूरुजानुपादेषु —— दशार्णान्विन्यसेन्मनोः ॥ ततो ध्यानम् ॥ अयोध्यान
चित्र गरे रम्ये रत्नसौन्दर्य्यमंडपे ॥ मंदारपुष्पैराबद्धविताने तोरणांचिते ॥ सिंहासनसमारूढं पुष्पकोपरि राघवं ॥ रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः ॥ सं
गंधर्वैः स्तूयमानं मुनिभिः सर्वतः परिसेवितं ॥ सीतालंकृतवामांगं लक्ष्मणेनोपशोभितं ॥ श्यामं प्रसन्नवदनं सर्वाभरणभूषितं ॥ ध्यायेद्देवं जपेन्मंत्रं वर्णलक्षमन यन्ने
न्यधीः ॥ अन्यत्सर्वं पूर्ववत् ॥ मंत्रांतरं ॥ वह्निर्नारायणो नाद्यो जठरः केवलस्तथा ॥ द्व्यक्षरो मंत्रराजोयं सर्वाभीष्टफलप्रदः ॥ मंत्रांतरं ॥ श्रीमायामन्मथैकैकं बीजा
द्यंतगतो मनुः ॥ चतुर्वर्णः स एव स्यात् षड्वर्णो वांछितप्रदः ॥ स्वाहांतो हुंफडंतो वा नमोऽन्तो वा भवेन्मनुः ॥ तारमायापा रमा नंगवाक्स्वबीजैस्तु षड्विधः ॥ त्र्यक्ष
रो मंत्रराजः —— स्यात्सर्वाभीष्टफलप्रदः ॥ द्व्यक्षरश्चंद्रभद्रांतो मंत्रोयं चतुरक्षरः ॥ रामाय हृन्मनुः प्रोक्तो मंत्रः पंचाक्षरोऽपरः ॥ पंचाशन्मातृकावर्णै
प्रत्येकपूर्वको मनुः ॥ लक्ष्मीवाङ्मन्मथादिश्च तारादिः स्यादनेकधा ॥ तेन अं रामाय नमः ॥ इत्यादि षडक्षरोक्तस्ते षा द्वौ लक्ष्मबीजादीनां अन्यनरहाने
सप्ताक्षरः ॥ वह्निस्थं शयनं विष्णोरर्द्धचन्द्रविभूषितं ॥ एकाक्षरो मनुः प्रोक्तो मंत्रराजः सुरद्रुमः ॥ ब्रह्मा मुनिः स्याद्गायत्री छंदो रामस्तु देवता ॥ एकाक्ष
रे तु द्वादशलक्षजपः पुरश्चरणम् ॥ भानुलक्षं जपेन्मंत्रमिति वचनात् ॥ अन्येषां षड्लक्षजपः इति विशेषः ॥ पूजादिकं सर्वं षडक्षरवत् ॥ अथ श्रीकृष्णमं
त्राः ॥ गोपीजनपदस्यांते वल्लभाय द्विठावधिः ॥ अयं दशाक्षरो मंत्रो दृष्टादृष्टफलप्रदः ॥ अयं मंत्रः कामबीजादिः ॥ राशिनक्षत्रविचारे पुनर्बीजरहिते

रेचये॥६ मन्त्रपं॥३ कल्पकोटिभिः॥२

नविचारः॥बीजपूर्वोजपश्चास्यरहस्यंकथितंमुने॥लुप्तबीजस्वभावत्वात्दशाक्षरइहोच्यते इतिगौतमीयात्॥तथाचबृहद्गौतमीये॥भोगमो
क्षैकनिलयोलुप्तबीजोदशाक्षरः॥उद्धरेत्तुपृथक्त्वेनकामबीजंमहामुने॥तद्योगात्फलदोमंत्रोनान्यथासिद्धिदंभवेत्॥अस्यपूजाप्रयोगः॥प्रातः
कृत्यादितत्त्वन्यासांतंकर्मविधायप्राणायामंकुर्यात्॥तथाचगौतमीये॰॥एवंतत्त्वानिविन्यस्यप्राणायामंसमाचरेत्॥तद्यथा॥कामबीजस्यएकवा
रजपेनदक्षिणनासयावायुंरेचयेत्॥पुनःसप्तवारजपेनवामनासयावायुंपूरयेत्॥ततोनासापुटौधृत्वाविंशतिवारजपेनवायुंकुंभयेत्॥पुन
र्वामेनरेचयेत्॰ दक्षेनपूरयेत्उभाभ्यांकुंभयेत् पुनर्दक्षिणेनरेचयेत्॥वामेनापूर्य्यउभाभ्यांकुंभयेत्॥तथाच॥एकेनरेचयेत्कामबीजेनैवपृ
थक्पृथक्॥पूरयेत्सप्तजप्तेनविंशत्यातेनधारयेत्॥सर्वेषुकृष्णमंत्रेषुबीजेनानेनवाजपेत्॰यद्वा॰मूलमंत्रेणैवप्राणायामः।पवनसंयमनंत्वमुनाचरे
त् यमिहजप्त मसौमनुमिच्छति॥यदिदशाक्षरंजपतितदा॥दशाक्षरेणचेत्तत्रचाष्टाविंशतिरेचयेत्॥पूरयेद्वामयातद्धारयेत्तत्प्रमाणतः
॥प्राणायामोभवेदेकोरेचपूरककुंभकैः॥अष्टादशाक्षरेणचेत् द्वादशैवंसमाचरेत्॥अन्यमनुभिर्वर्णानुरूपमित्युक्तत्वात्॥तत्तन्मंत्रवर्णसं
ख्याकैरेवकादित्रयंकुर्यात्॥रेचयेन्मारुतंदक्षयादक्षिणः पूरयेद्वामयामध्यनाड्यापुनर्धारयेदित्यादि॥एतत्तुश्रीकृष्णमंत्रविषयंनान्य
त्र॥ततःपीठन्यासंविधायकेसरेषुमध्येषुच॥विमलादिपीठमन्त्वंतंविन्यस्यऋष्यादिन्यासंकुर्यात्॥शिरसिनारदऋषयेनमः॥मुखेविराट्छं
दसेनमः॥हृदिश्रीकृष्णायदेवतायेनमः॥गुह्येक्लींबीजायनमः॥पादयोःस्वाहाशक्तयेनमः॥मंत्राधिष्ठातृदेवतायैदुर्गायैनमः इतिदुर्गांनमस्कु
र्यात्॥ततःप्रणवपुटितंमूलमंत्रंबीजरहितंकरयोरंतर्मध्येपार्श्वेच त्रिशोविन्यस्यप्रणवपुटितान्मंत्रवर्णान्सबिंदूनंगुलीनांपर्वसुनमोंतान्न्यसे
त्॰तद्यथा॰दक्षांगुष्ठादित्रिपर्वसु ॐगोंॐनमोदक्षांगुष्ठेदक्षतर्जन्यां॥ॐपीॐनमःदक्षमध्यमायाम्॥ॐजंॐनमःदक्षानामिकायां॥ॐनंॐन

काम॥३

मः दक्षकनिष्ठायां ॥ ॐ बं ॐ नमः वामकनिष्ठायां ॥ ॐ लं ॐ नमः वामनासायां ॥ ॐ भं ॐ नमः वाममध्यमायां ॥ ॐ [illegible] ॐ नमः वामतर्जन्यां ॥ ॐ स्वां
ॐ नमः वामांगुष्ठे ॥ ॐ हां ॐ नमः सर्वांगे । अयं तु सृष्टिन्यासः ॥ एवं दक्षिणांगुष्ठपूर्वं वामकनिष्ठांता स्थितिः ॥ संहृतिस्तु ॥ वामांगुष्ठादि दक्षिणकनिष्ठां
ता पुनः सृष्टिः स्थितीति पंचधा कुर्य्यात्॰ अशक्तश्चेदेकवारं न्यसेत् ॥ तथा च गौतमीये ॥ संहृतिर्दोषसंघातोहारिणी परिकीर्तिता ॥ विद्याप्रदस्य
सृष्ट्यंतो वर्णिनां शुद्धचेतसां ॥ स्थित्यंतस्त्या गृहस्थानां त्रयं कार्य्यानुरूपतः ॥ सहजातो वानप्रस्थे स्थित्यंतं कश्चिदिच्छति ॥ संहारांतो मुनीनां
च विविक्तस्य च सर्वशः ॥ अशक्तश्चेदेकमात्रं कुर्य्यात् ॥ तथा च ॥ न्यासत्रयं सदा कार्य्यमशक्तावेक एव ही ति गौतमीयवचनात्॰ ततः स्थिति
क्रमेणांगुलीषु दशांगानि विन्यसेत् ॥ तद्यथा ॥ ॐ गों नमः दक्षांगुष्ठे ॥ पीं नमः तर्जन्यां ॥ ॐ जें नमः मध्यमायां ॥ ॐ तं नमोऽनामिकायां ॥ ॐ वें नमः कनि
ष्ठायां ॥ वामांगुष्ठे । ह्लं नमः ॥ वामतर्जन्यां ॐ भं नमः ॥ वाममध्यमायां ॐ पं नमः ॥ वामानामिकायां ॐ स्वां नमः ॥ वामकनिष्ठायां हां नमः ॥ ततः कर
योरंगुलीषु पंचांगन्यासः ॥ आचक्राय स्वाहा अंगुष्ठाभ्यां नमः ॥ विचक्राय स्वाहा तर्जनीभ्यां स्वाहा ॥ सुचक्राय स्वाहा मध्यमाभ्यां वषट् ॥ त्रैलोक्य
रक्षणचक्राय स्वाहा अनामिकाभ्यां हुं ॥ असुरांतकचक्राय स्वाहा कनिष्ठाभ्यां फट् ॥ ततो मूलमंत्रपुटितान्मातृकावर्णान्सबिंदून्मातृकाचक्रेषु
विन्यसेत् ॥ तत्र प्रणवपुटितं मूलमंत्रं आकेशादापादं आपादादाकेशं त्रिवारं विन्यस्य संहारसृष्टिभेदेन दशतत्वानि विन्यसेत् ॥ संहृतावनुगतो मनु
वर्य्यः सृष्टिवर्त्मनि भवेत्प्रतिपातः ॥ तद्यथा ॥ पादयोः गों नमः पराय पृथिवीतत्वात्मने नमः ॥ लिंगे पीं नमः पराय जलतत्वात्मने नमः ॥ हृदि जें नमः पराय तेजस्तत्वा
त्मने नमः ॥ मुखे तं नमः पराय वायुतत्वात्मने नमः ॥ शिरसि वं नमः परायाकाशतत्वात्मने नमः ॥ हृदि ह्लं नमः परायाहंकारतत्वात्मने नमः ॥ भं नमः पराय म
हत्तत्वात्मने नमः सर्वांगे यं नमः पराय प्रकृतितत्वात्मने नमः ॥ स्वां नमः पराय पुरुषतत्वात्मने नमः ॥ हां नमः पराय परतत्वात्मने नमः ॥ एतत्त्रयं सर्वगात्रे ॥ इति संह

स्याने ५

रक्रमः॥अथसृष्टिन्यासः॥सर्वांगेहांनमःपरायपरतत्वात्मनेनमः॥स्वांनमःपरायपुरुषतत्वात्मनेनमः॥यंनमःपरायप्रकृतितत्वात्मनेनमः॥हृदिभंनमःपरायमहत्तत्वात्मनेनमः॥ह्लंनमःपरायाहंकारतत्वात्मनेनमः॥शिरसिवंनमःपरायाकाशतत्वात्मनेनमः॥मुखेरंनमःपरायवायुतत्वात्मनेनमः॥हृदिजंनमःपरायतेजस्तत्वात्मनेनमः॥लिंगेपींनमःपरायजलतत्वात्मनेनमः॥पादयोःगोंनमःपरायपृथ्वीतत्वात्मनेनमः॥इतिसृष्टिन्यासः॥परायमहत्तत्वात्मनेनमःलंनमःपरायाहंकारतत्वात्मनेनमःशिरसिवंनमःपरायाकाशतत्वात्मनेनमःमुखेरंनमःपरायवायुतत्वात्मनेनमः तत्रसृष्टिन्यासः॥इतिसृष्टिन्यासः॥जंनमःपरायतेजस्तत्वात्मनेनमःलिंगे पींनमःपरायजलतत्वात्मनेनमःपादयोःगोंनमःपरायपृथिवीतत्वात्मनेनमः॥तत्रांगुलिनियमोऽवधे॥शिरसिविहितामध्यासेवास्यात्तर्जनिकान्विता॥अवसिरहितांगुष्ठाज्येष्ठान्विनोपकनिष्ठानसिवदने सर्वाः॥सज्यायसीहृदितर्जनीप्रथमविहितामध्यानिनामाभोग्रवसिविहिताः शिवे॥ताएवांगुलयोजान्वोःसांगुष्ठास्तपदद्वये॥शिवेलिंगे॥स्थानार्णयोर्विनियमोनांगुलिस्थानयोर्भवेत्॥यथा॥शिरसिगोंनमोमध्यमांगुल्यानेत्रयोः॥पींनमःस्तर्ज्जनीमध्यमाभ्यांकर्णयोः॥जंनमोंगुष्ठरहितांगुलीभिःघ्राणयोः॥नंनमोंऽगुष्ठानामिकाभ्यांमुखे॥वंनमःसर्वांगुलीभिःहृदि॥ह्लंनमोंगुष्ठतर्जनीभ्यांनाभौ॥भंनमःअंगुष्ठमध्यमाभ्यांलिंगे॥यंनमोंगुष्ठरहितांगुलिभिःजान्वोः॥स्वांनमोंगुष्ठरहितांगुलिभिःपादयोः॥हांनमःसर्वांगुलिभिः॥इयंसृष्टिः॥अथस्थितिक्रमः॥हृदिगोंनमोंगुष्ठतर्जनीभ्यांउदरे पींनमोंगुष्ठमध्यमाभ्यांलिंगे जंनमोंगुष्ठरहितांगुलीभिःजानुनिनंनमोंगुष्ठरहितांगुलीभिःपादयोः वंनमःसर्वांगुलीभिःशिरसि ह्लंनमःमध्यमांगुल्यानेत्रयोःभंनमस्तर्ज्जनीमध्यमाभ्यांकर्णयोःयंनमोंगुष्ठरहितांगुलीभिःघ्राणे स्वांनमोंगुष्ठानामिकाभ्यांमुखे हांनमःसर्वांगुलीभिः॥अथसंहारक्रमः॥पादयोःगोंनमःसर्वांगुलीभिः॥जानुनोःपींनमोंगुष्ठरहितांगुलीभिःलिंगे जंनमोंगुष्ठरहितांगुलीभिःउदरेनंनमोंगुष्ठमध्यमाभ्यांहृदि वंनमोंगुष्ठतर्ज्जनीभ्यांमुखे ह्लंनमःसर्वांगुलीभिःघ्राणे[१]

[१] नासिकयोः

भांनमोंगुष्ठानामिकाभ्यांकर्णयोः यंनमः अंगुष्ठरहितांगुलीभिः नेत्रयोः स्वांनमस्तर्जनीमध्यमाभ्यांमूर्द्ध्निहांनमः मध्यमांगुल्या॥पुनःसृष्टिस्थितीचवि
न्यसेत्॥स्थानार्णयोर्विनिमयोनांगुलिस्थानयोर्भवेत्॥विद्यार्थीब्रह्मचारीचपुनःसृष्टिंसमाचरेत्॥गृहस्थश्चपुनःसृष्टिस्थितीचकुर्य्यात्समाहितः॥
यतिर्वैराग्ययुक्तश्चसंहारांतेचविन्यसेत्॥एतेनविद्यार्थिब्रह्मचारिणाचतुर्द्धागृहस्थानांपंचधायतीनांविविक्तानांत्रिधान्यासः॥तथाचनिबंधे॥न्यासःसंहा
रांतोमस्करिवैखानसेषुविहितोयं॥स्थित्यंतोगृहमेधिषुसृष्ट्यंतोवर्णिनामितिप्राहुः॥वैराग्ययुक्तगृहस्थःसंहारांतंन्यसेत्केचिदाहुराचार्य्याः॥सहजानोव
नवासिनिस्थितिंचविद्यार्थिनोसृष्टिं॥केचित्तुन्यासत्रयेवैपरीत्यमामनंति॥वस्तुतस्तुतेनसर्वैरेवपंचधान्यासःकार्य्यः॥अथविभूतिपंजरन्यासः॥तत्रनिबंधे
वच्मिपरंन्यासवरंविभूत्यभिधंभूतिकरं॥मंत्रदृशाहृतिमयंगुप्ततमंमंत्रिवरैः॥यथा॥आधारेगोंनमः॥लिंगेपींनमः॥नाभौजंनमः॥हृदिनंनमः॥गलेवंनमः
॥मुखेल्लंनमः॥अंसयोःभांनमोयंनमः॥ऊर्वोःस्वांनमः हांनमः॥कंधरायांगोंनमः॥नाभौपींनमः॥कुक्षौजंनमः॥हृदिनंनमः स्तनयोःवंनमःल्लंनमःपार्श्व
योः॥भांनमःयंनमःश्रोण्योः॥स्वांनमः हांनमः२ शिरसि॥गोंनमःमुखे॥पींनमः ---- नेत्रयोः॥जंनमःकर्णयोः॥वंल्लंनासापुटयोः॥भांयंकपोलयोः॥
स्वांहां३ एवंदक्षिणकरमूलेसंध्यग्रेषुपंचदक्षिणहस्तांगुलीषुपंच४ एवंवामकरमूलसंध्यग्रेषुपंचवामकरांगुलीषुचपंच५ एवंचदक्षि-
णपादमूलसंध्यग्रेषुपंचपंच६ एवंवामपादमूलसंध्यग्रेषुपंच अंगुलीषुचपंच७ मूर्द्ध्निगोंतत्पूर्वेपीं॥तद्दक्षिणेजं॥तत्पश्चिमेनं॥तदुत्तरेवं॥
मूर्द्ध्निसकलेल्लं॥भुजयोः भांयं॥ऊर्वोःस्वांहां८ शिरसिगोंनेत्रयोःपींमुखेजं॥कंठेनंहृदिवंउदरेल्लं॥मूलाधारेभांलिंगेयंनमःजानुनोःस्वांपादयोः
हां९ श्रोत्रयोःगोंनमः॥गंडयोःपींनमःअंसयोःजंस्तनयोःनंपार्श्वयोःवंकक्ष्योःल्लंऊर्वोःभांजानुनोःयंजंघयोःस्वांपादयोःहां॥सर्वाणि१०
एतानिनमोंतानिविन्यसेत्॥ततःपूर्ववत्मूर्त्तिपं—जरन्यासः॥पुनःसृष्टिस्थितीततोदशांगपंचांगन्यासौ॥तद्यथा॥हृदिगोंनमःशिरसिपींनमःशि

खायां जं सर्वांगे नं दिक्षु वं दक्षिणपार्श्वे ल्लं वामपार्श्वे आं कटिदेशे यं पृष्ठे स्वां मूर्द्ध्नि हां॥ ततः पंचांगन्यासः॥ आचक्राय स्वाहा हृदयाय नमः॥ विचंक्राय॰ शिरसे स्वाहा॥ सुचक्राय॰ शिखायै वषट्॥ ॥ त्रैलोक्यरक्षणचक्राय॰ कवचाय हुं॥ असुरांतकचक्राय॰ अस्त्राय फट्॥ ततः किरीटमंत्रेण व्यापकं विधाय वेणुबिल्वादिमुद्राः प्रदर्श्य ॐ नमः सुदर्शनायास्त्राय फट् इति मंत्रेण दिग्बंधनं कुर्य्यात्॰ ततः किरीटादिकं तु सर्वत्र॥ ततो ध्यानम्॥ स्मरेद्वृंदावने रम्ये मोहयंतमनारतं॥ गोविंदं पुंडरीकाक्षं गोपकन्याः सहस्रशः १ आत्मनो वदनांभोजे प्रेषिताक्षिमधुव्रताः॥ पीडिताः कामबाणेन चिरमाश्लेषणोत्सुकाः २ मुक्ताहारलसत्पीनतुंगस्तनभरान्विताः॥ स्रस्तधम्मिल्लवसना मदस्खलितभाषणाः ३ दंतपंक्तिप्रभोद्भासिस्पंदमानाधरांचिताः॥ विलोभयंती विविधैर्विभ्रमैर्भावगर्भितैः ४ फुल्लेंदीवरकांतिमिंदुवदनं बर्हावतंसप्रियं श्रीवत्सांकमुदारकौस्तुभधरं पीतांबरं सुंदरं॥ गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं गोविंदं कलवेणुवादनपरं दिव्यांगरूपं भजे ६ एवं ध्यात्वा मानसैः संपूज्य शंङ्खस्थापनं कृत्वा वैष्णवोक्तपीठमभ्यर्च्य पीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्य्यंतं विधाय देवशरीरे सृष्टिस्थितिदशांगपंचांगन्यासक्रमेण पूजयेत्॰॥ मूलेन ततो मुखे ॐ वेणवे नमः॥ एवं हृदि वनमालायै नमः॥ कौस्तुभाय॥ श्रीवत्साय॥ ततोऽपरं पंचपुष्पांजलिं दद्यात्॥ शुक्लचंदनपंकिलां श्वेततुलसीं रक्तचंदनपंकिलां रक्ततुलसीं मूलेन दक्षिणवामपार्श्वयोर्दद्यात्॥ एवं हृदये करवीरद्वयेन मूर्द्ध्नि पद्मद्वयेन अंजलीं विधाय॰ तथा तुलसीद्वयं पद्मद्वयं रक्तकरवीरद्वयं शिरसि दद्यात्॥ तथा च गौतमीये॥ तुलसीयुगलं पादद्वये गंधद्वयान्वितं॥ हयारियुगलं पादद्वये गंधद्वयान्वितं पद्मयुग्मं मूर्ध्निदेशे मूलेन दक्षवामके॥ षड्भिः सर्वतनौ दद्यात्पुनः शिरसि सर्वतः॥ दक्षिणे वासुदेवाख्यं स्वच्छं चैतन्यमव्ययं॥ वामे च रुक्मिणी देवी रक्ता रजोगणान्वितेति॥ ततः सर्वाणि पुष्पाणि सर्वतनौ दद्यात्॥ ततः आवरणपूजा॥ पूर्वे नारदाय नमः॥ एवं दक्षिणे सुदा

दामायै

र्वि

ग

भूषं

रोहि

माय॥ पश्चिमे वसुदेवाय॥ उत्तरे किंकिण्यै ॥ केसरेष्वग्निकोणे आं चक्राय स्वाहा हृदयाय नमः॥ नैर्ऋते विचक्राय स्वाहा शिरसे स्वाहा॥ वा
यवे सुचक्राय स्वाहा शिखायै वषट्॥ ईशाने त्रैलोक्यरक्षणचक्राय स्वाहा कवचाय हुं॥ चतुर्दिक्षु असुरांतकचक्राय स्वाहा अस्त्राय फट्॥ ततः प
त्रेषु पूर्वादि ॐ रुक्मिण्यै नमः॥ एवं सत्यभामायै नाग्निजित्यै मित्रविंदायै सुनंदायै सुलक्षणायै जाम्बवत्यै सुशीलायै॥ पत्राग्रेषु पूर्वादि वसुदेवाय देव
क्यै नंदाय यशोदायै बलभद्राय सुभद्रायै गोपिभ्यो गोपेभ्यश्च नमो नेन पूजयेत्॥ तद्बाह्ये मध्ये पूर्वादिक्रमेण॥ ॐ मंदाराय नमः॥ एवं संतानाय पा
रिजाताय कल्पवृक्षाय हरिचंदनाय॥ तद्बाह्ये इन्द्रादीन्वज्रादींश्च पूजयेत्॥ ततः कृष्णाष्टकेन पूजयेत्॥ यथा॥ श्रीकृष्णाय वासुदेवाय
देवकीनन्दनाय नारायणाय यदुश्रेष्ठाय वार्ष्णेयाय धर्म्म संस्थापनाय असुराक्रांतभारहारिणे॥ अशक्तश्चेदंगे इन्द्रादीन्वज्रादीन्पूज
राज येत्॥ तथा च गौतमीये॥ अथवांगैर्दिक्पतिभिस्तदस्त्रैरपि चार्चयेत्॰ एवमभ्यर्चयेत्कृष्णं कामभुक्त्योश्च भाजनं॥ एतत्पूजनाऽ
शक्तश्चेत्कृष्णाष्टकेन पूजयेत्॥ ततो धूपादिविसर्जनांतं कर्म्म समापयेत्॥ अस्य पुरश्चरणं दशलक्षजपः॥ तथा च निबंधे॥ दश
लक्षमक्षयफलप्रदं मनुं प्रतिजप्य विमलमतिर्दशाक्षरं॥ जुहुयात् सिताज्यमधुरप्लुतैर्नवैररुणाम्बुजैर्हुतवहे दशायुतं॥ अथ मुषिरपु
गलवर्णचेन्मनुं पंचलक्षं प्रजपेत्तु जुहुयाच्च प्रोक्तकल्पार्द्धलक्षम्॥ अमलमतिरलाभे पायसैरंबुजानामसितघृतसुसिक्तैरारभे होमक
र्म्म॥ मंत्रांतरं॥ दशाक्षरादौ तु श्रीमायाकामः मायाश्रीकामः। काममायाश्रीः॥ त्रिविधः त्रयोदशाक्षरो भवति॥ तथा च॥ श्रीशक्तिमारपूर्वश्च
शक्तिश्रीमारपूर्वकः॥ कामशक्तिरमापूर्वो दशार्णो मनवस्त्रयः॥ इति सनत्कुमारकल्पदर्शनात्॥ एतेषां पूजाप्रयोगः॥ प्रातःकृत्या
दिवैष्णवोक्तपीठन्यासांतं विधाय ऋष्यादिन्यासं कुर्यात्॥ यथा शिरसि नारदऋषिः॥ मुखे गायत्रीछन्दसे नमः॥ हृदि श्रीकृ

॥श्रीं ह्रीं क्लीं १ ह्रीं श्रीं क्लीं २ क्लीं ह्रीं श्रीं ३॥ ॥गोपीजनवल्लभाय स्वाहा इति दशाक्षरादौ एतैर्बीजपुटितं कृत्वा जपेत्॥ ३॥

स्त्रायदेवतायैनमः॥ततःकरांगन्यासौ॥आचक्रायस्वाहाअंगुष्ठाभ्यांनमःइत्यादिदशाक्षरवत्॥ ततःफलार्थीचेद्दृष्टतत्त्वमू
र्त्तिपंजरौन्यसेत्॥ततःकिरीटमंत्रेणव्यापकंकृत्वायथाशक्तिमुद्राबध्वाॐनमःसुदर्शनायास्त्रायफट् इतिमंत्रेणदिग्बंधनंकृत्वा
ध्यायेत्॥आद्येमनौदशाक्षरवद्ध्यानंद्वितीयेमनौमणिरत्नाभिषेकवत्॥तृतीयेतुध्यानम्॥शंखचक्रधनुर्बाणपाशांकुशधरोऽरुणः॥वेणुं
धमन्धृतंदोर्भ्यांध्येयःकृष्णोदिवाकरे॥गौतमीयेतु॥अत्रापिदशाक्षरवद्ध्यानं॥तथाचरमादिकामादिर्वामंत्रद्वयमधिकृत्य॥अनयोर्मं
त्रयोर्मंत्रीआचक्राद्यैःषडंगकं॥कुर्य्याद्दशार्णवत्सर्वंध्यानपूजादिकंसुधीः॥एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंकृत्वावैष्णवोक्तपीठपू
जांविधायपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतंविधाय पूर्वोक्तवेण्वादिपूजांकृत्वावरणपूजामारभेत्॥असावरणादीनि
अंगइंद्रवज्रादीनिततःकृष्णाष्टकेनपूजयेत् ततोधूपादिविसर्जनांतंकर्मसमापयेत्॥एतेषांपुरश्चरणंपंचलक्षजपः॥तथा॰ पंचलक्षंज
पेत्तावद्दयुतंपायसेनतु॥जुहुयात्संस्कृतेवन्हौमंत्रीमंत्रार्थसिद्धये॥अथाष्टादशाक्षरः॥कृष्णायपदमाभाष्यगोविंदायततःपरं॥गोपीजनप
दस्यांतेवल्लभायद्विठावधिः॥कामबीजादिराख्यातोमनुरष्टादशाक्षरः॥अस्यपूजाप्रयोगः॥प्रातःकृत्यादिवैष्णवोक्तपीठमन्वंतंविन्यस्यऋष्यादिन्यासंकु
र्य्यात्॥यथाशिरसिनारदऋषयेनमः॥मुखेगायत्रीछंदसेनमः॥हृदिश्रीकृष्णायदेवतायैनमः॥गुह्येक्लींबीजायनमः॥पादयोःस्वाहाशक्तयेनमः॥त
तःप्रणवपुटितेनमंत्रंत्रिशःकरयोर्व्यापकंकृत्वाकरांगन्यासौकुर्य्यात्॥तद्यथा॥क्लींकृष्णायअंगुष्ठाभ्यांनमः॥गोविंदायतर्जनीभ्यांस्वाहा॥ गो
पीजनमध्यमाभ्यांवषट्॥वल्लभायअनामिकाभ्यांहुं॥स्वाहाकनिष्ठाभ्यांफट्॥एवंहृदयादिषु॥ततोमूलेनमूर्द्धादिपादपर्य्यंतंत्रिशोव्याप्यप्रण

क्लींकृष्णायगोविंदायगोपीजनवल्लभायस्वाहा॥४॥

वेन सकृद्व्याप्य मंत्रन्यासं कुर्य्यात्॥ मूर्ध्नि ललाटे भ्रूमध्ये कर्णयोश्चक्षुषोर्घ्राणयोर्वदने ग्रीवायां हृदि नाभौ कट्यां लिंगे जान्वोः पादयोरेषु स्थानेषु प्रत्येकेन मंत्रवर्णान्क्रमेणैतान्विन्यस्य शिरसि प्रणवं च न्यसेत्॥ प्रकारांतरं गौतमीये॥ ततो नयनमुखहृदयगुह्यांघ्रिषु मंत्रस्य पदपंचकं नमोंतं न्यसेत्॥ पदपंचकं च चतुश्चतुस्तथा द्व्यं ततोंगन्यासं कुर्य्यात्॥ क्लीं कृष्णाय हृदयाय नमः॥ गोविंदाय शिरसे स्वाहा॥ गोपीजन शिखायै वषट्॥ वल्लभाय कवचाय हुं॥ स्वाहा अस्त्राय फट्॥ मूलमंत्रं चतुर्वर्गचतुष्केण द्विकेन च॥ प्रोक्तांगानि च भूयोस्य चिंतयेद्देवकीसुतं॥ ततो दशतत्त्वमूर्त्तिपञ्जरन्यासौ कृत्वा किरीटमंत्रेण व्यापकं विधाय यथाशक्ति मुद्रां बद्ध्वा ॐ नमः सुदर्शनायास्त्राय फट् इति मंत्रेण दिग्बंधनं कृत्वा दशाक्षरोक्तं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा वैष्णवोक्तपीठमन्वंतं पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतं विधाय क्लीमित्याद्यक्षरैस्तत्तदंगेषु न्यासक्रमेण संपूज्य पुनरंजलिपंचपुष्पांजलिं दद्यात्॥ ततो वेण्वादिपूजनं कृत्वा दशाक्षरोक्तावरणपूजां कृत्वा धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं दशाक्षरपटले पंचलक्षमुक्तं॥ अथ विंशत्यर्णः॥ शक्तिश्रीकामपूर्वकोऽष्टादशाक्षरो विंशत्यर्णकः॥ अस्य पूजा॥ प्रातःकृत्यादि वैष्णवोक्तपीठन्यासांतं पीठमन्वंतं कृत्वा ऋष्यादिन्यासं कुर्य्यात्॥ शिरसि ब्रह्मणे ऋषये नमः॥ मुखे गायत्री छंदसे नमः॥ हृदि श्रीकृष्णाय देवतायै नमः॥ गुह्ये क्लीं बीजाय नमः॥ पादयोः स्वाहा शक्तये नमः॥ ततः करांगन्यासौ॥ ह्रीं श्रीं क्लीं अंगुष्ठाभ्यां नमः कृष्णाय तर्जनीभ्यां स्वाहा॥ गोविंदाय मध्यमाभ्यां वषट्॥ गोपीजन अनामिकाभ्यां हुं॥ वल्लभाय कनिष्ठाभ्यां वौषट्॥ स्वाहा करतलकरपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ मूलेन व्यापकं कृत्वा मंत्रपुटितान् मातृकावर्णांस्तत्तत्स्थानेषु न्यसेत्॥ ततो दशतत्त्वानि विन्यस्य पुनर्मूलेन

ह्रीं श्रीं क्लीं कृष्णाय गोविंदाय गोपीजनवल्लभाय स्वाहा॥ ५॥

व्यापकं कुर्य्यात्॥ ततो मंत्रन्यासः॥ मूर्द्धि ह्रीं नमः। कपोले श्रीं नमः। भ्रूमध्ये क्लीं नमः। नेत्रयोः कृं नमः। कर्णयोः ष्णां नमः। नासिकयोः यं। वदने गों।
चिबुके विं कंठे दां मूले यं हृदि गों उदरे पीं नाभौ जं लिंगे नं आधारे वं कट्यां ल्लं जानुनोः भां जंघयोः यं गुल्फयोः स्वां पादयोः हां सर्वत्र नमोंता
न्न्यसेत्॥ इति सृष्टिः॥ हृदि ह्रीं नमः। उदरे श्रीं नमः। नाभौ क्लीं लिंगे कृं आधारे ष्णां कट्यां यं जान्वोः गों जंघयोः विं गुल्फयोः दां पादयोः यं मू
र्द्धि गों कपोले पीं भ्रूमध्ये जं नेत्रयोः नं कर्णयोः वं नसोः ल्लं वदने भां चिबुके यं कंठे स्वां दोः मूले हां सर्वत्र नमोंतान्न्यसेदिति स्थितिः॥ पादयोः
ह्रीं गुल्फयोः श्रीं जंघयोः क्लीं जान्वोः कृं कट्यां ष्णां आधारे यं लिंगे गों नाभौ विं उदरे दां हृदि यं दोर्मूले गों कंठे पीं चिबुके जं वदने नं नसोः वं
कर्णयोः ल्लं नेत्रयोः भां भ्रूमध्ये यं भाले स्वां मस्तके हां सर्वत्र नमोंतान्न्यसेदिति संहारः॥ पुनः सृष्टिस्थिती कृत्वा मूर्त्तिपंजरं न्यसेत्॥ सृष्टिस्थि
ती विन्यस्य ततः षडंगानि समाचरेत्॥ यथा॥ ह्रीं श्रीं क्लीं हृदयाय नमः॥ कृष्णाय शिरसे स्वाहा॥ गोविंदाय शिखायै वषट्॥ गोपीजनकवचाय
हुं॥ वल्लभाय नेत्राभ्यां वौषट्॥ स्वाहास्त्राय फट्॥ ततः पूर्ववन्मुद्रां दिग्बंधनं च कृत्वा किरीटमुद्रां बध्वा ध्यायेत्॥ तथा॥ द्वारावत्यां सहस्रार्कभास्वरैर्भव
नोत्तमैः॥ अनल्पैः कल्पवृक्षैश्च परिते मणिमंडपे॥ ज्वलद्रत्नमयस्तंभद्वारतोरणकुड्यके॥ फुल्लस्रग्गुल्मसच्चित्रविताना लंबि मौक्तिके॥ पद्मरागस्थ
लीराजद्रत्नवेद्याश्च मध्यतः॥ अनारतगलद्रत्नधाराढ्यस्वस्तरोरधः॥ रत्नप्रदीपावलिभिः प्रदीपितदिगंतरे॥ उद्यदादित्यसंकाशमणिसिंहासनेंबु
जे॥ समासीनोऽच्युतो ध्येयो द्रुतहाटकसन्निभः॥ समानोदितचंद्रार्कतडित्कोटिसमद्युतिः॥ सर्वांगसुंदरः सौम्यः सर्वाभरणभूषितः॥ पीतवासाश्चक्र
शंखगदापद्मोज्ज्वलद्भुजः॥ अनारतोच्छलद्रत्नधारौघकलशं स्पृशन्॥ वामपादांबुजाग्रेण मुष्णता पल्लवच्छविं॥ रुक्मिणीसत्यभामे स्य मूर्ध्नि रत्नौ

घधारया॥२ ममामुकफलंभवतुक्लीं॥४॥ मूलमंत्रसंवेष्टिभिः॥४॥

घधारया॥सिंचंत्यौदक्षवामस्थेसुदोःस्थकलशोत्थया॥नाग्नजितीसुनंदाचदिशंत्यौकलशोनयो॥नाभ्यांचदक्षवामस्थेमित्रविंदासुलक्षणे॥र
त्ननद्याःसमुद्रस्यरत्नपूर्णौघटौततयोः॥जांबवतीसुशीलाचदिशंत्यौदक्षवामके॥बहिःषोडशसाहस्रसंख्याताःपरितःप्रियाः॥ध्येयाःकनकर
त्नौघधाराद्युक्कलशोज्वलाः॥तद्बहिश्चाष्टनिधयःपूरयंतोधनैर्धरां॥तद्बहिर्वृष्णयःसर्वेपुरोवच्चस्वरादयः॥एवंध्यात्वामानसैःसंपूज्यशंख
स्थापनंकुर्यात्॥अस्यपूजायंत्रं॥षट्कोणमध्यमष्टदलपद्मंविलिख्यषट्कोणमध्येतुससाध्यसहितंकामबीजंविलिख्यतंशिष्टैःसप्तदशभिर्वेष्टये
त्॥ततःषट्कोणस्यप्राग्रक्षोनिलकोणेषुश्रीबीजंलिखेत्॥शिष्टेषुभुवनेशानींलिखेत्ततः षट्संधिषुक्लींकृष्णायनमःइतिषड्वर्णान्लिखेत्॥ततः
केशरेषु॥कामदेवायविद्महेपुष्पबाणायधीमहि॥तन्नोनंगःप्रचोदयात्इतिगायत्र्यास्त्रीणित्रीण्यक्षराणिपूर्वादिक्रमेणलिखेत्॥ततःपत्रमध्येषुपू
र्वादिनमःकामदेवायसर्वजनप्रियायसर्वजनसम्मोहनायज्वलज्वलप्रज्वलप्रज्वलसर्वजनस्यहृदयंममवशंकुरुकुरुस्वाहेति मालामंत्रस्यषडक्षरा
णिँमालामंत्रमाह॥मातृकावर्णेनवेष्टयेत्३चतुरस्रेश्रीबीजंलिखेत्३तद्बाह्येवज्राणि३॥शारदायां॥नमोंतेकामदेवायवदेत्सर्वपदंततः॥प्रियाप
सर्ववर्णांतेजनसंमोहनायच॥ज्वलज्वलप्रज्वलार्णौवदेत्सर्वजनस्यच॥हृदयंममशब्दांतेवशंकुरुयुगंशिवः॥मालामनुरयंसाष्टाचत्वारिं
शतिकाक्षरैः॥विलिखेत्तद्बाह्येमातृकयासंवेष्टयेत्॥ततोभूबिंबेदिक्षुचश्रीबीजंविदिक्षुमायाबीजंविलिखेत्॥तद्बाह्येअष्टपत्राणि॥तथाच॥विलि
५५ ख्यगंधपंकेनलिखेदष्टदलांबुजं॥कर्णिकायांचषट्कोणंससाध्यंतत्रमन्मथं॥शिष्टैस्तंसप्तदशभिरक्षरैर्वेष्टयेत्स्मरँ॥प्राग्रक्षोऽनिलकोणेषुश्रियंशि
ष्टेषुसंविदं॥षडक्षरंषट्संधिषुकेसरेषुत्रिशस्त्रिशः॥विलिखेत्स्मरगायत्रीमालामंत्रंदलाष्टके॥षट्शःसंलिख्यतद्बाह्येवेष्टयेन्मातृकाक्षरैः॥

भूबिंबंचलिखेद्वात्येश्रीमायेदिग्विदिक्ष्वपि॥भूगृहंचतुरस्रंस्यादष्टवज्रविभूषितं॥एतद्यंत्रमेकादशाक्षरअष्टादशाक्षरद्वादशाक्षरद्वाविंशत्यक्षरं॥चतुर्दशाक्षरएकाक्षराणामिति॥यत्तुगौतमीये॥पद्ममष्टपलाशंतुचतुरस्रंसुलक्षणं॥चतुर्द्वारसमायुक्तंकागर्भितकर्णिकम्॥सामान्यंयंत्रमुद्दिष्टमष्टादशाक्षरेशृणु॥चतुरस्रंचतुर्द्वारंपद्ममष्टदलान्वितं॥षट्कोणगर्भकामाख्यसप्तदशार्णवेष्टितं॥षडक्षरंमनुवरंषट्कोणेविलिखेत्ततः॥एतद्यंत्रंमहाभागकृपयाकथितंतव॥अस्यविज्ञानमात्रेणकृष्णात्मासाधकोभवेत्॥इतिगौतमीये०॥अष्टादशाक्षरद्वादशाक्षरयोर्यर्हि शेषयंत्रमुक्तम् तदशक्तविशयं॥अन्यथातत्तापिन्यादिविरोधःस्यात्॥ततःपीठमन्त्रंतंपीठपूजांविधायपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतंविधाय सृष्टिस्थितिषडंगंचसंपूज्य।ॐकिरीटायनमः।एवंकुंडलाभ्यांनितंबेपीनवस्त्राय।चक्राय।शंखाय।गदायै।पद्माय।वनमालायै।श्रीवत्साय।कौस्तुभाय।प्रणवादिनमोंतेनपूजयेत्॥ततःपंचपुष्पांजलिंदत्वा आवरणपूजामारभेत्॥षट्कोणेष्वग्न्यादि॥ह्रींश्रींक्लींहृदयायनमः॥कृष्णायशिरसेस्वाहा इत्यादिनापूजयेत्॥ततोदिक्पत्रस्यमूले।ॐवासुदेवायनमः॥एवंसंकर्षणाय।प्रद्युम्नाय।अनिरुद्धाय॥विदिक्पत्रमूलेशांत्यैश्रियै।सरस्वत्यै।रत्यै॥पत्रेषुपूर्वादिक्रमेणपूर्ववद्रुक्मिण्याद्याःपूजयेत्॥अग्रेषोडशसहस्रंमहिषीभ्योनमः॥तद्बहिःपूर्वादिॐइंदुनिधयेनमः।एवंनीलनिधयेनमः।मुकुंदनिधयेनमः।मकरंदनिधयेआनंदनिधयेकच्छपनिधयेशंखनिधयेचक्रनिधयेगदानिधयेपद्मनिधयेतद्बहिरिंद्रादीन्वज्रादींश्चसंपूज्य धूपादिविसर्ज्जनांतंकर्म्मसमापयेत्॥अस्यपुरश्चरणंचतुर्लक्षजपः॥तथाच॥ध्यात्वैवंपरमात्मानंविंशत्यर्णमनुंजपेत्॥चतुर्लक्षंहुनेदाज्यैश्चत्वारिंशत्सहस्रकं॥अथद्वात्रिंशद्वर्णः॥वाग्भवंकामबीजंचकृष्णा[illegible]भुवनेश्वरीं॥गोविंदायरमां॥पीज

६॥ ऐं क्लीं ह्रीं श्रीं गोपीजनवल्लभाय स्वाहा ॥६

ऐं क्लीं कृष्णाय ह्रीं गोविंदाय श्रीं गोपीजनवल्लभाय स्वाहा सौः॥१॥ घृतमधुशर्कराभिर्युक्तैः॥४

नवल्लभङे· शिरः॥ चतुर्दशस्वरोपेतः शुक्रः सर्गीन्दूर्ध्वितः॥ ह्रीं विंशत्यक्षरो मंत्रो वागीशत्वप्रदायकः॥ अस्य पूजा॥ प्रातःकृत्यादि वै स्नवोक्तपी
तमन्त्वं तं पीठन्यासं विधायाष्टादशाक्षरवदृष्यादिन्यासं करांगन्यासं च विधाय मुद्रादिदिग्बंधनं कृत्वा ध्यायेत्॥ वामोर्ध्वहस्ते दधतं विद्यासर्वस्वपु
स्तकं॥ अक्षमालां च दक्षोर्ध्वे स्फाटिकीं मातृकामयीं॥ शब्दब्रह्ममयं वेणुमधःपाणिद्वये रितं॥ गायंतं पीतवसनं श्यामलं कोमलच्छविं॥ बर्हिबर्हकृ
तोत्तंसं सर्वज्ञं सर्ववेदिभिः॥ उपासितं मुनिगणैरुपतिष्टेद्धरिं सदा॥ एवं ध्यात्वा द्वाविंशत्यर्णं पूर्ववत्पूजयेत्॥ विशेषकृत्सृष्टिस्थितिपूजनेना
क्लितनद्वर्णाभावात्॥ अस्य पुरश्चरणं चतुर्लक्षजपः॥ तथा च·। चतुर्लक्षं जपेन्मंत्रममुं मंत्री सुसंयतः॥ पलाशपुष्पैः स्वाद्वक्तैश्चत्वारिंशत्सहस्रकम्
॥ जुहुयात्कर्मणानेन मंत्रः सिद्धो भवेद्ध्रुवम्॥ अथ चतुर्दशार्णमंत्रः कथ्यते· वाग्भवं कामबीजं च मायां लक्ष्मीमनंतरं॥ दशार्णो मनुवर्यश्च भवे
च्छुक्राक्षरो मनुः॥ ब्रह्मसंहितायां तु॥ वाग्भवं भुवनेशानी श्रीबीजं कामराजकं॥ दशार्णो मंत्रराजश्च भवेच्छुक्राक्षरः परः॥ अस्य पूजा॥ प्रातःकृत्या
नारदोवा दि वै स्नवोक्तपीठन्यासं कृत्वा ऋष्यादिन्यासं कुर्यात्॥ शिरसि ब्रह्मणे ऋषये नमः॥ मुखे गायत्रीछन्दसे नमः॥ हृदि श्रीकृष्णाय देवतायै नमः॥
न्यासपूजादिकं होमं सर्वं च दशाक्षरवत्॥ ध्याने तु विशेषः॥ ध्यायेद्वृन्दावने रम्ये कांचनीभूमिमध्यगे॥ नानापुष्पलताकीर्णे वृक्षखंडैश्च मंडिते॥ कल्पा
टवीनलसन्मध्ये श्रीमन्माणिक्यमंडपे॥ नारदाद्यैर्मुनिश्रेष्ठैः स्तुवद्भिः परिवारिते॥ रत्नसिंहासने ध्यायेदुपविष्टं कजोपरि॥ सजलजलदश्यामं रक्त
निभे पद्मदलेक्षणं॥ रक्तपद्मनिभापादपाणिभ्यां परिवारितं॥ नवरत्नसमारब्धभूषणैः परिभूषितं॥ श्रीयुक्तवक्षः श्रीवत्सकौस्तुभोद्भासितोवरं॥ तारहारा
वलीरम्यश्रीवत्सांकितवक्षसं॥ रोचनातिलकप्रांतकुंतलभ्रमरायितं॥ कंदर्पचापसदृशवनमालाविराजितं॥ अनेकरत्नसन्नद्धस्फुरन्मकरकुंडलम्॥ बर्हिब
र्हकृतोत्तंसं सर्वज्ञं सर्ववेदिभिः॥ उपासितं मुनिगणैरुपतिष्टेद्धरिं सदा॥ अथ कृष्णैकाक्षरः॥ कांमाक्षरं धरासंस्थं 'शांति' बिंदुविभूषितं॥ त्रैलोक्य

मंडितं॥३॥ आवेष्टितं·१४ चिह्निमाला श्रीयुक्तवक्षसि श्रीमत्कौस्तुभोद्भासिभासुरं॥३॥ १तेन क्लिं संज्ञितबीजं॥१

कल्पद्रुमखावने

मोहनो विष्णुः कथितस्तव यत्नतः ॥ अस्य पूजा ॥ प्रातःकृत्यादि वैष्णवोक्तपीठन्यासांतं कृत्वा तदुपरि पक्षिराजाय स्वाहेति पीठमनुं न्यसेत् ॥ ततः ऋष्यादिन्यासो यथा ॥ शिरसि संमोहनऋषये नमः ॥ मुखे गायत्रीछंदसे नमः ॥ हृदि त्रैलोक्यमोहनाय विष्णवे देवतायै नमः ॥ ततः करांगन्यासौ ॥ क्लीं अंगुष्ठाभ्यां नमः इत्यादि ॥ क्लीं हृदयाय नमः इत्यादि च षड्दीर्घभाजा बीजेन ॥ तथा च ॥ दीर्घषट्कयुजानेन कामबीजेन कल्पयेत् ॥ ततो बाणन्यासः ॥ द्रां शोषणबाणाय नमोंगुष्ठयोः ॥ एवं तर्जन्यादिषु द्रीं सम्मोहनं ॥ क्लीं संदीपनं ॥ ब्लूं तापनं ॥ सः मादनं ॥ न्यासे तु सर्वत्र बाणपदप्रयोगः ॥ तथाऽऽमस्तकमुखहृदयलिंगपादेषु तान् न्यसेत् ॥ द्रामाद्यं शोषणं पूर्वं द्रीमाद्यं मोहनं तथा ॥ संदीपनाख्यं क्लीमाद्यं ब्लूमाद्यं तापनं पुनः ॥ सर्गांतभृगुणा भूयो मादनं पंचमं न्यसेत् ॥ ततो ध्यानं ॥ भग्नविद्रुमसंकाशं सर्वतेजोमयं वपुः ॥ किरीटिनं कुंडलिनं केयूरवलयान्वितम् ॥ मुक्तासद्रत्नसन्नद्धतुलाकोटिसमुज्वलम् ॥ नानालंकारसुभगं पीतांबरयुगावृतम् ॥ गरुडोपरि सन्नद्धरक्तपंकजमध्यगं ॥ उत्तप्ततेजसंकाशं लक्ष्मीं वामोरुसंस्थितां ॥ सर्वालंकारसुभगां शुक्लवासोयुगावृतां ॥ सकामां लीलया देवीं मोहयंतं पुनः पुनः ॥ शंखचक्रगदापद्मपाशांकुशधनुःशरान् ॥ धारयंतं जगन्नाथं रक्तपद्मारुणेक्षणं ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ न्यासक्रमेण पीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानं दत्वा न्यासक्रमेण शरीरे पंचबाणान् संपूज्य ॥ ॐ किरीटाय नमः ॥ एवं कुंडलाभ्यां नमः ॥ शंखाय नमः ॥ चक्राय गदायै पद्माय पाशाय धनुषे शराय हस्तेषु पूजयेत् ॥ स्तनोर्द्धे श्रीवत्साय कौस्तुभाय ॥ गले वनमालायै ॥ नितंबे पीतवसनाय ॥ वामांगे श्रीलक्ष्म्यै ॥ ततः केशरेषु अग्न्यादिकोणमध्ये दिक्षु च ॥ क्लां हृदयाय· इत्यादिना षडंगं पूजयेत् ॥ ततः पूर्वादिदिक्षु बाणान् संपूज्य कोणेषु पंचमं बाणं पूजयेत् ॥ पत्रेषु पूर्वादि ॐ लक्ष्म्यै नमः ॥ एवं सरस्वत्यै रत्यै कीर्त्यै प्रीत्यै कांत्यै तुष्ट्यै पुष्ट्यै तद्बहिर्लोकपालान् पूजयेत् ॥ अत्र वज्रादिपूजा नास्त्यनुक्तत्वात् ॰ ॥

के।३

२चतुर्थ्यंते क्लीं हृषीकेशाय नमः२ ॥ श्रीं ह्रीं क्लीं कृष्णाय स्वाहा द्वितीयभेदोष्टाक्षरः॥३॥

ततो धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्॥ अस्य पुरश्चरणं द्वादशलक्षजपः॥ तथा च निबंधे॥ रविलक्षं जपेन्मंत्रं जुहुयात्तद्दशांशतः॥ अमृतत्रय
सिक्तेन पायसेन विधानवित्॥ अथवा रविसाहस्रं हुनेत्तावच्च तर्प्पयेत्॥ हृषीकेशपदं ङेंतेन मोंतः कामपूर्वकः॥ अष्टाक्षरो मनुः प्रोक्तो नमोंतः
पुरुषार्थदः॥ ध्यानपूजादिकं सर्वं पूर्ववच्च समाचरेत्॥ मंत्रांतरं॥ लक्ष्मीर्म्माया कामबीजं ङेंतं कृष्णपदं यथा॥ स्वाहेति मंत्रो राजोयं भजतां सुरपाद
पः॥ अस्य पूजा॥ प्रातः कृत्यादि वैष्णवोक्तपीठमन्वंतं विन्यस्य ऋष्यादिन्यासं कुर्य्याद्यथा॥ शिरसि नारदऋषये नमः॥ मुखे नुष्टुप्छंदसे नमः
॥ हृदि श्रीकृष्णाय देवतायै नमः॥ ततः करांगन्यासौ॥ क्लां अंगुष्ठाभ्यां नमः इत्यादि॥ क्लां हृदयनमः इत्यादि॥ षड्दीर्घयुक्तेन एवं॥ ततो ध्यानं
कलायकुसुमश्यामं वृंदावनगतं हरिं॥ गोपगोपीगवावीतं पीतवस्त्रयुगावृतं॥ नानालंकारसुभगं कौस्तुभोद्भासिवक्षसं॥ सनकादिमु
निश्रेष्ठैः संस्तुतं परमं मुदा॥ शंखचक्रलसद्बाहुं वेणुहस्तहृद्येरितं॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा वैष्णवोक्तपीठमन्वंतं
पीठमनुं संपूज्य पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्य्यंतं विधायावरणपूजामारभेत्॥ यथा केशरेषु अग्न्यादिकोणेषु मध्ये दि
क्षु च क्लां हृदयाय नमः इत्यादिना षडंगादिपूजयेत्॥ तद्बहिरिंद्रादीन् वज्रादींश्च संपूज्य धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्॥ अ
स्य पुरश्चरणं चतुर्लक्षजपः॥ तथा च॥ ध्यात्वैवं परमात्मानं चतुर्लक्षं जपेन्मनुं॥ दशांशं जुहुयान्मंत्री कुसुमैर्ब्रह्मवृक्षजैः पलाशैः॥ अयं द्वादशाक्ष
रः॥ श्रीं शक्ति स्मर कृष्णाय गोविंदाय स्वाहा शिरो मनुः॥ अस्य पूजा॥ प्रातः कृत्यादि पीठमन्वंतं पीठन्यासं विधाय रत्नाभिषेकवत् ऋष्यादिन्या
सं कृत्वा करांगन्यासौ कुर्य्यात्॥ तद्यथा॥ श्रीं अंगुष्ठाभ्यां नमः॥ ह्रीं तर्ज्जनीभ्यां स्वाहा॥ क्लीं मध्यमाभ्यां वषट्॥ कृष्णाय अनामिकाभ्यां

सुदर्षणे ६॥ ॥श्रीं ह्रीं क्लीं कृष्णाय गोविंदाय स्वाहा०॥२॥

नं·सा·
६७

३ ॐ नमो भगवते रुक्मिणीवल्लभाय स्वाहा ।३

हुं ॥ गोविंदाय कनिष्ठाभ्यां वौषट् ॥ स्वाहा करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ श्रीं हृदयाय नमः इत्यादि ॥ ततो मूर्तिपंजरन्यासं विधाय मुद्रादिदिग्बं
धनं कृत्वा विंशत्यर्णोक्तं ध्यात्वा तद्विधानेन पूजयेत् विशेषस्तु सृष्टिस्थितिपूजनं नास्ति तत्र द्वर्णासंभवात् ॥ अस्य पुरश्चरणं जपहोमश्च तत्या ॥ ॥ अ
थ षोडशाक्षरः तारं हृद्भगवते रुक्मिणीवल्लभाय ठद्वयं ॥ तारो हृद्भगवान् ङेंतो रुक्मिणीवल्लभस्तथा ॥ शिरोंतः षोडशार्णोयं रुक्मिणीवल्लभाह्वयः ॥
अस्य पूजा ॥ प्रातः कृत्यादि वैष्णवोक्तपीठमन्त्रांते पीठं न्यस्य स्वकृष्यादिन्यासं कुर्यात् ॥ यथा ॥ शिरसि नारदऋषये नमः ॥ मुखे नुष्टुप्छंदसे नमः ॥ हृ
दि रुक्मिणीवल्लभाय देवतायै नमः ॥ ततः करांगन्यासौ ॥ ॐ अंगुष्ठाभ्यां नमः ॥ नमस्तर्जनीभ्यां स्वाहा ॥ भगवते मध्यमाभ्यां वषट् ॥ रुक्मिणीवल्लभाय अ
नामिकाभ्यां हुं ॥ स्वाहा कनिष्ठाभ्यां वौषट् ॥ एवं हृदयादिषु ॥ ॐ हृदयाय नमः इत्यादि ॥ ततो ध्यानम् ॥ तापिंजच्छविरंकगां प्रियतमां स्वर्णप्र
भामंबुजप्रोद्यद्वामभुजां स्वबाहुलतया श्लिष्यन्स चिंतास्मयां ॥ श्लिष्यंतीं स्वयमन्यहस्तविलसत्सौवर्णवेत्रश्चिरं पायाद्वोसनसूनपीतवसनो
नानाविभूषो हरिः ॥ १ ॥ एवं ध्यात्वा मानसैः संपूज्य वैष्ण वोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावर
णपूजामारभेत् ॥ यथा ॥ केशरेषु अग्न्यादिकोणेषु दिक्षु च ॥ ॐ हृदयाय नमः इत्यादिना पूजयेत् ॥ ततोऽष्टदलेषु पूर्वादि ॥ ॐ नारदाय नमः ॥ ए
वं पर्वताय विष्णवेऽनिरुद्धाय उद्धवाय दारुकाय विष्वक्सेनाय शैलेयाय अग्रे विनतासुताय नमः ॥ तद्बहिरिन्द्रादीन्वज्रादींश्च संपूज्य धूपादिवि
सर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं लक्षमेकं जपः ॥ तथा च ॥ ध्यात्वैवं रुक्मिणीनाथं जपेल्लक्षममुं मनुं ॥ अयुतं जुहुयात्पद्मैररुणैर्मधु
राप्लुतैः ॥ मंत्रांतरं ॥ श्रीं ह्रीं श्रीशक्तिकामपूर्वोऽयं क्लीं जन्मशक्तिरमांतिकः ॥ दशाक्षरः स एवादौ लैंच्चेत् शक्तिरमाश्रितः ॥ एतद्बीजप्रपुटितको मंत्रः स एव दशाक्षरः
॥ आदौ शक्तिरमान्वितश्चद्वपरः ॥ मंत्रो विकृतिरव्यर्णो आचक्राद्यंगिना विमौ ॥ आदौ आमुखे माया श्रीयुक्तः सदशाक्षरश्च द्वादशार्णः ॥ मायाश्रीकाम

निशठाया ४ क्लींह्रीं २ श्री २ काम २ नः सत्वदेव ७

केशरैः
राम
६७

प्रणवेनसमायुक्तं ।२

पूर्वकामशक्तिरमे तुर्दशार्णः षोडशार्णो भवति॥ अनयोर्ऋष्यादिपंचांगानि दशाक्षरवत्पूर्ववत् विंशत्यर्णोक्तवत् पूजां कुर्य्यात्॥ ध्यानं तु॥ वरदाभ
यहस्ताभ्यां श्लिष्यंतं स्वांकगे प्रिये० पद्मो त्पलकरे ताभ्यां श्लिष्टं चक्रदरोज्ज्वलं॥ अनयोर्मंत्रयोः पुरश्चरणं तु दशलक्षजपः॥ तथावं० द
शलक्षं जपेदाज्यैस्तावत्सहस्रहोमतः॥ अथ चतुर्दशार्णः॥ प्रणवं नमसा युक्तं कृष्णगोविंदकौ तथा॥ श्रीपूर्वौ ङें·तावुच्चार्य्य हुं फट् स्वाहेतिकी
र्तितः१॥ अस्य नारदऋषिरनुष्टुप्छंदः परमात्मा हरिर्देवता॥ आचक्राद्यैरंगकल्पना दशार्णवदस्य पूजाजपहोमादयो बीजशक्ती च तत्समे
॥ अथ बालगोपालमंत्राः॥ गौतमीये निबंधे च॥ चक्री वसुस्वरान्वितः सर्गी एकार्णोयं मनुर्मतः॥ कृष्णेति द्व्यक्षरः प्रोक्तः कामपूर्वस्त्रिवर्णकः
॥ स एव चतुर्वर्णः स्यात् ङें·तोन्यश्चतुरक्षरः॥ वक्ष्यते पंचवर्णः स्यात् कृष्णाय नम इत्यपि॥ स एव कामपूर्वश्चेत् षडक्षरमनुर्मतः॥ कृष्णायेति
स्मर हृं हृमध्ये पंचाक्षरः परः॥ गोपालायाऽग्निजायांतः षडक्षर उदाहृतः॥ कृष्णाय कामबीजाद्यो वह्निजायांतिको मनुः॥ कृष्ण
गोविंदकौ ङें·तौ सप्तार्णो मनुरुत्तमः॥ कृष्णगोविंदकौ ङें·तौ कामाद्यश्चाष्टवर्णकः॥ आद्यंते कामबीजश्चेन्नवाक्षर उदाहृतः॥ दधिभक्षण ङें·व
ह्निजायाभिरपरोष्टकः॥ सुप्रसन्नात्मने प्रोक्तो नम इत्यपरोष्टकः॥ कामबीजं धराबीजं पुनः कामं समुच्चरेत्॥ श्यामलांगपदे ङें·ते नमोंतोयं
दशाक्षरः॥ शिरोंतो बालवपुषे कृष्णायान्यो मनुर्मतः॥ श्रीशक्तिकामकृष्णाय मारः सप्ताक्षरो मनुः॥ शिरोंतो बालपुरुषे क्लीं कृष्णाय स्मृतो
बुधैः॥ कृः। कृष्ण। कामकृष्ण। कामकृष्णाय। कृष्णाय नमः। कामकृष्णाय नमः। कामकृष्णाय कामः। गोपालाय ठद्वयं। कामकृष्णाय ठद्वयं। कृष्णाय गो
विंदाय। कामकृष्णाय गोविंदाय। कामकृष्णाय गोविंदाय कामः। दधिभक्षणाय ठद्वयं। सुप्रसन्नात्मने हृदयं। कामबीज ग्लौं कामबीज श्यामलांगाय नमः
। बालवपुषे कृष्णाय ठद्वयं। श्रीशक्तिमारः कृष्णाय मारः। बालवपुषे कामबीज कृष्णाय ठद्वयं एतेषां पूजायंत्रं॥ रत्नमष्टदलं पद्मं भूगृहं रत्नमध्यस्थं का

व्याघ्रनखभूषितः।५।

मबीजं॥ तथा च गौतमीये॰ पद्ममष्टपलाशं तु चतुरस्रं सुलक्षणम्॥ चतुर्द्वारसमायुक्तं कामगर्भितकर्णिकं॥ एतेषां पूजाप्रयोगः॥ प्रातःकृत्यादि वैष्णवोक्तपीठमन्वंते पीठन्यासं विधाय ऋष्यादिन्यासं कुर्यात्॥ यथा॥ शिरसि नारदऋषये नमः॥ मुखे गायत्रीछंदसे नमः॥ हृदि श्रीकृष्णाय देवतायै नमः॥ ततः करांगन्यासौ॥ क्लां अंगुष्ठाभ्यां नम इत्यादि॥ क्लां हृदयाय नम इत्यादि॥ तथा षड्दीर्घस्वरयुक्तेन ततः पूर्ववन्मुद्राः प्रदर्श्य ध्यायेत्॥ अव्याद्व्याकोषनीला बुजरुचिररुणांभोजनेत्रांबुजस्थो बालो जंघाकटीरस्थलकलितरणत्किंकिणीको मुकुंदः॥ दोर्भ्यां हैयंगवीनं विदधति विमलं पायसं विश्ववंद्यो गोगोपीगोपवीतो रुरुनखविलसत्कंठभूषश्चिरं नः॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्। ततो वैष्णवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ यथा केशरेष्वऽग्न्यादिकोणेषु दिक्षु च॥ क्लां हृदयाय नमः इत्यादिना षडंगेन पूजयेत्॥ तद्बहिरिंद्रादीन् वज्रादींश्च संपूज्य धूपादिविसर्जनांतं कर्म समापयेत्॥ एतेषां पुरश्चरणं लक्षमेकं जपः॥ तथा च॥ ध्यात्वैवमेकमेतेषां लक्षं जप्यान्मनुं ततः॥ सर्पिःसितोमलोपेतैः पायसैरयुतं हुनेत्॥ तर्पयेत्तावदेतेषां मनुना पूर्वसंख्यया॥ मंत्रांतरं॥ सद्यःफलप्रदं मंत्रं वक्ष्येऽन्यं चतुरक्षरं॥ संयुक्तो मारयुग्मांतस्थानकृष्णपदेन तु॥ कामयोरंते कृष्णपदं मंत्रः सद्यःफलप्रदः॥ अस्य पूजा॥ प्रातःकृत्यादि वैष्णवोक्तपीठमन्वंतं विधाय पूर्ववदृष्यादिन्यासं करांगन्यासौ कृत्वा ध्यायेत्॥ श्रीमत्कल्पद्रुमाधोदृगलकमलसत्कर्णिकासंस्थितो यस्तच्छाखालं बिपद्मोदरविसरदसंख्यातरक्ताभिषिक्तः॥ हेमाभः स्वप्रभाभिस्त्रिभुवनमखिलं भावयन्वासुदेवः पायाद्वः पायसादोनवरतनवनीतामृताशीवशी सः॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा वैष्णवोक्तपीठमन्वंतं पीठं संपूज्य पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ पूर्ववदग्न्यादि दिक्षु च क्लां हृदयाय नम इत्यादिना षडंगेन पूजयेत्॥ पत्रे

ओम।२

ष्णुपूर्वाद्यष्टनिधीन्संपूज्य ततः इन्द्रादीन्वज्रादींश्च पूर्वादितः संपूज्य धूपादिविसर्जनांते कर्म समापयेत्॥ अस्य पुरश्चरणं चतुर्लक्षजपः॥ तथा
च॥ ध्यात्वैवं प्रजपेल्लक्षं चतुष्कं जुहुयात्ततः॥ त्रिमध्वक्तैर्बिल्वफलैश्चत्वारिंशत्सहस्रकं॥ जुहुयाद्द्वादश स्रोन्यैः समिद्भिः पायसेन वा॥
प्रासादे स्थापिते कृष्णमनुना नित्यमर्चयेत्॥ सूर्च्चादिपीठार्चनांतं कृत्वा पूर्वोक्तमार्गतः॥ अर्चयेच्छ्रीहरिं दिक्षु विदिक्ष्वंगानि च क्रमात्॥ वासुदेवः संक
र्षणः प्रद्युम्नश्चानिरुद्धकः॥ रुक्मिणी सत्यभामा च लक्ष्मणा जांबवत्यपि॥ दिग्विदिक्ष्वर्चयेदेता निंद्रवज्रादिकान्बहिः॥ योमुं मनुं जपेन्नित्यं
विधिनाभ्यर्च्चयेद्धरिं॥ स सर्वसंपत्संपूर्णो नित्यं शुद्धपदं व्रजेत्॥ अस्य मंत्रस्य कामबीजलकारयो रंते रेफश्चेत्तदा मंत्रचूडामणिः॥ तथा च
निबंधे॥ मारयोरस्य मांसाद्योरक्तश्चेदपरो मनुः॥ अस्य पूजाप्रयोगः॥ पूर्ववदृष्यादिन्यासः॥ करांगन्यासस्तु॥ कलरां अंगुष्ठाभ्यां नमः॥ कलरां
हृदयाय नमः इत्यादि च॥ अस्य पूजादिकं सर्वं पूर्ववत्॥ ध्याने तु विशेषो यथा॥ आरक्तोद्यानकल्पद्रुमतलविलसत्स्वर्णदोलाधिरूढं गोपी
भ्यां प्रेंख्यमाणं विलसितनवबंधूकसिंदूरभासं॥ बालं लीलालकांतं कटितटविलसत्क्षुद्रघंटाघटाढ्यं वंदे शार्दूलकामांकुशलसितगला क
जप्त्वा लश्रीप्रमुकुंदं॥ ध्यात्वैवं पूर्ववत्सैनं हुत्वा रक्तोत्पलैर्नवैः॥ मधुरत्रितये हुत्वाभ्यर्चयेत्पूर्ववद्धरिं॥ अथ वासुदेवमंत्रः॥ प्रणवो हृद्भगवते वासुदे
उरपादपः
वाय कीर्तयेत्॥ प्रधानं वैष्णवे तंत्रे मंत्रोयं द्वादशाक्षरः॥ अस्य पूजा॥ प्रातःकृत्यादि पूर्वोक्तपीठमन्वंतं विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ यथा॥
शिरसि प्रजापतये ऋषये नमः॥ मुखे गायत्री छंदसे नमः॥ हृदि वासुदेवदेवतायै नमः॥ ततः करांगन्यासे॥ ॐ अंगुष्ठाभ्यां नमः॥ नमस्तर्जनी।
भ्यां स्वाहा॥ भगवते मध्यमाभ्यां वषट्॥ वासुदेवाय अनामिकाभ्यां हुं॥ समस्तेन कनिष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ तारेण हृदयं प्रोक्तं नमसा
शिर ईरितं॥ चतुर्वर्णैः शिखा प्रोक्ता पंचार्णैः कवचं मतं॥ समस्तेन भवेदंगमेवमंगकल्पनमीरितं॥ ततो मंत्रन्यासः॥ मूर्ध्नि भाले दृशोर्नास्ये गले दोर्हृदयांबुजे

व्याघ्रनखहृद्ययुक्तभूषणं कामांकुशेति। दि

कुक्षौनाभौध्वजेजानुद्वयेपादद्वयेतथा॥ द्वादशाक्षराणिनमोंतानिविन्यसेत्॥ ततोमूर्त्तिपंजरंविन्यस्यकिरीटमंत्रेणव्यापकंकृत्वाध्यायेत्॥
विष्णुंशारदचंद्रकोटिसदृशंशंखंरथांगंगदामंभोजंदधतंसिताब्जनिलयंकांत्याजगन्मोहनं। आबद्धांगदहारकुंडलमहामौलिंस्फुरत्कंक
णं श्रीवत्सांकमुदारकौस्तुभधरंवंदेमुनींद्रैःस्तुतं॥ एवंध्यात्वामानसैःसंपूज्य शंखस्थापनंकृत्वावैष्णवोक्तपीठपूजांविधाय पुनर्ध्यात्वावाह
नादिपंचपुष्पांजलिदानपर्यंतंविधायावरणपूजांकुर्यात्॰ यथा॥ अग्न्यादिकोणेदिक्षुच ॐहृदयायनमः। इत्यादिनापंचांगेनपूजयेत्॥ ततः
पूर्वादिदलेषुवासुदेवादींस्ततइन्द्रादीन्वज्रादींश्चसंपूज्य धूपादिविसर्जनांतंकर्मसमापयेत्॥ अस्यपुरश्चरणंद्वादशलक्षजपः॥ तथाच
॥वर्णलक्षंजपेन्मंत्रंदीक्षितोविजितेन्द्रियः॥ तत्सहस्रंप्रजुहुयात्तिलैराज्यपरिप्लुतैः॥ मंत्रवर्णसंख्याक्षरमुक्तं॥ अथलक्ष्मीनारायणमंत्रः॥ मा
याहृद्यंरमाहृद्यंलक्ष्मीवासुदेवायनमः॥ प्रणवादिरयंमंत्रः॥ तथाचनिबंधे॰ हृल्लेखाबीजयुगलंरमाबीजयुगंतथा॥ लक्ष्म्यंतेवासुदेवायहृदं
गःप्रणवादिकः॥ चतुर्दशाक्षरःप्रोक्तोमंत्रोयंसुरपादपः॥ अस्यपूजावासुदेववत्॥ ऋष्यादिन्यासेतुवासुदेवोदेवता॥ करांगन्यासौ॥ ॐह्रींह्रींअंगु
ष्ठाभ्यांनमः इत्यादि॥ ॐश्रीश्रींतर्जनीभ्यांस्वाहा॥ ॐलक्ष्मीमध्यमाभ्यांवषट्॥ ॐवासुदेवायअनामिकाभ्यांहुं॥ ॐ नमःकनिष्ठाभ्यांवौषट्॥ एवं
हृदयादिषु॥ हृदयंशक्तिबीजाभ्यांरमाभ्यांशिरईरितं॥ लक्ष्म्याप्रोक्तंशिखावर्मवासुदेवपदकीर्तितं॥ नमसास्त्रंसमुद्दिष्टंसर्वेतारादिकंन्यसेत्॥ ध्यानंतु॥ वि
द्युच्चंद्रनिभवपुःकमलजावैकुंठयोरेकतांप्राप्तंस्नेहवशेनरत्नविलसद्भूषाभरालंकृतं॥ विद्यापंकजदर्पणान्मणिमयंकुंभंसरोजंगदांशंखंच
क्रममूनिबिभ्रदमितांदिश्याच्छ्रियंवःसदा॥१॥ अस्यपुरश्चरणंचतुर्लक्षजपः॥ तथाच॥ वर्णलक्षंजपेन्मंत्रंतत्सहस्रंसरोरुहैः॥ होमंकुर्याद्वि
कसितैर्मधुरत्रयसंयुतैः॥ वर्णलक्षंमंत्रवर्णसंख्याक्षरलक्षं॥ अथदधिवामनमंत्रः॥ ॐनमोविष्णवेसुरपतयेमहाबल [illegible] गो

॥ॐनमोविघ्नवेसुरपतयेमहाबला।यस्वाहा

वृया

हृद्धिग्लवेपँश्वान्डें·तंसुरपतिर्भवेत्॥महाबलायठंहूंहूंमनुरष्टाद्शाक्षरः॥अस्यपूजाप्रयोगः॥प्रातःकृत्यादि [illegible] मंत्रस्य ऋष्यादिन्यासंकुर्यात्॥शिरसिइन्दुऋषयेनमः॥मुखेविराट्छंदसेनमः॥हृदिदधिवामनायदेवतायैनमः॥तथाचनिबंधे॥चंद्रांतकस्थिते पीठेप्रागुक्तेनसमर्चयेत्॥ततःकरांगन्यासौ॥ॐअंगुष्ठाभ्यांनमः॥नमस्तर्जनीभ्यांस्वाहा॥विघ्नवेमध्यमाभ्यांवषट्॥सुरपतयेअनामिकाभ्यांहुं। ॥महाबलायकनिष्ठाभ्यांवौषट्॥स्वाहाकरतलकरपृष्ठाभ्यांफट्॥एवंहृदयादिषु॥ॐहृदयायनमः इत्यादिना॥तथाच॥हृदेकेनशिरोद्वाभ्यां शिखात्रिभिरुदाहृता॥कवचंपंचभिःप्रोक्तंनेत्रंतावद्भिरक्षरैः॥द्वाभ्यामस्त्रमितिप्रोक्तंप्रकारोंगस्यसूरिभिः॥ततोमंत्रन्यासः॥शिरसिभालेचक्षुषोः कर्णयोःओष्ठेतालुकेकंठेबाहुद्वयेहृदयेउदरेनाभौगुह्येऊरुद्वयेजानुद्वयेजंघाद्वयेपादद्वयेमंत्रवर्णान्न्यसेन्मोतान्॥जंघाद्वौपादौतुद्वयंद्वयंवर्णंन्यसेत्॥ततोमूर्तिपंजरादिकंविधायध्यानंकुर्यात्॥यथा॥मुक्तागौरंनवमणिलसद्भूषणंचंद्रसंस्थंभृंगाकारैरलकनिकरैःशोभिवक्त्रारविंदं॥हस्ताब्जाभ्यांकनककलशंशुद्धतोयाभिपूर्णं दध्यन्नाद्यंकनकचषकंधारयंतंभजामः॥एवंध्यात्वामानसैस्संपूज्य शंखस्थापनंकृत्वा ततः चंद्रमंडलांतेपीठंसंपूज्यपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतंविधायावरणपूजामारभेत्॥चंद्रांतकस्थितेपीठेप्रागुक्तेनसमर्चयेत्॥अग्न्यादिकोणचतुष्टयेमध्येदिक्षुच ॐहृदयायनमः इत्यादिनापूजयेत्॥ततोदिग्दलेषुवासुदेवादीन्शक्तिसहितान्ध्वजादीन्संपूज्यतदग्रेकेशवादीन्संपूज्य इन्द्रादीन्वज्रादींश्चसंपूज्यऐरावतादिदिग्गजान्पूजयेत्॥ॐऐरावतादिदिग्गजायनमः इत्यादिनापूजयेत्॥ततो धूपादिविसर्जनांतंकर्मसमापयेत्॥अस्यपुरश्चरणंत्रिलक्षजपः॥तथाच॥गुणलक्षंजपेन्मंत्रंतद्दशांशंघृतप्लुतं॥पायसान्नंमजुहुयाद्ध्यानं वायथाविधि॥ततोहयग्रीवमंत्राः॥ॐउद्गिरत्पदमाभाष्यप्रणवोद्गीथशब्दतः॥सर्ववागीश्वरेत्यंतेप्रवदेदीश्वरेत्यथ॥सर्ववेदमयाचिन्त्यपदांतेसर्वमुच्चरे

॥ॐउद्गिरत्प्रणवोद्गीथसर्ववागीश्वरईश्वरसर्ववेदमयाचिंत्यसर्वंबोधयबोधय॥अयंमंत्रः ३४॥ ३॥

त्॥ बोधयद्वितयांतो यं मंत्रस्त्वादिरीरितः॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि वैष्णवोक्तपीठमन्वंतं पीठन्यासं विधाय ऋष्यादिन्यासं कुर्यात्॥
यथा॰ शिरसि ब्रह्मणे ऋषये नमः॥ मुखेनुष्टुप्छन्दसे नमः॥ हृदि हयग्रीवाय देवतायै नमः॥ ततः करांगन्यासौ॰ ॐ अंगुष्ठाभ्यां नमः॥ उद्गिर
त्प्रणवोद्गीथ तर्जनीभ्यां स्वाहा॥ सर्ववागीश्वरेश्वर मध्यमाभ्यां वषट्॥ सर्ववेदमयाचिंत्य अनामिकाभ्यां हुं॥ सर्वं बोधय बोधय कनिष्ठाभ्यां फ
ट्॥ एवं हृदयादिषु॥ ततो ध्यानम्॥ शरच्छशांकप्रभमश्ववक्त्रं मुक्तामयैराभरणैः प्रदीप्तं॥ रथांगशंखाचितबाहुयुग्मं जानुद्वयं न्यस्तकरं भ
जामः॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा वैष्णवोक्तपीठपूजां विधाय पुनर्ध्यात्वा हसूमित्यनेन मूर्तिं संकल्प्यावाहयेत्
पुनर्ध्यात्वा पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात्॰ तथा च निबंधे॰ बीजेन मूर्तिसंक
ल्प्य बीजमूर्ध्नि पूजयेत्तथा॥ वियद्भृगुस्थमर्घीशबिंदुमद्बीजमीरितं॥ वियत् हकारः भृगुः सकारः स्थः अर्घीशः ःऊकारः इंदु बीजं अर्ध
चंद्रबीजं तेन ह्सूँ ॐ हृदयाय नमः इत्यादि पंचांगानि॥ ततः केसरेषु चतुर्दिक्षु ततो दिग्दलेषु चतुर्वेदान् ऋग्यजुःसामाथर्वाख्यान् समर्चयेत्॥
विदिक्ष्वंगस्मृतिन्यायसर्वशास्त्राणि पूजयेत्॥ अर्चयेत्तस्य मध्येषु विधानेनांगदेवताः॥ ततस्तद्बहिरिंद्रादीन् वज्रादींश्च संपूज्य धू
पादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं त्रयस्त्रिंशल्लक्षजपः॥ तथा च॰ वर्णलक्षं जपेन्मंत्रं कुंदपुष्पैर्मधुप्लुतैः द
शांशं संस्कृते वह्नौ जुहुयान्मंत्रसिद्धये॥ अथैकाक्षरः॥ स च हकार सकार षष्ठस्वरबिंद्वात्मकः॥ चतुर्दशस्वरयुक्त इति कल्पांतरे॥ तथा
च निबंधे॰ वियद्भृगुस्थमर्घीशबिंदुमद्बीजमीरितं॥ एकाक्षरो मनुः प्रोक्तश्चतुर्वर्गफलप्रदः॥ अस्य ब्रह्मा ऋषिरनुष्टुप्छंदो हयग्रीव
रूपी विष्णुर्देवता हकारो बीजम् ऊकारः शक्तिः उकारः कीलकं हसां हसीं हसूं हसैं हसौं हसः इति षडंगकल्पना॥ ध्यानं तु॥ ध्य [illegible] निबं
वैष्णवे

७ हयग्रीवाय हयअश्वमुखः॥७ जाला देवारिजिष्णुं

क्षीरगौरं कराब्जै जपवलयसरोजे पुस्तकाभीष्टदानैः॥दधतममलवस्त्राकल्पदीप्तोभिरामं तुरगवरवदनं [illegible] विद्याधि[illegible] अस्य
नूच॰ शरच्छशांकप्रभमश्ववक्त्रं मुक्तामयैराभरणैरुपेतम्॥रथांगशंखोर्ध्वकरं च विद्याव्याख्यानमुद्रान्यकरं नमामि॥एवंध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतं विधायावरणपूजामारभेत्॥तत्रांगैः प्रथमावरणम्॥प्रज्ञा हयमेधा हयस्मृति हयविद्या हयलक्ष्मी हयवागीशी हयविद्याविशाल हयनारविमर्दन हयैः इत्यष्टभिर्द्वितीयं॥लक्ष्मीसरस्वतीरतिप्रीतिकीर्त्तिकांतितुष्टिपुष्टिभिस्तृतीयं॥कुमुदादिभिर्गजैश्चतुर्थं॥इन्द्रादिभिः पंचमावरणं॥ततो धूपादिसर्जनांतं कर्म्म समापयेत्॥अस्य पुरश्चरणं लक्षचतुष्टयजपः॥तथा च॥वेदलक्षं जपेन्मंत्री दशांशं जुहुयात्ततः॥आज्येन दशांशहोमः॥अथ सप्ताक्षरी॥हयग्रीवाय एकाक्षरादिचतुर्थ्यंतं हयशिरः शब्दो नमोंतः॥तथा च कल्पे॥हयशिरपदं ङेंतं हृदयांतं समुद्धरेत्॥स्वबीजादिर्म्महामंत्रश्चतुर्वर्गफलप्रदः॥अस्य ब्रह्मा ऋषिरनुष्टुप्छंदो हयग्रीवरूपी विष्णुर्देवता अन्यत्सर्वमेकाक्षरवत्॥मंत्रांतरं॥उद्गिरत्प्रणवोद्गीथ सर्ववागीश्वरेश्वर॥सर्ववेदमयाचिंत्य सर्वं बोधय बोधय॥स्वाहांतो मनुराख्यातो बीजप्रणवसंपुटः॥मंत्रांतरम्॥विश्वोत्तीर्णस्वरूप यचिन्मयानंदरूपिणे॥तुभ्यं नमो हयग्रीव विद्याराजाय विष्णवे॥स्वाहांतो मनुराख्यातो हंसेन संपुटी—कृतः॥अयं मंत्रः हंसादिसोहमंतिकः॥एतयोर्म्मंत्रयोः पूर्वानुष्ठितहयग्रीवमंत्रवत्सर्वं ज्ञातव्यं॥अथ नृसिंहमंत्राः॥उग्रं वीरं वदेत्पूर्वं महाविष्णुमनंतरं॥ज्वलंतपदमाभाष्य सर्वतोमुखमीरयेत्॥नृसिंहं भीषणं भद्रं मृत्युमृत्युं वदेत्ततः॥नमाम्यहमिति प्रोक्तो मंत्रराजः सुरद्रुमः॥अयं मंत्रो मायापुटितो भवति॥प्रणवहृल्लेखापुटितश्चेत्सर्वकामफलप्रदः॥कल्पे तु॥हृल्लेखापुटितश्चेत्स्यात्सर्वकामफलप्रदः॥अस्य पूजाप्रयोगः॥प्रातःकृत्यादिपीठमन्वंतं विधाय ऋष्यादिन्यासं कुर्यात्

संत्रासयंते ४

तं·सा·
७१

द्वयथा॥शिरसिब्रह्मणेऋषयेनमः॥मुखेनुष्टुप्छंदसेनमः॥हृदिनृसिंहायदेवतायैनमः॥ततःकरांगन्यासौ॥चतुर्भिर्हृदयंवर्णैः शिरस्ता
वद्भिरक्षरैः॥शिखाऽष्टभिःसमुद्दिष्टाषड्भिःकवचमीरितम्॥नावद्भिर्नयनंप्रोक्तमस्त्रंस्यात्करणाक्षरैः॥शिरोललाटनेत्रेषुमुखेबाह्वोःऽघ्रिसंधि
षु॥साग्रेषुकुक्षौहृदये गलेपार्श्वद्वयेपुनः॥अपरांगेचककुदिन्यसेद्वर्णान्यथाक्रमम्॥ध्यानम्॰ माणिक्याद्रिसमप्रभंनिजरुचासंत्रस्त
रक्षोगणंजानुन्यस्तकरांबुजंत्रिनयनंरत्नोल्लसद्भूषणम्॥बाहुभ्यांधृतशंखचक्रमनिशंदंष्ट्रोग्रवक्त्रोल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयंव
देनृसिंहंविभुं॥एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंकुर्य्यात्॥वैष्णवोक्तपीठपूजांकृत्वापुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदान
पर्य्यंतंविधायावरणपूजामारभेत्॥यथा॥केशरेष्वग्न्यादिकोणेमध्येदिक्षुचअंगानिपूजयेत्॥उग्रंवीरंहृदयायनमः॥महाविष्णुंशिरसे
स्वाहा॥ज्वलंतंसर्वतोमुखंशिखायैवषट्॥नृसिंहंभीषणंकवचायहुं॥भद्रंमृत्युमृत्युंनेत्रत्रयायवौषट्॥नमाम्यहंअस्त्रायफट्॥ततःपू
र्व्वादिदले॥गरुडंशंकरंशेषंब्रह्माणंचप्रपूजयेत्॥विदिग्दलेषुश्रियंह्रियंधृतिंपुष्टिंचप्रणवादिनमोंतेनपूजयेत्॥तद्बहिरिंद्रादी
न्वज्रादींश्चसंपूज्यततोधूपादिविसर्ज्जनांतंकर्म्मसमापयेत्॥अस्यपुरश्चरणंद्वात्रिंशल्लक्षजपः॥तथाच॥वर्णलक्षंजपेन्मंत्रंततस्तद्धुतं
घृतप्लुतैः॥पायसान्नैःप्रजुहुयाद्विधिवत्पूजितेनले॥अथनृसिंहषडक्षरमंत्राःकथ्यन्ते॥पाशःश्क्लींश्चक्ष्रौंक्रोंवर्मफट्॥तथाचनिबंधे॥पाशः
शक्तिर्नरहरिरंकुशोवर्म्मफट्मनुः॥षडक्षरोनरहरेःसर्वकामफलप्रदः॥अस्यपूजा॥प्रातःकृत्यादिवैष्णवोक्तपीठमन्त्रांतंविन्यस्यऋष्यादिन्या
संकुर्यात्॥शिरसिब्रह्मणेऋषयेनमः॥मुखेपंक्तिछंदसेनमः॥हृदिनृसिंहायदेवतायैनमः॥ततःकरांगन्यासौ॥आंअंगुष्ठाभ्यांनमः॥ह्रीं
तर्ज्जनीभ्यांस्वाहा॥क्ष्रौंमध्यमाभ्यांवषट्॥क्रोंअनामिकाभ्यांहुं॥हुंकनिष्ठाभ्यांवौषट्॥फट्करतलकरपृष्ठाभ्यांफ [illegible]

सम·
७१

जिष्णुं

तो ध्यानम्॥ कोपादालोलजिह्वं विवृतनिजमुखं सोमसूर्याग्निनेत्रं पादादानाभिरक्तं प्रभमुपरिसितार्भिन्नदैत्येंद्रगा[illegible]शंखं च [illegible]कुशकुलिशगदादारुणान्युद्वहंतं भीमं तीक्ष्णाग्रदंष्ट्रं मणिमयविविधाकल्पमीडे नृसिंहं॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा वैष्णवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ ततः केसरेष्वग्न्यादिकोणमध्ये दिक्षु च आं हृदयाय नमः इत्यादि षडंगानि संपूज्य पत्रेषु पूर्वादि शंखचक्रपाशअंकुशवज्रगदाखड्गखेटकं च पूजयेत्॥ तथा च॥ अंगावृतेर्बहिश्चक्रं शंखं पाशांकुशौ पुनः॥ वज्रकौमोदकीखड्गखेटौ पत्रेषु पूजयेत्॥ तद्बहिरिंद्रादीन्वज्रादींश्च संपूज्य धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं षट्लक्षजपः॥ तथा च॥ ऋतुलक्षं जपेन्मंत्रं घृतेन जुहुयात्ततः॥ तत्सहस्रं समिद्भिर्वा तोषयेद्वसुना गुरुं॥ अथैकाक्षरः। क्षकारो वह्निमारूढश्चतुर्दशस्वरयुक्तः बिंदुमानेकाक्षरो मंत्रः॥ तथा च॥ क्षकारो वह्निमारूढो मनुस्वरसमन्वितः॥ बिंदुनादलसन्मूर्द्धा बीजं नरहरेर्मतं॥ एकाक्षरो मनुः प्रोक्तो भजतां काममदो मणिः॥ अस्य पूजादिकं सर्वं मंत्रराजवत्॥ अस्य अत्रिऋषिः गायत्री छंदः क्षकारो बीजं औंकारः शक्तिः षड्दीर्घयुक्तेनांगकल्पना॥ अस्य पुरश्चरणं अष्टलक्षजपः॥ तथा च निबंधे॥ वसुलक्षं जपेन्मंत्रमित्यादि॥ जयद्वयं श्रीनृसिंहः॥ तथा च कल्पे॥ जयद्वयं समुच्चार्य श्रीपूर्वो नृसिंह इत्यपि॥ अष्टाक्षरो मनुः प्रोक्तो भजतां काममदो मणिः॥ अस्य ब्रह्माऋषिर्गायत्री छंदः षड्दीर्घभाजा श्रीबीजेनांगकल्पना॥ ध्यानार्चनादिकं सर्वं मंत्रराजवत्॥ अस्य पुरश्चरणं अष्टलक्षजपः॥ तथा च॥ वसुलक्षं जपेन्मंत्रमित्यादिवचनात्॥ अथ हरिहरमंत्रः॥ स च मंत्रदेवप्रकाशिकायाम्॥ तारो माया प्रासादं शंकरनारायणाय नमः॥ प्रासादं मायातारः॥ अस्य पूजा॥ प्रातःकृत्यादि वैष्णवोक्तं शैवोक्तं वा पीठं विधाय ऋष्यादिन्यासं कुर्यात्॥ यथा॥ शिरसि नारदऋषये नमः॥

श्रीजयजयनृसिंह॥४॥

॥ॐ ह्रीं हौं शंकरनारायणाय नमः॥२॥

मुखेनुष्टुप्छंदसे नमः ॥ हृदिहरिहरिहरायदेवतायै नमः ॥ गुह्ये ह्रौं बीजाय नमः ॥ पादयोः ह्रीं शक्तये नमः ॥ ततः करांगन्यासौ । ह्रां अंगुष्ठाभ्यां
नमः इत्यादि ॥ ह्रां हृदयाय नमः इत्यादि ॥ ततो ध्यानम् ॥ स्थूलं चक्रं पांचजन्यमभीतिं दधतः करैः ॥ स्वस्वभूषाच्छुतोलार्हदेहं हलमिहांभ
जे ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा वैष्णवोक्तं शैवोक्तं वा पीठपूजां विधाय पुनर्ध्यात्वावाहनादि   पंचपुष्पांजलिदान
पर्य्यंतं विधायावरणपूजामारभेत् ॥ केसरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च ह्रां हृदयाय नमः इत्यादिना पूजयेत् ॥ ततः पत्रेषु पूर्वादि ॐ
लक्ष्म्यै नमः ॥ एवं नारायण्यै ॥ धरायै ॥ भूधरायै ॥ अंबिकायै ॥ त्र्यंबिकायै ॥ गंगायै ॥ गंगाधरायै ॥ तद्बहिरिंद्रादीन्पूजयेत् ॥ अत्र वज्रादिपू
जानास्त्येवाऽनुक्तत्वात् ॥ ततो धूपादि विसर्ज्जनांतं कर्म्म समापयेत् ॥ अस्य पुरश्चरणं लक्षजपः ॥ घृतपायसेनाऽयुत होमः ॥ तथा च ॥
लक्षमात्रं जपेन्मंत्रं तद्दशांशं घृतप्लुतैः ॥ पायसैर्हवनं कुर्यात्संस्कृते हव्यवाहने ॥ अथ वराहमंत्रः तारो नमो भगवते वरा   हरूपाय भू
र्भुवः स्वः पतये भूपतित्वं मे देहि ह्रदापय ठद्वयं ॥ अयं मंत्रस्त्रयस्त्रिंशदक्षरः ॥ तारो नमो भगवते वराहपदमीरयेत् ॥ रूपाय भूर्भुवः स्वः स्या
त्पतये तदनंतरं ॥ भूपतित्वं मे पदांते देह्यंते च ददापय ॥ वह्निजायावधिर्मंत्रः स्यात्त्रयस्त्रिंशदक्षरः ॥ भार्गवो मुनिराख्यातश्छंदोनुष्टुब
दा   हृतं ॥ देवतादिवराहश्च मंत्रस्य कथितो बुधैः ॥ एकदंष्ट्राय हृदयं व्योमोल्काय शिरः स्मृतं ॥ शिखा तेजोधिपतये विश्वरूपाय वर्म्म च
॥ महादंष्ट्राय अस्त्रं स्यात्पंचांगमिति कल्पना ॥ यंत्रमस्य प्रपंचसारे ॥ अष्टपत्रमथ प   द्ममुल्लसत्कर्णिकं विधिवदावचर्यच ॥ मंडले रविसह
स्रसंनिभं सूकरयजनतंत्रसिद्धये ॥ अस्य पूजाप्रयोगः ॥ प्रातःकृत्यादि वैष्णवोक्तपीठमन्वंतं विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥ यथा ॥ शिरसि रम
भार्गवऋषये नमः ॥ मुखेऽनुष्टुप्छंदसे नमः ॥ हृदि आदिवराहाय देवतायै नमः ॥ ततः करांगन्यासौ ॥ एकदंष्ट्राय अंगुष्ठाभ्यां नमः ॥ व्योमोल्का

शैवेशाक्तेनदुष्यति।७

यतर्जनीभ्यांस्वाहा॥तेजोधिपतयेमध्यमाभ्यांवषट्॥विश्वरूपायअनामिकाभ्यांहुं॥महादंष्ट्रायकनिष्ठाभ्यांफट्॥एवंहृदयादिषु॥ततोध्यान
म्॥आघ्राद्यंजानुकेशाद्धरकनकनिभंनाभिदेशादधस्तान्मुक्ताभंकंठदेशात्तरुणरविनिभंमस्तकान्नीलभासं॥ईडेहस्तैर्दधानंरथचरणद
रौखड्गखेटौगदाख्यंशक्तिदानाभयेचक्षितिधरणलसद्दंष्ट्रमाद्यंवराहम्॥एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंकृत्वापंचपुष्पांजलिदानप
र्यंतंविधायावरणपूजामारभेत्॥यथा॥पूर्वादिदिक्षुएकदंष्ट्रायहृदयायनमः॥व्योमोल्कायशिरसेस्वाहा॥तेजोधिपतयेशिखायैवषट्॥विश्वरूपा
यकवचायहुं॥अग्न्यादिकोणेषुमहादंष्ट्रायअस्त्रायफट्॥तद्बहिःपत्रेषुॐचक्रायनमः॥शंखायनमः॥खड्गायनमः॥एवंखेटकाय॥गदायै॥शक्त
ये॥वराय॥अभयाय॥तद्बहिरिंद्रादीन् वज्रादींश्चसंपूज्यधूपादिविसर्जनांतंकर्मसमापयेत्॥अस्यपुरश्चरणंलक्षजपः॥तथाच॥
कमलैः लक्षमेकंजपेन्मंत्रंमधुराक्तैःसरोरुहैः॥जुहुयात्तद्दशांशेनपीठेविष्णुंप्रपूजयेत्॥विष्णुमंत्रंरात्रौनजपेत्॥तथाच॥नजपेद्वैष्णवंरात्रौशक्तिमं
त्रेणदुष्यतीतिवैशंपायनसंहितावचनात्॥इतिविष्णुमंत्रपूजापरिच्छेदः॥॥इतिविष्णुमंत्रैःपूजाःसमाप्ताः॥अथशिवमंत्राः॥उद्दिश्यपंकजवतीगिरिजा
तपांसियस्मात्पंकजरजोविबुधानमंति॥आशांबरंभुजगराजविभूषितांगंतंचंद्रमौलिममलंमनसास्मरामि॥१॥अथवश्यैमहेशस्यमंत्रा
न्सर्वसमृद्धिदान्॥यैःपूर्वमृषयःप्राप्ताःशिवसायुज्यमंजसा॥सांतंसघासंयुक्तोविंदुभूषितमस्तकः॥प्रासादाख्योमनुःप्रोक्तोभजतांकामदोमणिः॥अ
स्यपूजाप्रयोगः॥प्रातःकृत्यादिमातृकान्यासांतंप्राणायामंचकृत्वाश्रीकंठन्यासंमातृकास्थानेषुकुर्यात्॥यथा॥अंश्रीकंठपूर्णोदरीभ्यांनमः
॥एवंआंअनंतविजयाभ्यां॥इंसूक्ष्मशाल्मलीभ्यां॥ईंत्रिमूर्तिलोलाक्षीभ्यां॥उंअमरेश्वरवर्तुलाक्षीभ्यां॥ऊंअर्घीशदीर्घघोणाभ्यां॥ऋंभा
रभूतिसुदीर्घमुखीभ्यां॥ॠंअतिथीशगोमुखीभ्यां॥लृंस्थाणुकदीर्घजिह्वाभ्यां॥लॄंहरकुंडोदरीभ्यां॥एंझिंटीशऊर्ध्वमुखीभ्यां॥ऐंभौतिकेशवि

शैवशाक्तेनदुष्यति॥६

सांतमाकारसंयुक्तंविंदुभूषितमस्तकं॥४

कृतमुखीभ्यां॥ ओं सद्योजातज्वालामुखीभ्यां॥ औं अनुग्रहेश्वरोल्कामुखीभ्यां॥ अं अक्रूरसुश्रीमुखीभ्यां॥ अः महासेनविद्यामुखीभ्यां॥ कं क्रोधीशसर्वसिद्धिमहाकालीभ्यां॥ खं चंडेश्वरसर्वसिद्धिसरस्वतीभ्यां॥ गं पंचांतकगौरीभ्यां॥ घं शिवोत्तमत्रैलोक्यविद्याभ्यां॥ ङं एकरुद्रमंत्रशक्तिभ्यां॥ चं कूर्म्मात्मशक्तिभ्यां छं एकनेत्रभूतमातृभ्यां॥ जं चतुराननलंबोदरीभ्यां॥ झं अजेशद्राविणीभ्यां॥ ञं सर्वेशनागरीभ्यां॥ टं सोमेशखेचरीभ्यां॥ ठं लांगलीमंजरीभ्यां॥ डं दारुकरूपिणीभ्यां॥ ढं अर्धनारीश्वरवीरिणीभ्यां॥ णं उमाकांतकाकोदरीभ्यां· तं आषाढिपूतनाभ्यां॥ थं दंडिभद्रकालीभ्यां॥ दं अत्रियोगिनीभ्यां॥ धं मीनशंखिनीभ्यां॥ नं मेषगर्जिनीभ्यां॥ पं लोहितकालरात्रिभ्यां॥ फं शिखिकुब्जाभ्यां॥ बं छगलंडकपर्दिनीभ्यां॥ भं द्विरंडेशवज्रिणीभ्यां॥ मं महाकालजयाभ्यां॥ यं त्वगात्मबालिसुमुखेश्वरीभ्यां॥ रं असृगात्मने भुजंगेशरेवतीभ्यां॥ लं मांसात्मपिनाकीशमाधवीभ्यां॥ वं मेद आत्मखड्गीशवारुणीभ्यां॥ शं अस्थ्यात्मबकेशवायवीभ्यां॥ षं मज्जात्मश्वेतरक्षोविदारिणीभ्यां· सं शुक्रात्मभृग्वीशसहजाभ्यां॥ हं प्राणात्मने नकुलीशलक्ष्मीभ्यां॥ ळं जीवात्मशिवव्यापिनीभ्यां॥ क्षं क्रोधात्मसंवर्तकमायाभ्यां॥ साहितेद्विवचनबहुवचनहं हंसमासोवाइति न्यासदिविरोधेइदमेव वाक्यं॥ ततः सामान्यपद्धत्युक्तक्रमेण पीठन्यासं कृत्वा पीठशक्तीर्न्यसेत्॥ यथा॥ ॐ वामायै नमः॥ एवं ज्येष्ठायै· रौद्र्यै· काल्यै· कलविकरिण्यै· बलविकरिण्यै· बलप्रमथिन्यै· सर्वभूतदमन्यै· एता हृत्पद्मस्य पूर्वादिकेसरेषु विन्यस्य मध्ये च ॐ मनोन्मन्यै· तदुपरि ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनंताय योगपीठात्मने नमः॥ श्रीकंठोऽनंतसूक्ष्मौ च त्रिमूर्ति   रमरेश्वरः॥ अर्घीशो भारभूतिश्चातिथीशः स्थाणुको हरः॥ झिंटीशो भौतिकः सद्योजातश्चानुग्रहेश्वरः॥ अक्रूरश्च महासेनः षोडश स्वरमूर्तयः॥ ततः क्रोधीशचंडेशौ पंचांतकशिवोत्तमः॥ तथैकरुद्रकूर्मैकनेत्राख्यश्चतुराननः॥ अजेशः सर्वसोमेशस्तथा लांगलिदारुकौ॥ अर्धनारीश्वरश्चोमाकांतश्चाषाढिदंडिनौ॥ सुरद्भिमीनमेषाश्च लोहितश्च शिखी तथा॥ छगलंडद्विरंडेशौ समहाकालवालिनौ॥ भुजंगेशः पिनाकीशः खड्गीशश्च बकस्तथा॥ श्वेतो भृग्वीशनकुलिः शिवः संवर्तकस्तथा॥ एते रुद्राः समाख्याता धृतशूलकपा

लिकाः॥ पूर्णोदरी स्याद्विरजा शाल्मली तदनंतरं॥ लोलाक्षी वर्तुलाक्षी च दीर्घघोणा समीरिता॥ सुदीर्घमुखां गोमुख्यौ दीर्घजिह्वा तथैव च॥ कुंडोदर्यूर्ध्वमुखी च तथा विकृतमुख्यपि॥ ज्वालामुखी तथा ज्ञेया पश्चादुल्कामुखी स्मृता॥ सुश्रीमुखी चापि विद्यामुख्येताः सुरशक्तयः॥ महाकाली सरस्वत्यौ सर्वसिद्धिसमन्विते॥ गौरी त्रैलोक्यविद्या स्यान्मंत्रशक्तिस्ततः परं॥ आत्मशक्तिर्भूतमाता ततो लंबोदरी मता॥ द्राविणी नागरी भूयः खेचरी चापि मंजरी॥ रूपिणी वीरिणी पश्चात्काकोदर्यपि पूतना॥ स्याद्भद्रकाली योगिन्यौ शंखिनी गर्जिनी तथा॥ कालरात्रिश्च कुब्जिन्या कपर्दिन्यपि वज्रया॥ जया च सुमुखेश्वर्यौ रेवती माधवी ततः॥ वारुणी वायवी प्रोक्ता पश्चाद्रक्षोविदारिणी॥ ततश्च सहजा लक्ष्मी व्यापिनी मायया तथा॥ एता रुद्रांकपीठस्थाः सिंदूरारुणविग्रहाः॥ रक्तोत्पलकपालाभ्यामलंकृतकरांबुजाः॥ तथा च शारदायां॥ वामा ज्येष्ठा तथा रौद्री काली कलविकारिका॥ विकरिण्यभया प्रोक्ता बलाद्यैः विकरिण्यथ॥ बलप्रमथिनी पश्चात्सर्वभूतदमन्यथ॥ मनोन्मनीति संप्रोक्ता शैवपीठस्य शक्तयः॥ वामदेवो मुनिः छंदः पंक्तिर्देवः सदाशिवः॥ ईशानाद्यान्न्यसेन्मूर्तिरंगुष्ठादि ततः क्रमात्॥ ततः ऋष्यादिन्यासः॥ शिरसि वामदेवाय ऋषये नमः॥ मुखे पंक्तिछंदसे नमः॥ हृदि सदाशिवाय देवतायै नमः॥ ततः करांगन्यासौ॥ ह्रां अंगुष्ठाभ्यां नमः इत्यादि षट् दीर्घयुक्तेन न्यसेत्॥ ह्रां हृदयाय नमः॥ इत्यादि च॥ ततः ईशानाद्याः पंच मूर्तीन्न्यसेत्॥ यथा॥ अंगुष्ठयोः हों ईशानाय नमः॥ तर्जन्योः हें तत्पुरुषाय नमः॥ मध्यमयोः हुं अघोराय नमः॥ अनामिकयोः हिं वामदेवाय नमः॥ कनिष्ठयोः हं सद्योजाताय नमः॥ ततस्तदंगुलीभिः हौं ईशानाय नमः इत्यादिभिः शिरोवदनहृद्गुह्यपादेषु पंच मूर्तीन्न्यसेत्॥ ऊर्ध्वप्राग्दक्षिणोत्तरपश्चिमेषु मुखेषु तत्तदंगुलीभिः ततहौं जैस्ततन्मूर्तीन्न्यसेत्· शूद्धस्फरतावस्यर्थंतं न्यासं कृत्वा ध्यायेत्॥ अन्यत्र नाधिकारात्॥ तत ऊर्ध्वपूर्वदक्षिणपश्चिमोत्तरमुखेषु॥ ईशानस्य पंच कला ब्रह्मऋचः परादिकाः॥ प्रणवादिनमोंतेन

न्यसेत्॥तद्यथा॥ऊँईशानःसर्वविद्यानांशशिन्यैकलायैनमः॥ईश्वरःसर्वभूतानां ऊँअंगदायैकलायैनमः॥ब्रह्माधिपतिर्ब्रह्मणोधिपतिः॥ऊँब्रह्मेष्टदायैकलायैनमः॥ऊँशिवोंमेस्तु ऊँमरीच्यैकलायैनमः॥सदाशिवों अंशुमालिन्यैकलायैनमः॥ततःपूर्वपश्चिमदक्षिणोत्तरमुखेषुतत्पुरुषस्यचतस्रःकलान्यसेत्॥ऊँतत्पुरुषायविद्महेऊँशांत्यैकलायैनमः॥ततोमहादेवायधीमहि ऊँविद्यायैकलायैनमः॥तन्नोरुद्रःऊँप्रतिष्ठायैकलायैनमः॥प्रचोदयात् ऊँनिवृत्त्यैकलायैनमः॥ततोहृदयेग्रीवायांअंसद्वयेनाभौकुक्षौपृष्ठेवक्षसिअघोरस्याष्टकलान्यसेत्॥तद्यथा॥ऊँअघोरेभ्यःऊँउमायैकलायैनमः॥अथघोरेभ्यः मोहायैकलायैनमः॥घोरेभ्यःऊँक्षमायैकलायैनमः॥घोरतरेभ्यःनिद्रायैकलायैनमः॥सर्वतःसर्वऊँव्याधयेकलायैनमः॥सर्वेभ्यः॥ऊँमृत्यवेकलायैनमः॥नमस्तेस्तुऊँक्षुधायैकलायैनमः॥रुद्ररूपेभ्यःऊँतृष्णायैकलायैनमः॥ततोगुह्येमुखेगुल्फद्वयेऊरुद्वयेजानुद्वयेजंघाद्वयेस्फिक्द्वयेकुक्ष्योःपार्श्वयोःवामदेवस्यत्रयोदशकलान्यसेत्॥यथा॥ऊँवामदेवायनमः॥ऊँरजायैकलायैनमः॥ज्येष्ठायनमः॥ऊँरक्षायैकलायैनमः॥ऊँरुद्रायनमःऊँरत्यैकलायैनमः॥कालायनमःऊँकपालिन्यैकलायैनमः॥कलऊँकामायैकलायैनमः॥विकरणायऊँसंयमिन्यैकलायैनमः॥बलऊँक्रियायैकलायैनमः॥विकरणायनमःऊँवृद्ध्यैकलायैनमः॥बलायऊँस्थिरायैकलायैनमःबलप्रमथनायैनमःऊँरात्र्यैकलायैनमः॥सर्वभूतदमनायनमःऊँभ्रामिण्यैकलायैनमः॥मनःऊँमोहिन्यैकलायैनमः॥उन्मनायनमःऊँज्वरायैकलायैनमः॥ततःपार्श्वयोःस्तनयोर्नेत्रमूर्द्धिवाहुयुग्मेसद्योजातस्याष्टौकलान्यसेत्॥ऊँसद्योजातंप्रपद्यामिऊँसिद्ध्यैकलायैनमः॥सद्योजातायवैनमःऊँवृद्ध्यैकलायैनमः॥भवेऊँमत्यैकलायैनमः॥अभवेऊँलक्ष्म्यैकलायैनमः॥अनातिभवेऊँमेधायै कलायैनमःभवस्वमांऊँप्रज्ञायैकलायैनमः॥भवऊँप्रभायैकलायैनमः॥उद्भवायनम ऊँ सुधा [illegible] मः

दि ज

ततः पंचांगुलीषु ईशानाद्याः पंच ऋचो न्यसेत्॥ ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिप [illegible] शिवो [illegible] सदाशिवोम्॥१॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि॥ तन्नो रुद्रः प्रचोदयात्॥२॥ ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः॥ सर्वतः सर्वसर्वेभ्यो नमस्तेस्तु रुद्ररूपेभ्यः॥३॥ ॐ वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय मनोन्मनाय नमः॥४॥ ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः॥ भवे ऽभवे नातिभवे भवस्व मां भवोद्भवाय नमः॥५॥ एवं मूर्धास्यहृदयगुह्यपादेषु एता ऋचो न्यसेत्॥ ततोंऽगन्यासं कुर्य्यात्॰ ऐं ह्रौं ब्लुं स्त्रौं सः सर्वज्ञाय हृदयाय नमः॥ अमृते तेजोमालिनि नित्यतृप्ताय ब्रह्मशिरसे स्वाहा॥ ज्वलितशिखिशिखाय अनादिबोधाय शिखायै वषट्॥ वज्रिणे वज्रहस्ताय स्वतंत्राय कवचाय हुं॥ सौं स्त्रौं ह्रौं परतो लुप्तशक्तये नेत्रत्रयाय वौषट्॥ श्लीपशु हुं फट् अनंतशक्तये ऽस्त्राय फट्॰ एवं विन्यस्य ध्यायेद्यथा॰ मुक्तापीतपयोदमौक्तिकजवावर्णैर्मुखैः पंचभिस्त्र्यक्षैरंचितमीशमिंदुमुकुटं पूर्णेंदुकोटिप्रभं॥ शूलं टंककृपाणवज्रदहनान्नागेंद्रघंटांकुशान् पाशं भीतिहरं दधानममिताकल्पोज्ज्वलांगं भजे॥१॥ एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनं कृत्वा॥ अत्र शंखनिषेधः॥ सर्वत्रैव प्रशस्तोऽब्जः शिवसूर्य्यार्चनं विनेति॥ शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्य्यंतं विधायावरणपूजामारभेत्॥ यथा॥ ऐशान्यां ॐ ईशानाय नमः॥ पूर्वे ॐ तत्पुरुषाय नमः॥ दक्षिणे ॐ अघोराय नमः उत्तरे ॐ वामदेवाय नमः॥ पश्चिमे ॐ सद्योजाताय नमः॥ ईशानादिकोणेषु च॥ ॐ निवृत्त्यै नमः॥ एवं प्रतिष्ठायै नमः॥ विद्यायै॥ शान्त्यै नमः॥ ततोऽष्टपत्रेषु पूर्वादि॥ ॐ अनं

ह्रीं ॐ नमः शिवाय ह्रीं ४

नायनमः॥एवंसूक्ष्माय॥शिवोत्तमाय॥एकनेत्राय॥एकरुद्राय″त्रिमूर्तये॥श्रीकंठाय॥शिखंडिने॥तद्बाह्ये उत्तरादिक्रमेण॥ॐ उमायैनमः
एवंचंडेश्वराय″नंदिने″महाकालाय″गणेशाय″वृषाय″भृंगिरिटाय″स्कंदाय″प्रणवादिनमोंतेन पूजयेत्॥उत्तरादियजेत् पश्चात्तां ध्यायेन्मुकेंदु
शितपाटलान्॥तद्बाह्ये पूर्वोक्त क्रमेण इन्द्रादीन्वज्रादींश्च संपूज्य धूपादिविसर्जनांतं कर्म्मसमापयेत्॥अस्य पुरश्चरणं पंचलक्ष
जपः॥तथा च॥एवं ध्यात्वा जपेन्मंत्रं पंचलक्षं मधुप्लुतैः॥प्रसूनैः करवीरोत्थैर्जुहुयात्तद्दशांशतः॥अथ अष्टाक्षरीमंत्रः॥भुवनेशीनी प्रणवंन
मः शिवाय भुवनेशीपुनरष्टाक्षरो मनुः॥तथा च निबंधे॰ षडक्षरः शक्तिरुद्धः कथितोऽष्टाक्षरः परः॥अस्य पूजा॥प्रातःकृत्यादि पूर्वोक्तपी
ठन्यासांतं विधाय ऋष्यादिन्यासं कुर्यात्॥ यथा।शिरसि वामदेवाय ऋषये नमः मुखे पंक्तिछंदसे नमः॥हृदि उमापतये देवतायै नमः॥त
तः करांगन्यासौ॥ॐ अंगुष्ठाभ्यां नमः॥नं तर्जनीभ्यां स्वाहा॥मं मध्यमाभ्यां वषट्॥शिं अनामिकाभ्यां हुं॥वां कनिष्ठाभ्यां वौषट्॥यं करतल
करपृष्ठाभ्यां फट्॥ॐ हृदयाय नमः॥एवं हृदयादिषु॰ ततो ध्यानम्॥॰बंधूकाभं त्रिनेत्रं शशिशकलधरं स्मेरवक्त्रं वहंतं हस्तैः शूलं
कपालं वरदमभयदं चारुहारं नमामि॥वामोरूल्लंभ गायाः करतलविलसच्चारुरक्तोत्पलाया हस्तेनाश्लिष्टदेहं मणिमयविलसद्भूषणायाः
प्रियायाः॥एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनं कृत्वा ततः शैवोक्तपीठपूजां विधाय पुष्पांजलिदानपर्य्यंतं विधायावरणपूजामारभेत्
॥यथा॥केशरेषु अग्न्यादिकोणे मध्ये दिक्षु च॥ॐ हृदयाय नमः इत्यादिना पूजयेत्॥ततो मध्ये पूर्वादिदिक्षु॥ॐ हृल्लेखायै॥एवं गगनायै रक्ता
यै″करालिकायै॥महोच्छुष्मायै नमः॥ततः पत्रेषु पूर्वादि वृषभादीन् पूजयेत्· ॐ वृषभाय नमः॥एवं क्षेत्रपालाय॥दुर्गायै″कार्त्तिकेयाय″नंदिने″वि

ग्राय॥ शूलामाय॥ सेनापतये॥ ततः पूर्वपत्राग्रेषु उमादींश्च पूजयेत् तद्बाह्ये ब्राह्म्याद्या मातरः पूज्याः तद्बाह्ये इंद्रादीन् वज्रादींश्च पूजयेत् ततो धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं चतुर्दशलक्षजपः॥ तथा च॥ मनुलक्षं जपेन्मंत्रं तद्दशांशं यथाविधि॥ जुहुयान्मधुरासिक्तैरारग्वधसमिद्वरैः॥ आरग्वधः शोणालुः बहेडा इति॥ अथ द्वितीय अष्टाक्षरः॥ तारमाया प्रासादं नमः शिवाया ष्टाक्षरो मनुः॥ तथा च निबंधे॥ तारो मायावियत्सेंदुर्मनुस्वरसमन्वितः॥ पंचाक्षरसमायुक्तो वसुवर्णो मनुर्मतः॥ अस्य पूजाप्रयोगः॥ प्रातः कृत्यादि शिवोक्तपीठन्यासांतं विधाय पूर्वोक्तऋष्यादिन्यासं करांगन्यासौ कुर्यात्॰ ततो ध्यानम्॰ वंदे सिंदूरवर्णं मणिमुकुटलसच्चारुचंद्रावतंसं भालोद्यन्नेत्रमीशं स्मितमुखकमलं दिव्यभूषागणांगं॥ वामोरुन्यस्तपाणेररुणकुवलयं संदधत्याः प्रियाया वृत्तोत्तुंगस्तनाग्रे निहितकरतलं वेदटंकेष्टहस्तं॥ एवं ध्यात्वा मानसै[illegible]पूज्याऽर्घस्थापनादि पीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदान पर्य्यंतं विधायावरणपूजामारभेत्॥ पूर्ववदंगानि संपूज्य [illegible]पत्रेषु ऽनंतादीन्पत्राग्रेषु उमादीन्पूजयेत्॥ तद्बहिरिंद्रादीन्वज्रादींश्च संपूज्य धूपादिविसर्जनांतं कर्म समापयेत्॰ अस्य पुरश्चरणमष्टलक्षजपः॥ तथा च॰ अष्टलक्षं जपेन्मंत्री मंत्रं मंत्रविदांवरः॥ तत्सहस्रं प्रजुहुयात्पायसान्नैर्घृतप्लुतैः॥ अथ मृत्युंजयत्र्यक्षरो मंत्रः॥ तारः स्थिरासकर्णेंदुर्भृगुस्सर्गसमन्वितः॥ त्र्यक्षरात्मा निगदितो मंत्रो मृत्युंजयात्मकः॥ अस्यार्थः॥ स्थिरा जकारः कर्ण ऊकारः भृगुः सकारः तेन ॐ जूंसः॥ अस्य पूजा॥ प्रातः कृत्यादि शिवोक्तपीठन्यासांतं विधाय। ऋष्यादिन्यासं कुर्यात्॰॥ यथा॰ शिरसि कहोलऋषये नमः॥ मुखे देवीगायत्रीछंदसे नमः॥ हृदि मृत्युंजयाय देवतायै नमः॥ ततः करांगन्यासौ॥ यथा॥ सां अंगुष्ठाभ्यां नमः॥ सीं तर्जनीभ्यां स्वाहा

गुडूचीखंडैः॥६

इत्यादि॥एवंहृदयादिषु॥सांहृदयायनमइत्यादि॥तथाचनिबंधे॥भृगुणादीर्घयुक्तेनकुर्य्याद्दंगक्रियामनोः॥ततोध्यानम्॰ चंद्रार्काग्नि
विलोचनंस्मितमुखंपद्मद्वयांतःस्थितंमुद्रापाशमृगाक्षसूत्रविलसत्पाणिंहिमांशुप्रभम्॥कोटीरेंदुगलत्सुधाप्लुततनुंहारादिभूषोज्ज्व
लंकांत्याविश्वविमोहनंपशुपतिंमृत्युंजयंभावयेत्॥१॥एवंध्यात्वामानसैःसंपूज्यार्घस्थापनादिपीठपूजांतंविधायपुनर्ध्यात्वावाहना
दिपंचपुष्पांजलिदानपर्यंतंविधायावरणपूजामारभेत्॰यथा॰केसरेष्वग्न्यादिकोणेमध्येदिक्षुचसांहृदयाय नमइत्यादिनासंपूज्य
तद्बहिरिंद्रादीन्वज्रादींश्चसंपूज्य धूपादिविसर्जनांतंकर्मसमापयेत्॥अस्यपुरश्चरणंलक्षत्रयजपः॥तथाच॥गुणलक्षंजपेन्मंत्रंनरःशांतो
विशालधीः॥जुहुयादमृताखंडैःशुद्धदुग्धाज्यलोडितैः॥अथदक्षिणामूर्तिमंत्राः॥प्रणवोहृदयंपश्चात्ततोभगवतेपदं॥ङें॰तंचदक्षिणामूर्तिमह्यं
मेधासुदीरयेत्॥प्रयच्छठद्वयांतोयंद्वाविंशत्यक्षरोमनुः॥अस्यपूजाप्रयोगः॥प्रातःकृत्यादिशैवोक्तपीठन्यासंविधायऋष्यादिन्यासंकुर्य्यात्॰
यथा॥शिरसिचतुर्मुखऋषयेनमः॥मुखेगायत्रीछंदसेनमः॥हृदिदक्षिणामूर्तयेदेवतायैनमः॥ततःकरांगन्यासौ॥ॐआंॐअंगुष्ठा
भ्यांनमः॥ॐईंॐतर्जनीभ्यांस्वाहा॥ॐऊंओंमध्यमाभ्यांवषट्॥ॐऐंॐअनामिकाभ्यांहुं॥ॐऔंॐकनिष्ठाभ्यांवौषट्॥ॐअःॐकर
तलकरपृष्ठाभ्यांफट्॥एवंहृदयादिषु॥तथाचनिबंधे॰तारुरुद्धैःस्वरैर्दीर्घैःषड्भिरंगानिकल्पयेत्॥अथवामंत्रसंभूतैःपदैर्वाकल्पयेत्क्रमात्॥
ततोध्यानम्॥वटवृक्षमहोद्यानपद्मरागफलोज्ज्वलं॥गारुत्मतमयैःपत्रैर्विचित्रैरुपशोभितं॥नवरत्नमहाकल्पैर्लंबमानैरलंकृतं॥ [illegible] राम
द्रुमूलस्थंचिंतयेल्लोकनायकं॥स्फटिकरजतवर्णंमौक्तिकीमक्षमालाममृतकलशविद्याज्ञानमुद्रांकरस्त्वे [illegible] कार्त्तिकेयाम् [illegible] दिने [illegible]
॥ॐनमोभगवतेदक्षिणामूर्तयेमह्यंमेधाप्रयच्छस्वाहा॥६॥ [illegible] मः॥

नविविधभूषं दक्षिणामूर्तिमीडे ॥१॥ एवं ध्यात्वा मानसैः संपूज्यार्घस्थापनादि शैवोक्तपीठप [illegible]
लिदानपर्यंतं विधायावरणपूजामारभेत् ॥ यथा॰ केसरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च ॥ ॐ आं ॐ हृदयाय नमः इत्यादि [illegible] ततः
पत्रेषु पूर्वादि ॐ सरस्वत्यै नमः ॥ एवं ब्रह्मणे ॥ सनकाय नमः ॥ सनंदाय ॥ सनातनाय ॥ शुकाय ॥ व्यासाय ॥ गणेश्वराय ॥ तद्बहिः पूर्वा
दिसिद्धाय ॥ गंधर्वाय ॥ योगींद्राय ॥ विद्याधराय ॥ तद्बहिरिंद्रादीन्वज्रादींश्च संपूज्य धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं लक्षजपः
तथा च ॥ लक्षमात्रं जपेन्मंत्रं ब्रह्मचारिव्रते स्थितः ॥ जुहुयात्सघृतैः पद्मैर्दशांशं संस्कृतेनले ॥ अथ शैवचिंतामणिमंत्रः ॥ ॥ अग्निः संवर्त
रा कादित्यश्चानिलो षष्ठबिंदुमत् ॥ चिंतामणिरिति ख्यातं बीजं सर्वसमृद्धिदम् ॥ अग्नी रेफः संवर्तकः क्षकारः आदित्यो मकारः रस्वरूप
अनिलो यकारः औस्वरूप षष्ठस्वरः ऊकारः बिंदुः अनुस्वारः एतद्युक्तम् क्ष्म्र्यौं ॥ अस्य पूजाप्रयोगः ॥ प्रातः कृत्यादि शैवोक्तपीठमन्त्व
तं विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥ यथा॰ ॥ शिरसि कश्यपऋषये नमः ॥ मुखे अनुष्टुप्छंदसे नमः ॥ हृदि अर्द्धनारीश्वराय देवतायै नमः
॥ ततः करांगन्यासौ ॥ रं अंगुष्ठाभ्यां नमः ॥ क्षं तर्जनीभ्यां स्वाहा ॥ मं मध्यमाभ्यां वषट् ॥ यं अनामिकाभ्यां हुं ॥ औं कनिष्ठाभ्यां वौषट् ॥ ऊं करतल
करपृष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ रं हृदयाय नमः इत्यादि॰ तथा च निबंधे॰ रेफादिव्यंजनैः षड्भिः कुर्यादंगानि षट् क्रमात् ॥ ततो ध्यानं॰
नीलप्रवालरुचिरं विलसत्त्रिनेत्रं पाशारुणोत्पलकपालकशूलहस्तं ॥ अर्द्धांबिकेशमनिशं प्रविभक्तभूषं बालेंदुबद्धमुकुटं प्रणमामि रूपं ॥१॥
एवं ध्यात्वा मानसैः संपूज्यार्घस्थापनादिकं कुर्यात् ॥ ततः शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधा
यावरणपूजामारभेत् ॥ यथा ॥ केसरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च रं हृदयाय नम इत्यादिना पूजयेत् ॥ ततः पत्रेषु पूर्ववत् वृषभादीन्पत्राग्रेषु

पार्श्वो वन्हिसमारूढस्ता ॥ २

पूर्वादि ब्राह्मीं महेश्वरीं कौमारीं वैष्णवीं वाराहीं इंद्राणीं चामुंडां महालक्ष्मीं च पूजयेत् ॥ तद्बहिरिंद्रादीन्वज्रादींश्च पूजयेत् ॥ ततो धूपादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं लक्षजपः ॥ तथा च ॥ लक्षमेकं जपेद्बीजमित्थं मंत्री विचिंतयन् ॥ अयुतं मधुरासिक्तैर्जुहुयात्तिलतंदुलैः ॥ अथ नीलकंठमंत्रः ॥ लोहितोऽग्न्यासनताँरवान् आद्यमीरितं ॥ धांतो वह्निसमारूढस्तूर्यस्वरसमन्वितः ॥ बिंदुमांस्तु द्वितीयं स्यात् ठांतः सर्गान्तृतीयकं ॥ लोहितोपकारः ऽग्नी रेफो रकारः तारवान् धांतो नकारः वह्निसंयुक्तः तुर्यस्वर उदाहृतः ईकारः टांतः ठकारः तेन प्रोंन्नीं ठः ॥ नीलकंठात्मकः प्रोक्तो विषमैर्ज्वरैर्हरः परः ॥ अस्य पूजा ॥ प्रातः कृत्यादि शैवोक्तपीठन्यासांतं विधाय ऋष्यादिन्यासं कुर्यात् ॥ यथा ॥ शिरसि अरुण ऋषये नमः ॥ मुखे नुष्टुप् छंदसे नमः ॥ हृदि नीलकंठाय देवताये नमः ॥ ततः करांगन्यासौ ॥ हरहर स्वाहा अंगुष्ठाभ्यां नमः ॥ कपर्दिने स्वाहा तर्जनीभ्यां स्वाहा ॥ नीलकंठाय स्वाहा मध्यमाभ्यां वषट् ॥ कालकूटविषभक्षणाय हुं फट् अनामिकाभ्यां हुं ॥ नीलकंठिने स्वाहा कनिष्ठाभ्यां फट् ॥ एवं हृदयादिषु तथा च निबंधे ॰ हरद्वयं वन्हिजायाहृदयं परिकीर्तितं ॥ कपर्दिने च युगलं शिरोमंत्र उदाहृतः ॥ नीलकंठाय ठद्वंद्वं शिखामंत्रोयमीरितः ॥ कालकूटपदस्यांते विषभक्षणङे-युतं ॥ हुं फट् कवचमादिष्टं विद्वद्भिर्नीलकंठिने ॥ स्वाहांतं मंत्रमेतानि पंचांगानि मनोर्विदुः ॥ ततो मंत्रन्यासः ॥ शिरसि प्रों नमः ॥ कंठे न्नीं नमः ॥ हृदि ठः नमः ॥ मूर्द्धि कंठे हृदंभोजे क्रमाद्बीजत्रयं न्यसेत् ॥ ततः समाहितो भूत्वा नीलकंठं विचिंतयेत् ॥ ततो ध्यानं ॥ बालार्कायुततेजसं धृतजटाजूटेंदुखंडोज्ज्वलं नागेंद्रैः कृतशेखरं जपवटीं शूलं कपालं करैः ॥ खट्वांगं दधतं त्रिनेत्रविलसत् पंचाननं सुंदरं व्याघ्रत्वक्परिधानमब्जनिलयं श्रीनीलकंठं भजे ॥ १ ॥ एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनं कृत्वा शैवोक्तपीठपूजांतं विधाय पुनर्ध्या

हृय

त्वावाहनादि पंचपुष्पांजलिदानपर्य्यंतं विधायावरणपूजामारभेत्॥ यथा॥ केसरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च हर हर स्वाहा हृदयाय नम इत्यादिना पूजयेत्॥ तद्बहिरिन्द्रादीन्वज्रादींश्च संपूज्य धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं लक्षत्रयजपः॥ तथा च॥ लक्षत्रयं जपेन्मंत्रं तद्दशांशं ससर्पिषा॥ हविषा जुहुयात्सम्यक्संस्कृते हव्यवाहने॥ अथ नीलकंठाष्टाक्षरः॥ प्रणवो हृन्नीलकंठायाष्टाक्षरः॥ कल्पे॰ तारो हृन्नीलकंठायमंत्रश्चाष्टाक्षरः परः॥ ॐ नमो नीलकंठाय॥ अस्य पूजादिकं सर्वं पूर्ववत्॥ विशेषस्तु॥ ब्रह्मा ऋषिर्गायत्री छंदः नीलकंठोस्य देवता॥ अथ शिवपंचाक्षरी॰ हृदयं च परं स्तात्क्षिलांतोऽनंतान्वितो मरुत्॥ पंचाक्षरो मनुः प्रोक्तस्ताराद्योयं षडक्षरः॥ ॐ नमः शिवाय॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि शैवोक्तपीठमन्वंतं विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ यथा॥ शिरसि वामदेवाय ऋषये नमः॥ मुखे पंक्तिश्छंदसे नमः॥ हृदि ईशानाय देवतायै नमः॥ ततो मूर्तिपंजरन्यासः॥ यथा॰ तर्ज्जन्योः नं तत्पुरुषाय नमः॥ मध्यमयोः मं अघोराय नमः॥ कनिष्ठयोः शिं सद्योजाताय नमः॥ अनामिकयोः वां वामदेवाय नमः॥ अंगुष्ठयोः यं ईशानाय नमः॥ तथा च निबंधे॰ मंत्रवर्णादिकन्न्यसेत् पंचमूर्तीर्यथाक्रमं॥ तर्जनीमध्ययोरंत्यानामिकांगुष्ठके पुनः॥ एवं वक्त्रे हृदये पादे गुह्ये मूर्ध्नि न्यसेत्॥ एवं प्राग्याम्योदीच्यवरुणमध्यमवक्त्रेषु तान्न्यसेत्॥ ततः करांगन्यासौ॥ ॐ अंगुष्ठाभ्यां नमः॥ नं तर्जनीभ्यां स्वाहा इत्यादि॥ एवं हृदयादिषु॥ तथा च निबंधे॰ षड्भिर्वर्णैः षडंगानि कुर्य्यान्मंत्रस्य देशिकः॥ ततो गोलकन्यासः॥ हृदि ॐ नमः॥ वक्त्रे नं नमः॥ अंसयोः मं नमः शिं नमः॥ ऊर्वोर्वां नमः यं नमः॥ एवं कंठनाभौपार्श्वहृद्ये पृष्ठे हृदि॥ एवं मूर्ध्नि वदने नेत्रयोः नसोः॥ एवं करतलपत्संधिषु साग्रेषु॥ एवं शिरो वदन हृत् कुक्षि ऊरु पादद्वये॥ एवं हृदि वक्त्रोटंकरसै

हि

बीजं॥२

भपवरेषु॥ एवं वक्त्रांस हृत्पदोरुजठरेषु च॥ एवं मूर्ध्निभालोदरास्य हृदयेषु ताः पूर्ववत् पंचमूर्तीर्न्यसेत्॥ अनेन व्यापकं कुर्यात्॥ नमो॰
स्तु स्थाणुभूताय ज्योतिर्लिंगाऽमृतात्मने॥ चतुर्मूर्तिवपुश्छायाभासितांगाय शंभवे॥ ततो ध्यानं॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचं
द्रावतंसं रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं॥ पद्मासीनं समंतात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववंद्यं निखिलभ
यहरं पंचवक्त्रं त्रिनेत्रं॥१॥ एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनं कृत्वा शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानप
र्यंतं विधायावरणपूजां कुर्यात्॥ यथा॥ कर्णिकायां पूर्ववदीशानादिपंचमूर्तीः संपूज्य कोणेषु निवृत्यादिकलाः पूर्ववत्संपूज्य अग्न्यादिको
णेषु मध्ये दिक्षु च षडंगानि पूजयेत्॥ ॐ हृदयाय नमः॥ नं शिरसे स्वाहा॥ मं शिखायै वषट्॥ शिं कवचाय हुं॥ वां नेत्र॰॥ यं अ॰॥ ततः पूर्ववदनंता॰
दीन् पूजयेत्॥ ततः उत्तरादिक्रमेण उमादीन्पूजयेत्॥ तद्बाह्ये इंद्रादीन्वज्रादींश्च पूजयेत्॥ ततो धूपादि विसर्जनांतं कर्म समापये
त्॥ अस्य पुरश्चरणं षट्त्रिंशल्लक्षजपः॥ पायसैराज्यसंमिश्रैः षट्त्रिंशत्सहस्रहोमः॥ तथा च॥ तत्वलक्षं जपेन्मंत्रं दीक्षितः शैववर्त्मना तावत्संख्या
सहस्राणि जुहुयात्पायसैः शुभैः॥ अत्र तत्वशब्देन षट्त्रिंशत्तत्वं महेशस्येति श्रुतेः॥ तत्वमुच्यते अंतरंगत्वात्॥ मंत्रांतरं॥ अर्घीशो वन्हि
शिखो लांतस्योदांत ईरितः॥ फडंतश्चंडमंत्रोयं त्रिवर्णात्मा समीरितः॥ अपरः॥ कूर्मो विष्णुयुतो दंडी बीजमस्योच्यते बुधैः॥ वदेच्चंडे
श्वरायेति बीजादिहृदयांतकं॥ अर्चनादिष्विमं मंत्रं यथावत्संप्रयोजयेत्॥ अस्य पूजा॥ प्रातः कृत्यादि शैवोक्तपीठन्यासांतं कर्म समाप्य
ऋष्यादिन्यासं कुर्यात्॥ शिरसि त्रित ऋषये नमः॥ मुखे ऽनुष्टुप्छंदसे नमः॥ हृदि चंडेशाय देवतायै नमः॥ ततः करांगन्यासौ॥ दीप्त रम॰
फट् अंगुष्ठाभ्यां नमः॥ ज्वल फट् तर्जनीभ्यां स्वाहा॥ ज्वालिनि फट् मध्यमाभ्यां वषट्॥ फट् फट् अनामिकाभ्यां हुं॥ हन फट् कनिष्ठिकाभ्यां

वौषट्॥ सर्वज्वालिनि फट् करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ निबंधे॥ अस्य त्रिनेत्रो मुनिः प्रोक्तश्छंदोनुष्टुबुदाहृतं॥ चंडेशो देवतेत्यादि
प्रपंचसारे॥ दीप्तज्वलज्ज्वालिनीति ज्ञेयेन च हनेन च॥ सर्वज्वालिनि संयुक्तैः फडंतै रंगमाहरेत्॥ ततो ध्यानं॥ चंडेश्वरं रक्ततनुं त्रिनेत्रं रक्तांशुकाढ्यं
हृदि भावयामि॥ टंकं त्रिशूलं स्फटिकाक्षमालां कमंडलुं बिभ्रतमिंदुचूडं॥ एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कुर्यात्॥ ततः शैवोक्तपीठ
पूजां विधाय [illegible]मिति बीजेन मूर्तिं संकल्प्य पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ अंगैः प्रथमावरणं
॥ मातृभिर्द्वितीयं॥ इंद्रादिभिस्तृतीयं॥ वज्रादिभिश्चतुर्थं॥ ततो धूपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं त्रिलक्षजपः॥ तथा च॥ व
र्णलक्षं जपेन्मंत्रं होमं कुर्याद्दशांशतः॥ मधुरत्रयसंयुक्तैः संशुद्धैस्तिलतंडुलैः॥ इति शिवमंत्रपरिच्छेदः॥ अथ क्षेत्रपालमंत्रः॥ मंत्रदेवप्रकाशिकायां॥ स
च क्षौमिति बीजादि क्षेत्रपालाय नमोंतः प्रणवादिर्वायं मंत्रः॥ तथा च॥ वर्णोन्त्यमो बिंदुयुक्तं क्षेत्रपालाय हृन्मनुः॥ नारदो वसुवर्णोयं क्षेत्रपाल
स्य ईरितः॥ अस्य पूजा॥ प्रातः कृत्यादि प्राणायामांतं विधाय धर्मादिकल्पितपीठं विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ अस्य ब्रह्मा ऋषिः॥ गायत्री छंदः
॥ क्षेत्रपालो देवता॥ क्षौमिति बीजं॥ आयेति शक्तिः॥ षड्दीर्घयुक्तबीजेनांगन्यासः॥ ततो ध्यानं॥ भ्राजच्चंद्रजटाधरं त्रिनयनं नीलाद्रितुल्यप्रभं दोर्दंडा
डगदाकपालमरुणस्रग्वस्त्रगंधोज्वलं॥ घंटामेखलघर्घरध्वनिमिलज्झंकारभीमं विभुं वंदे संहितसर्पकुंडलधरं श्रीक्षेत्रपालं सदा॥ एवं ध्यात्वा
मानसैः संपूज्यार्घ्यस्थापनं कुर्यात्॥ ततो धर्मादिकल्पितपीठपूजां कृत्वा पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभे
त्॥ अंगैः प्रथमावरणं॥ अनलाख्याग्निकेशकरालघंटारवमहाकोपपिशितांशनपिंगलाक्षऊर्ध्वकेशैरष्टभिः द्वितीयं इंद्रादिभिस्तृतीयं वज्रा
दिभिश्चतुर्थं॥ अस्य पुरश्चरणं लक्षजपः आज्येन चरुणा दशांशहोमः॥ तथा च शारदायां॥ लक्षमेकं जपेन्मंत्रं जुहुयात्तद्दशांशतः॥ चरुणा

तस्मिन्केनततः क्षेत्रेशमर्चयेत्॥ मंत्रदेवप्रकाशिकायांतु॰ प्रणवरहितोयोमंत्रस्तस्यपुरश्चरणमयुतजपः॥ अस्यबलिविधिः॥ रात्रौगृहांगणे
स्थंडिलेकृत्वातत्रदेवंसपरिवारंसंपूज्य देवस्यकपालेबलिमंत्रेण त्रिवारंबलिंदत्वासपरिवारेभ्यः स्वस्वनामभिर्बलिंदद्यात्॥ बलिमंत्रस्तु
॥ एह्येहिविदुषिसुरु२ भंजय२ तर्जय२ विघ्न२ महाभैरवक्षेत्रपालबलिंगृह्ण२ स्वाहा॥ तथाच॥ पूर्वमेहिद्वयंपश्चाद्विदुषिस्यात्सुरुद्वयं
भंजयद्वितयंभूयस्तर्जयद्वितयंपुनः॥ ततोविघ्नपदद्वंद्वंमहाभैरवततःपरं॥ क्षेत्रपालबलिंगृह्णद्वयंपावकसुंदरी॥ यद्वा॥ एह्येहितुरु२ मुरु
२ जंभ२ हन२ विघ्नविनाशय२ महाबलिंक्षेत्रपालगृह्ण२ स्वाहा॥ इतिबलिमपिसोदंशद्विहस्तपिंडेनदद्यात्॥ फलंतु॥ बलिदानेनसंतुष्टः
क्षेत्रपालः प्रयच्छति॥ कांतिमेधाबलारोग्यं तेजःपुष्टियशःश्रियः॥ अथबटुकमंत्रः॥ निबंधे॰ ॥ उद्धरेद्वटुकंङेंतमापदुद्धारणंतथा॥ कुरु
द्वयंपुनर्ङेंतंबटुकांतंसमुद्धरेत्॥ ह्रींबटुकायआपदुद्धारकायकुरुकुरुबटुकायह्रीं॥ एकविंशत्यक्षरात्माशक्तिरुद्धोमहामनुः॥ अस्य
पूजाप्रयोगः॥ प्रातःकृत्यादिप्राणायामांतंविधायपीठन्यासंकुर्यात्॥ यथा॥ धर्म्माद्यनैश्वर्यांतंदेहेविन्यस्यऋष्यादिन्यासंकुर्यात्॥ यथा
॥ शिरसिबृहदारण्यकऋषयेनमः॥ मुखेगायत्रीछंदसेनमः॥ हृदिबटुकभैरवायदेवतायैनमः॥ ततोमूर्तिन्यासः॥ ह्रौंवौंईशानायनमों
गुष्ठयोः॥ ह्रैंवैंतत्पुरुषायनमस्तर्जन्योः॥ ह्रुंवुंअघोरायनमोमध्यमयोः॥ ह्रींविंवामदेवायनमोनामिकयोः॥ ह्रंवंसद्योजातायनमोक
निष्ठयोः॥ पुनस्तदंगुलिभिः शिरोवदनहृद्गुह्यपादेषुतत्तद्बीजादिकास्तत्तन्मूर्तीर्न्यसेत्॥ तथा॥ ऊर्द्धप्रागदक्षिणोदीच्यपश्चिमेषुमुखेषुच
तान्न्यसेत्॥ तथाचनिबंधे॰॥ अंगुलीदेहवक्त्रेषुमूर्तीर्न्यसेद्यथापुरा॥ सद्यादिपंचह्रस्वाढ्यशक्तिबीजपुरःसरं॥ वकारंपंचह्रस्वाद्यमीशाना
दिषुयोजयेत्॥ ततःकरांगन्यासौ॥ यथा॥ ह्रांवांअंगुष्ठाभ्यांनमः॥ ॐह्रांवांहृदयायनमइत्यादिचषड्दीर्घयुक्तम्॥ तथाचनिबंधे॰ षड्दीर्घ

भाजयाशक्त्यावकारेणचतत्वहृत्॥अंगानिजातानियुक्तानिप्रणवाद्यानिकल्पयेत्॥ततोध्यानंत्रिधाप्रोक्तंसात्त्विकादिप्रभेदतः॥सात्त्विकं यथा॥वंदेबालंस्फटिकसदृशंकुंतलोल्लासिवक्त्रंदिव्याकल्पैर्नवमणिमयैःकिंकिणीनूपुराद्यैः॥दीप्ताकारंविशदवसनंसुप्रसन्नंत्रिनेत्रंहस्ताब्जाभ्यांबटुकमनिशंशूलदंडौदधानं॥राजसंयथा॥उद्यद्भास्करसन्निभंत्रिनयनंरक्तांगरागस्रजंस्मेरास्यंवरदंक पालमभयंशूलंदधानंकरैः॥नीलग्रीवमुदारकौस्तुभधरंशीतांशुचूडोज्ज्वलम् बंधूकारुणवाससंभयहरंदेवंसदाभावयेत्॥तामसंयथा॰ध्यायेन्निलाद्रिकांतंशशिशकलधरंमुंडमालंमहेशंदिग्वस्त्रंपिंगकेशंडमरुमथसृणिंखड्गशूलाभयानि॥नागंघंटांकपालंकरसरसिरुहैर्बिभ्रतंभीमदंष्ट्रंसर्प्पाकल्पंत्रिनेत्रंमणिमयविल सत्किंकिणीनूपुराढ्यं॥सात्त्विकंध्यानमाख्यातमपमृत्युविनाशनं॥आयुरारोग्यजननमपवर्गफलप्रदं॥राजसंध्यानमाख्यातंसर्वकामार्थसिद्धिदं॥तामसंशत्रुशमनंकृत्याभूतगदापहं॥एवंध्यात्वामानसैःसंपूज्यअर्घ्यस्थापनंकृत्वा॥अस्यपूजायंत्र॥धर्माधर्मादिभिःक्लृप्तपीठेपंकजशोभिते॥षट्कोणांतस्त्रिकोणस्थेव्योमपंकजशोभिते॥ततोमूलेनमूर्तिंसंकल्प्यपूर्ववद्ध्यात्वावाहनादिकंकुर्यात्॥ततःक्रमः॥मूलादिसद्योजातमंत्रेणावाहनं॥मूलादिवामदेवेनस्थापनं॥मूलेनसान्निध्यं॥अघोरेणसन्निरोधनं॥तत्पुरुषेणयोनिमुद्राप्रदर्शनं॥ईशानेनवंदनमितिविशेषःततआसनादिपुष्पोपचारांतानुपचारानुपचर्यततःकर्णिकायांचतुर्दिक्षुकोणेष्वीशानादीन्पूजयेत्॥प्रथमावरणं॥ततोव्योमपंकजदलेषु असितांगादीन् भैरवान्पूजयेत्॥यथा॥असितांगोरुरुश्चंडक्रोधउन्मत्तभैरवः॥कपालीभीषणश्चैवसंहारश्चाष्टभैरवाः॥एतैरष्टभैरवैर्द्वितीयावरणं॥ततःषट्कोणेषुपूर्वादि ह्रांबांहृदयायनमः इत्यादिनाषडंगानिपूजयेत्॥ततःपूर्वादिडाकिनीराकिनीलाकिनीकाकिनीशाकिनीहाकिनीमालिनीदेविपुत्रानष्टदिक्षुयजेत्॥डाकिन्यादिभिस्तृतीयावरणं॥उमापुत्रान्रुद्रपुत्रान्मातृ

पुत्रान्दक्षिणतोयजेत्॥ऊर्द्ध्वे ऊर्द्ध्वमुखीपुत्रान् अधोअधोमुखीपुत्रान्यजेत्॥एवंत्रयोदशपुत्रैश्चतुर्थावरणं॥ तद्बहिरष्टपत्रेषुले
केशान्बटुकरूपान्पूजयेत्॥तद्बहिः पूर्वेब्राह्मीपुत्रायनमः।ईशानेऊँमाहेश्वरीपुत्रायनमः।उत्तरेवैष्णवीपुत्रायनमः॥अनिलेकौमारी
पुत्रायनमः।पश्चिमेइन्द्राणीपुत्रायनमः।नैर्ऋतेमहालक्ष्मीपुत्रायनमः।याम्येवाराहीपुत्रायनमः।वायवेचामुंडापुत्रायनमः इति
ब्राह्म्याद्यष्टमातृपुत्रैःपंचमावरणं॥तथाचनिबंधे॥ब्रह्माणीपुत्रकंपूर्वेमाहेशीपुत्रमीश्वरे॥वैष्णवीपुत्रकंसौम्येकौमारीपुत्रमानिले॥
तद्बहिः॥इन्द्राणीपुत्रकंभूयःपश्चिमेपूजयेत्ततः॥महालक्ष्मीसुतंपश्चाद्रक्षोदिशिसमर्चयेत्॥वाराहीपुत्रकंयाम्येचामुंडापुत्रमानिले॥
तद्बहिर्दशदिक्षुहेतुकंत्रिपुरांतकंवेतालंवह्निजिह्वंकालांतकंकरालकंएकपादंभीमरूपंअचलंहाटकेश्वरान्पूजयेत्॥ततोयो
गिनी—सहितदिव्ययोगीशायनमः॥एवंयोगिनीसहितांतरिक्षयोगिनीशायनमः॥एवंयोगिनीसहितभूमिष्ठयोगिनीशायनमः
इति॥ईशानाग्निनैर्ऋतेषुपूजयेत्॥अस्यपुरश्चरणमेकं विंशतिलक्षजपः॥तथाच॰वर्णलक्षंजपेन्मंत्रंहविष्याशीजितेंद्रियः॥
तद्दशांशंप्रजुहुयात्तिलैर्मधुरसंयुतैः॥अथबलिदानं॰ पूर्वेविघ्नंदुर्गांसमाराध्यबलिंदद्यात्॥शाल्यन्नंपललंसर्पिर्लाजाचूर्णा
निशर्करा॥गुडमिश्रसुरासापूपैर्मध्वक्तैःपरिमिश्रितैः॥कृत्वाकवलमाधारेवैप्रागुक्तवर्त्मना॥रक्तचंदनपुष्पाद्यैर्निशितस्मैबलिंहरे
त्॥यथा॥अन्यूनांगमजंहत्वाराजसंप्रागुदीरितं॥बलिप्रदानसमयेरिपूणांसर्वसैन्यकं ॥निवेदयेद्बलिंत्वेनबटुकायविशिष्टधीः॥
विदर्भयेच्छत्रुनाम्नाबलिमंत्रंतदासुधीः॥ शत्रुपक्षस्यपिशितंरुधिरंचदिनेदिने॥भक्षयस्वगणैःसार्द्धंसारमेयसमन्वितं॥ ॥ब
लिमंत्रोयमाख्यातःसर्वेषांविजयप्रदः॥अनेनबलिनाहृष्टोबटुकःपरसैन्यकं॥सर्वगणेभ्योविभजेदामिषंकुकुमानानःस्वं॰हंतेप

रवलक्ष्मीयंते नात्र संशयः॥ मुद्गपायसादिना माभस्येतु क्षेत्रपालबलिविधानं सपरिवारबटुकेतरसंबोधनपूर्वकं रात्रौ बलिविसर्जनं तु॥ स्त्रमीष्टफलप्रदं॥ इति वटुकमंत्रः॥ अथ त्रिपुरामंत्राः॥ यत्पादपंकजरजो मरहंदवंद्यं यद्योगतः परशिवः परमेश्वरोभूत्॥ या सृष्टिपालनलयं तनुते त्रिमूर्त्ता साशांभवी विजयते जगदेकमाता· शारदायां अज्ञानतिमिरध्वंसि संसारार्णवतारकं॥ आनंदवीजमवतादतकैत्रैपुरमहः॥ अथ वक्ष्ये महाविद्यां त्रिपुरामतिगोपितां॥ यां ज्ञात्वा सिद्धिसंघानामधिपो जायते नरः॥ तत्र त्रिपुरायास्त्रैविध्यं बाला भैरवी सुंदरी भेदेन॥ तथा च ज्ञानार्णवे॥ त्रिविधा त्रिपुरा देवी ति शिवोक्तिः॥ तत्र शारदायां॥ वियद्भृगुर्हुताशस्थो भौतिको बिंदुशेखरः॥ वियत्तदादिकं ह्यग्निस्थितं वामाक्षिबिंदुमत्॥ आकाशभृगुवह्निस्थो मनुः सर्गेन्दुखंडवान्॰ पंचकूटात्मिका विद्या वेद्या त्रिपुरभैरवी॥ प्रथमं वाग्भवं कूटं द्वितीयं कामराजकं॥ तृतीयं शक्तिकूटाख्यं त्रिभिर्बीजैरुदाहृतं॥ अस्यार्थः॥ शिवः हकारः चंद्रः सकारः। वह्निर्वाग्भवे रेकारः॥ शिव चंद्र काम पृथिवी वह्नि चतुर्थस्वरबिन्दुमान्॥ शिव चंद्र रेफयुक्त चतुर्दशस्वरबिंदुविसर्गाः॥ अस्य पूजा॥ प्रातः कृत्यादिप्राणायामांतं विधाय पीठन्यासं कुर्यात्॥ पूर्वोक्तक्रमेण धारशक्त्यादि ह्रीं ज्ञानात्मने नमः इत्यंतं विन्यस्य हृत्पद्मस्य पूर्वादिकेसरेषु ॐ इच्छायै नमः॥ एवं ज्ञानायै॥ क्रियायै॥ कामिन्यै॥ कामदायिन्यै॥ रत्यै॥ रतिप्रियायै॥ आनंदायै॥ मध्ये मनोन्मन्यै॥ तदुपरि ऐं परायै॥ अपरायै॥ परापरायै॥ हसौः सदाशिवमहाप्रेतपद्मासनाय नमः॥ इति विन्यस्य ऋष्यादिन्यासं कुर्य्यात्॥ यथा॥ शिरसि दक्षिणामूर्तये ऋषये नमः॥ मुखे पंक्तिछंदसे नमः॥ हृदि महात्रिपुरभैरव्यै देवतायै नमः॥ गुह्ये वाग्भवाय बीजाय नमः॥ पादयोः तार्तीयशक्तये नमः॥ सर्वांगे कामराजाय कीलकाय नमः॥ दक्षिणामूर्त्तिसंहितायां॥ ऋषिरस्य दक्षिणामूर्तिरहं शिरसि विन्यसेत्॥ छंदः पंक्तिस्तु विज्ञेयं मुखे विन्यस्य देवतां॥ हृदये त्रिपुरेशानी वाग्भवं बीजमुच्यते॥ शक्तिबीजं शक्तिरेव कामराजं च कीलकं।

बीजं॥३

ततोनाभ्यादिचरणपर्य्यंतं हसैंनमः॥हृदयान्नाभिपर्य्यंतं हसक्लींनमः॥शिरसोहृदयपर्य्यंतंहसौंनमः॥एवंआद्यबीजंदक्षिणकरेद्वितीयंबीजं
वामकरेतृतीयमुभयंकरे॥ततोमूर्द्धिमूलाधारेहृदियथासंख्येनत्रीणिबीजानिविन्यसेत्॥तथाचनिबंधे॰॥नाभेराचरणंन्यस्येद्वाग्भवंमंत्र
वित्नमः॥हृदयान्नाभिपर्य्यंतंकामराजंप्रविन्यसेत्॥शिरसाहृत्प्रदेशांतंतार्तीयंविन्यसेत्ततः॥आद्यंद्वितीयंकरयोस्तार्तीयमुभयोर्न्यसेत्॥
मूध्न्याधारेहृदिन्यसेद्व्योबीजत्रयंक्रमात्॥ततोनवयोनिन्यासः॥आद्यबीजंदक्षकर्णे॥द्वितीयंवामकर्णे॥तृतीयंचिबु के॥एवंगंडयो
र्वदने३ नेत्रयोर्नसि३ अंसयोर्जठरे३कूर्परयोःकुक्षौ ३जानुनोर्लिंगे३पादयोर्गुह्ये ३पार्श्वयोर्हृदि३स्तनयोःकंठे ३॥तथाचनिबंधे॰ नव
योन्यात्मकंकुर्य्यान्न्यासंबीजैस्त्रिभिः क्रमात्॥कर्णयोश्चिबुकेभूयोगंडयोर्वदनेपुनः॥नेत्रयोर्नसिविन्यस्येदंसयोर्जठरेपुनः॥ततःकूर्पर
योःकुक्षौजानुनोर्ध्वजमूर्द्धनि॥पादयोर्गुह्यदेशेचपार्श्वयोर्हृदयोद्भुजे॥स्तनयोःकंठदेशेचत्रीणिबीजानिविन्यसेत्॥अथरत्यादिन्यासः
॥मूलाधारे ऐंरत्यैनमः॥हृदि क्लींप्रीत्यैनमः॥भ्रूमध्येसौः मनोभवायैनमः॥पुनर्भ्रूमध्येसौःअमृतेश्यैनमः॥हृदि क्लींयोगेश्यैनमः॥मू
लाधारे ऐंविश्वयोन्यैनमः॥तथाचनिबंधे॰ मूलेरतिंहृदिप्रीतिंभ्रुवोर्मध्येमनोभवां॥बालाबीजैस्त्रिभिर्न्यस्येत्स्थानेष्वेषुविलोमतः॥
अमृतेशींन्योगेशींविश्वयोनिंक्रमादिमाः॥विलोमबीजैर्विन्यस्यमूर्तिन्यासंसमाचरेत्॥अथमूर्तिन्यासः॥मूर्ध्निसहरौंईशानमनोभवा
यनमः॥वक्त्रेसहरेंतत्पुरुषमकरध्वजायनमः॥हृदिसहरूंअघोरकुमारकंदर्पायनमः॥गुह्येसहरिंवामदेवमन्मथायनमः॥पादयोः
सहरंसद्योजातकामदेवायनमः॥एवंऊर्द्ध्वप्राग्दक्षिणोत्तरपश्चिमेषुमुखेषुईशानमनोभवादिपंचमूर्तीस्तद्बीजादिपूर्विकान्यसेत्॥त
थाच॰॥स्वस्वबीजादिकंपूर्वमूर्ध्नीशानमनोभवं॥न्यसेत् वक्त्रेतत्पुरुषमकरध्वजमात्मवित्॥हृद्यऽघोरकुमारादिकंदर्पंतदनंतरं॥

गुह्यदेशे प्रविन्यस्येद्वामदेवादिमन्मथं ॥ सद्योजातं कामदेवं हृदयो विन्यसेत्ततः ॥ ऊर्ध्वप्राग्दक्षिणोदीच्यपश्चिमेषु मुखेषु तान् ॥ न्तविन्यसेद्य
थापूर्वं भृगुर्व्योमाग्निसंस्थितः ॥ सद्यादि पंचह्रस्वाद्यं बीजमेषां प्रकीर्तितं ॥ ततः करयोरंगुलीषु पंचबाणान् पंचकामांश्च विन्यसेत् यथा
॥ द्रां द्राविण्यै नमोंगुष्ठयोः ॥ द्रीं क्षोभिण्यै नमस्तर्जन्योः ॥ क्लीं वशीकरिण्यै नमो मध्यमयोः ॥ ब्लूं आकर्षिण्यै नमो नामिकयोः ॥ सः उ
न्मादिन्यै नमः कनिष्ठयोः ॥ ह्रीं कामाय नमः ॥ क्लीं मन्मथाय नमः ॥ ऐं कन्दर्पाय नमः ॥ ब्लूं मकरध्वजाय नमः ॥ स्त्रीं मीनकेतनाय
नमः ॥ बाणन्यासस्थानेषु ॥ तथा च॰ ज्ञानार्णवे॰ पंचबाणान् क्रमेणैव करांगुलिषु विन्यसेत् ॥ अंगुष्ठादि कनिष्ठांतं क्रमेण परमे
श्वरि ॥ थांतद्वयं समालिख्य वह्निसंस्थं क्रमेण तु ॥ मुखवृत्तेन नेत्रेण वामेन परिमंडितं ॥ बाणद्वयमिति प्रोक्तं मादनं भूमिसंस्थितं ॥ च
तुर्थस्वरबिंद्वाढ्यं नादरूपं वरानने ॥ फांतं शक्रेण संयुक्तं वामकर्णविभूषितं ॥ बिंदुनादसमायुक्तं सर्गवांश्च द्रमाः प्रिये ॥ पंचबाणान्महेशा
नि नामतः शृणु पार्वति ॥ द्रावणः क्षोभणो वश्यस्तथाकर्षणसंज्ञकः ॥ वश्योन्माद क्रमेणैव नामानि परमेश्वरि॰ न्यासे तु सर्वत्र स्त्रीलिंगे
न प्रयोगः ॥ तथा च निबंधे॰ द्रामाद्यां द्राविणीं सुहृद्रीमाद्यां क्षोभिणीं पदे ॥ क्लीं वशीकरणीं वक्त्रे गुह्ये ब्लूं बीजपूर्विकां ॥ आकर्षिणीं
हृदि पुनः सर्गांत भृगुसंयुतां ॥ संमोहिनीं क्रमादेवं बाणन्यासोयमीरितः ॥ आद्योन्मादसंमोहनयोरेकपर्यायत्वं ॥ कामास्तत्रैव विज्ञेया
स्तेषां बीजानि संशृणु ॥ पराबीजं मध्यबाणं वाग्भवं परमेश्वरि ॥ ब्लूं बीजं तु ततश्चैव स्त्रीबीजं चक्रमात्प्रिये ॥ पंचकामा इमे देवि नामानि
शृणु वल्लभे ॥ काममन्मथकंदर्पमकरध्वजसंज्ञकः ॥ मीनकेतुर्महेशानि पंचमः परिकीर्तितः ॥ पंचकामांस्ततो देवि बाणस्थानेषु
विन्यसेत्॰ एतान्विन्यस्य देवेशि करन्यासस्ततः परं ॥ ततः करांगन्यासौ ॥ ह्स्रां अंगुष्ठाभ्यां नमः ॥ ह्स्रीं तर्जनीभ्यां स्वाहा ॥ ह्स्रूं म

तं॰सा॰ ध्यमाभ्यांवषट्॥ हस्रैं अनामिकाभ्यांहुं॥ हस्रौं कनिष्ठाभ्यांवौषट्॥ हस्रः करतलकरपृष्ठाभ्यांफट्॥ एवंहृदयादिषु॰ तथाचनिबंधे॰ षट्
८२ दीर्घयुक्तेनाद्येनबीजेनांगक्रियामता॥ ततः सुभगादिन्यासः॥ भाले ऐं क्लीं ब्लुं स्त्रीं सः सुभगायैनमः॥ एतंभ्रुवोर्मध्ये ऐं ५ भगायनमः॥
वदने ऐं ५ भगसर्पिण्यैनमः॥ घंटिकायां ऐं ५ भगमालिन्यैनमः॥ कंठे ऐं ५ अनंगायैनमः॥ हृदि ऐं ५ अनंगकुसुमायैनमः॥ नाभौ ऐं ५
अनंगमेखलायैनमः॥ लिंगमूले ऐं ५ अनंगमदनायैनमः॥ तथाचनिबंधे॥ भालभ्रूमध्यवदनघंटिकाकंठहृत्सु च॥ नाभ्यधिष्ठानयोः
पंचताराद्याः सुभगादिकाः॥ न्यस्तव्या विधिना देव्यो मंत्रिणा सुभगा भगा॥ भगसर्पिण्यथपराभगमालिन्यनंतरं॥ अनंगानंगकुसुमा
भूयश्चानंगमेखला॥ अनंगमदना सर्वा मदविभ्रममंथराः॥ वाक्कामबीजं ब्लूं स्त्रीं सस्ताराः पंचोदितास्त्वमी॥ अथ भूषणन्यासः॥ शिरसि अं
नमः॥ भाले आं नमः॥ भ्रुवोः इं नमः ईं नमः॥ कर्णयोः उं नमः ऊं नमः॥ नेत्रयोः ऋं नमः ॠं नमः॥ नसि लृं नमः॥ गंडयोः ॡं नमः एं नमः॥
ओष्ठयोः॥ ऐं नमः ओं नमः॥ दंतयोः औं नमः अं नमः॥ मुखे अः नमः॥ चिबुके कं॥ गले खं॥ कंठे गं॥ पार्श्वयोः घं ङं॥ स्तनयोः चं छं॥ दोर्मूले जं
झं॥ कूर्परयोः ञं टं॥ पाण्योः ठं डं॥ करपृष्ठयोः ढं णं॥ नाभौ तं॥ गुह्ये थं॥ ऊर्वोः दं धं॥ जानुनोः नं पं॥ जंघयोः फं बं॥ ग्रंथिस्थानयोः भं मं॥ पत्तलयोः
यं॥ चरणांगुष्ठयोः रं॥ काञ्च्यां वं॥ ग्रीवायां लं॥ कंठे ळं ॥ हृदि शं॥ गुह्ये सं॥ कर्णयोः षं॥ गंडयोः सं॥ मौलौ हं॥ सर्वत्र नमोन्तं न्यसेत्॥ तथाच निबं
धे॥ न्यसेच्छिरसि भाले भ्रूकर्णाक्षियुगले नसि॥ गंडयोरोष्ठयोर्दंतपंक्त्योरास्ये न्यसेत्स्वरान्॥ चिबुकेऽथ गले कंठे पार्श्वयोः स्तनयुग्मके॥
दोर्मूलयोः कूर्परयोः पाण्योस्तत्पृष्ठदेशतः॥ नाभौ गुह्ये पुनश्चोर्वोर्जानुनोर्जंघयोः पुनः॥ स्फिचोः पत्तलयोः पश्चाच्चरणांगुष्ठयोर्द्वयोः॥ का राम
दिवांतान्न्यसेद्वर्णान्स्थानेष्वेषु समाहितः॥ कांच्यां ग्रैवेयके पश्चात्कंठके हृदि गुह्यके॥ कर्णयोर्गंडयोर्मौलौ वलळान्शषसान्सहैः॥ अष्टा ८२

विमान्त्रविन्यस्य देशिकः स्थिरमानसः ॥ ततस्त्रिखंडां मुद्रां बद्ध्वा ध्यायेत् ॥ तथा च ॥ उद्यद्भानुसहस्रकांतिमरुणक्षौमां शिरोमालिकां रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरं ॥ हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविंदश्रियं देवीं बद्धहिमांशुरत्नमुकुटां वंदे समंदस्मितां ॥ १ ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा ॥ ततः आधारशक्त्यादि ह्रीं ज्ञानात्मने नमः इत्यंतं संपूज्य पूर्वादिकेशरेषु ॥ इच्छा ज्ञाना क्रिया चैव कामिनी कामदायिनी ॥ रती रतिप्रिया नंदा नंदिनी च मनोन्मनी ॥ एताः प्रणवादिनमोंतेन पूजयेत् ॥ ततः ॥ ऐं परायै अपरायै परापरायै हसौः सदाशिवमहाप्रेतपद्मासनाय नमः इति संपूज्य प्राग्योनिमध्ययोन्योरंतराले श्रीविद्योक्तगुरुपंक्तिं पूजयेत् ॥ तथा च निबंधे ॥ वाग्भवं लोहितं रायै श्रीकंउं लोहितो नलः ॥ दीर्घवान्ये पराः पश्चात्परायै हसौः पुनः ॥ सदाशिवमहाप्रेतङें तपद्मासनं ततः ॥ अनेन मनुना दद्यादासनं श्रीगुरुक्रमं ॥ प्राङ्मध्ययोरंतराले पूजयेत् कल्पयेत्ततः ॥ पंचभिः प्रणवैर्मूर्तिं तस्यामावाह्य देवतां ॥ पूजयेदागमोक्तेन विधानेन समाहितः ॥ तारवाक्शक्तिकमला हसखफ्रें हसः स्मृताः ॥ तदग्रतो ॐ गुरुभ्यो नमः ॥ ॐ गुरुपादुकाभ्यो नमः ॥ एवं परमगुरुभ्यः ॥ परमगुरुपादुकाभ्यः ॥ परापरगुरुभ्यः ॥ परापरगुरुपादुकाभ्यः ॥ परमेष्ठिगुरुभ्यः ॥ परमेष्ठिगुरुपादुकाभ्यः ॥ आचार्येभ्यः ॥ आचार्यपादुकाभ्यः ॥ अस्याः पूजायंत्रनिबंधे ॥ पद्मं वसुदलोपेतं नवयोन्याढ्यकर्णिकं ॥ चतुर्द्वारसमायुक्तं भूगृहं विलिखेत्ततः ॥ ततः ऐं ह्रीं श्रीं हसखफ्रें हसौः इति मंत्रेण बिंदुचक्रे देव्या मूर्तिं संकल्प्य त्रिखंड मुद्रया पूर्ववद्देवीं ध्यात्वा वाहयेद्यथा ॥ देवेशि भक्तिसुलभे परिवारसमन्विते ॥ यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव ॥ इत्यावाह्य पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत् ॥ यथा ॥ देव्या वामकोणे ऐं रत्यै नमः ॥ दक्षिणकोणे क्लीं प्रीत्यै नमः ॥ अग्रकोणे सौः मनोभवायै नमः ॥ ततः केसरेष्वग्नीशासुरवायव्यमध्ये दिक्षु च पूर्वोक्तागममंत्रेण पू

ब्लूंबीजंच॥४॥

त॰सा॰
८३

जपेत्॥तथाच ज्ञानार्णवे॰ अग्नीशासुरवायव्यमध्ये दिक्ष्वंगपूजनं॥तदुत्तरे द्रां द्राविण्यै नमः॥ द्रीं क्षोभिण्यै नमः॥दक्षिणकोणे क्लीं वशी
करिण्यै नमः॥ब्लूं आकर्षिण्यै नमः॥अग्रे सः संमोहिन्यै नमः॥एवमुत्तरे ह्रीं कामाय नमः॥क्लीं मन्मथाय नमः॥दक्षिणकोणे ऐं कंदर्पाय
नमः॥ब्लूं मकरध्वजाय नमः॥अग्रे स्त्रीं मीनकेतनाय नमः॥तथाच ज्ञानार्णवे॥उत्तरस्यां द्वयं देवि दक्षिणस्यां द्वयं दिशि॥अग्रे चैकं
क्रमेणैव पंचबाणान्क्रमाद्यजेत्॰ पंचकामांस्तथा देवि बाणवत्परिपूजयेत्॥तथा॥पराबीजं मध्यबाणं वाग्भवं परमेश्वरि॥तूर्यबाण
स्ततश्चैव स्त्रीबीजं च क्रमात्प्रिये॥कामं मन्मथकंदर्पमकरध्वजसंज्ञकाः॥मीनकेतुर्महेशानि पंचमः परिकीर्तितः॥ततोष्ट योनिषु पूर्वा
दितः पूजयेत्॥ऐं क्लीं ब्लूं स्त्रीं सः सुभगायै नमः॥एवं ऐं ५ भगायै॰॥ऐं ५ भगसर्पिण्यै॰ ऐं ५ भगमालिन्यै॰ ऐं ५ अनंगायै॰ ऐं ५ अनंगकुसु
मायै नमः॥ऐं ५ अनंगमेखलायै॰ ऐं ५ अनंगमदनायै॰ नमोंतेन पूजयेत्सर्वत्र॥ततोऽष्टपत्रेषु पूर्वा दि॥ॐ असितांगब्राह्मीभ्यां नमः॥
एवं रुरुमाहेश्वरीभ्यां॰ चंडकौमारीभ्यां॰ क्रोधवैष्णवीभ्यां॰ उन्मत्तवाराहीभ्यां॰ भीषणचामुंडाभ्यां॥कपालींद्राणीभ्यां॥संहारमहाल
क्ष्मीभ्यां नमः॥इति सर्वत्र॰ तथाच निबंधे॰ अष्टयोनिष्वष्टशक्तीः पूजयेत्सुभगादिकाः॥मातरो भैरवांकस्था मदविभ्रमविह्वलाः॥अष्टप
त्रेषु संपूज्या यथावत्कुसुमादिभिः॥तद्बहिः पूर्वादिदिन्द्रादीन्संपूज्य धूपादिविसर्जनांतं कर्म समापयेत्॥नैवेद्यानंतरं श्रीविद्योक्तबलि
चतुष्टयमत्र देयमिति॥अस्य पुरश्चरणं दशलक्षजपः॥होमस्तु द्वादशसहस्रं॥तथाच निबंधे॥दीक्षां प्राप्य जपेन्मंत्रं तत्त्वलक्षं जितेंद्रि
यः॥पुष्पैर्भानुसहस्राणि जुहुयाद्ब्रह्मवृक्षजैः॥बृहद्यामले॥पूर्वजन्मकृतैः पुण्यैर्ध्यात्वैनां परदेवतां॥यो भजेदुक्तमार्गेण स साक्षाच्छंक
रो भवेत्॥अथ संपत्प्रदाभैरवीमंत्रः॥ज्ञानार्णवे॥यथासौ त्रिपुरा बाला तथा त्रिपुरभैरवी॥संपत्प्रदा नाम तस्याः शृणु निर्मलमान

राम॰
८३

से॥ शिवचन्द्रौ वह्निसंस्थौ वाग्भवं तदनंतरं॥ कामबीजं तथा देवि शिवचन्द्रान्वितं ततः॥ पृथ्वीबीजां तवस्या[illegible]तार्तीयं शृणु वल्लभे॥ श
क्तिबीजं महेशानि शिववह्नीनियोजितं॥ कुमार्य्याः परमेशानि हित्वा सर्गं तु बैंदवं॥ त्रिपुराभैरवी देवी महासंपत्प्रदायिनी॥ अस्यार्थः॥ त्रिपुरा
भैरवी विसर्गरहिता चेत्संपत्प्रदा भवति॥ न्यासपूजादिकं सर्वं पूर्ववत्कार्यं अंगमंत्रे तु विशेषः ह्रूरुंक्लैंस्त्रिबीजैः करांगन्यासकल्पना॥ ध्या
नं तु॰ उदितार्कसहस्राभां स्फुरच्चंद्रकलाजटां॥ किरीटरत्नविलसच्चित्रितमौक्तिकां॥ स्रवद्रुधिरपंकाढ्यमुंडमालाविभूषितां॥ नयनत्र
यशोभाढ्यां पूर्णेंदुवदनान्वितां॥ मुक्ताहारलताराजत्पीनोन्नतघनस्तनीं॥ रक्तांबरपरीधानां यौवनोन्मत्तरूपिणी॥ पुस्तकं चाभयं वामे दक्षिणे च
क्षमालिकां वरदानरतां नित्यां महासंपत्प्रदां स्मरेत्॥ न्यासपूजादिकं च पूर्ववत्॥ अंगमंत्रे तु विशेषः॥ ह्रूरुंक्लैंस्तु त्रिभिर्बीजैः करांगन्यासकल्प
ना॥ अस्याः पुरश्चरणं त्रिलक्षजपः॥ ज्ञानार्णवे॥ बालावदस्याः पूजोक्तत्वात्॥ तथा च॥ न्यासपूजादिकं सर्वं कुमार्य्या इव सुव्रते॥ एकलक्षं ज
पेन्मंत्रं सिद्धये साधकोत्तम इति वचनात्॥ एकलक्षजपपुरश्चरणमिति केचित् सिद्धविद्यात्वात्॥ अथ कौलेशी भैरवी॥ ज्ञानार्णवे॰ संपत्प्र
दा भैरवी वह्निस्थि कौलेशभैरवी॥ हसाद्या सैव देवेशि त्रिषु बीजेषु पार्वती॥ इयं तु हसराद्या स्यात् ध्यानपूजादिकं तथा॥ अस्यार्थः॥ त्रिकू
टे सकारानंतरं हकारश्चेत्तदा कौलेशी भैरवी भवति॥ अस्या ध्यानपूजादिकं तु संपत्प्रदाभैरवीवत् बोध्यम् अथ भयविध्वंसिनी भैरवी॥ संप
त्प्रदाभैरवी आद्यंते रेफवर्जिता चेत् भयध्वंसिनी भवति॥ दक्षिणामूर्त्तौ तथा दर्शनात्॥ अथ सकलसिद्धिदा भैरवी॥ ज्ञानार्णवे॥ एतस्या एव
विद्याया आद्यंते रेफवर्जिते॥ तदेयं परमेशानि नाम्ना सकलसिद्धिदा संपत्प्रदाभैरवीवद्ध्यानपूजादिकं तथा॥ अस्यार्थः॥ कौलेशभैरवी
आद्यंते रेफरहिता चेत्तदा सकलसिद्धिदायिनी भवति॥ पूजादिकं तु संपत्प्रदावत्॥ अथ चैतन्यभैरवी॥ ज्ञानार्णवे॥ वाग्भवं बीजमुच्चार्य्य जी

वप्राणसमन्वितम्॥ सकलाभुवनेशानी द्वितीयंबीजमुद्धरेत्॥ जीवप्राणवह्निसंस्थं शक्रस्वरविभूषितं॥ विसर्गाढ्यं महेशानि विद्यात्रैलोक्यमातृका॥ अस्यार्थः॥ चंद्रशिवद्वादशस्वरसंयुक्तं बिंदुनादकलाढ्यं॥ चंद्रकामपृथिवीमहामाया॥ चंद्रशिववह्निबीजं चतुर्दशस्वरविसर्गाढ्यं च॥ अस्या यंत्रं॥ तत्रैव ज्ञानार्णवे॥ त्रिकोणं चैव षट्कोणं वसुपत्रं वरानने॥ चतुरस्रं चतुर्द्वारमेवं मंडलमालिखेत्॥ अस्य पूजाप्रयोगः॥ प्रातः कृत्यादि आधारशक्त्यादि ह्रीं ज्ञानात्मने नमः॥ इत्यंतं विन्यस्य हृत्पद्मस्य केशरेषु पूर्वादि॥ ऊ वामायै नमः॥ एवं ज्येष्ठायै नमः॥ रौद्र्यै॥ अंबिकायै॥ इच्छायै॥ ज्ञानायै॥ क्रियायै॥ चित्रायै॥ कुब्जिकायै॥ विषघ्निकायै॥ भूचर्यै॥ आनंदायै॥ मध्ये मनोन्मन्यै॥ हसौः सदाशिवमहाप्रेतपद्मासनाय नमः॥ संपत्प्रदा बाला कौलेशी सकलेश्वराणां विद्यानां एता पीठशक्तयो ज्ञानार्णवोक्तत्वात्॥ ततो ऋष्यादिन्यासः॥ शिरसि दक्षिणामूर्तये ऋषये नमः॥ मुखे पंक्तिछंदसे नमः॥ हृदि चैतन्यभैरव्यै देवतायै नमः॥ ततः करांगन्यासः॥ पूर्वबीजमुच्चार्य अंगुष्ठाभ्यां नमः॥ द्वितीयबीजमुच्चार्य तर्जनीभ्यां स्वाहा॥ तृतीयबीजमुच्चार्य मध्यमाभ्यां वषट्॥ पुनः प्रथमबीजमुच्चार्य अनामिकाभ्यां हुं॥ द्वितीयबीजमुच्चार्य कनिष्ठाभ्यां वौषट्॥ तृतीयबीजमुच्चार्य करपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ ततो ध्यानं॥ उद्यद्भानुसहस्राभां नानालंकारभूषितां॥ मुकुटाग्रलसच्चंद्ररेखां रक्तांबरान्वितां॥ पाशांकुशधरां नित्यां वामहस्तकपालिनीं॥ वरदाभयशोभाढ्यां पीनोन्नतघनस्तनीं॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा पीठपूजां कुर्याद्यथा॥ आधारशक्त्यादि वामाज्येष्ठादि पीठमनुपीठशक्तीश्च पूजयेत्॥ ततो भैरव्युक्तगुरुपंक्तिं संपूज्य पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ यथा॥ प्रथमं षडंगपूजा अग्निकोणे प्रथमबीजमुच्चार्य हृदयाय नमः॥ ईशाने द्वितीयबीजमुच्चार्य शिरसे स्वाहा॥ नैर्ऋते तृतीयबीजमुच्चार्य शिखायै वषट्॥ वायुको[illegible] नः प्र[illegible]

च्चार्य्य कवचाय हुं॥ मध्ये द्वितीयबीजमुच्चार्य्य नेत्रत्रयाय वौषट्॥ चतुर्दिक्षु तृतीयबीजमुच्चार्य्य अस्त्राय फट्॥ ततः पूर्ववत् रत्नपादुकासं
पूज्य अग्रे ॐ वसंतायनमः॥ वामे कामदेवाय॰॥ दक्षिणे चापाय॰ ततः पूर्ववद्बाणान्संपूज्य षट्कोणे पूर्वादि॰ ॐ डाकिन्यै नमः॥ राकि
ण्यै॰ काकिण्यै॰ लाकिन्यै॰ शाकिन्यै॰ हाकिन्यै॰ ततो अष्टपत्रेषु पूर्वोक्तानंगकुसुमाद्याः पूज्याः॥ पत्राग्रेषु पूर्वादि ॐ परभृतेनमः॥ ए
वं सारसाय॰ शुकाय॰ मोघच्छायाय॰ मेघायेति वा॥ अपांगाय॰ भ्रूविलासाय॰ हराय॰ भवाय॰ नमोन्तेन प्रणवादि पूज्याः॥ ततः
इन्द्रादीन्वज्रादींश्च संपूज्य धूपादिविसर्जनांतं कर्म्म समापयेत्॥ अस्य पुरश्चरणं लक्षजपः॥ तथा च॰ ज्ञानार्णवे॰॥ लक्षं संख्यं ज
पेन्मंत्रमित्यादिवचनात्॥ अथ कामेश्वरीभैरवीमंत्राः॥ ज्ञानार्णवे॰ कामेश्वरी च रुद्राणी पूर्वं सिंहासने स्थिता॥ एतस्या एव विद्या
या बीजद्वयमुदाहृतम्॥ तदंते परमेशानि नित्यक्लिन्ने मदद्रवे॥ एतस्या एव तार्त्तीयरुद्राणी परमेश्वरी॥ ध्यानपूजादिकं देवि
चैतन्यायाश्च पूर्ववत्॥ त्रिकोणे तु विशेषोस्ति कथयामि तवानघे॥ अग्रकोणक्रमेणैव नित्याक्लिन्नां मदद्रवां॥ षडंगावरणां पश्चा
त्पूजयेत्सर्वसिद्धये॥ अथ षट्कूटाभैरवी॰ तत्र ज्ञानार्णवे॰ डाकिनी राकिनी बीजे लाकिनी काकिनी युगं॥ साकिनी हाकिनी बीजे आद्
न्त्यसुरसुंदरि॥ आद्यमैकारसंयुक्तमन्यदीकारसंयुतं॥ शक्रस्वरान्वितं देवि तार्त्तीयं बीजमालिखेत्॥ बिन्दुनादकलाक्रांतं त्रितयं
शैलसंभवे॥ एषा विद्या महेशानि पश्चिमासनगा भवेत्॥ तृतीयबीजं सविसर्गं इत्यपि॥ तंत्रांतरे॥ उरोस्मा मादनं जीवं शिवमत्र त्रिधा।
लिखेत्॥ अर्केण मायाशक्राभ्यां क्रमात्तं मंडितं कुरु॥ बिंदुनादान्वितं चाद्ययुग्ममन्त्यं विसर्गवत्॥ ध्यानमस्याः प्रवक्ष्यामि सर्वभूत
निकृंतनम्॥ ध्यानम्॥ बालसूर्यप्रभां देवीं जवाकुसुमसन्निभां॥ मुंडमालावलीरम्यां बालसूर्य्यसमांशुकां॥ सुवर्णकलशाकारपी

नोन्नतपयोधरां॥ पाशांकुशौ पुस्तकं च तथा च जपमालिकां॥ दधतीमिति विशेषः॥ द्विरावृत्त्या षडंगानि विधाय परमेश्वरि॥ यंत्रमस्या वरारोहे त्रिकोणं तत्पुटं लिखेत्॥ बहिरष्टदलं पद्मं रविपत्रं ततो लिखेत्॥ चतुरस्रं चतुर्द्वारमेवं मंडलमालिखेत्॥ षडंगावरणं देवि पूर्ववत् पूजयेच्छिवे॥ रत्यादित्रितयं देवि त्रिकोणे परिपूजयेत्॥ डाकिन्याद्यास्तु षट्कोणे वसुपत्रे ततः परम्॥ ब्राह्म्यादियुगलं पश्चाद्रविपत्रे ततः परम्॥ बालायाः पीठशक्तीस्तु रामाद्याः पूजयेत्क्रमात्॥ चतुरस्रे लोकपालांस्तथायुधान् परमेश्वरि॥ अनेनैव विधानेन नित्याख्यां भैरवीं यजेत्॥ अथ भोगमोक्षदा भैरवीमंत्रः॥ ज्ञानार्णवे॰ एतस्या एव विद्यायाः षड्वर्णान्क्रमतः स्थितान्॰ विपरीतान्वदप्रौढे विद्येयं भोगमोक्षदा॥ नित्याख्या भैरवी देवि रिपुभारनिकृंतनी॥ न्यासपूजादिकं सर्वमस्याः पूर्ववदाचरेत्॰ अथ रुद्रभैरवी॰ ज्ञानार्णवे॰ शिवचंद्रौ मादनांतपांतं वह्निसमायुतं॥ शक्तिभिन्नं बिंदुनादकलाढ्यं वाग्भवप्रिये॥ १॥ सप्तमस्वरया भैरव्याः कामराजं तदेव हि॥ सदाशिवस्य बीजं तु महासिंहासनस्य च॥ एषा विद्या महेशानि वर्णितुं नैव शक्यते॥ अस्यार्थः॥ शिवचंद्रकांतपांतं वह्नियुतमेकादशस्वरविशिष्टं बिंदुनादकलाक्रांतं वाग्भवबीजं॥ शिवचंद्रकामपृथ्विवह्निचतुर्थस्वरविभूषितं नादबिंदुकलाक्रांतं॥ कामराजबीजं द्वितीयं प्रेतबीजं शक्तिकूटं तृतीयं॥ अस्याः पूजायंत्रं॥ त्रिकोणं चैव वृत्तं च वृत्ताष्टदलपंकजं॥ वृत्तं भूमंडलं चेत्यादि॥ अस्याः पूजा॥ प्रातःकृत्यादि प्राणायामांतं विधाय चैतन्यभैरवीवत् पीठन्यासं कुर्यात्॥ यथा॥ आधारशक्त्यादीन् ह्रीं ज्ञानात्मने नमः इत्यंतं विन्यस्य पूर्वादिक्रमेण ॐ रामायै नमः॥ एवं ज्येष्ठायै॰ रौद्र्यै॰ काल्यै॰ कलविकरिण्यै॰ बलप्रमथिन्यै॰ सर्वभूतदमन्यै॰ मध्यमनोन्मन्यै इति पीठशक्तीर्विन्यस्य पीठमंत्रं न्यसेत्॥ अत्र पीठमंत्रस्तु॥ ॐ अघोरे ऐं ॐ घोरे ह्रीं सर्वतः सर्वसर्वेभ्यो घोरघोरतरेभ्यः श्रीं नमस्तेस्तु रुद्ररूपे [illegible]

ऐंऐं ॥ ततः ऋष्यादिन्यासः ॥ शिरसि दक्षिणामूर्तये ऋषये नमः ॥ मुखे पंक्तिछंदसे नमः ॥ हृदि रुद्रभैरव्यै देवतायै नमः ॥ ततः करांगन्यासः ॥ प्रथम [illegible] ष्ठा-
भ्यां नमः ॥ द्वितीयं बीजमुच्चार्य तर्जनीभ्यां स्वाहा ॥ तृतीयं बीजमुच्चार्य मध्यमाभ्यां वषट् ॥ पुनः प्रथमबीजमुच्चार्य अनामिकाभ्यां हुं ॥ द्वितीयं बीजमुच्चार्य कनिष्ठि-
भ्यां वौषट् ॥ तृतीयं बीजमुच्चार्य करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिषु० ततो ध्यानम्० उद्यद्भानुसहस्राभां चंद्रचूडां त्रिलोचनां ॥ ना-
नालंकारसुभगां सर्ववैरिनिकृंतनीं ॥ वमद्रुधिरमुंडालिकलितां रक्तवाससीं ॥ त्रिशूलं डमरुं खड्गं तथा खेटकमेव च ॥ १ ॥ पिनाकं च शरांश्चैवं
पाशांकुशयुगं क्रमात् ॥ पुस्तकं चाक्षमालां च शववसिंहासनस्थितां ॥ २ ॥ एवं ध्यात्वा मानसैः संपूज्य पूर्ववत् शंखस्थापनं कृत्वा चैतन्यभै-
रवीवत् कृतपीठपूजां विधाय एतन्मंत्रोक्तपीठमंत्रेण पीठं संपूज्य पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत् ॥
यथा ॥ अग्निकोणे प्रथमबीजमुच्चार्य हृदयाय नमः ॥ ईशाने द्वितीयबीजमुच्चार्य शिरसे स्वाहा ॥ नैर्ऋते तृतीयबीजमुच्चार्य शिखायै वष-
ट् ॥ वायव्ये पुनः प्रथमबीजमुच्चार्य कवचाय हुं ॥ मध्ये द्वितीयबीजमुच्चार्य नेत्रत्रयाय वौषट् ॥ चतुर्दिक्षु पूर्वादि तृतीयबीजमुच्चार्य अस्त्रा-
य फट् ॥ ततस्त्रिकोणे रत्यादिकमभ्यर्च्य पत्रमूलेऽनंगादिकान्पूजयेत् ॥ पत्रेषु पूर्वादि असितांगब्राह्मादींश्च संपूज्य भूगृहे इंद्रादिवज्रा-
दींश्च पूजयेत् ॥ ततो धूपादिविसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं लक्षजपः ॥ लक्षसंख्यं जपेन्मंत्रं इत्यादिवचनात् ॥ अथ भुवनेशी-
भैरवी ॥ तत्र ज्ञानार्णवे ॥ हसाद्यं वाग्भवं चाद्यं हसकांते सुरेश्वरि ॥ भूबीजं भुवनेशानि द्वितीयं बीजमुद्धृतम् ॥ शिवचंद्रौ महेशानि भुवनेशी च भैर-
वी ॥ तथा त्रिपुरार्णवे ॥ हंसास्त्रयो दंतिसकाररूढा वस्वब्धिपंक्तिस्वरसंविभिन्नाः ॥ आद्यौ सविंदू परतो विसर्गी मध्ये विरिंचींद्रहराग्नियुक्तः ॥ अस्यार्थः ॥
शिवचंद्रवाग्भव इति प्रथमबीजं ॥ शिवचंद्रकामपृथ्वि महामाया इति द्वितीयबीजं ॥ शिवचंद्रचतुर्दशस्वरविसर्गास्तृतीयबीजं ॥ अस्या यंत्रे

मंत्रो ॥ ३ ॥

तन्यभैरवीवद्बोध्यम्॥ अस्य पूजा प्रातःकृत्यादिप्राणायामान्तं कृत्वा चैतन्यभैरवीउक्तपीठन्यासं कृत्वा ऋष्यादिन्यासं कुर्य्यात्॰ शिरसि दक्षिणामूर्त्तये ऋषये नमः॥ मुखे पंक्तिछन्दसे नमः॥ हृदि भुवनेश्वरीभैरव्यै देवतायै नमः॥ ततः करांगन्यासौ॥ षट्दीर्घभाजा बीजेन कुर्य्याद्रागक्रियामनोः॥ तेन षट्दीर्घयुक्तेन मध्यमबीजेन करांगन्यासः॥ यथा॥ हसकलह्रां अंगुष्ठाभ्यां नमः॥ हसकलह्रीं तर्जनीभ्यां स्वाहा॥ हसकलह्रूं मध्यमाभ्यां वषट्॥ हसकलह्रैं अनामिकाभ्यां हुं॥ हसकलह्रौं कनिष्ठाभ्यां वौषट्॥ हसकलह्रः करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॰॥ ततो ध्यानम्॥ जवाकुसुमसंकाशां दाडिमीकुसुमोपमां॥ चंद्ररेखाजटाजूटां त्रिनेत्रां रक्तवाससीं॥ नानालंकारसुभगां पीनोन्नतघनस्तनीं॥ पाशांकुशवराभीतिधारयंतीं शिवांश्रये॥ अन्यत्सर्वं चैतन्यभैरवीवत् करणीयं॥ भुवनेशीभैरव्याश्च भेदांतरमिहोच्यते॥ सहायास्तैवदेवेशि तदा सा सकलेश्वरी॥ ध्यानपूजादिकं सर्वमेतस्या एव पार्वति॥ अस्यार्थः॥ इयं सहाया चेत्सकलेश्वरी ध्यानपूजादिकं तु पूर्ववत्॥ अथ त्रिपुराबालामंत्रः॥ तत्र शारदायाम्॰ अधरो बिंदुमानाद्यो ब्रह्मेन्द्रस्थः शशीयुतः॥ द्वितीयं भृगुसर्गाढ्यो मनुस्तार्तीयईरितं॥ एषा बालेति विख्याता त्रैलोक्यवशकारिणी॥ अस्यार्थः॥ वाग्भवं कामबीजं चंद्रबीजं सविसर्गकम् चतुर्दशस्वरबिंदुविभूषितं॥ अस्याः पूजादिकं तु त्रिपुरभैरवीवच्छारदातिलके उक्तत्वात्॥ ज्ञानार्णवे तु विशेषः॥ न्यासादिकं तु एतद्बीजेनैव कुर्य्यात्॥ करांगन्यासस्त्विह तया॥ षड्दीर्घेणाचरेत् देवि ह्रीं रात्र्या क्रमेण त्विति वचनात्॥ अस्याः पुरश्चरणं त्रिलक्षजपः॥ तथा च ज्ञानार्णवे॰ वर्णलक्षं जपेन्मंत्रं दशांशं हवनं चरेत्॥ तर्प्पणं तु तथा कुर्य्यात्सर्वसौभाग्यवान्भवेत्॥ इतरेषां लक्षजपः श्रीविद्यायामुक्तत्वात्॥ मंत्रांतरं॥ ज्ञानार्णवे॥ सूर्यस्वरं समुच्चार्य बिंदुनादकलान्वितं॥ स्वरांतपृथिवीसंस्थं तूर्यस्वरसमन्वितं॥ बिंदुनादकलाक्रांतं

न्मार्व्ययः॥ शक्रस्वरसमाक्रांता विद्येयं त्र्यक्षरी मता॥ अर्धयो बिंदुः॥ दक्षिणामूर्तिसंहितायामप्येवं॥ एवा विसर्गो —— विंदुनाशता ए॥ द्यां संमुद्धृत्य सारसमुच्चयाद्दोशापबोधनात्॥ तद्यथा॥ विद्यामूलोऽप्यतिरेषामयोक्ता ज्ञातव्येयं सर्वदा सिद्धिकामैः॥ देव्याश शापेन विद्येयमापूर्वैतेन प्राणहीना भवेत्सा॥ मुंडमालातंत्रेऽपि॥ कुमारीया च विद्येयं त्वया शप्ता पतिव्रते॥ तथा॥ आद्रिमेन तु लुप्तासा त्वमध्यमेन तु कीलिता॥ प्रान्तिमेन तु संभिन्ना तेन विद्या न सिध्यति॥ न चैवं शारदोक्तविद्यापि शप्ता स्यादिति वाच्यं॥ तस्या ज्ञानार्णवोक्तविंदुघटितत्वात्॥ शापोद्धारमाह मुंडमालातंत्रे॥ केवलं शिवरूपेण शक्तिरूपेण केवलं॥ मया प्रतिष्ठिता विद्या ३ तिहकारसकारौ वाग्भवे कामराजे च तृतीयबीजे हकारः॥ वस्यमाउसारसमुच्चयेतथ्यादर्शनात्॥ त्रिपुरासारेऽपि॥ शिवशक्तिबीजमत एव शंभुनानिहितं तयो रूपरि पूर्वबीजयोः॥ अनंतरं कुलोपरि मध्यमाधरेद ह नं ततः प्रभृति सोर्जिता भवेत्॥ मध्यमाधरे मध्ये बीजस्य पश्चात्॥ रुद्रयामले॥ वाग्भवं प्रथमं देवि कामराजं द्वितीयकं॥ तृतीयं शक्तिबीजं तु शिवयुक्तं सदा भवेत्॥ एषा बाला समाख्याता सर्वदोषविवर्जिता॥ मंत्रोतरं॥ श्रीक्रमे॥ वाग्भवं क्लें द्वितीयबीजमीकारं ततस्ततः परे तु॥ शक्तिमौकारसंयुक्तं विसर्गस्तदधः पठेत्॥ विंदुनादकलाक्रांतं बीजं परमदुर्लभम्॥ एतद्बीजत्रयं देवि सौः क्लीं च तदनंतरं॥ इयं पंचाक्षरी द्या कथिता तु विदुर्लभा॥ मंत्रांतरं तत्रैव॥ बालाबीजत्रयं देवि हसाद्यं वा जपेत्सुधीः॥ हसांतं वा महाभागे शापादिदोषशांतये॥

तत्रैव॥ पाशबीजं महेशानि शक्तिः शिवसवह्निमान्॥ द्वादशस्वरसंयुक्तं नादबिंदुविभूषितं॥ कामराजं प्रवक्ष्यामि ह्रींकारं शक्तिशैवकं॥ मादकं चेंद्रबीजं च वह्निवामाक्षिबिंदुमत्॥ शक्ति कूटं महादेवि क्रोंकारं शक्तिशैवकं॥ वह्निबीजं मनोर्युक्तं नादबिंदुसमर्गकं॥ चतुर्दशस्वरैर्विद्याषोडशी शृणु चांबिके॥ हंसबीजं ततः पश्चात्षोडशी कथिता मया॥ अथ नवकूटबालातंत्रैव॥ बालाबीजत्रयं देवि कूटत्रयं नवाक्षरं॥ वियत्कूटत्रै

यं देवि भैरव्या नवकूटकं ॥ बालाबीजत्रयं ॥ सकलसिद्धिभैरव्या नवाक्षरी कूटत्रयं ॥ भयविध्वंसिनीभैरव्या नवाक्षरीकूटत्रयमित्यर्थः ॥ मंत्रांतरं
श्रीक्रमे ॥ शिवः शक्तिश्च वाग्बीजं नादबिंदुकलान्वितं ॥ वाग्भवं कथितं देवि कामराजं शृणु प्रिये ॥ शिवशक्तिस्मादनेंद्रवन्हिमायासमन्वितं ॥ नाद
बिंदुकलातीतं कूटं परमदुर्लभं ॥ शिवश्चंद्रश्च सत्यांतः सर्गबिंदुकलान्वितः ॥ एषा नवाक्षरी बाला सर्वदोषविवर्जिता ॥ अस्यार्थः ॥ शिवचंद्रवस्मवं प्रथमं ॥
शिवचंद्रकामभूवन्हितूर्यस्वरबिंदुयुक्तं द्वितीयं ॥ शिवचंद्रचतुर्दशस्वरबिंदुविसर्गयुक्तं तृतीयं ॥ अपरश्चंद्रादिः ॥ त्रिपुरासारे ॥ भैरवीयमुदिता कुलपूर्वा देशिके यदि
भवेत्कुलपूर्वा ॥ सैव शीघ्रफलदा भुवि विद्येत्युच्यते पशुजनेष्वतिगोप्या ॥ त्रिपुरासारे ॥ शिवाष्टमं केवलमादिबीजं भगस्य पूर्वाष्टमबीजमन्य
त् ॥ परं शिवोंतं कथिता त्रिवर्णा संकेतविद्या गुरुवक्त्रगम्या ॥ मंत्रांतरं ॥ शक्तिः शिवो वन्हिबीजं द्वादशस्वरबिंदुकं ॥ शक्तिर्महेशः कामश्च इन्द्रो वन्हीदु
मायया ॥ शक्तिः शिवश्च वन्हिश्च मनुस्वरविसर्गकः ॥ नादबिंदुकलायुक्तं बीजमेतत्प्रकीर्तितं ॥ एतासां यंत्रपूजादिकं तु भैरवीवत् ॥ पुरश्चरणं तु लक्षजपः
॥ श्रीक्रमादौनयोक्तत्वात् ॥ एतासां दीपनी विद्या श्रीक्रमे ॥ वदयुग्मं महेशानि वाग्वादिनि ततः परं ॥ एषा त्वष्टाक्षरी विद्या वाग्भवाद्येति योजयेत् ॥ क्लि
न्ने क्लेदिनि देवेशि महाक्षोभं ततः कुरु ॥ कामराजं समुच्चार्य प्रणवं तदनंतरं ॥ महाक्षोभं कुरु पश्चाच्छक्तिकूटं तथोच्चरेत् ॥ जपेदादौ जपेत्पश्चात्त
त्रिवारमनुक्रमात् ॥ अथान्नपूर्णेश्वरी भैरवी ॥ ज्ञानार्णवे ॥ तारं च भुवनेशानी श्रीबीजं कामबीजकं ॥ हृदंते भगवत्यंते माहेश्वरिपदं ततः ॥ अन्न
पूर्णेठयुगलं विद्येयं विंशदक्षरी ॥ तथा कल्पे ॥ कामबीजं विना देवि त्रिबीजपूर्विका परा ॥ ऊनविंशाक्षरी देवी धनधान्यसमृद्धिदा ॥ अस्याः पूजा ॥
प्रातःकृत्यादि सामान्योक्तपीठपूजान्यासं विधाय केशरेषु पूर्वादि ॥ ॐ वामायै नमः ॥ एवं ज्येष्ठायै ॥ रौद्र्यै ॥ काल्यै ॥ कलविकरिण्यै ॥ बलविकरि
ण्यै बलप्रमथिन्यै ॥ सर्वभूतदमन्यै ॥ मध्ये मनोन्मन्यै ॥ तत्समीपे तु जयायै ॥ विजयायै ॥ अजितायै ॥ अपराजितायै ॥ नित्यायै ॥ विलासिन्यै

॥द्वेशाग्रे॥अघोरायै॥मध्येमंगलायै॥प्रणवादिनमोंते॥सर्वत्रपूजयेत्॥ततोहसौः सदाशिवमहाप्रेतपद्मासनायनमः॥ततऋष्यादिन्या
संकुर्यात्॰ शिरसिब्रह्मणेऋषयेनमः॥मुखेपंक्तिछंदसेनमः॥हृदिअन्नपूर्णेश्वर्यैभैरव्यैदेवतायैनमः॥ ततःकरांगन्यासौ॥ ह्रांअंगुष्ठाभ्यां
नमः॥ह्रांहृदयायनमः इत्यादिच॥तथाच॰ ज्ञानार्णवे॥भुवनेश्यामहेशानिषट्दीर्घस्वरयुक्तया॥षडंगानीति॰ ततःपदन्यासः॥ मू
र्ध्नि ॐनमः॥चक्षुषोः ह्रींनमः श्रींनमः॥कर्णयोः क्लींनमः नमोनमः॥नसोः भगवतिनमः माहेश्वरिनमः॥मुखे अन्नपूर्णेनमः॥गुह्ये
स्वाहानमः॥पुनर्गुह्यादिमूर्द्धपर्यंतंन्यसेत्॥तत्रैव॥एकमेकंपुनश्चैकंपुनरेकंद्वयंततः॥चतुश्चचतुस्तस्याद्वाभ्यांपदान्येतानिपावे
ति॥पदानिदेवदेवेशिनवद्वारेषुविन्यसेत्॥मूर्द्धादिगुदपर्यंतंपुनस्तेषुवरानने॥गुदादिब्रह्मरंध्रांतपदानांनवकंन्यसेत्॥तत्रैव
ब्रह्मरंध्रमुखहृदयमूलाधारेषु अनुक्रमात् चतुर्बीजानिविन्यस्यापरेषु अन्यांश्चविन्यसेत् ॥भ्रूमध्यनासिकाकंठनाभिलिंगेषुपंचसु॥
पूर्ववत्क्रमतोदेविनमःप्रभृतिकंन्यसेत्॥ततोमूलेनव्यापकंकृत्वा॥ध्यायेत्॥तप्तकांचनवर्णाभांबालेन्दुकृतशेखरां॥नवरत्नप्रभा
युक्तमुकुटांकुंकुमारुणां॥चित्रवस्त्रपरीधानांशफराक्षींत्रिलोचनां॥सुवर्णकलशाकारपीनोन्नतघनस्तनीं॥गोक्षीरधामधवलंपंच
वक्त्रंत्रिलोचनं॥प्रसन्नवदनंशंभुंनीलकंठविभूषितं॥कपर्दिनंस्फुरत्सर्पभूषणंकुंदसन्निभं॥नृत्यंतमनिशंहृष्टंदृष्ट्वानंदमयीपरां॥
।सानंदमुखलोलाक्षीमेखलाढ्यानितंबिनीं॥अन्नदानरतांनित्यांभूमिश्रीभ्यामलंकृतां॥इतिध्यात्वामानसैःसंपूज्यशंखस्थापनंकु
र्यात्॥अस्याःपूजायंत्रं॥त्रिकोणंचचतुष्पत्रंवसुपत्रंततःपरं॥कलापत्रंचभूबिंबंचतुर्द्वारंसमालिखेत्॥ततःपीठपूजांविधायपु

न ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधाय । वरणपूजामारभेत् ॥ कर्णिकायां ॥ अग्न्यादिकोणेमध्येदिक्षु च ह्रां हृदयाय नमः इत्यादिनाषडंगानि पूजयेत् ॥ त्रिकोणाग्रे ॐ ह्रीं नमः शिवायेति शिवं पूजयेत् ॥ वामकोणे ॐ नमो भगवते वराहरूपाय भूर्भुवः स्वः पतये भूपतित्वं मे देहि ददापय स्वाहा ॥ इति वराहं पूजयेत् ॥ दक्षिणकोणे ॐ नमो नारायणायेति नारायणं पूजयेत् ॥ ततो वामदक्षिणे च ग्लौं श्रीं अन्नं मे देह्यन्नाधिपतये ममान्नं प्रदापय स्वाहा श्रीं ग्लौं इत्यनेन भूमिश्रियौ पूजयेत् ॥ ततश्चतुर्दले पुरत आरभ्य ॐ परविद्यायै नमः ॥ एवं ह्रीं भुवनेश्यै नमः ॥ श्रीं कमलायै नमः ॥ क्लीं सुभगायै नमः ॥ तथा च ज्ञानार्णवे ॥ तारेण परविद्यां च भुवनेशीं तदात्मना ॥ कमलां रमया मध्ये कामेन सुभगां यजेत् ॥ अष्टपत्रेषु पश्चिमादितः ब्राह्म्यादिमातृकाः पूजयेत् ॥ षोडशपत्रेषु नं अमृतायै ॥ एवं अन्नपूर्णायै ॥ मों मादनायै ॥ भं तुष्ट्यै ॥ गं पुष्ट्यै ॥ वं प्रीत्यै ॥ तिं रत्यै ॥ मां क्रियायै ॥ हें श्रियै ॥ श्वं वसुधायै ॥ रिं रात्र्यै ॥ अं ज्योत्स्नायै ॥ न्नं हैमवत्यै ॥ पूं छायायै ॥ र्णें पूर्णिमायै ॥ स्वां नित्यायै ॥ हां अमावास्यायै ॥ एता अन्नपूर्णांताः पूजयेत् ॥ तथा च ज्ञानार्णवे ॥ शेषैर्वर्णैः प्रपूज्याश्च अन्नपूर्णांतशक्तिकाः ॥ ततश्चतुरस्रे लोकपालान्पूजयेत् ॥ तत्रैव ॥ चतुरस्रे लोकपालान्क्रमेण संपूजयेत् ॥ ततो धूपादिविसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं लक्षजपः ॥ तथा च कल्पे ॥ एवं ध्यात्वा जपेन्मंत्रं लक्षसंख्यमनन्यधीः ॥ साज्येनान्नेन जुहुयात्तद्दशांशमनंतरम् ॥ इति भैरवीप्रकरणम् ॥ अथ श्रीविद्या ॥ तत्र मेरु ज्ञानार्णवे ॥ भूमिश्चंद्रः शिवो माया शक्तिः कृष्णाध्वमादनौ ॥ अर्द्धचंद्रश्च बिंदुश्च नववर्णो मेरुरुच्यते ॥ महात्रिपुरसुंदर्या मंत्रा मेरुसमुद्भवाः ॥ ज्ञानार्णवे ॥ सकला भुवनेशानी कामेशी बीजमुत्तमम् ॥ अनेन सकला विद्याः कथयामि वरानने ॥ अस्यार्थः ॥ सकले लिंगरूपं ॥ भुवनेशी लज्जा ॥ शक्तिबीजं वरारोहे कथितं सर्वसिद्धिदं ॥ कूटद्वयं समुद्धृत्य पश्चादेतत्समुद्धरेत् ॥ शक्त्यंतं तुर्यवर्णोयं कलमध्ये सुलोचने ॥ वाग्भवं पंचवर्णाढ्यं कामराजमथोच्यते ॥ मादनं शिवचंद्राढ्यं शिवांतं

१ ॥ शिवमिंदुं सुलोचने

मसिद्धिं देहि २ मम शत्रून्मारय २ करालिके हूं फट् स्वाहेति॥ ततो देव्या दक्षिणे ॐ वर्लिन्यै नमः वामे डाकिन्यै नमः॥ ततो देव्यां षडंगं संपूज्य दक्षिणे ॐ शंखनिधये नमः॥ वामे पद्मनिधये नमः॥ पूर्वादिदिक्षु च लक्ष्मीं लज्जां मायां वाणीं च पूजयेत्॥ विदिक्षु ब्रह्मविष्णुरुद्रेश्वरान्मध्ये सदाशिवं सर्वत्र प्रणवादिनमोन्तेन पूजयेत्॥ ततः पंचपुष्पांजलिं दत्त्वावरणपूजामारभेत्॥ अग्नीशासुरवायुमध्ये दिक्षु च॥ ह्रां खड्गाय हृदयाय स्वाहा नमः इत्यादि षडंगं संपूज्य अष्टपत्रेषु पूर्वादिक्रमेण॥ ॐ ह्रीं काल्यै नमः॥ एवं वर्णिन्यै डाकिन्यै महाभैरव्यै भैरव्यै इंद्राक्ष्यै पिंगलाक्ष्यै संहारिण्यै॥ तथा च॰॥ पद्मपत्रे यजेत्कालीं वर्णिनीं डाकिनीं तथा॥ भैरवीं च महापूर्वां भैरवीं तदनंतरं॥ इंद्राक्षीं पिंगलाक्षीं च ततः संहारकारिणी॥ पूर्वादिके दले पूज्याः शक्तयश्च यथाक्रमं॥ प्रणवादिनमोन्तेन लज्जाबीजादिमुच्चरन्॥ पद्ममध्ये हूं हूं फट् नमः स्वाहा नमः॥ देव्या दक्षिणे ॐ [illegible] नमः॥ देव्या उत्तरे सर्ववर्णेभ्यो नमः॥ पुनर्दक्षिणे ॐ बीजशक्तिभ्यां नमः॥ पत्राग्रेषु पूर्वादिक्रमेण ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही इन्द्राणी चामुण्डा महालक्ष्मीः प्रणवादिनमोन्तेन पूजयेत्॥ ततश्चतुर्दिक्षु द्वारेषु ॐ करालाय नमः॥ एवं विकरालाय॥ अतिकरालाय॥ महाकरालाय॥ भैरवीये॰ पूर्वद्वारे करालं च विकरालं च दक्षिणे॥ पश्चिमेऽतिकरालं च महाकरालमुत्तरे॥ ततो धूपादिविसर्जनांतं कर्म समापयेत्॥ विसर्जने तु अयं विशेषः॥ संहारमुद्रां प्रदर्श्यो जलावारोप्य वामनासापुटेन॥ योनिमुद्रासमारूढां प्रदीपकलिकाकारां कृष्णप्रतिपच्चंद्रकलातिवक्रक्रमेण क्षीणतां गतां॥ इमं मंत्रं तु समुच्चार्य चंद्ररश्मौ निवेशयेत्॥ मंत्रस्तु॰ उत्तरे शिखरे देवी भूम्यां पर्वतवासिनी॥ ब्रह्मयोनिसमुत्पन्ने गच्छ देवि भवांतिकं॥ भैरवीये॰ योनिमुद्रासमारूढां प्रदीपकलिकोज्वलां॥ कृष्णपक्षे विधुमिव क्रमेण क्षीणतां गतां॥ इमं मंत्रं समुच्चार्य चरौंद्ररश्मौ निवेशयेत्॥ उत्तरे शिखरेत्यादि॰॥ अस्य पुरश्चरणं लक्षजपः सिद्धविद्यात्वात्॥ बलिदानं तु॰ भैरवीये॰

२ चंद्रमिव २

ह्रीं क्लीं श्रीं ऐं हूं फट्।५॥ तिमायाच॥२

३ ह्रीं क्लीं हुं ऐं ह्रीं हुं ऐं वज्रवैरोचनीये हुं फट् स्वाहा।३

रात्रौबलिःप्रदातव्योमाषमांससुधादिभिः॥ अथवामधुपानाद्यैर्मधुरैर्विभवक्रमैः॥ मंत्रस्तु॥ उच्चरेत्प्रणवंपूर्वंसर्वसिद्धिप्रदेऽन्वितं॥ वर्णनी
येततोवा चंसर्वसिद्धिप्रदेततः॥ डाकिनीयेततोवाच्यंदेवीनामततःपरं॥ एह्येहीतिततोवाच्यमिमंबलिमनंतरं॥ गृह्ण गृह्ण ततःप्रोक्तामम सि
द्धिमनंतरं॥ देहिदेहीतिमामेवंततःफट्स्वाहयायुतः॥ बलिमंत्रःसमाख्यातःपूजितोसुरेश्वरि॥ मंत्रांतरं॥ भुवनेशीकामबीजंकूर्चबीजंच
वाग्भवम्॥ भुवनेशीकूर्चबीजंवाग्भवंतदनंतरं॥ वज्रवैरोचनीयेहूंफट्स्वाहांतदनंतरं॥ अस्यान्यासपूजादिकंसर्वंषोडशीवत् बोद्धव्यं॰ अपरः
॥ह्रैंह्लेरवामास्तंलक्ष्मीवाग्भवंकूर्चमेवच॥ अस्त्रांतछिन्नमस्तायामहाविद्याप्रकीर्तिता॥ अस्यापिसदृशीविद्याजगत्स्वपिनविद्यते॥ षडर्णोयं
मनुःप्रोक्तोमोक्षदोनात्रसंशयः॥ अस्याध्यानमहंवक्ष्येशृणुपंकमलानने॥ प्रत्यालीढपदांसदैववरधतींछिन्नंशिरःकर्त्रिकांदिग्वस्त्रांस्वकबं म
धप्रोत्थितासृक्सुधाधारांपिबंतींमुदा॥ नागाबद्धशिरोमणिंत्रिनयनांहृद्युत्पलालंकृतांरत्यासक्तमनोभवोपरिदृढांध्यायेज्जवासन्निभां॥१॥ दक्षेचा
तिसिताविमुक्तचिकुराकर्त्रीतथाखर्परंहस्ताभ्यांदधतीरजोगुणभवानाम्नापिसावर्णिनी॥ देव्याश्छिन्नकबंधतःपतदसृग्धारांपिबंतीमुदा
नागाबद्धशिरोमणिर्मनुविदाध्येयासदासासुरैः॥२॥ वामेकृष्णतनुस्तथैवदधतीखड्गंतथाखर्परंप्रत्यालीढपदाकबंधविगलद्रक्तंपिबंतीमुदा
॥सैषायाप्रलयेसमस्तभुवनंभोक्तुंक्षमातामसीशक्तिःसापिसदापराभगवतीनाम्नापराडाकिनी॥३॥ अस्याःपूजादिकंसर्वंषोडशीवत्॰ अपरः।
तारंलज्जाहृदयंवज्रवैरोचनीयेहूंफट्स्वाहा॥ ध्यानपूजादिकंसर्वंषोडशीवदुपाचरेत्॰ अपरः॥ वियत्सत्त्वयुतंबिंदुनादयुक्तंततःप्रिये॥ एका १
क्षरीमहाविद्यात्रैलोक्यक्षोभकारिणी॥ सत्त्वंदीर्घऊकारः॥ मंत्रांतरं॥ द्विवर्णैषामहाविद्यात्रैलोक्यमोहकारिणी॥ ताराद्यंनामवेदेषाचतुर्वर्गफ
लप्रदा॥ मंत्रांतरं॥ वज्रवैरोचनीयेचकूर्चयुग्मंसफट्ठठः॥ मंत्रांतरं॥ ताराद्यैषामहाविद्यासर्वतेजोपकारिणी॥ त्रैलोक्या[illegible]षिणीवि[illegible]नर्वे

ॐ ह्रौं ह्रीं वज्रवैरोचनीये हूं फट् स्वाहा॰ ३

ॐ वज्रवैरोचनीये हुं हुं फट् ठः ठः १

मुदहषेप..

वश्य २

र्गफलप्रदा॥ ध्यानपूजादिकं सर्वं षोडशीवत्॥ इदानीं षोडशीविद्याप्रशंसामाह॥ तस्याः सर्वप्रयत्नेन सर्वोपास्या च षोडशी॥ लक्ष्मीबीजादिकासैव सर्वैश्वर्यप्रदायिनी॥ लज्जाद्या स्वर्गभूनागयोषिदाकर्षणीपरा॥ कूर्चाद्या सर्वजंतूनां महापातकनाशिनी॥ वाग्भवाद्या यदा देवी वागीशत्वप्रदायिनी॥ एषा तु षोडशीविद्या वेद्या सप्तदशाक्षरी॥ श्रीबीजपुटिता सा च लक्ष्मीवृद्धिकरी सदा॥ लज्जया पुटिता विद्या त्रैलोक्याकर्षिणी परा॥ कूर्चेन पुटिता सर्वपापिनां पापहारिणी॥ वाग्बीजपुटिता चैषा कवित्वादिप्रदायिनी॥ चतुर्विधेति विद्येषा प्रिये सप्तदशाक्षरी॥ ताराद्या षोडशी चान्या भवेत्सप्तदशाक्षरी॰ एषा त्रिविद्या महाविद्या भुक्तिमुक्तिकरी सदा॥ अपरः॥ कमला भुवनेशानी कूर्चबीजं सरस्वती॥ वज्रवैरोचनीये च पूर्वाणि तद्विरुच्चरेत्॥ फट् स्वाहा तु महाविद्या वसुचंद्राक्षरी परा॥ ताराद्यैकोनविंशार्णा ब्रह्मविद्या ‾ स्वरूपिणी॥ एते विद्योत्तमे देवि भुक्तिमुक्तिप्रदे शुभे॰ लक्ष्म्यादिपुटितश्चैव वसुचंद्राक्षरी भवेत्॥ चतुर्धा तु महाविद्या चतुर्वर्गफलप्रदा॥ प्रणवाद्या यदा चैषा भोगमोक्षकरी सदा॥ मंत्रांतरं॥ विद्यांतरं प्रवक्ष्यामि सावधानावधारय ॥ हल्लेखा कूर्चवाग्बीजं वज्रवैरोचनीये हूं॥ अस्त्रं स्वाहा महाविद्या चतुर्दशाक्षरी मता॥ सर्वैश्वर्यप्रदा चैषा सर्वमोहनकारिणी॥ मंत्रांतरं॥ भुवनेशी त्रितत्वं च वाग्बीजं प्रणवं ततः॥ वज्रवैरोचनीये च फट् स्वाहा च ततः परा॥ चतुर्दशाक्षरी चैषा चतुर्वर्गफलप्रदा॥ एषा विद्या महाविद्या जन्ममृत्युविनाशिनी॥ मंत्रांतरं॥ रमा कामस्तथा लज्जा वाग्भवं वज्रवै परं ॥ रोचनीये लज्जाहं हूमस्त्रस्वाहासमन्वितं॥ इयं सा षोडशी प्रोक्ता सर्वकामफलप्रदा॥ कथिताः सकला विद्याः सारात्सारतराः शुभे॥ आसां ऋषिर्भैरवो हि नाम्ना तु क्रोधभूपतिः॥ सम्राट् छंदो देवता च छिन्नमस्ता प्रकीर्तिता॥ षट्दीर्घभाक्स्वरेणैव प्रणवाद्येन सुंदरि॥ खड्गाद्यैर्हृदंतानि षडंगानि प्रकल्पयेत् ॥ नारिदोषादिकं चासां नास्तु सिद्धाः सुरासुरैः॥ सकलेषु च वर्णेषु सकलेष्वाश्रमेषु च॥ अंतिमेषु च वर्णेषु भुक्तिमुक्तिप्रदायिनी॥ प्रणवाद्याश्रया विद्या

योग॥४॥ नातिचिंताबि॥५ स्यां ३ कोणे॥३

शृङ्गारौनसमीरिताः॥अस्याश्चैवविशेषोयंयोषिच्चेत्समुपास्तते॥डाकिनीसामवन्येवडाकिनीभिःप्रजायते॥पतिहीनापुत्रहीनायथास्यात्सिद्धयोगिनी॰इतितेकथितंतत्त्वंरहस्यमखिलंमया॥अतिस्नेहतरंगेणभक्त्याशसेस्मितेप्रिये॥एतासांध्यानपूजादिकंसर्वंषोडशीवद्बोद्धव्यं॥नाभौशुभ्रारविंदंतदुपरिविमलंमंडलंचंद्ररश्मेःसंसारैकसारंत्रिभुवनजननींधर्मकामोदयाढ्यं॥तस्मिन्मध्येत्रिमार्गेत्रितयतनुधरांछिन्नमस्तांप्रशस्तांतांवंदेज्ञानरूपांनिखिलभयहरांयोगिनींयोगमुद्रां॥इतिछिन्नमस्ताप्रकरणम्॥अथश्यामा॰भैरवतंत्रे॥अथवक्ष्येमहाविद्याःकालिकायाःसुदुर्लभाः॥यास्यांविज्ञानमात्रेणजीवन्मुक्तोभवेन्नरः॥मौत्रमित्रारिशुद्धिःस्यान्नात्रमित्रादिलक्षणं॥नवाप्रयासबाहुल्यंसमयाऽसमयादिकं॥नवित्तव्ययबाहुल्यंकायक्लेशकरंनवा॥यएतांचिंतयेन्मंत्रीसर्वकार्यसमृद्धिदां॥तस्यहस्तेसदैवास्तिसर्वसिद्धिर्नसंशयः॥गद्यपद्यमयीवाणीसभायांतस्यजायते॥तस्यदर्शनमात्रेणवादिनोनिष्प्रभांगताः॥राजानोपिचदासत्वंभजंतेकिंपरेजनाः॥दिवारात्रिव्यत्ययंचवशीकर्तुंक्षमोभवेत्॰अंतेचलभतेदेव्यागणत्वंदुर्लभंनरः॥कालीतंत्रे॰॥कामत्रयंवह्निसंस्थंरतिबिंदुसमन्वितम्॥कूर्चयुग्मंतथालज्जायुगलंतदनंतरम्॥दक्षिणेकालिकेचेतिपूर्वबीजानिचोद्धरेत्॥अंतेवह्निवधूंदद्याद्विद्याराज्ञीप्रकीर्तिता॥अन्वर्थमाहयामले॰ककारोजनेरूपत्वात्केवलंमोक्षदायिनी॥ज्वलनार्णसमायोगात्सर्वतेजोमयीशुभा॥मात्रात्रयेणदेवेशिसृष्टिस्थित्यंतकारिणी॥बिंदूनांनिष्कलत्वाच्चकैवल्यफलदायिनी॥शब्दबीजद्वयेनैवशब्दराशिप्रबोधिनी॥बीजद्वयसमायोगात्केवलंज्ञानचित्कला॥ज्ञानबीजद्वयेनैवसृष्टिस्थित्यंतकारिणी॥संबोधनपदेनैवतदासंवित्स्वरूपिणी॥स्वाहाबीजगतामात्रेसर्वपापप्रणाशिनी॥अस्याःप्रयोगः॥प्रातःकृत्यादिकृत्वास्नात्वामंत्राचमनंकुर्यात्॰यथा॥कालिकाभिस्त्रिभिःपीत्वाकाल्यादिभिरुपस्पृशेत्॥द्वाभ्यामोष्ठौहिसृज्यचैकेनक्षालयेत्करं॥मुखघ्राणेक्षणश्रोत्रनाभ्युरस्कंभुजौस्पृशेत्

॥क्रींक्रींक्रींहूंहूंह्रींह्रींदक्षिणेकालिकेक्रींक्रींक्रींहूंहूंह्रींह्रींस्वाहा॥ ५॥ रंजन॥५

॥आचम्यैवंभवेत्कालीवत्सरान्तांप्रपश्यति॥तद्यथा०क्रीं३त्रिराचमेत्॥ॐकाल्यैनमः॥ॐकपालिन्यैनमः॥इतिद्विरुन्मृजेत्॥ॐकुल्लायैनमःकरंप्रक्षालयेत्॥ॐकुरुकुल्लायैनमःइतिमुखे०ॐविरोधिन्यैनमःइतिदक्षिणनासायां॥ॐविप्रचित्तायैनमःइतिवामनासायां॥ॐउग्रायैनमःॐउग्रप्रभायैनमःनेत्रयोः॥ॐदीप्तायैनमःॐनीलायैश्रोत्रयोः॥ॐघनायैनाभौ॥ॐबलाकायैवक्षसि०॥ॐमात्रायैनमःइतिशिरसि॥ॐमुद्रायैनमःॐमितायैनमःइत्यंसयोः॥इत्याचमनंतथाचविश्वसारतंत्रेस्तुतिः॥कादिवर्णानिप्रकृतयस्त्वादिवर्णानिविकृतयः॥कूर्चेद्वयंतत्रप्रकृतिः॥लज्जाद्वयंविकृतिःसंबोधनपदंकीलकं॥पुनरपि॥कादिवर्णानिप्रकृतयःकूर्चेद्वयंप्रकृतिविकृतीलज्जाद्वयंप्रकृतिर्विकृतिः॥वह्निजायाशक्तिरूपाप्रकृतिः॥यएनाजानंतितेसर्वेपाशमुक्ताभवंति॥संसारंतरंतिस्मचमृत्युंजयंति॥सपाप्मानभवति॥ससर्वहत्यांतरति॥समहापातकान्युपपातकानितरतीतिश्रुतिः॥ततःप्रातःकृत्यादिभूतशुद्ध्यंतंविधायमायाबीजेनयथाविधिप्राणायामंकुर्यात्०॥ततःऋष्यादिन्यासः॥अस्यमंत्रस्यभैरवऋषिःउष्णिक्छंदोदक्षिणकालीदेवताह्रींबीजंहूंशक्तिःक्रींकीलकंचतुर्विधपुरुषार्थसिद्ध्यर्थेजपेविनियोगः॥तथाचनिबंधे०कीलकंचाद्यबीजंस्याच्चतुर्वर्गफलप्रदंइति॥शिरसिभैरवऋषयेनमः॥मुखेउष्णिक्छंदसेनमः॥हृदिदक्षिणकालिकायैदेवतायैनमः॥गुह्येह्रींबीजायनमः॥पादयोःहूंशक्तयेनमः॥सर्वांगेक्रींकीलकायनमः॥ततःकरांगन्यासौ॥तदुक्तंकालीतंत्रे०अंगन्यासकरन्यासौयथावदभिधीयते॥भैरवोऽस्यऋषिःप्रोक्तउष्णिक्छंदउदाहृतं॥देवताकालिकाप्रोक्तालज्जाबीजंतुबीजकं॥कीलकंआद्यबीजंस्याच्चतुर्वर्गफलप्रदं॥शक्तिश्चकूर्चबीजंस्यादनिरुद्धसरस्वती॥कवित्वार्थेविनियोगःस्यादित्यादि॥तेनमाययाषडंगन्यासः॥षट्दीर्घभाजाबीजेनप्रणवाद्येनकल्पयेत्॥वीरतंत्रेपि॥दीर्घषट्कयुताद्येनप्रणवाद्येनकल्पयेत्०॥इतिवा॥तद्यथा॥ॐक्रांह्रींअंगु

कामेनपुटितांदेवींकामंतत्पुटितंन्यसेत्॥ पुनःशक्तिपुटांन्यस्त्वाशक्तिंचतत्पुटंन्यसेत्॥ ह्रीं हंहंचपुनर्न्यस्त्वाऋंॠंलृंॡंचपूर्ववत्॥

ष्ठाभ्यांनमः ॐ क्लीं ह्रीं तर्जनीभ्यांस्वाहेत्यादि॰ एवंहृदयादिषु॰ ततोवर्णन्यासः॥ ॐ अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं नमइतिहृदये॥ एं ऐं ओं औं अं
अः कं खं गं घं ङं दक्षबाहौ॥ ङं चं छं जं झं ञं टं ठं डं ढं नमोवामबाहौ॥ णं तं थं दं धं नं पं फं बं भं नमोदक्षपादे॥ मं यं रं लं वं शं षं सं हं लं क्षं नमोवाम
पादे॰॥ विरूपाक्षमतेतु॰ अं आं लृं वर्णपर्य्यन्ताहृदयेममामातृकाः। एषान्ताङादिक्षान्ताश्चरक्षंतुबाहुयुग्मके॥ णमममध्यगतावर्णाःपादि
सान्तास्तथैवच॥ सविंदवःसदापातुजंघयोरुभयोरपीति॥ सबिंदुस्वयंन्यासः॥ तथाचवीरतंत्रे॥ अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं वैहृदयेन्यसेदित्या
दि॥ कालीतंत्रे॰ पुनर्निर्विंदुः॥ अ आ इ ई उ ऊ ऋ ॠ लृ ॡ वैहृदयंस्पृशेदित्यादि॥ अन्यत्रापि॥ सबिंदूंस्तान्न्यसेदेतान्निर्बिंदूंश्चाथवर्णका
निति॥ आचार्य्यपरिगृहीतभैरवीयेवाक्यंविनिर्गमकं॥ अथषोढान्यासः॥ तदुक्तंवीरतंत्रे॥ केवलांमातृकांन्यस्त्वामातृकांतारसंपुटां॥ मातृ
कापुटितंतारंन्यसेत्साधकसत्तमः॥ श्रीबीजपुटितांतांतुमातृकापुटितंतुतत्॥ कामेनपुटितांतांतुपुनस्तत्पुटितांतुतत्॥ पुनःशक्त्याच
पुटितांशक्तिंचतत्पुटांन्यसेत्॰ बीजहंहंहेनपुटितांबीजहंहंतथैवच॥ इतिन्यस्त्वामहेशानिऋंॠंलृंॡंचपूर्ववत्॥ मूलेनपुटितांदेवी
तत्पुटंमंत्रमेवच॥ अनुलोमविलोमेनन्यस्त्वामंत्रंयथाविधि॥ मूलेनाष्टशतंकुर्य्याद्व्यापकंतदनंतरं॥ यथा श्री अं श्री एवंतथैवमातृकापु
टितं॥ एवंकामपुटितंतत्पुटितंकामः॥ एवंशक्तिपुटितंमातृकातत्पुटितोशक्तिंन्यसेत्॥ ह्रींहंयंऋंॠंलृंॡंपूर्ववदितिह्रींहंयंऋंॠंलृंॡंपुटि
तांमातृकां॥ एवंमातृकापुटितंतत्तन्मंत्रपुटितांमातृकांन्यस्त्वामातृकापुटितंमंत्रं॥ पुनरनुलोमविलोमेनकेवलमंत्रंमातृकास्थानेषुविन्यस
मूलेनाष्टोत्तरशतेनव्यापकंकुर्यात्॥ एवंन्यासस्तारायाअपिकार्य्यः॥ इतिगुह्येनदुर्गायाअंगषोढाप्रकीर्तिता॥ तारायाःकालिकायाश्च
एतन्मुख्यास्तथापराः॥ कृतेस्मिन्न्यासवर्य्येचसर्वपापंविनश्यति॥ अथतत्त्वन्यासः॥ तद्यथा॥ मूलंचत्रिखंडंविधायप्रणवाद्येन

ॐ क्रीं क्रीं क्रीं हूं हूं ह्रीं ओं आत्मतत्त्वायस्वाहेतिपादादिनाभिपर्य्यन्तम्॥१

ॐ दक्षिणे कालिके ॐ विद्यातत्त्वाय स्वाहेत्यादिनाभिहृदयपर्यंतम्॥१॥ ॐ क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं ॐ शिवतत्त्वाय स्वाहेति हृदयादिशिरःपर्यंतम्॥१

प्रथमखंडांते ॐ आत्मतत्त्वाय स्वाहेति पादादिनाभिपर्यंतम्॥ द्वितीयखंडांते ॐ विद्यातत्त्वाय स्वाहेत्यादिनाभ्यादिहृदयांतं॥ तृतीयखंडां
ते शिवतत्त्वाय स्वाहेत्यादिहृदयादिशिरःपर्यंतम्॥ तदुक्तं स्वतंत्रतंत्रे॥ मूलविद्यां त्रिखंडांते प्रणवाद्यैर्यथाविधि॥ आत्मविद्याशिवैस्तत्त्वैस्त
त्त्वन्यासं समाचरेत्॥ अथ बीजन्यासः॥ आद्यबीजं ब्रह्मरंध्रे द्वितीयं भ्रूमध्ये तृतीयं ललाटे चतुर्थबीजं नाभौ पंचमबीजं गुह्ये षष्ठबीजं वक्त्रे स
प्तमबीजं सर्वांगे॥ तदुक्तं कुमारीकल्पे॰ ब्रह्मरंध्रे भ्रुवोर्मध्ये ललाटे नाभिदेशके॥ गुह्ये वक्त्रे च सर्वांगे सप्तबीजं क्रमान्न्यसेत्॰ एतत्त्रयं काम्य
म्॰ ततो मूलेन सप्तधा व्यापकं कृत्वा यथाविधि मुद्रां प्रदर्श्य देवीं ध्यायेद्यथा॥ कालीतंत्रे॰ करालवदनां घोरां मुक्तकेशीं चतुर्भुजां॥ कालिकां
दक्षिणां दिव्यां मुंडमालाविभूषितां॥ सद्यःछिन्नशिरःखड्गवामोर्द्ध्वाधःकरांबुजां॥ अभयं वरदं चैव दक्षिणाधोर्द्ध्वपाणिकां॥ महामेघप्रभां श्या
मां तथा चैव दिगंबरां॥ कंठावसक्तमुंडालीगलद्रुधिरचर्चितां॥ कर्णावतंसतानीतशवयुग्मभयानकां॥ बालार्कमंडलाकारनेत्रत्रयविभू
षितां॥ घोरदंष्ट्राकरालास्यां पीनोन्नतपयोधरां॥ शवानां करसंघातैः कृतकांचीहसन्मुखीं॥ सृक्कद्वयगलद्रक्तधाराविस्फुरिताननां॥ घोररा
वां महारौद्रीं श्मशानालयवासिनीं॥ दंतुरां दक्षिणव्यापिलंबमुक्तकचोच्चयां॥ शवरूपमहादेवहृदयोपरिसंस्थितां॥ शिवाभिर्घोररावाभि
श्चतुर्दिक्षु समन्वितां॥ महाकालेन सार्धं तामुपविष्टारता लितां॥ सुखप्रसन्नवदनां स्मेराननसरोरुहां॥ एवं विचिंतयेद्देवीं श्मशानाल
यवासिनीं शवयुग्मेति॥ घोरवाणावतंसेति प्रेतकर्णपूरेति च॥ शकुनपक्षसंयुक्तबाणकर्णविभूषिताद्रूति॥ विगतासुकिशोराभ्यां कृत
कर्णावतंसिनी मिति दर्शनाद्भयमेव पाठः॥ भावनावस्तुनः पुनः शकुनपक्षरूर्ध्वशवजपवलीति यस्य ख्यातिरिति रहस्यार्थः॥ ध्याना
नंर स्वतंत्रे॰ अंजनाद्रिनिभां देवीं करालवदनां शिवां॥ मुण्डमालावलीकीर्णां मुक्तकेशीं स्मिताननां॥ महाकालहृदंभोजस्थितां पीनपयो

महाकालेन च समं विपरीतरतातुरां॥४ र्णावतंसे॥३ मुक्तालंबि॥५ कालीं सर्वकामार्थसिद्धिदां॥४॥

स

धरां॥विपरीतरतासक्तां घोरदंष्ट्रां शवैः सह॥नागयज्ञोपवीताढ्यां चंद्रार्द्धकृतशेखरां॥सर्वालंकारसंयुक्तां मुण्डमालाविभूषितां॥मृतहस्त
सहस्रेस्तु कृतकांचीदिगंशुकां॥शिवाकोटिसहस्रैस्तु योगिनीभिर्विराजितां॥रक्तपूर्णमुखांभोजां मद्यपानप्रमत्तिकां॥वन्ह्यर्कशशिनेत्रांतवे
क्रविस्फुरिताननां॥विगतासुकिशोराभ्यां कृतकर्णावतंसिनीं॥कंर्णावितंसमुण्डालिगलद्रुधिरचर्चितां॥श्मशानवह्निमध्यस्थां ब्रह्मकेशव
सेवितां सद्यः कृतशिरःखड्गवराभीतिकराम्बुजामिति शिवनत्वाद्भावनात्काली नंत्रलत्॥इति ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कुर्याद्य
था॥स्ववामे भूमौ हूं गर्भत्रिकोणं विलिख्य तत्र त्रिपदिकामारोप्य फडिति शंखं प्रक्षाल्य तदुपरि अर्घ्यपात्रं संस्थाप्य मूलेन शुद्धजलादिना शंखा
दिपात्रमापूर्य्य गंधादिकं दत्वा गंगे चेत्यादिना तीर्थमावाह्य मं वन्हिमंडलाय दशकलात्मने नमः आधारे अं सूर्यमंडलाय द्वादशकलात्मने नमः पा
त्रे ॐ सोममंडलाय षोडशकलात्मने नमः जले संपूज्य ॐ ह्रां हृदयाय नमः॥ॐ ह्रीं शिरसे स्वाहा॥ॐ ह्रूं शिखायै वषट्॥ॐ ह्रैं कवचाय हुं॥इ
त्यङ्गैः शिसुखासुषु अग्रे ॐ ह्रौं नेत्रत्रयाय वौषट्॥चतुर्दिक्षु ॐ ह्रः अस्त्राय फट्॥तदुपरि मत्स्यमुद्रया छाद्य मूलमंत्रं दशधा जप्त्वा धेनुमुद्र
यामृतीकृत्वास्त्रेण संरक्ष्य भूतिनीयोनिमुद्रे प्रदर्श्य तज्जलं किंचित् प्रोक्षणीपात्रे निःक्षिप्य मूलेन तेनोदकेनात्मानं पूजोपकरणं चाभ्युक्ष्य पी
ठपूजामारभेत्॥अस्याः पूजायंत्रं॥आदौ बिंदुं स्वबीजं भुवनेशीं च विलिख्य तत्र त्रिकोणं लिखेत्॰ तद्बाह्ये त्रिकोणचतुष्टयं वृत्तमष्टदलं पुनर्वृ
त्तं चतुर्द्वारात्मकं भूगृहं एवं यंत्रं विलिखेत्॰ तदुक्तं कालीतंत्रे॰ आदौ त्रिकोणमालिख्य त्रिकोणं तद्बहिर्लिखेत्॥ततो वै विलिखेन्मंत्री त्रिको
णत्रयमुत्तमं॥ततो वृत्तं समालिख्य लिखेदष्टदलं ततः॥वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककं॥कुमारीकल्पेपि॥मध्ये तु बैंदवं चक्रं बीज
मायाविभूषितमित्यादि॥अत्र विशेषाधारो मुण्डमालायाम्॰ ताम्रपात्रे कपाले वा श्मशानकाष्ठनिर्मिते॥शनिभौमदिने जापिशरीरे मृतस

चिंतामणिगृहंतथा॥२

भवे॥स्वर्णरौप्येथलोहे वा चक्रं कार्य्यं विधानतः॥तंत्रे॥शक्त्यग्निभ्यां चषट्कोणं शक्तिभिश्च नवात्मकं॥पद्मेवसुदले भूमिपूश्चतुर्द्वारसंयुतमिति
॥पीठपूजा कुमारीकल्पे॰ पीठपूजां ततः कुर्य्यादाधारशक्तिपूर्वकं॥प्रकृतिं कमठं चैव शेषं पृथ्वीं तथैव च॥सुधांबुधिं म
णिद्वीपं चिंतयेच्च मणिगृहं॥श्मशानं पारिजातं च तन्मूले रत्नवेदिकां॥तस्योपरि मणेः पीठं न्यसेत्साधकसत्तमः॥चतुर्दिक्षु मुनीन्देवान्शिवांश्च
शवमुण्डकान्॥धर्माद्यधर्मादींश्चेति पावकादिचतुष्टये॥हृदिकंदं तथा पद्मं सूर्यसोममहेश्वरि॥वैश्वानरं तथा सत्वं रजश्चैव तमस्तथा॥आत्मानं चैव
विन्यस्य शक्तिं हृत्कमले न्यसेत्॥ततआधारशक्त्यादिह्रीं ज्ञानात्मने नमः इत्यंतं संपूज्य केशरेषु पूर्वादितः॥इच्छा ज्ञाना क्रिया चैव कामिनी काम
दायिनी॰ रती रतिप्रिया नंदा मध्ये चैव मनोन्मनी॥प्रणवादिनमोंतेन पूजयेत्॥तदुपरि ऐं परायै अपरायै परापरायै हसौः सदाशिवमहाप्रे
तपद्मासनाय नमः॥ततः पुनर्ध्यात्वा पुष्पांजलावानीय मूलमंत्रकल्पितमूर्तावावाहयेत्॥ॐ देवेशि भक्तिसुलभे परिवारसमन्विते॥यावत्त्वां
पूजयिष्यामि तावत्त्वं सुस्थिरा भव॥ततो मूलमुच्चार्य्य अमुकेदेवि इहावह २ इह तिष्ठ २ इह सन्निधेहि २ इह सन्निरुध्यस्व ततो हुमित्यवगु
ण्ठ्यागमंत्रैः सकलीकृत्य वमिति धेनुमुद्रयामृतीकृत्य परमीकरणमुद्रया परमीकृत्य भूतिनी आकर्षणी योनिमुद्राः प्रदर्श्य प्राणप्रतिष्ठां
कुर्य्यात्॥ततो मूलेन पाद्यादिभिः संपूज्य मूलमुच्चार्य्य एतत्पाद्यममुकदेवतायै नमः॥एवमिदमर्घ्यं स्वाहा॰ इदमाचमनीयं स्वधा एवं गं
धो नमः एतानि पुष्पाणि वौषट्॥ततो मूलेन पंचपुष्पांजलिं दत्वा धूपदीपौ दद्यात्॥ॐ वनस्पतीत्यादिमंत्रं मूलमंत्रं चोच्चार्य्य एष धूपो नमः दीप
मंत्रस्तु स्वप्रकाशो महादीपः सर्वत्र तिमिरापहः॥सबाह्याभ्यंतरंज्योतिर्दीपोयं प्रतिगृह्यतां॥मूलमुच्चार्य्य एष दीपो नमः ततः ॐ जयध्वनि
मंत्रमातः स्वाहेति घंटां संपूज्य वामहस्तेन तां वादयन् नीचैर्धूपं दत्वा दृष्टिपर्य्यंतं दीपं दद्यात्॥ततो मूलेन पुष्पांजलित्रयं दत्वा यथोपप

वनस्पतिरसोद्भूतोगंधाढ्यः सुमनोहरः॥घ्राणेचसर्वदेवानां धूपोयं प्रतिगृह्यतां॥२

ह्रीं २ ह्रूं २ ह्रैं २ ह्रौं २ ह्रः २ ह्रां

त्नं नैवेद्यं दद्यात्॥ ततः आवरणपूजा॰ श्रीअमुकदेव्यावरणं ते पूजयामीत्याज्ञां गृहीत्वा केसरेषु अग्नीशासुरवायुषु अग्रे चतुर्दिक्षु च॥ ॐ क्रां
हृदयाय नमः ईशाने ॐ क्रीं शिरसे स्वाहा॥ नैर्ऋते ॐ क्रूं शिखायै वषट्॥ वायौ ॐ क्रैं कवचाय हुं॥ अग्रे ॐ क्रौं नेत्रयाय वौषट्॥ दिक्षु ॐ क्रः अस्त्राय फ
ट्॥ इत्यादिषडंगैः पूजयेत्॰ ततो बहिः षट्कोणे ॐ काल्यै नमः॥ एवं कपालिन्यै कुल्लायै कुरुकुल्लायै॥ विरोधिन्यै विप्रचित्तायै अंत्यत्र्यस्रे॥
उग्रायै उग्रप्रभायै दीप्तायै॥ द्वितीयत्र्यस्रे॥ नीलायै घनायै बलाकायै तृतीयत्र्यस्रे॥ मात्रायै मुद्रायै मितायै॥ सर्वाः श्यामा असिकरा मुण्ड
मालाविभूषणाः॥ तर्जनीं वामहस्तेन धारयंत्यः शुचिस्मिताः॥ दिगंबरा हसन्मुखाः स्वस्वभूषणभूषिताः॥ इति ध्यात्वा प्रणवाद्येन पूजयेत्
ततोऽष्टपत्रेषु पूर्वादि॥ ॐ ब्राह्म्यै नमः॥ ॐ एवं नारायण्यै माहेश्वर्यै चामुण्डायै कौमार्यै अपराजितायै वाराह्यै नारसिंह्यै एता गंधादिभिः
संपूज्य पत्राग्रेऽसितांगादिभैरवान्पूजयेत्॥ ततो मूलेन पुष्पांजलित्रयं दद्यात्॥ ततः पाद्यादिना महाकालं पूजयेत्॥ तथा च कुमारीकल्पे॥ देव्या
स्तद्दक्षिणे भागे महाकालं प्रपूजयेत्॥ हूं स्सौं यां रां लां वां आं क्रों महाकालभैरव सर्वविघ्नान्नाशय २ ह्रीं श्रीं फट् स्वाहा अनेन पाद्यादिभिराराध्य
त्रिस्तर्पयेत्॰॥ मूलेन देवीं पंचोपचारैः पूजयेत्॰ तथा च कालीतंत्रे॰ महाकालं यजेद्यत्नात्पश्चाद्देवीं प्रपूजयेत्॥ कालीकल्पे॥ कूर्चं स्सौं यां
सकुद्दयरां लां वां आं च क्रों ततः॥ महाकालभैरवेति सर्वविघ्नान्नाशयेति च॥ नाशयेति पुनः प्रोच्य मायां लक्ष्मीं समु चरेत्॥ फट्स्वाहया समायु
क्तो मंत्रः सर्वार्थसाधकः॥ ततो देवीं ध्यायन् यथाविधिं जप्त्वा ॐ गुह्यादिनेत्यादिना वामहस्ते समर्प्य यंत्रलेपं वामहस्तेऽकृत्वा सव्यहस्तकनिष्ठया
मायाबीजं विलिख्य तया तिलकं कुर्यात्॥ अन्यत्र॰ वामे कृत्वा यंत्रलेपं वामसव्यकनिष्ठया॥ तथा च तिलकं कुर्यात् मंत्रेणानेन साधकः॥
॥ॐ यं यं स्पृशामि पादेन यो मां पश्यति चक्षुषा॥ स एव दासतां यातु राजानो दुष्टदस्यवः॥ जपकाले तु कर्पूरयुक्ता जिह्वा कार्या॥ उक्तं

शक्ति ३

चं कर्पूराढ्यासद्राजिह्वा कर्तव्या जापकर्मणीति विश्वसारवाक्यात्॥ इयं काम्यजपे इति तत्वं॥ ततस्तत्साप्रदक्षिणीकृत्याष्टांगप्रणतिं कृत्वा श्रीजगन्मंगलं नाम कवचं पठेत्॥ ततः आवरणदेवतादेव्यंगे विलाप्य संहारमुद्रया अमुकी देवि क्षमस्वेति विसृज्य तत्तेजः पुष्पेण सार्द्धं हृद्यारोपयेत्॥ उत्तरे शिखरे जाता भूम्यां पर्वतवासिनी॥ ब्रह्मयोनिसमुत्पन्ना गच्छ देवि ममान्तरमिति॥ ततो नैवेद्यं किंचिदुच्छिष्टं चांडालिन्यै नमः इत्यैशान्यां दिशि दत्वा शेषं शिष्टेभ्यो दत्वा किंचित्स्वीकृत्य पादोदकं पीत्वा निर्माल्यं विधृत्य यथेष्टं विहरेदिति॥ ततो मूलेनाष्टोत्तरशताभिमंत्रितं पुष्पचंदनादिकं धृत्वा त्रैलोक्यं वशमानयेत्॥ तथा च॥ सर्वसिद्धीश्वरो भूत्वा वत्सराद्भैरवो भवेत्॥ अस्य पुरश्चरणे लक्षजपः॥ तत्र क्रमः॥ तथा च कालीतंत्रे॥ लक्षमेकं जपेद्विद्यां हविष्याशी दिवा शुचिः॥ रात्रौ तांबूलपूर्णास्यः शय्यायां लक्षमानतः॥ व्यवस्थामाह स्वतंत्रतंत्रे॥ दिवानक्तं शुचिर्भूत्वा हविष्याशी भवेन्नरः॥ ततस्तद्दशांशेन होमयेद्विषाप्रिये॥ अंगस्य कालान्तरमाह॥ नीलसारस्वततंत्रे॥ लक्षमेकं जपेन्मंत्री हविष्याशी दिवा शुचिः॥ अशुचिश्च तथा रात्रौ लक्षमेकं तथैव च॥ दशांशं होमयेन्मंत्री तर्पयेदभिषेचयेत् इति संप्रदायिकाः॥ वस्तुतस्तु कुमारीकल्पेपि॥ लक्षमेकं जपेद्विद्यां हविष्याशी दिवा शुचिः॥ रात्रौ तांबूलपूरास्यः शय्यायां लक्षमानतः॥ एवं लक्षद्वयं जप्त्वा तद्दशांशेन मंत्रवित्॥ अयुतं होमयेद्देवि दिवा रात्रि प्रभेदतः॥ तेन दिवा लक्षं जप्त्वा दिवा तद्दशांशहोमं कुर्यात्॥ रात्रौ लक्षं जप्त्वा रात्रौ तद्दशांशहोमं कुर्यात् इति रहस्यार्थः॥ ९ ॥६॥ ॥ रात्रिजपे तु कालनियमो यथा मुंडमालायां॥ गते तु प्रथमे यामे तृतीयप्रहरावधि॥ निशायां च प्रजप्तव्यं रात्रिशेषे जपेन्न च॥ द्विजातीनां च सर्वेषां दिवा विधिरिहोच्यते॥ शूद्राणां च तथा प्रोक्तं रात्राविष्टं महाफलमिति॥ अथ मंत्रभेदाः॥ तंत्रे॥ वर्गाद्यं वह्निसंयुक्तं रतिबिंदुविभूषितं॥ एकाक्षरो महामंत्रः सर्वकामफलप्रदः॥ त्रिगुणा तु विशेषेण सर्वेश

ॐह्रींह्रींहूंहूंक्रींक्रींक्रींदक्षिणेकालिकेक्रींक्रींक्रींहूंहूंह्रींह्रींस्वाहा॥६

स्वप्रबोधिका॥पूजादिकंतु प्रातः कृत्यादिप्राणायामांतंकर्मविधायपूर्वोक्तऋषिछंदोदैवतानिविन्यस्यवर्णन्यासंकृत्वाकरांगन्यासौ
कुर्याद्यथा॥ॐक्रांअंगुष्ठाभ्यांनमः॥ॐक्रींतर्जनीभ्यांस्वाहेत्यादि॥एवंहृदयादिन्यासंकुर्यात्॥तथावीरतंत्रे॥दीर्घषट्कयुजाद्येनप्रणवा
द्येनकल्पयेत्॥षडंगानिमनोरस्यजातियुक्तेनदेशिकः॥अन्यत्सर्वंपूर्ववत्॥अनयोःपुरश्चरणंलक्षजपः॥तथाचसिद्धेश्वरतंत्रे॥एवं
ध्यात्वाजपेन्मंत्रंलक्षमेकंविधानतः॥तद्दशांशंविधानेनहोमयेत्साधकोत्तमः॥अपरोमंत्रः॥देवीतंत्रे॰मायाद्वंद्वंकूर्चयुग्मंमेंद्रांतेमादनत्र
यं॥मायाविंद्वीश्वरयुतंदक्षिणेकालिकेपदं॥संहारक्रमयोगेनबीजसप्तकमुद्धरेत्॥एकविंशत्यक्षरोयंताराद्यःकालिकामनुः॥अस्यार्थः॥त
थाचतंत्रे॥मायेकूर्चेत्रयःकामावह्न्यंतरतिसंयुताः॥बिन्दुयुक्तामहेशानिसंबोधनपदद्वयं॥सप्तबीजानिसंसारेःस्वाहांतःप्रणवादिकः
इत्यत्रस्फुटलाद्रेफज्वनलः॥इंद्रस्यसमीपमैंद्रंरेफइत्यर्थस्तेनप्रणवंमायाद्वयंकूर्चद्वयंनिजबीजत्रयंदक्षिणेकालिकेपुनर्बीजत्रयंकू
र्चद्वयंमायाद्वयमित्येकविंशत्यक्षरः॥अस्याःपूजादिकंदक्षिणावत्॥पुरश्चरणंतुलक्षजपः तंत्रोक्तत्वात्॥होमस्तत्तद्दशांशतः॥विश्वसा
रेमंत्रांतरं॥स्वाहांतोयंत्रयोविंशत्यक्षरोमंत्रराजकः॥विनाप्रणवंदेवेशिद्वाविंशत्यक्षरोमतः॥स्वाहांविनाचैकविंशत्यक्षरःकामदोम
नुः॥विंशत्यर्णामहाविद्यास्वाहाप्रणववर्ज्जिता॥ध्यानपूजादिकंसर्वंदक्षिणावदुपाचरेत्॥तंत्रेमंत्रांतरं॥प्रणवंपूर्वमुद्धृत्यहृल्लेखाबी
जमुद्धरेत्॥रतिबीजंसमुद्धृत्यपंच मभगान्वितं॥तद्द्वयेनसमायुक्ताविद्याराज्ञीप्रकीर्तिता॥रतिबीजंनिजबीजं॥तथाचासुरज्ञातंत्रे॰
रत्याद्याकालिकापातुह्राविंशत्यक्षररूपिणीतिचकवचेप्रतिपादितंतेनप्रणवोमायानिजबीजंपपंचमोमकारः भगएकारःवह्निव
ल्लभा॥अस्याःपूजाप्रातःकृत्यादिप्राणायामांतंकर्मसमाप्यऋष्यादिन्यासंकुर्य्यात्॥अस्यमंत्रस्यभैरवऋषिःविराट्छंदःसिद्धि

ॐह्रींक्रींमेस्वाहांतोमंत्रः॥४॥

७क्रीं क्रीं क्रीं स्वाहा ॥क्रीं हूं ह्रीं स्वाहा॥७ मंत्र।४ ७क्रीं क्रीं क्रीं फट् स्वाहा

कालीब्रह्मस्वरूपाभुवनेश्वरीदेवतानिजबीजंलज्जाबीजंशक्तिःवर्णन्यासकरांगन्यासौदक्षिणावत्॥ध्यानंतु० रक्ताब्धिबिंदुबिंबस्रवरस्मृतरा
साक्षाद्विनग्नांगी त्रिनेत्रा सव्येपाणौकपालोद्गलदसृजमयोसुक्तकेशीपिबंती॥दिग्वस्त्राबद्धकांचीमणिमययुकुटाद्यैर्युतादीप्तजिह्वापायात्सो
लोन्मत्ताभारविशालिविलसत्कुंडलालीढपादा॥१॥एवंध्यात्वापूजादिकंतुदक्षिणावत् कार्यंपुरश्चरणंतु एक विंशतिसहस्रजपः॥तदुक्तं
कालीतंत्रे० जपेद्विंशतिसाहस्रंसहस्रैकेनसंयुतं॥होमयेत्तद्दशांशेनमृद्वपुष्पेणतत्रैवहि॥प्रकारांतरंविश्वसारतंत्रे॥मूलबीजंततोमायांलज्जा
बीजंततःपरं॥महाविद्यामहाकाल्यामहाकालेनभाषिता॥वर्गाद्यंवह्निसंयुक्तंरतिबिंदुसमन्वितं॥एतत्त्रयंवह्निवल्लभा॥अथपंचाक्षरींविद्यां
शृणुष्वकमलानने॥प्रजापतिंसमुद्धृत्यवह्न्यारूढंततःप्रिये॥चतुर्थस्वरसंयुक्तंनादबिंदुसमन्वितं॥बीजत्रयंक्रमेणैवततदंतेवह्निसुंदरी
॥पंचाक्षरीमहाविद्याकथितापद्मयोनिना॥मंत्रांतरं॥मूलत्रयंफट्वह्निवल्लभा॥षडक्षरीमहाकालीशृणुवक्ष्यामिपार्वति॥बीजंत्रयंसमुद्धृ
त्यअस्त्रवर्णसमुद्धरेत्॥वह्निजायावधिःप्रोक्ताविद्यात्रैलोक्यमोहिनी॥मंत्रांतरं॥निजबीजंकूर्चंलज्जापुनस्तान्येववह्निवल्लभा॥अष्टाक्ष
रीमहाविद्याकथ्यतेशृणुपार्वति॥बीजंत्रयंक्रमेणैवपुनर्बीजत्रयंसुधीः॥स्वाहांताकथितांविद्याचतुर्वर्गफलप्रदा॥मंत्रांतरं॥वाग्भवंमू
लबीजंपुनस्तदेवकालिकायेवह्निवल्लभा॥एकादशाक्षरीविद्याकथ्यतेशृणुपार्वति॥वाग्भवंहृदयंपश्चात्वह्न्यारूढंप्रजापतिं॥चतुर्थ
स्वरसंयुक्तंनादबिंदुविभूषितं॥द्विगुणंतुततःकृत्वाडेंतंचकालिकापदं॥स्वाहांताकथिताविद्याप्रियेचैकादशाक्षरी॥एतासांपूजाप्रयोगः
॥प्रातःकृत्यादिप्राणायामांतंकर्मकृत्वाऋष्यादिन्यासंकुर्यात्॥तदुक्तंतत्रैव॥ऋषिःस्याद्दक्षिणामूर्तिःछंदःपंक्तिउदाहृतं॥परात्परतराश
क्तिःकालिकादेवतास्मृता॥एकादशाक्षरीविद्याकालिकायाःसुदुर्लभा॥लक्षत्रयंजपेद्विद्यांपुरश्चरणकर्मणि॥अन्यासांवर्णलक्षंस्यात्क

क्रीं हूं ह्रीं क्रीं हूं ह्रीं स्वाहा ५ ४ ऐंनमो क्रीं क्रीं क्रीं कालिके स्वाहा॥४ अक्षराणि हीनो १

॥क्रीं हूं ह्रीं दक्षिणे कालिके स्वाहा॥५ ४ द्वयमिति पुस्तकांतरे॥ ३ श्वं स्वपमित्यपि पुस्तकांतरे॥३

थितं पञ्चयोनिना॥ अस्या ध्यानं॥ चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषितां॥ खड्गं च दक्षिणे पाणौ बिभ्रतीं दीवरद्वयं॥ कर्त्रीं च खर्प्परं चैव क्रमाद्वामेन बिभ्रतीं॥ द्यां लिखंतीं जटामेकां बिभ्रतीं शिरसा द्वयी॥ मुण्डमालाधरां शीर्षे ग्रीवायामपि चापरां॥ वक्षसा नागहारं च बिभ्रतीं रक्तलोचनां॥ कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्वितां॥ वामपादं शवहृदि संस्थाप्य दक्षिणं पदं॥ विलाप्य सिंहपृष्ठे तु लेलिहानां शवं स्वयं॥ साट्टहासां महाघोररावयुक्तां सुभीषणां॥ अन्यत्सर्वं दक्षिणावत्॥ पूर्वोक्तानां च मंत्राणां पूजादिकं दक्षिणावत्॥ अस्याः पुरश्चरणं लक्षत्रयं॥ अन्यासां मंत्रवर्णसंख्यलक्षजपः॥ मूलबीजं ततो मायां लज्जाबीजं ततः परं॥ दक्षिणे कालिके चेति तदंते वह्निसुंदरी॥ ऐकादशाक्षरी विद्या चतुर्वर्गफलप्रदा॥ कवचं मूलबीजाद्यं तदंते भुवनेश्वरी॥ दक्षिणे कालिके चेति अष्टार्णा समुदीरिता॥ दशाक्षरी महाविद्या चतुर्वर्गफलप्रदा॥ अथापरां प्रवक्ष्यामि विद्यां विंशतिवर्णिकां॥ यस्याः प्रसादाद्देवेशि भवेद्भूमिपुरंदरः॥ मूलबीजद्वयं ब्रूयात्ततः कूर्चद्वयं वदेत्॥ लज्जाद्वयं समुद्धृत्य संबुद्ध्यंतं पदद्वयं॥ पूर्ववत्स्यात्तथा बीजान्यंते च वह्निसुंदरी॥ प्रकारांतरमाह॥ मूलबीजद्वयं ब्रूयात्ततः कूर्चद्वयं वदेत्॥ लज्जाद्वयं समुद्धृत्य अन्यत्सर्वं च पूर्ववत्॥ एतासां पूजाप्रयोगः॥ प्रातःकृत्यादि प्राणायामांतं कर्म विधाय ऋष्यादिन्यासं कुर्यात्। तदुक्तं तत्रैव॥ ऋषिः स्याद्दक्षिणामूर्तिः पंक्तिश्छंद उदाहृतं॥ देवता सद्भिरुद्दिष्टा काली दक्षिणपूर्विका॥ निजबीजं बीजमस्याः ह्लेखा शक्तिरीरिता॥ ततश्च साधकश्रेष्ठैः कीलकं वह्निवल्लभा॥ अथापरां प्रवक्ष्यामि विद्यां त्रिभुवनेश्वरीं॥ निजबीजं समुद्धृत्य तदंते वह्निसुंदरी॥ भैरवोऽस्य ऋषिः प्रोक्तः सर्वतंत्रसमन्वितः॥ अष्टाक्षरी तु या प्रोक्ता सर्वतंत्रेषु गोपिता॥ निजबीजद्वयं कूर्चद्वयं लज्जाद्वयं ततः॥ स्वाहांता कथिता विद्या काली सर्वफलप्रदा॥ निजं कूर्चं तथा लज्जां तदंते वह्निसुंदरी॥ पंचाक्षरी महाविद्या पंचवक्त्रऋषिः स्मृता॥ नवाक्षरीं महाविद्यां शृणुष्व कमलानने॥ निजबीजत्रयं कूर्चद्वयं लज्जाद्वयं ततः॥ स्वाहांता कथिता विद्या सर्व

क्रीं स्वाहा॥३॥ ३ क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा॥३ ह्रीं स्वाहा॥ २

क्रीं क्रीं क्रीं ह्रीं ह्रीं हुं हुं हुं हुं ह्रीं ह्रीं क्रीं क्रीं क्रीं स्वाहा ॥५॥ क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके स्वाहा ॥३॥ नमो ऐं क्रीं क्रीं कालिकायै स्वाहा

संपत्प्रदा मता ॥ अथापरां प्रवक्ष्यामि विद्यां तां च नवाक्षरीं ॥ मूलबीजं समुद्धृत्य संबुद्ध्यंतं पदद्वयं ॥ स्वाहांता कथिता विद्या सर्वशत्रुभयंकरी ॥ अथवाष्टाक्षरी विद्यां शृणुष्व कमलानने ॥ निजबीजं ततः कूर्चं ततो मायां समुद्धरेत् ॥ पुनस्तामेव चोच्चार्य स्वाहांता मोक्षदायिनी ॥ अथापरां प्रवक्ष्यामि दशनलसमन्वितं ॥ मूलद्वयं कूर्चयुग्मं तथा लज्जाद्वयं ततः ॥ पुनस्तान्येव बीजानि तदंते वह्निसुंदरी ॥ चतुर्दशाक्षरी विद्या चतुर्वर्गफलप्रदा ॥ ब्रह्मास्त्रयं समुद्धृत्य रतिवह्निसमन्वितं ॥ नादबिंदुसमायुक्तं लज्जाकूर्चद्वयं ततः ॥ पुनः क्रमेण चोद्धृत्य वह्निजायावधिर्मनुः ॥ षोडशी यं समाख्याता विद्याकल्पद्रुमोपमा ॥ मायातंत्रे० हृदयं वाग्भवं देवि निजबीजयुगं ततः ॥ कालिकायै पदं चोक्त्वा तदंते वह्निसुंदरी ॥ तंत्रांतरे० नमः पाशांकुशौ वे धा फट् स्वाहा कालि कालिके ॥ दीर्घतनुच्छदः कालीमनुः पंचदशाक्षरः ॥ अस्यार्थः ॥ नमः आमिति फट् स्वाहा कालिकालिके वेधा इति पाठे मूलबीजमिति तेन नमः आं क्रों हूं क्रीं फट् स्वाहा कालिकालिके स्वरूपमिति ॥ एतासां पूजनं चैव दक्षिणावदुपाचरेत् ॥ लक्षसंख्यजपं कुर्य्यात्पुरश्चरणसिद्धये ॥ एतासां पूजायंत्रे कालीतंत्रे ॥ आदौ त्रिकोणं विन्यस्य त्रिकोणतद्बहिर्लिखेत्० ॥ ततो वै विलिखेन्मंत्री त्रिकोणत्रयमुत्तमं ॥ ततो वृत्तं समालिख्य लिखेदष्टदलं ततः ॥ वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककं ॥ कुमारीकल्पे ॥ मध्ये तु बैंदवं चक्रं बीजमायाविभूषितं ॥ यंत्रनिर्माणपात्रं मुण्डमालातंत्रे० ताम्रपात्रे कपाले वा श्मशानकाष्ठनिर्मिते ॥ शनिभौमदिने वापि शरीरे मृतसंभवे ॥ स्वर्णे रौप्येथ लोहे वा चक्रं कार्य्यं विधानतः ॥ अथ गुह्यकाली विश्वसारतंत्रे० अथ वक्ष्ये महेशानि विद्यां सर्वफलप्रदां ॥ चतुर्वर्गप्रदां साक्षान्महापातकनाशिनीं ॥ सर्वसिद्धिप्रदां नित्यां भुक्तिमुक्तिप्रदायिनीं ॥ गुह्यकाली महाविद्यां त्रैलोक्ये चातिदुर्लभाम् ॥ इन्द्रादिरूढवर्गाद्यं रतिबिंदुसमन्वितं ॥ त्रिगुणं च तथा कृत्वा ईशानं च समुद्धरेत् ॥ षष्ठस्वरसमायुक्तं नादबिंदुकलान्वितं ॥ द्विगुणं च ततः कृत्वा

१वदेदितियुक्तः पाठः॥

ईशद्वयं समुद्धरेत्॥ वामाक्षिवह्निसंयुक्तं नादबिंदुविभूषितं॥ तंत्रगुह्ये कालिके प्रोक्ता चाथवा दक्षिणे यजेत्॥ सप्तबीजं पुनः पूर्वक्रमेण योज
येत्ततः॥ वह्निजायावधिः प्रोक्ता विद्या त्रैलोक्यमोहिनी॥ अथवेति गुह्ये कालिके दक्षिणे कालिके वा मंत्रः॥ कामबीजं तथा कूर्चं तदंते भुवनेश्व
री॥ गुह्ये च कालिके चापि तथा बीजद्वयं भवेत्॥ स्वाहांता कथिता विद्या त्रैलोक्ये चातिदुर्लभा॥ एषा तु षोडशी विद्या चतुर्वर्गफलप्रदा॥ अस्या
र्थः॥ आदौ निजबीजं ततः कूर्चं ततो मायां ततः संबोधनपदद्वयं॥ ततो निजबीजद्वयं कूर्चद्वयं मायाद्वयं वह्निवल्लभा॥ कामबीजद्वयं हि
त्वा भवेद्विद्या चतुर्दशी॥ अस्य मंत्रस्य विशेषः॥ सप्तबीजं ततः प्रोक्तं गुह्ये च कालिके पुनः॥ स्वाहांता कथिता विद्या सर्वतंत्रेषु गोपिता॥ एषा
पि चतुर्दशाक्षरी॥ तथास्या नामादिपदं त्यक्त्वा दक्षिणे पदं चेत् तथा पंचदशाक्षरी॥ तथा च॥ दक्षिणेपदमाभाष्य भवेत्पंचदशाक्षरी॥ कामबीजं प
रित्यज्य अथवा षोडशाक्षरी॥ एतेन षोडशाक्षरीविद्यायाः कामबीजाभावे तु पंचदशी भवति॥ कामबीजं समुद्धृत्य संबुद्ध्यंते पदद्वयं॥ पुनः का
मं तदंते च दद्याद्व्ह्रेश्च सुंदरी॥ एषा नवाक्षरी विद्या गुह्यकाल्याः समर्थिता॥ दक्षिणेपदमाभाष्य भवेद्विद्या दशाक्षरी॥ एतासां पूजनं तु तंत्रे
व॥ पूर्ववत्स्यात्सर्वगं तु पूर्ववत्पूजयेच्छिवां॥ पूर्ववच्च जपेद्विद्यां सर्वं पूर्ववदेव हि॥ बलिदानं तथा यंत्रं पूर्ववत्परिकल्पयेत्॥ अथ बलि
मंत्रस्तु॥ ह्रीं ह्रीं एह्येहि जगन्मातर्जगतां जननि गृह्ण २ मम बलिं सिद्धिं देहि २ शत्रुक्षयं कुरु २ हूं २ ह्रीं २ हूं २ फट् फट् ओं कालिकायै नमः फट्
स्वाहा॥ काल्या अयं वा बलिमंत्रः॥ एहि २ गुह्यकाल्ये गृह्ण २ मम शत्रून्नाशय २ खादय २ तुरु २ स्फुर २ छिंदि २ सिद्धिं देहि २ हूं २ फट् स्वाहा॥ विस्त
रे॥ एह्येहिपदद्वंद्वं गुह्यकाली तथा ङे॰ ततः॥ गृह्ण गृह्ण पदद्वंद्वं मम शत्रून्वदेत्ततः॥ नाशय द्वितयं ब्रूयात्खादय द्वितयं ततः॥ तुरु तुरु पदद्वंद्वं ततः स्फु
र स्फुरेति च॥ छिंधि छिंधि पदद्वंद्वं सिद्धिं देहि पदद्वयं॥ कवच द्वितयं ब्रूयात्तदंते वह्निसुंदरि॥ पंचाशद्द्वितयं रूढो बलिदाने मनुः शुभः॥ तथा चैवा

६॥ क्लीं कालिकालिके क्लीं स्वाहा॥ ६

३ गयजेत्॥३

बलिमंत्रः॥ ॐ हूं सदाशिवमहाप्रेताय गुह्यकालासनाय गुह्यकाल्यै हूं नमः॥ तथा॥ सदाशिवं वदेन्ङें·तं महाप्रेतपदं पुनः॥ गुह्यकाल्यासनांङें·
तं गुह्यकाली तथा ङि·तः॥ ॐकाराद्याद्धमांताच्च नमोंताच्च तथा मनुः॥ भद्रकाल्यास्त्रयो विद्याः कथ्यन्ते शृणु सुंदरि॥ कामराजादिकं बीजं सर्वपूर्वं
परे भवेत्॥ भद्रकाली तथा ङें·तं बीजमध्ये नियोजयेत्॥ स्वाहांता कथिता विद्या विंशत्यर्णात्मिका परा॥ चतुर्वर्गप्रदा विद्या भद्रकाल्याः शु-
भानने॥ सप्तबीजं समुद्धृत्य श्मशानकालिके तथा॥ पुनर्बीजं क्रमेणैव स्वाहांता सर्वसिद्धिदा॥ विंशत्येकाधिका विद्या श्मशानकालिका मता॥
बीजानि चोच्चरेत्पूर्वं महाकालीपदं ततः॥ तदंते सप्तबीजानि स्वाहांता सर्वसिद्धिदा॥ विंशत्यर्णा महाविद्या महाकाली प्रकीर्तिता॥ एतासां
जपपूजने दक्षिणावत्॥ विशेषस्तु भूपुरे इंद्रादीन्वज्रादींश्च पूजयेत्॥ भूगृहे स्याः पूर्वादि द्वारेषु विष्णुं शिवं सूर्यं गणेशं च पूजयेत्॥ तत्रै-
व· भूगृहे लोकपालाः स्युस्तदस्त्राणि च तद्बहिः॥ भूपुरेषु चतुष्कोणे पूजयेत्क्रमतः सुधीः॥ विष्णुं शिवं तथा सूर्यं गणेशं पूजयेत्ततः॥ त-
द्यायंत्रं तु· त्रिकोणं चैव षट्कोणं नवकोणं मनोहरं॥ त्रिवृत्तं साष्टपत्रं च सुकिंजल्कसमन्वितं॥ भूपुरत्रयमारूढं योनिमंडलमंडितं॥ त्रिको-
णाकारमित्यर्थः॥ त्रिपंचारमिदं चक्रं सर्वतंत्रे प्रकीर्तितं॥ ध्यानं तु· महामेघप्रभां देवीं कृष्णवस्त्रपिधायिनीं॥ ललज्जिह्वां घोरदंष्ट्रां
कोटराक्षीं हसन्मुखीं॥ नागहारलतोपेतां चंद्रार्द्धकृतशेखरां॥ या लिखंती जटामेकां लेलिहानां शवं स्वयं॥ नागयज्ञोपवीतांगीं नाग-
शय्यां निषेदुषीं॥ पंचाशन्मुण्डसंयुक्तनरमालां महोदरीं॥ सहस्रफणसंयुक्तमनंतं शिरसोपरि॥ चतुर्दिक्षु नागफणावेष्टितां गुह्यका-
लिकां॥ तक्षकसर्पराजेन वामकंकणभूषितां॥ अनंतनागराजेन कृतदक्षिणकंकणां॥ नागेन रसनां नारकल्पितां नेन नूपुरां॥ ॥
द्विभुजां चिंतयेद्देवीं नागयज्ञोपवीतिनीं॥ नररत्नसमारब्धकुण्डलश्रुतिमंडितां॥ प्रसन्नवदनां देवीं नवरत्नविभूषितां॥ नारदाद्यैर्मु-

देह १

नागेन वसनाहारकल्पितां रत्ननूपुरां इति पुस्तकांतरे॥२

गे

निगमैः सेवितां शिवमोहिनीम्॥ अट्टहासां महाभीमां साधकाभीष्टदायिनीं॥ जरां मे को धारयंतीमिति शेषः॥ अनंतं शिरसो परि दधतीमि-
ति शेषः॥ गुह्येत्युपलक्षणं॥ तंत्रांतरे॥ नमः पाशांकुशौ हूं धा फट् स्वाहा कालिकालिके॥ दीर्घत्वनुच्चरं काली मन्त्रः पंचदशाक्षरः॥ पूजादिकं तु दक्षि-
णकालीवत् सर्वं कार्यम्॥ श्यामामुद्दिश्य यामले॰ जागर्त्येषा महाविद्या केवलं चित्प्रकाशिनी॥ न मत्ता न च सुप्ता च सर्वेयं योगसिद्धिदा॥ त-
स्मात्सा सिद्धफलदा सदा दक्षिणकालिका॥ इमां विद्यां परित्यज्य ये चान्यदर्शनोत्सुकाः॥ करस्थं रत्नमुत्सृज्य धावंति स्फटिकाय ते॥ समत्वं चे-
तिपुण्यात्मा आवयोरैक्यमंततः॥ दक्षिणा सिद्धसाध्यादिरहिता क्षिप्रसिद्धिदा॥ कालसंग्रहणात्काली कालग्रासं करोत्यतः॥ ततः काली सिद्धि-
विद्या कलौ पूर्णफलप्रदा॥ यथा निजवलादिभिश्वास्पृष्टं विमलं नभः॥ तथा चेयं महाविद्या कलिदोषैर्न बाध्यते॥ सिद्धमंत्रतया नात्र युगसे-
वापरिश्रमः॥ तस्मात्तु सकलोपायैराराध्येयं महात्मभिः॥ इति श्यामाप्रकरणम्॥ अथ तारामन्त्रस्य सूक्ते॥ अथ भेदास्त्रव स्वामिना दिव्याः सर्व-
सिद्धिदात्॥ येषां विज्ञानमात्रेण जीवन्मुक्तस्तु साधकः॥ कवितां लभते शुद्धामनर्गलविजृंभिणी॥ पांडित्यं सर्वशास्त्रेषु धनैर्धनपतिर्भवेत्॥ रा-
जद्वारे सभायां च विवादे व्यवहारके॥ सर्वत्र जयमाप्नोति बृहस्पतिरिवापरः॥ मायाबीजमुद्धृत्य तकारं वह्निसंयुतं॥ मायाबिं हीश्वरयुतं द्वितीयं
बीजमीरितं॥ कूर्चबीजं तृतीयं च फट्कारं तदनंतरं॥ संपूर्णसिद्धिमंत्रस्तु रश्मिपंचकसंयुतं॥ रश्मिपंचकं च वर्णपंचकं॥ लीलया वाक्प्रदा चे-
ति तेन नीलसरस्वती॥ तारकत्वात्सदा तारा सुखमोक्षप्रदायिनी॥ उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्तिता॥ तारार्णवे॰ वसिष्ठाराधिता विद्या
न तु शीघ्रफलापनः॥ अतस्तेनापि मुनिना शापो दत्तः सुदारुणः॥ ततः प्रभृति विद्येयं फलदात्री न कस्यचित्॥ चंद्रबीजं त्रपांतस्थं बीजोपरि नियो-
जितं॥ ततः प्रभृति विद्येयं वधूरिव यशस्विनी॥ फलिनी सर्वविद्यानां जयिनी जयकांक्षिणां॥ विषक्षयकरी विद्या अमृतत्वप्रदायिनी॥ मंत्रस्य ज्ञा-

५॥ तथा च मत्स्योक्ते ॐ ह्रीं त्रीं हूं फट्॥ ५॥ प्रणव इति केचित्॥ ४

॥ह्रीं स्त्रीं हूं त्रीं फट्॥१

नमात्रेण विजयी भुवि जायते ॥ एकवीराकल्पेपि ॥ लैं ज्ञां बीजं वधूबीजं कूर्चबीजं तथा हि फट् ॥ एवं पंचाक्षरी विद्या पंचभूतप्रकाशिनी ॥ वधूबीजं स्त्रीकारं ॥ तथा च विश्वसारे॰ सत्रीं च महेशानि वधूबीजं प्रकीर्तितं ॥ तथा ॥ षोडशव्यंजनं वह्निवामाक्षीविंदुसंयुतं ॥ इंदुबीजं समारूढं वधूबीजं प्रकीर्तितं ॥ इंदुः सकारः ॥ नीलतंत्रे ॥ ताराद्या पंचवर्णोयं श्रीमन्नीलसरस्वती ॥ सर्वभाषामयी शुद्धा सर्वाम्नाये नमस्कृता १ ॥ तारार्णवेपि ॥ अनुत्तरं समुद्धृत्य मायोत्तरमतः परं ॥ पपंचमसमायुक्तं पंचरश्मिप्रकीर्तितं ॥ जीवनीमध्यमापश्चादेकाक्षी तदनंतरं ॥ उग्रदर्प्पेत तोद्धारस्त्वरे विप्रकाशितं ॥ एकाक्षी स्त्रीं तेन सर्वेशापोद्धारः ॥ पंचाक्षरीमधिकृत्य तंत्रे ॥ श्रीबीजाद्या यदा देवी तदा श्रीः सर्वतोमुखी ॥ एषैव हि महाविद्या मायाद्या सकलेष्टदा ॥ वाग्भवाद्या यदा विद्या वागीशत्वप्रदायिनी ॥ ताराद्यैकजटा चैषा महामुक्तिकरी मता ॥ तारास्त्ररहिता त्र्यर्णा महानीलसरस्वती ॥ कुल्लुकेयं समाख्याता सर्वतंत्रेषु गोपिता ॥ यथा भुवनेशीपर्य्यायमाह ॥ संकेततंत्रोदये ॥ हल्लेखा भुवनेश्वरी च भुवना देवीश्वरी ह्रीं महामाया जीवनमध्यगा त्रिजगतां धात्री परेशी परेति ॥ एषा क्रमगता प्राप्ता मनभेदादनेकधा ॥ एषा पंचाक्षरी तदेवाह ॥ पंचाक्षरी सैकजटा तारा भावे महेश्वरी ॥ ताराद्यानुभवेद्देवि श्रीमन्नीलसरस्वती ॥ उग्रतारा त्र्यक्षरी चेन्महानीलसरस्वती ॥ कुल्लुका च॰ अन्यासां विद्यानामेकजटैव देवता प्रकृतित्वात्॰ एतासां साधनस्थानं नीलतंत्रे ॥ एकलिंगे श्मशाने वा शून्यागारे चतुष्पथे ॥ तत्रस्थः साधयेद्योगी विद्यां त्रिभुवनेश्वरीं ॥ तत्रैव ॥ पंचक्रोशांतरे यत्र न लिंगांतरमीक्षते ॥ तदेकलिंगमाख्यातं तत्र सिद्धिरनुत्तमा ॥ अन्यत्रापि॰ उज्जटे पर्वते वापि निर्जने वा चतुष्पथे ॥ देवागारे च शून्ये च निर्जने कानवेश्मनि ॥ वीरतंत्रेपि ॥ शून्यागारे श्मशाने यदि जपति जडस्त्वेकलिंगे तडागे गंगारामे गिरौ वा सुचिरमलमतिः सर्वदा भक्तियुक्तः ॥ विद्यां श्रीनीलवाण्याः भुवनजनपतिः सर्वशास्त्रार्थवेत्ता देहांते योगिमुख्यः परमसुखपदं ब्रह्मनिर्वाण

विनारैकेति पाठांतरं ॥८॥

त्रि ४

मेति॥ अथ ताराचमनं॥ वीरतंत्रे॥ ताराभेदैस्त्रिभिः पीत्वा मायया क्षालयेत्करं॥ स्त्रीं हूं त्रो ष्ठौ हिरुन्मृज्य फट्कारैः क्षालयेत्करं॥ आस्य
नासेक्षण श्रोत्र नाभिवक्षः शिरो भुजान्॥ विरोचनादिभिः स्पृष्ट्वा सर्वपापैः प्रमुच्यते॥ आचम्य भैरवो भूत्वा वत्सरान्तं प्रपश्यति०॥ तारेति॥ तारा
उग्रा एकजटा महानीलसरस्वती॥ भेदैः रूपास्य भेदैः॥ वैरोचनादेयस्तु वैरोचनशंखपांडरपद्मनाभमामकनामकतारकपांडरस्त्रसिताभयप
ज्ञातकयमांतकविघ्नांतकनरांतकाः सचतुर्थ्यंप्रणवादिनमोंतकाः॥ अस्याः पूजा प्रातःकृत्यादिस्नानांतकर्म समाप्य यागस्थाने गत्वा ॐ वज्रो
दके हुं फट् स्वाहा इति जलमंत्रेण जलमधिष्ठाय एतज्जले पूजार्थं विधाय किंचिदन्यजले निःक्षिप्य तेनैव वारिणा ॐ ह्रीं विशुद्धसर्वपापानिशं
मयाशेषविकल्पमपनय हुं फट् स्वाहा इति हस्तपादौ प्रक्षाल्य कुलकुशान् सुवर्णरजतरूपान् यथासंख्येन तर्जन्यनामासु धृत्वा यथा शंखेन
हस्तेन कृत्वा ॐ ह्रौं स्वाहेत्याचम्य पीठं चिंतयेत्॥ विशेषस्तु कुमारीतंत्रे॥ स्नानान्तरम उत्थाय कुलवस्त्रे द्वे परिधाय कुलेन च तिलकं कुलरूपं
च कृत्वाचम्य सुरेश्वरि॥ कुलेन स्वयंभुकुसुमेन॥ तथा च॥ जलशंखं करे कृत्वा गत्वा द्वारि महेश्वरि॥ क्षालयेद्धस्तपादौ च वक्ष्यमाणेन वर्त्मना॥
॥ तारं वज्रोदके हूं फट् स्वाहा जलमधिष्ठितं॥ तथा॥ तारं माया विशुद्धांते सर्वपापानि चैव हि॥ समयांते त्वशेषांते विकल्पं पदमुच्चरेत्॥ अपन
यांते वर्म फट् स्वाहा पदं विशुद्धये॥ ॐ मायावह्निजायाच तथाचाचमने मनुः॥ कुलकुशास्तु॥ सुवर्णरजतं चैव जपपूजादिकर्मसु॥ कुशकार्य्य
कं स्त्रोक्तं न तु वन्याः कुशाः कुशाः॥ तथा॥ तर्जन्या रजतं धार्यं अनामासु सुवर्णकं॥ यथा०॥ समुद्रं तत्र संचिंत्य तत्र कल्पद्रुमं स्मरेत्॥ तन्मूले मणिपी
ठं च नानामणिविभूषितं॥ नानालंकारभूषाढ्यं मुनिदेवैश्च भूषितं॥ शिवाभिर्बहुमांसास्थिमोदमानाभिरंततः॥ चतुर्दिक्षु शिवासुराडं चितांगारा
स्थिभूषितं॥ तन्मध्ये भावयेद्देवीं यथोक्तध्यानयोगतः॥ इति ध्यात्वा मं णिधारिणि वज्रिणि महाप्रतिसरे रक्ष रक्ष मां हूं फट् स्वाहेति क्षिप्त्वा बध

ॐ नमो ॥४

१॥ मालाधारिणि वज्रिणि सर्ववशंकरि हुं फट् स्वाहे पुस्तकांतरे पाठः॥१

२॥ रन्वितमित्यपि पाठः॥२

मृदुकंबलमासीनोअन्येषुकोमलेषुचेतिप्रत्यंतरे॥४

नंशिखाभावे वस्त्रग्रंथिबंधनं कुर्य्यात्‌· ॐ रक्ष २ हुं फट्‌स्वाहा इति जलसेकाद्भूमिं संशोध्य तत्र पूजास्थानं चिंतयेत्‌॥ ॐ सर्वविघ्नानुत्सारयोत्सारय हूं फट्‌स्वाहा इति नाराचमुद्रया अक्षतप्रक्षेपेण त्रिविधविघ्नान्‌ दिव्यांतरिक्षभौमानुत्सारयेत्‌॥ ॐ पवित्रवज्रभूमे हूं फट्‌स्वाहेति भूमिमभिमंत्र्य तत्र कंबलकोमलविष्टरासनानि यथासाधनान्यास्तीर्य्य ॐ आः सुरे रखे वज्ररे खे हूं फट्‌ स्वाहा इति गंधपुष्पादिना तमभ्यर्च्य स्वस्तिकादिक्रमेण तत्रोपविशेत्‌॥ तदुक्तं मत्स्यसूक्ते॰ मृदुकोमलमासीनो अन्येषु कंबलेषु च॥ विष्टरं वा समासीनः साधयेत्सिद्धिमुत्तमां॥ कोमलादिलक्षणमाह॥ श्रीक्रमे॥ पंचवर्षांतरं यावन्मृतं बालमचूडकं॥ षण्मासाभ्यंतरं यावद्दशमासाच्च पूर्वकं॥ गर्भच्युतं मृतं बालं गर्भाष्टमपुरःसरं॥ एतत्कोमलमित्याहुर्विष्टरेषु कुशेषु वा॰ अथ नीलतंत्रे॥ अकृतचूडको बालो हीनोपनयनः पुमान्‌॥ यो मृतः पंचमे वर्षे तमेव कोमलं विदुः॥ पंचमे वर्षे पंच वर्षपूर्णो॥ एकहस्तं द्विहस्तं वा चतुरस्रं समंततः॥ विशुद्ध आसने कुर्य्यात्संस्कारं पूजनं बुधः॥ कृष्णसारव्याघ्रचर्मादि आसनं॥ तदुक्तं तंत्रे॥ कृष्णसारेऽपि चर्मे अचूडकमित्यादि विष्टरेष्वित्यादि कुशपत्रशतेन वटुकं निर्माय तत्र शवप्राणप्रतिष्ठां कुर्य्यात्‌॥ ॐकारं आः सुरे रखे च वज्ररे खे ततः परं॥ हूं फट् स्वाहेति च कुर्यान्मंडले च शवासने॥ वीरासनेनोपविश्य संपूज्यासनमेव च॥ ॐ मणिधरि वज्रिणि महाप्रतिसरे रक्ष रक्ष मां हुं फट्‌स्वाहा इति वस्त्रांतिके रक्षाग्रंथिं बंधयेत्‌॥ ॐ आः हूं फट्‌ स्वाहेति व्यापकतया वाक्कायचित्तं शोधयेत्‌॥ ॐ पुष्पेतु राजार्हते सतताय सम्यक्समाधाय ॐ पुष्पे २ महापुष्पे सुपुष्पे पुष्पशोभिते॥ पुष्पचयावकीर्णे हूं फट्‌स्वाहेति पुष्पमभिमंत्रयेत्‌॥ ततः स्वर्णादि पीठे गोरोचनाकुंकुमादिलिप्ते ॐ आः सुरे रखे वज्ररे रखे हूं फट्‌ नमः इति मंत्रेणाधोमुखत्रिकोणगर्भाष्टदलपद्मं चतुरस्रं चतुर्द्वारयुक्तं यंत्रमुद्धरेत्‌॥ पद्मस्य पूर्वादिदलेषु मंत्राक्षराणि लिखेत्‌॥ तथा च तंत्रचूडामणौ॥ ततः कुलरसेनैव पीठं निर्माय यत्नतः॥ आः सुरे रखे वज्ररे रखे हूं फट्‌स्वाहा समन्वितः॥ मंत्रेणा

रस्वाहा

म॰यबीजंद्वितीयेफमुत्तरेपश्चिमेतुटमितिपुस्तकांतरे ॥२

वसुपत्रमितिपुस्तकद्वयेपाठः ॥१

वृत्तमितिपुस्तकांतरे १॥

नेनसंलिख्यपद्मपत्रंमनोहरं ॥ वर्णलिखनप्रकारमाह फेत्कारीये ॥ सयोनिंचंदनेनाष्टदलंपद्मंलिखेत्ततः ॥ मृद्वासनंसमासाद्यमायांपूर्वदलेलि-
खेत् ॥ बीजंद्वितीयंयाम्येफट्उत्तरेपश्चिमेतुटं ॥ मध्येबीजंतुलिखेत्तारंभूतशुद्धिमथाचरेत् ॥ तारंहूंकारंताराप्रणवत्वात् भर्गेकूर्चमिति भैरवीयवाक्या
च्च मध्ये षट्कोणांकितपद्ममितिकेचित्॰ द्वितीयेदक्षिणे ॥ तथाच ॥ मायांपूर्वदलेचैवद्वितीयंदक्षिणेदलेइतिवचनात् ॥ तारंहुंकारंताराप्रणवत्वा
त् ॥ टंपश्चिमेभागकूर्चपत्रांतेभूपुरद्वयमितिभैरवीयवाक्याच्च ॥ मध्येकोणांकितपद्ममितिकेचित् ॥ तदुक्तं ॥ षट्कोणांतर्गतंपद्मंभूबिंबद्वितयंपुनः
॥ चतुरस्रंचतुर्द्वारमेवंवायंत्रमालिखेत् ॥ बीजलिखनंतुपूर्ववत् ॥ नीलतंत्रे ॥ सारस्वतार्थिनांविशेषयंत्रमाह ॥ व्योमेद्वौरसनार्णकर्णिकम
चांहृहेःस्फुरत्केशरं वर्गोल्लासिवसुच्छदंवसुमतीगेहेनसंवेष्टितं ॥ ताराधीश्वरवाग्विवर्णविलसद्दिक्कोणसंशोभितंयंत्रंनीलतनोःपरंनिग
दितंसर्वार्थसिद्धिप्रदम् ॥ एवंयंत्रमालिख्यपीठमर्च्चयेत् ॥ यथापीठस्यपूर्वद्वारे ॐ ह्रींगांगणपतयेनमः ॥ पीठस्यदक्षिणे ॐ ह्रींवाबटुकाय
नमः ॥ पीटस्यपश्चिमे ॐ ह्रींक्षांक्षेत्रपालायनमः ॥ पीठस्योत्तरे ॐ ह्रींयांयोगिनीभ्योनमः ॥ तदुक्तंकुमारीकल्पे ॥ ततोर्घपात्रंविन्यस्यद्वारपाला
स्समर्च्चयेत् ॥ गांबीजाद्यंगणेशंतुवामाद्यंबटुकंतथा ॥ क्षामाद्यंक्षेत्रपालंतुमायाद्यायोगिनीस्ततः ॥ पूर्वाधोवामदक्षिणेध्यात्वेवंपूजयेत्सुधीः
॥ ध्रुवाद्याःसर्वेदीर्घाद्याःशक्तिबीजपुरःसराः ॥ मध्ये॰ ॐ श्मशायनमः १॥ एवंकल्पवृक्षाय २॥ तन्मूलेमणिपीठाय ३॥ नानालंकारेभ्यः ४॥ नाना
मुनिभ्यः ५॥ देवताभ्यः ६॥ बहुमांसास्थिमोदमानशिवाभ्यः ७॥ चतुर्दिक्षुशवमुंडचित्तागा[illegible]स्थिभ्यः ८॥ सर्वत्र प्रणवादिनमोंतेनपूजयेत् ॥
ततोऽष्टदलेषु॰ अग्न्यादि ॐ लक्ष्म्यैनमः ॥ एवंसरस्वत्यैरत्यैकीर्त्यै । प्रीत्यै । शांत्यै । तुष्ट्यै । पुष्ट्यै । तन्मध्येह्सौःसदाशिवमहाप्रेतपद्मासनायनमः ॥ तदुक्तं
सिद्धसारस्वते॰ लक्ष्मीःसरस्वतीचैवरतिःप्रीतिस्तथैवच ॥ कीर्तिःकांतिश्चपुष्टिश्चतुष्टिरित्यष्टशक्तयः ॥ देव्यानीलसरस्वत्याःपीठशक्तयईरिताः

॥ॐ आं श्मशानायनमः॥४॥

चतुर्विंशतिरित्यपिपाठः॥२

॥वीरतंत्रे॥ तन्मध्ये पूजयेद्देव्या वाहनं शवमेव च॥ ततो भूतशुद्धिं कुर्यात्॰ यथा॥ स्वांकेन उत्तानौ करौ कृत्वा हंस इति मंत्रेण कुंडलिनीं जीवात्मानं विलोमेन षड्विंशतत्वानि सुषुम्णावर्त्मना परमतेजसि संयोज्य कुंभकेन ह्रींकारं रक्तवर्णं नाभौ ध्यात्वा तदुद्भूतेनाग्निना लिंगशरीरं संदह्य स्त्रींकारं पीतवर्णं हृदि विचिंत्य तदुद्भूतेन वायुना भस्म प्रोत्सार्य्य रेचकेन हूंकारं श्वेतवर्णं शिरसि विचिंत्य तदुद्भूतेन जलेन तदस्थिप्लावितं कृत्वा समस्तमपगतव्यथं विश्वशरीरमाप्लावयेत्॥ तथा च श्रुतिः॥ षट्त्रिंशत्तत्वानि शरीरमिति॥ तत आत्मानमपगतव्यथं निर्मलं देवतामे[illegible]न ध्यायेत्॰ तस्मिन् स्मशानरूपं विश्वव्यापके वारिणि आःकाराद्रक्तपंकजं तदुपरि टांकारात् श्वेतपंकजं तदुपरि नीलसन्निभं हूंकारं ध्यात्वा तदुपरि हूंबीजभूषितां कर्तृकां ध्यायेत्॥ तदुपरि देवतां आं ह्रीं क्रों स्वाहेत्येकादशवारं जपन् प्राणप्रतिष्ठाप्य ध्यायेदिति॥ तदुक्तं फेत्कारीये॥ मायां नाभौ रक्तवर्णं ध्यात्वा तज्ज्ञातवह्निना॥ शुष्ककर्मात्मकं देहं दग्ध्वा संचिंतयेत्ततः॥ स्त्रींकारं हृदि पीताभं तदुद्भूतेन वायुना॥ भस्म प्रोत्सारितं कृत्वा ललाटे चिंतयेत्ततः॥ कूर्चं तु षारवर्णाभं तदुद्भूतामृतेन च॥ तदस्थिप्लावितं कृत्वा तदात्मानं विचिंतयेत्॥ सर्वव्यथाविनिर्मुक्तं निर्मलं देवतामयं॥ भूतशुद्धिं विधायेत्थं शून्यं विश्वं विचिंतयेत्॥ निर्लेपं निर्गुणं शुद्धमात्मानं देवतामयं॥ अंतरिक्षे ततो ध्यायेदाःकाराद्रक्तपंकजं॥ भूयस्तस्योपरि ध्यायेत् टांकारात्श्वेतपंकजं॥ तस्योपरि पुनर्ध्यायेत् हूंकारं नीलसंनिभं॥ ततो हूंकारजां पश्येत्कर्तृकां बीजभूषितां॥ कर्तृकोपरिगतां ध्यायेदात्मानं तारिणीमयं॥ प्रत्यालीढपदां घोरां मुंडमालाविभूषितां॥ खर्वां लंबोदरीं भीमां व्याघ्रचर्मावृतां कटौ॥ नवयौवनसंपन्नां पंचमुद्राविभूषितां॥ ॥ चतुर्भुजां ललज्जिह्वां महाभीमां वरप्रदां॥ खड्गकर्तृसमायुक्तसव्येतरभुजद्वयां॥ कपालोत्पलसंयुक्तसव्यपाणिद्वयान्वितां॥ पिंगोग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषितां॥ कालकमंडलाकारलोचनत्रयभूषितां॥ ज्वलच्चितामध्यगतां घोरदंष्ट्रांकरालिनीं॥ सावेशस्मेरवदनां स्त्र्यलंकारविभूषितां॥ विश्वव्यापकतोयांतः श्वेत

युगान्वितामित्यपिपाठः॥२

पद्मोपरिस्थितां॥अक्षोभ्यदेवीमूर्द्धन्यस्त्रिमूर्त्तिनागरूपधृक्इति॥पंचमुद्राविभूषितामिति भैरवतंत्रे॰॥पंचमुद्राविभूषितामित्यभिधाय॥योनि
श्चभूतिनीचैवबीजाख्यादैत्यधूमिनी॥लेलिहानेतिसंप्रोक्ताःपंचमुद्राःप्रकीर्तिताः॥आसांबीजानितंत्रैव॰ योनिर्मायाधरासेंदुर्वधूःकूर्चंक्रमादिह॥
बीजान्यासांलक्षणंतुक्रमेणकथयाम्यहं॥योनिमुद्राप्रसिद्धा॥अधोमुखीमिमांमुद्रांर येद्बीजपूर्विकां॥त्र्यस्रास्करेविततर्ज्जन्यौनिपात्यपृष्ठहस्त
तः॥संस्थाप्यांगुष्ठकेमुद्राभूतिनीपरिकीर्तिता॥१॥परिवृत्यकरौस्पष्टावंगुष्ठतर्जनीयुगं॥अर्द्धचंद्रकृतिन्यायांयुगपत्कारयेत्समं॥२॥अधःकनिष्ठा
माकृष्यमध्यमेविनियोजयेत्॥मुद्रैषाकथितादेविबीजाख्याज्ञानरूपिणी॥३॥परिवृत्यकरौकृत्वाकनिष्ठाकृष्टमध्यमा॥अनयोर्युगलंचाधस्त
र्जनीयुगलंपृथक्॥४॥अन्योन्यंनिविडंबध्वांगुष्ठाग्रेअनामिके॥दैत्यानांधूमकेआख्यामुद्रैषाकथिताप्रिये॥५॥ललाटेश्वेतास्थिपट्टि
काचतुष्टयान्वितकपालपंचकतयान्वितामित्यर्थः॥श्रीशंकराचार्य्येणाप्युक्तम्॥ विचित्रास्थिमालांललाटेकरालंकपालेचपंचान्वितंधारयंतीमि
ति॥ततःप्राणायामः॥वामनासापुटेमूलंचतुर्वारंजप्त्वावायुंपूरयेत् ततस्तुनासापुटौधृत्वाषोडशवारंजपेनकुंभयेत् ततस्तुदक्षिणनासापुटेनाष्टा
वर्तेनरेचयेत्॥पुनर्दक्षिणेनापूर्यवामेनरेचयेत्॥पुनर्वामेनापूर्यदक्षिणेनरेचयेत्॥इतिप्राणायामत्रयंभवति॥ततःऋष्यादिन्यासः॥यथा॥शिर
सिअक्षोभ्यऋषयेनमः॥मुखेबृहतीछंदसेनमः॥हृदिश्रीमदेकजटायैदेवतायैनमः॥मूलाधारेहूंबीजायनमः॥पादयोःफट्शक्तयेनमः॥सो
[illegible]क्षराणिउच्चार्यसर्वांगेकीलकायनमः॥तदुक्तंवीरतंत्रे॥अक्षोभ्यऋषिरेतस्याबृहतीछंदईरितं॥नीलसरस्वतीदेवीत्रिषुलोकेषुगोपिता
हूंबीजमस्त्रशक्तिःस्याच्चतुर्वर्गफलप्रदा॥ततःकालीतंत्रोक्तमातृकान्यासः॥तथाचोक्तं॥यथाकालीतथानीलाततःक्रमान्मातृकान्यसेत्॥तद्यथा॥
ॐअंआंइंईंउंऊंऋंॠंऌंॡंनमोहृदि॥एंऐंओंऔंअंअःकंखंगंघंनमोदक्षभुजे॥ङं॰चंछंजंझंञंटंठंडंढंनमोवामभुजे॥णंतंथंदंधंनंपंफं[illegible]

लीलासरस्वतीत्यपिग्रन्थान्तरे॥३

दक्षजंघायां॥ मंयंरंलंवंशंषंसंहंक्षंनमो वामजंघायां॥ समस्तेन व्यापकं॥ ततः करांगन्यासो॥ ह्रां अखिलवाग्रूपिण्यै अंगुष्ठाभ्यां नमः॥ ह्रीं अखंडवाग्रूपिण्यै तर्जनीभ्यां स्वाहा॥ ह्रूं ब्रह्मवाग्रूपिण्यै मध्यमाभ्यां वषट्॥ ह्रैं विष्णुवाग्रूपिण्यै अनामिकाभ्यां हुं॥ ह्रौं रुद्रवाग्रूपिण्यै कनिष्ठाभ्यां वौषट्॥ ह्रः सर्ववाग्रूपिण्यै करतलकरपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ अंगुलीनियमस्त्वपूर्ववदुक्तः॥ अयं तु नीलसरस्वतीपक्षे तथा च तारामधिकृत्य सिद्धसारस्वते॰ अखिलवाग्रूपिणी प्रोच्य हृदयाय नमो वदेत्॥ अखंडवाग्रूपिणीत्यपि शिरसे वह्निवल्लभां ब्रह्मवाग्रूपिणी मुक्ताशिखायै वषडित्यपि॥ विष्णुवाग्रूपिणी प्रोच्य कवचाय हुमुच्चरेत्॥ रुद्रवाग्रूपिणी नेत्रत्रयाय वौषडित्यपि॥ सर्ववाग्रूपिणी युक्ता अस्त्राय फडिति क्रमात्॥ षट्दीर्घमायया चैव बीजान्तेनाभियोजयेत्॥ सर्वत्र ह्रां एकजटायै अंगुष्ठाभ्यां नमः॥ ह्रीं तारिण्यै तर्जनीभ्यां स्वाहा॥ ह्रूं वज्रोदके मध्यमाभ्यां वषट्॥ ह्रैं उग्रजटे अनामिकाभ्यां हुं॥ ह्रौं महाप्रतिसरे कनिष्ठाभ्यां वौषट्॥ ह्रः पिंगोग्रैकजटे करतलकरपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॰ तथा च॰ एकजटामधिकृत्य नीलतन्त्रे॥ बीजान्ते एकजटायै हृदयं परिकीर्तितं॥ तारिण्यै शिरसे तद्वत्तद्वद्वज्रोदके शिखा॥ उग्रजटे च कवचं महाप्रतिसरे तथा॥ पिंगोग्रैकजटे तद्वन्नेत्रत्रयाय कीर्तयेत्॥ अत्र वर्णन्यासपीठन्यासौ न लिखितौ अनुक्तत्वात्॥ तथा च फेत्कारीये॥ अत्रोक्तमाचरेत्सम्यङ्गान्यस्तं चारयेद्बुधः॥ फलार्थिना तारापोढान्यासः कर्तव्यः॥ तारापोढं प्रवक्ष्यामि सर्वतन्त्रेषु गोपितं॥ सर्वविघ्नोपशमनीं सर्वपापप्रणाशिनीं॥ महादारिद्र्यशमनीं सर्वसंपत्प्रदायिनीं॥ सर्वकामप्रदां नित्यां सर्वसाम्राज्यदायिनीं॥ शिष्याय भक्तियुक्ताय विनीताय महात्मने॥ वदान्याय कुलीनाय शुद्धाचाररताय च॥ एवंविधाय देवेशि साधकाय प्रकाशयेत्॥ अन्यथा सिद्धिहानिः स्यादित्याज्ञा शंकरैः कृता॥ रुद्रैस्तु प्रथमो न्यासो द्वितीयस्तु ग्रहैर्मतः॥ लोकपालैस्तृतीयः स्यात् शिवशक्त्या चतुर्थकः॥ तारादिभिः पंचमः स्यात्

८॥ षड्दीर्घमायाबीजान्ते ङेंतनामाभियोजयेदिति प्रसंगरे पाठः॥ ८

णुकेशाय ४ महेशाय ४

ष्ठुः पीठे निंगद्यते॥ एकेन सहिता रुद्राः पंचाशत्परिकीर्तिताः॥ बिंदुयुक्तमातृकार्णैः स्वस्वशैबीजपूर्वकैः॥ ङ्यंते नमोंते देवेशि विन्यसेत्तान्क्रमात्सु
धीः॥ तारिणी त्र्यक्षरी प्रोक्ता भवबंधविनाशिनी॥ नीलवर्णा त्रिनयना शवासनसमायुता॥ बिभ्रती विविधां भूषां मौलावक्षोभ्यभूषिताम्॥ एवं ध्यात्वा
तारिणीं तु समाहितमनाः शिवां॥ रुद्रन्यासः॥ ह्रीं स्त्रीं हूं अं श्रीकंठेशाय इत्यादिमातृकान्यासवत्॥ ३ आं अनंतेशाय॥ ३ इं सूक्ष्मेशाय॥ ३ ईं त्रिमूर्ती
शाय॥ ३ उं अमरेशाय॥ ३ ऊं अर्घीशाय॥ ३ ऋं भारभूतीशाय॥ ३ ॠं अतिथीशाय॥ ३ लृं स्थाणवीशाय॥ ३ लॄं हरेशाय॥ ३ एं झिंटीशाय॥ ३ ऐं भौतिके
शाय॥ ३ ओं सद्योजातेशाय॥ ३ औं अनुग्रहेशाय॥ ३ अं अक्रूरेशाय॥ ३ अः महासेनेशाय॥ ३ कं क्रोधीशाय॥ ३ खं चंडेशाय॥ ३ गं पंचांतकेशाय॥ ३ घं शि
वोत्तमेशाय॥ ३ ङं एकरुद्रेशाय॥ ३ चं कूर्मेशाय॥ ३ छं एकनेत्रेशाय॥ ३ जं चतुराननेशाय॥ ३ झं अजेशाय॥ ३ ञं सर्वेशाय॥ ३ टं सोमेशाय॥ ३ ठं लांगली
शाय॥ ३ डं दारुकेशाय॥ ३ ढं अर्द्धनारीशाय॥ ३ णं उमाकांतेशाय॥ ३ तं आषाढीशाय॥ ३ थं दंडीशाय ३ दं अत्रीशाय॥ ३ धं मीनेशाय॥ ३ नं मेषेशाय॥ ३
पं लोहितेशाय॥ ३ फं शिखीशाय॥ ३ बं छगलंडेशाय॥ ३ भं द्विरंडेशाय॥ ३ मं महाकालेशाय॥ ३ यं वाणीशाय॥ ३ रं भुजंगेशाय॥ ३ लं पिनाकीशाय॥ ३ वं
खड्गीशाय॥ ३ शं बकेशाय॥ ३ षं श्वेतेशाय॥ ३ सं भृग्वीशाय॥ ३ हं नकुलीशाय॥ ३ लं शिवेशाय॥ ३ क्षं संवर्त्तकेशाय॥ इति रुद्रन्यासः॥ स्वरैर्हृदि न्यसे
त्सूर्य्यं रक्तं त्र्यक्षरपूर्वकं॥ भ्रुवो मध्ये यवर्गेण सोमं शुक्लं तु विन्यसेत्॥ नेत्रत्रये कवर्गेण लोहितं मंगलं न्यसेत्॥ चवर्गेण बुधं श्यामं न्यसेत् हृदयमं
डले॥ टवर्गेण कंठकूपे पीतवर्णं बृहस्पतिं॥ गलदेशे तवर्गेण पांडुरं भार्गवं न्यसेत्॥ नाभिदेशे पवर्गेण नीलवर्णं शनिं न्यसेत्॥ शवर्गेण धूम्रवर्णं राहुं वक्त्रे
न्यसेत्ततः॥ लक्षाभ्यां गुह्यदेशे च केतुं धूम्रं वरानने॥ अथ प्रयोगः॥ हृदि रक्तवर्णं ध्यात्वा ह्रीं स्त्रीं हूं अं १६ सूर्य्याय नमः भ्रूमध्ये शुक्लवर्णं ध्यात्वा॥ ३ यं
४ सोमाय॥ नेत्रत्रये लोहितं ध्यात्वा॥ ३ कं ५ मंगलाय॥ २ हृदयमंडले श्यामं ध्यात्वा॥ ३ चं ५ बुधाय॥ २ कंठकूपे पीतवर्णं ध्यात्वा॥ २ टं ५ बृहस्पतये २

आषा॰७ सम्पुनकेशायेति पुस्तकांतरे॥५

गलदेशे पाडुरं ध्यात्वा॥३तं ५शुक्राय॥२नाभिदेशे नीलवर्णं ध्यात्वा॥३पं ५शनैश्चराय॥२मुखे धूम्रवर्णं ध्यात्वा॥३शं ४राहवे॥गुह्यदेशे धूम्रवर्णं ध्यात्वा॥३लं क्षं केतवे नमः॥इति ग्रहन्यासः॥इंद्रमग्निं यमं रक्षो वरुणं पवनं विधुं॥ईशानमात्मनो मूर्द्धि दिक्षु चाप्यनुक्रमान्॥अधोनंतं मूर्द्धिदेशे ब्रह्माणं च ततो न्यसेत्॥ह्रस्वदीर्घस्वरैश्चाष्टवर्गैस्त्र्यक्षरपूर्वकैः॥आत्मनो मूर्द्धिदेशेऽष्टदिक्षु अध ऊर्ध्वं च विन्यसेदित्यर्थः॥ह्रीं स्त्रीं हूं अं आं कं ५इंद्राय नमः॥३इं ईं चं ५अग्नये नमः॥३उं ऊं टं ५यमाय२॥३ऋं ॠं तं ५नैर्ऋतये२॥३ऌं ॡं पं ५वरुणाय२॥३एं ऐं यं ४वायवे२॥३ओं औं शं ४सोमाय२॥३अं अः लं क्षं ईशानाय२॥अधः३अनंताय२॥३ऊर्द्धं ब्रह्मणे नमः॥इति लोकपालन्यासः॥ब्रह्मा विष्णुश्च रुद्रश्चेश्वरश्च सदाशिवः॥ततः परशिवो देव षडेते शिवाः परिकीर्तिताः॥मूलाधारे ब्रह्मरंध्रे डाकिनीसहितं शिवं॥स्वाधिष्ठानाख्यचक्रे तु स विष्णुं राकिणी तथा॥रुद्रं तु लाकिनीयुक्तं डादिफांतार्णपूर्वकं॥अनाहते कादिहांतमीश्वरं काकिनीयुतं॥विशुद्धाख्ये महाचक्रे षोडशस्वरसंयुते॥सदाशिवं शाकिनी तु विन्यसेत्पूर्ववत्ततः आज्ञाचक्रे तु देवेशि हक्षवर्णसमन्वितं॥परंशिवं ब्रह्मरूपं हाकिनीसहितं न्यसेत्० अथ प्रयोगः॥मूलाधारे ३वं शं षं सं डाकिनीसहितं ब्रह्मणे नमः॥स्वाधिष्ठाने ३बं भं मं यं रं लं राकिनीसहितं विष्णवे नमः॥मणिपूरे ३डं ढं णं तं थं दं धं नं पं फं लाकिनीसहितं रुद्राय नमः॥अनाहते ३कं खं गं घं ङं चं छं जं झं ञं टं ठं काकिनीसहितं ईश्वराय नमः॥विशुद्धाख्ये ३अं १६ साकिनीसहितं सदाशिवाय नमः॥आज्ञाचक्रे ३हं क्षं हाकिनीसहितं परशिवाय नमः॥इति शिवशक्तिन्यासः॥तारा चोग्रा महोग्रा च वज्रा काली सरस्वती॥कामेश्वरी च चामुंडा इत्यष्टौ तारिणी मताः॥सर्वाष्टौ तारिणी वर्णसमुच्चार्य क्रमेण च॥स्वरादिवसुवर्गेण भूषितेन च बिंदुना॥ङेंतान नमोंतान्न्यस्तव्यास्ताराद्याध्यानपूर्विका॥ब्रह्मरंध्रे ललाटे च भ्रूमध्ये कंठगह्वरे॥हृदये नाभिदेशे च लिंगे चाधारके न्यसेत्॥प्रयोगस्तु० ब्रह्मरंध्रे ३अं १६ तारायै२॥ललाटे ३कं ५उग्रायै२॥भ्रूमध्ये ३

॥८॥ मूलाधारे तु ब्रह्माणं डाकिनीसहितं न्यसेत्॥सर्वत्र्यक्षरीयुक्तं वादिसांतं सबिंदुकं॥स्वाधिष्ठानाख्यचक्रे तु स विष्णुं राकिणीं तथा॥वादिलांतं प्रविन्यस्य नाभौ तु मणिपूरके॥डादिफांतार्णसहितं रुद्रं च लाकिनीं तथा॥अनाहते कादिठांतं ईश्वरं काकिनीं तथा॥इति पुस्तकांतरे पाठभेदः॥८॥

अष्टपुरीमिति पुस्तकांतरे॥३ अष्टपुरी॥६

चं ५ महोग्रायै॰ २॥ कंठगह्वरे ३ टं ५ वज्रायै २॥ हृदये ३ तं ५ काल्यै २॥ नाभिदेशे ३ पं ५ सरस्वत्यै २॥ लिंगे ३ यं ४ कामेश्वर्यै २॥ मूलाधारे ३ शं षं सं हं क्षं चामुण्डायै नमः॥ इति नादिन्यासः॥ मूलाधारे कामरूपं हृदि जालंधरं तथा॥ ललाटे पूर्णगिर्याख्यम् उड्डीयानं तदूर्द्ध्वके॥ वाराणसीं भ्रुवोर्मध्ये ज्वलंतीं लोचनत्रये॥ मायावतीं मुखवृत्ते कंठे मधुपुरीं ततः॥ अयोध्यां नाभिदेशे च कट्यां कांचीं विनिर्दिशेत्॥ एतानि प्रधानानि पीठानि। क्रमतो विदुः॥ ह्रस्वदीर्घस्वरैर्वर्गैर्नमोंतैः क्रमतो न्यसेत्॥ अथ प्रयोगः॥ मूलाधारे ३ अं आं कं ५ कामरूपपीठाय नमः॥ हृदये ह्रीं श्रीं हूं इं ईं चं ५ जालंधरपीठाय २॥ ललाटे ३ उं ऊं टं ५ पूर्णगिरिपीठाय २॥ ललाटोर्द्ध्वे ३ ऋं ॠं तं ५ उड्डियानपीठाय २॥ भ्रूमध्ये ३ ऌं ॡं पं ५ वाराणसीपीठाय २॥ लोचनत्रये ३ एं ऐं यं ४ ज्वलंतीपीठाय २॥ मुखवृत्ते ३ ओं औं शं ४ मायावतीपीठाय २॥ कंठे ३ अं अः लं क्षं मधुपुरीपीठाय २॥ नाभिदेशे ह्रीं श्रीं हूं अयोध्यापीठाय २॥ कट्यां ३ कांचीपीठाय २॥ ततो मूलमुच्चार्य शिरआदिपादपर्यंतं पादादिशिरोंतं हृदयादिमुखमिति व्यापकत्रयं कुर्यात्॥ इति षोढा च कथिता नाराद्या सर्वसिद्धिदा॥ असौभ्यः सर्वजंतूनां न्यासस्यास्य प्रभावतः॥ इति रुद्रयामले षोढान्यासः॥ प्रकारांतरं कालीतंत्रे मंत्रेणांतरितां कृत्वा षडंगं मातृकां न्यसेत्॥ क्रमोत्क्रमाद्धारारोहे ताराषोढा प्रकीर्तिता॥ कृतेस्मिन्न्यासवर्य्ये तु सर्वं पापं प्रणश्यति॥ योगिनीनां भवेन्मुख्यः स देवो न तु मानुषः॥ यं नमंति महेशानि षोढापुटितविग्रहाः॥ अल्पायुः सभवत्येव देवताः कंपते भिया॥ नान्यस्य पूज्यो लोकेपि पितृहंता मुखोजनः॥ तदुक्तं तंत्रांतरे॰ न्यसेत्सर्गान्वितां सृष्टिंह न्याबिंदुंतिकां न्यसेत्॥ केवलां मातृकां न्यस्येत्साधकः स्थितिवर्त्मना॥ संहृतिर्दीक्षसंहारः सृष्टिस्तु सुखमक्षयं॥ स्थितिस्तु शान्तिर्विन्यासस्तस्मात्कुर्यात्त्रिधा मतः॥ न्यासः संहारान्तो मस्करिवैखानसेषु विहितोयं॥ स्थितिन्यासो गृहमेधिषु सृष्टिन्यासो वर्णिनामिति प्राहुः॥ केचित्तु जिगृहस्थे संहारान्तं केचिदाहुराचार्याः॥ सहजानौ वनवासिनि [illegible] तिचादि [illegible] र्गितां स्त

नतु इति पुस्तकांतरे॥४॥ सुतरत्नय इति प्रत्यंतरे॥२ प्रसादत इति पुस्तकांतरे॥६॥ बिंदुसर्गान्वितां न्यासात् डायंतान् स्थितिवर्त्मनेति पुस्तकांतरे॥३॥

प्रयत्नतइतिपुस्तकांतरे२ शोधनइतिपाठांतरं॥२

सिं॥ एतेनसृष्टिस्थितिसंहृतिक्रमेणकर्तव्यं॥ षट्वारमितिसृष्टिस्थितिसंहारमित्याद्युक्रमेणेत्यर्थः॥ सृष्टिरकारादिसकारांता॥ स्थितिर्डादिढांतः
संहृतिःसकारादिरकारांतः॥ ततःषोढांतरं॰ तदुक्तंयामले॰ नप्रकाश्यमिदंकापिमंत्रिणःकायरक्षणे॥ प्रणवंमातृकावर्णैः पुटितंमातृ
कास्थले॥ तेनैवपुटितंवर्णंन्यसेत्तत्रैवपार्वति॥ मायाबीजंतथादेविविन्यस्तव्यंप्रियेततः॥ वधूबीजंतथाचैवंविन्यसेत्तुसमाहितः॥ कू
र्चबीजंतथादेविन्यसनीयमशेषतः॥ अस्त्रंचैवतथान्यस्त्वासकलंतदनंतरं॥ गुह्यषोढात्वियंदेविनप्रकाश्याकदाचन॥ अवश्यंप्रत्यहं
कार्यंनपूजानजपस्तथा॥ फलार्थिना एषाकालीषोढाकर्तव्या॥ तदुक्तंयामले॥ गुह्यषोढासदाकार्यातारिण्यामंत्रसिद्धये॥ कालीषोढा
ऽथवादेविनपूजानजपस्ततः॥ ततोमूलमुच्चार्यशिरआदिपादान्तंपादादिशिरोंतंहृदादिसुस्वमितिव्यापकत्रयंन्यसेत्॥ अथवाप्रणव
पुटितमूलेनव्यापकंपंचधासप्तधावाकुर्यात्॥ तदुक्तंफेत्कारिण्यां॥ ॐकारपुटितंकृत्वामनुनाव्यापकंन्यसेत्॥ ततोऽर्घ्यस्थापनं॥ तद्यथा
स्ववामेमूलमंत्रेणत्रिकोणवृत्तचतुरस्रमंडलंकृत्वातत्रसाधारंपात्रंस्थापयित्वामूलविद्ययाशुद्धजलादिनापूर्यजलाधिष्ठानमंत्रेणजलम
धिष्ठाप्यरक्तचंदनबिल्वपत्राद्यक्षतादीन्निःक्षिप्य अर्घ्यस्याग्नीशासुरवायुमध्येदिक्षुच ह्रांअखिलवागृपिण्यैहृदयायनमइत्यादिनाह्रींए
कजटायैहृदयायनमइत्यादिनाषडंगानिविन्यस्यार्घ्यपात्रे मत्स्यमुद्रयाछाद्यमूलंदशधाजपेत्॥ तथाच॥ दशकृत्वोजपेद्विद्यांदेवताभा
वसिद्धये॥ तेजोमयंतज्जलंविभाव्यकिंचित्प्रोक्षणी पात्रेनिःक्षिप्य तेनोदकेनात्मानंपूजोपकरणंचाभ्युक्ष्यपूजामारभेत्॥ भूतशुद्ध्यनं
तरंवा॥ तथाचफेत्कारीतंत्रे॰ भूतशुद्धिंविधायेत्थमर्घ्यादिस्थापनंचरेत्॥ प्राणायामंततःकृत्वाऋष्यादिन्याससमाचरेत्॥ ततःपुष्पांजलिं
विरच्यात्माभेदेनदेवींध्यायेत्॥ यथा॥ प्रत्यालीढपदार्पितांघ्रिशवहृत्घोराट्टहासापरां खड्गेंदीवरकर्तृखर्परभुजाहूंकारबीजोद्भवा॥

विधायार्थेतिपुस्तकांतरे॥२

खवेतिप्रत्यंतरे॥१

जूटोग्रेति पाठान्तरं १ रंध्रत इति पाठांतरं ४

॥ खर्वीनीलविशालपिंगलजटाजूटैकनागैर्युता जाड्यंन्यस्यकपालिके त्रिजगतांहंत्युग्रतारा स्वयं ॥ १ ॥ एवंविभाव्य करकलितदूर्वाक्षतरक्तचंदनमिलितदिनकरकिरणारुणकुसुमांजलौ मातृकायंत्रं ध्यात्वा हृदयान्मूलमंत्रतेजोमयीं शुद्धचैतन्यज्ञानमयीं षट्चक्रभेदेन शिरस्थितसहस्रदलकमलकर्णिकांतर्गतपरमशिवं प्रापय्य क्रियासमभिव्याहारेण तदमृतांबुधौ विश्राम्य तदमृतलोलीभूतां चैतन्यानंदमयीं तां प्रवहन्नासापुटादानीय मूलेन कल्पितमूर्तौ वावाहयेत् ॥ तथा च तंत्रांतरे ॥ देवीं सुषुम्णामार्गेण चानीय ब्रह्मरंध्रके ॥ वहन्नासापुटे ध्यात्वा निर्यांतीं स्वांजलिस्थितां ॥ पुष्पे आरोप्य तत्पुष्पं प्रतिमादौ निधापयेत् ॥ देवेशि भक्तिसुलभे परिवारसमन्विते ॥ यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव ॥ ततः पूर्वोक्तक्रमेणावाहनादिकं कृत्वा योन्यादिपंचमुद्राः बीजसहिताः दर्शयेत् ॥ तथा च ॥ आवाहनादिमुद्राभिः पंचमुद्राः प्रदर्शयेत् इति भैरवीयात् ॥ तास्तु मुद्राः प्रकरणेऽनुसंधेयाः ॥ आं ह्रीं क्रों स्वाहेति प्राणप्रतिष्ठां कुर्यात् ततो मूलमुच्चार्य श्रीमदेकजटे वज्रपुष्पं प्रतीच्छ हुं फट् स्वाहेत्यनेन मंत्रेण षोडशोपचारादिना पूजयेत् ॥ अस्याः पूजाप्रयोगस्तु ॥ आदौ मूलं तत एतन्मंत्रमुच्चार्य इदं द्रव्यं अमुकदेव्यै नमः ॥ तथा च फेत्कारीये ॥ श्रीमदेकजटेत्युक्त्वा वज्रपुष्पं प्रतीच्छ च ॥ तारादि[illegible]ह्निजायांतमुदीर्य यत्नतं चरे[illegible] ॥ तारः कूर्चं तदादि हुं फडित्यर्थः स च वह्निजायांत इति यावत् ॥ कस्यचित्प्राचीनपद्धतौ ॥ श्रीभगवत्येकजटे विशुद्धधर्मगात्रि सर्व[illegible] निशमय सर्वविकल्पानपनय हुं फट् स्वाहा पाद्यं नमः ॥ ॐ तारिणी ह्रीं इदमाचमनीयं स्वधा ॥ ॐ ह्रीं मणिधरिणि वज्रिणि महाप्रतिसरे इदमर्घ्यं नमः स्वधा ॥ ह्रीं कपालिके मधुपर्कं स्वाहा ॥ श्रीमदेकजटे इदमाचमनीयं सुगंधिजलं नमः ॥ गंधपुष्पा[illegible]शेषवस्त्वयं ॥ परमा[illegible]रामनंदसौरभ्यपरिपूर्णदिगंतरं ॥ गृहाण परमं गंधं कृपया परमेश्वरि ॥ श्रीमदेकजटे एष गंधो नमः ॥ तुरीयरससंभूतं [illegible]नागुणमहो[illegible]वं ॥ १३१

आदिशब्दात्पंचोपचारेण वा ॥ ६ १ वनेति पुस्तकांतरे

नेत्रं सौरभं पुष्पं गृह्यतां परमेश्वरि॥ इयं वचो रचनाविद्याधराचार्य्यसंमता॥ महानंत्रे तारिणीनिर्णये॥ प्रणवाद्गगवत्से [illegible]टे माया ततः परं॥
विशुद्धधर्मगात्रितः सर्वपापानि तत्परं॥ शमय सर्वविकल्पानपनय हुं फट् शिरः॥ अयं पाद्यमनुर्देवी आचमनीयमनुं शृणु॥ तारं तारिणि माये
[illegible]तले माया ततः परं॥ मणिधरिणि वज्रिणीति महाप्रतिसवेमनुः॥ मायाकपालिके मंत्रो मधुपर्के म्वरे म्वरी॥ ततो योनिमुद्रां प्रदर्श्य देवि आज्ञां
पयम[illegible]न्याः परिवारान्पूजयामि इति प्रार्थ्यावरण पूजां कुर्य्यात्॥ यथा केसरेषु अग्नीशासुरवायुमध्ये दिक्षु च षडंगानि पूजयेत्॥ आग्नेय्यां
ह्रां एकजटायै हृदयाय नमः ऐशान्यां ह्रीं तारिण्यै शिरसे स्वाहा॥ नैर्ऋत्यां ह्रूं वज्रोदके शिखायै वषट्॥ वायव्ये ह्रैं उग्रजटायै कवचाय हुं॥ मध्ये
ह्रौं महाप्रतिसरे नेत्रत्रयाय वौषट्॥ चतुर्दिक्षु ह्रः अस्त्राय फट् इत्यादि॥ नीलसरस्वतीपक्षे तु ह्रां अखिलवाग्रूपिण्यै हृदयाय नमः इत्यादिक्र
मेण षडंगानि पूजयेत्॥ ततो देव्या मौलौ ॐ अक्षोभ्य वज्रपुष्पं प्रतीच्छ हुं फट् स्वाहेति पूजयेत्॥ तदुक्तं फेत्कारीये॥ वज्रपुष्पं प्रतीच्छेति हुं फट् स्वा
हेति ततो मनुः॥ एतन्मंत्रेनाममात्रभिन्नेचैव न संशयः॥ अनेन मनुना देवि परिवारान्समर्चयेत्॥ सर्वत्रासौ प्रणवस्तदुक्तं तत्रैव॥ प्रणवं वह्निजायांतं
वज्रपुष्पं विनिःक्षिपेत् इति॥ ततः पीठस्योत्तरे वायव्यादीशपर्यंतं गुरुपंक्तित्रयं यजेत्॥ तथा॥ ओं ऊर्द्ध्वकेशानंदनाथ वज्रपुष्पं प्रतीच्छ हुं
फट् स्वाहा॥ एवं व्योमकेशानंदनाथ नीलकंठानंदनाथ वृषभध्वजानंदनाथं॥ एते दिव्यौघाः॥ वसिष्ठानंद नाथं कूर्मानंदनाथ मीनं
नाथानंदनाथं महेश्वरानंदनाथं हरिनाथानंदनाथ एते सिद्धौघाः॥ एवं तारावत्यंब भानुमत्यंब जयांब विद्यांब महोदर्यंब सुखानंदनाथ
परानंदनाथ पारिजातेश्वरानंदनाथ कुलेश्वरानंदनाथ विरूपाक्षानंदनाथ फेरव्यंब एते मानवौघाः प्रणवादिनमोंताः पूज्याः॥ एकैके
म्रमेकमात्रपूजयेत्॥ तदुक्तं भावचूडामणौ॥ अथ तारागुरूत्व स्येहष्टाहष्टफलप्रदान्॥ ऊर्द्ध्वकेशो व्योमकेशो नीलकंठो वृषध्वजः॥ दि

मंत्रतः॥६

तं·सा· व्यौघाः सिद्धिदा वत्स सिद्धौघान् शृणु तत्त्वतः॥ वसिष्ठः कूर्मनाथश्च मीननाथो महेश्वरः। हरिनाथो मानवौघान् शृणु वत्स्यामि तद्गुरून्॥ जा
१३२ रावती भानुमती जपा विद्या महोदरी॥ सुखानंद परानंद पारिजात कुलेश्वरः॥ विरूपाक्षः फेरवौ च कथितं तारिणीकुले॥ आनंदनाथशब्दांता य
गुरवः सर्वसिद्धिदाः॥ स्त्रियोपि गुरुरूपास्सुरं वा ताः परिकीर्तिताः॥ अशक्तश्चेद्दशोभ्यमात्रं पूजयेत्॥ मम मौलिस्थितं देवमवश्यं परिपूजयेदिति
फेत्कारीये देवीवाक्यात्॥ ततः पूर्वादिदलमूले। महाकाली च रुद्राणी उग्रा भीमा तथैव च॥ घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी॥ अष्टमी भैरवी प्रो
क्ता योगिनीस्ताः प्रपूजयेत्॥ ततः पूर्वादिचतुर्दले वामावर्तेन वैरोचन शंखपांडर पद्मनाभ असितान् पूजयेत्॥ अग्न्यादिकोणदलेषु लामक माम
क पांडर तारकान् पूजयेत्॥ पूर्वादिद्वारचतुष्टयेषु वामावर्तेन पद्मांतक यमांतक विघ्नांतक नरांतकान् वज्रेत्यादि पूजयेत्॥ तथा च सि
द्धसारस्वते॥ वैरोचनं च शंखं च पांडरं पद्मनाभकं॥ असिताभं यजेन्मंत्री दिक्चतुष्के चतुर्दले॥ लामकं मामकं चैव पाण्डरं तारकं तथा
॥ वह्न्यादिषु चतुष्कोणे मंत्रैः सैः स्वैः पृथक् पृथक्॥ नीलतंत्रे॰ वामावर्तक्रमेणैव पूजयेद्द्वारदेवताः॥ ततः पूर्वादिद्वारचतुष्टयेषु वामावर्तेन पद्मांत
कयमांतक विघ्नांतक नरांतकान् वज्रेत्यादिना पूजयेत्॥ तथा च॥ द्वारपूजादितस्तद्वत् पद्मांतकं यमांतकं॥ विघ्नांतकं समभ्यर्च्य पूजयेत्
नरकांतकं॥ ततो बलिं दद्यात्॥ तदुक्तं फेत्कारीये॰ पूजांते भोजनादौ च बलिमंत्रेण दापयेत्॥ तत्र क्रमः॥ स्ववामे तत्र त्रिकोण चतुरस्र मंडलं
कृत्वा पुष्पैस्तमभ्यर्च्य द्रव्यभरितसाधारं पात्रं निधाय तद्वामांगुष्ठानामिकाभ्यां ॐ ह्रीं एकजटे महायक्षाधिपतये मयोपनीतं बलिं गृह्ण गृ
ह्णापय २ मम सर्वशांतिं कुरु २ परविद्यामाक्ष्म्य फट् २ छिंधि २ सर्वजगद्वशमानय ह्रीं स्वाहेति त्रिः पठित्वा बलिं दद्यात्॥ तदुक्तं मत्स्यसूक्ते॥ इति राम
संपूज्य वामे च व्यापकं मंडलं लिखेत्॥ कुसुमैरर्चयेत्तत्तु तत्र पात्रं निधाय च॥ पात्रे विनिहितं द्रव्यं निधाय साधकोत्तमः॥ अंगुष्ठानामिकाभ्यां तु बलिं १३२

क्रमाद्यजेदिति पुस्तकांतरे॥ ६

त्रुटिति पुस्तकांतरे॥२

द्धोऽस्मयत्नत इति॥ तदुक्तं नीलतंत्रे॥ प्रणवं पूर्वमुच्चार्य ह्ल्लेखां च ततः परं॥ एकजटे पदं ते च महाशब्दमुदीरयेत्[illegible]क्षोधिपदमाभाष्य फट्ये प्रस्तो मया॥ उपनीतं बलिं चोक्त्वा गृह्ण गृह्णेति च द्विधा॥ गृह्णापय द्विधा प्रोक्ता मम सर्व पदं तथा॥ शांतिं कुरु पदं चैव परविद्यामनंतरं॥ हूं[illegible]क्ष्येति च ब्रूयात्स्फेट्टं छिंधीति च द्विधा॥ सर्वादिं च ततो जगद्वशमानय शब्दतः॥ मायया स्वाहया युक्तो मंत्रो बलिविधौ स्मृतः॥ ततो रहस्यमालया निगदेनोपांशुमानसेन वाष्टोत्तरसहस्रं शतं वा जपेत्॥ तथा च॰ अष्टोत्तरशतं जाप्यं यावज्जीविनसंख्यया॥ सहस्रं वा जपेद्देवि नित्यपूजाविधौ पुनः॥ अशक्तश्चेद्विंशत्यन्यूनं न जपेत्॥ तथा च॰ सहस्रमथ विंशद्वा जपेद्रहस्यमालया॥ तत्र जपरहस्यं यथा॥ मूलाधारस्वाधिष्ठानमणिपूरकेषु यथासंख्यं बीजत्रयव्याप्तिं तडित्कोटिकभास्वरां परस्परानुस्यूतां पीतां जलदाभां विभाव्य सर्वं तेजोमयं फट्कारं विश्रांतिरूपं ध्यात्वोच्चरेत्॥ तथा च नीलतंत्रे॥ मंत्रध्यानं प्रवक्ष्यामि जपात्सर्वज्ञदायकं॥ मंत्रध्यानान्महेशानि शुद्ध्यंति ब्रह्मादैवैः॥ मूलचक्रे तु ह्ल्लेखां सूर्यकोटिसमप्रभां॥ स्वाधिष्ठाने पीतवर्णं द्वितीयं तु विभावयेत्॥ नाभौ जीमूतसंकाशं कूर्चबीजं महाप्रभं॥ अस्त्रबीजं हृदि न्यस्य कालाग्निसदृशप्रभं॥ मूलादिब्रह्मरंध्रे तु सर्वां विद्यां विभावयेत्॥ सूर्यकोटिप्रतीकाशां योगिभिर्दृष्टपूर्विकामिति॥ एवं यथाशक्ति जप्त्वा जपसमर्पणादि विसर्जनांतं कर्म समापयेत्॥ जपसमर्पणक्रमस्तु फेत्कारीये॥ ततश्चार्घ्योदकेनैव देव्याश्च वामहस्तके॥ जपं समर्पयेद्धीमान् गुह्यातिगुह्यमंत्रकैरिति॥ अस्याः पुरश्चरणं लक्षजपः॥ तथा च॰ एवं कृत्वा हविष्याशी जपेल्लक्षमनन्यधीः॥ तथा॥ रहस्यमालामादाय लक्षमेकं सदा जपेदिति॥ रहस्यमाला यथा॥ अकस्माद्विहिता सिद्धिर्महाशंखाख्यमालया॥ पंचाशन्मणिभिर्माला निर्मिता सर्वसिद्धिदा॥ तथा॥ कांतया रचिता सिद्धिर्महाशंखाख्यमालया॥ पंचाशन्मणिभिर्माला विहिता सर्वसिद्धिदा॥ महाशंखाभावे स्फाटिकी कर्तव्या॥ तथा च॥ महाशंखेऽप्यशक्तश्चेत्स्फाटि

७॥ यत्न इति पुस्तकांतरे॥७

क्षमालया जपेत्॥ तारामंत्रेषु कुल्लुकाया ज्ञानमावश्यकं तथा॥ तथा च मत्स्यसूक्ते॥ कुल्लुकां च न जानाति महामंत्रं जपेन्नरः॥ पंचत्वं जायते तेनास्य अथवा वातुलो भवेत्॥ मायातंत्रे॰ कुल्लुकां धारयेत् शीर्षे लिखित्वा भूर्ज्जपत्रके॥ राजद्वारे सभायां च विजयी भवति ध्रुवं॥ एवमुक्तेन जप्तेन जप्तान् दशांशहोमं तद्दशांशतर्प्पणं तद्दशांशाभिषेकं तद्दशांशब्राह्मणभोजनं गुरुदक्षिणां च चरेत्॥ तदुक्तं सिद्धसारस्वते॥ एवं जपं पुरा कृत्वा दशांशमसितोत्पलैः॥ आज्याक्तैर्जुहुयान्मंत्री तद्दशांशेन तर्प्पणं॥ तत्रैव॰ एवं जपं पुरा कृत्वा दशांशमसितोत्पलैः॥ आज्याक्तैर्जुहुयान्मंत्री बिल्वैर्वा जुहुयात्ततः॥ कालागुरुद्रवोपेतैर्निर्मलैर्गंधवारिभिः॥ तर्प्पयेच्च परां देवीं तत्प्रकारमिहोच्यते॥ जलेनावाह्य विधिवत् पाद्याद्यैरुदकात्मकैः॥ संतर्प्य विधिवद्देवीं परिवारान्सकृत्सकृत्॥ अभिषेको यथा॰ देवीबुध्यास्वमात्मानं संपूज्य साधकोत्तमः॥ तारिणीं सिंचयामीति जलं मूर्ध्नि विनिःक्षिपेत्॥ अथ मंत्रभेदाः॥ एकवीराकल्पे॰ लिखेत्त्वं कूर्च्चसंयुक्तं रौद्रं त्रैगुण्यमेव च॥ विधिविष्णुमहेशानां स्वशक्त्याक्रमयोगतः॥ एक[illegible]ता महाविद्या सर्वसिद्धिप्रदा मता॥ अस्यार्थः॥ त्वं स्वरूपं तत्वा[illegible] बीजं॥ तथा च तंत्रे॥ [illegible]दिसं तं समुद्धृत्य बिंदुनादविभूषितं[illegible]मिति वचनात्॥ रौ[illegible]सादं त्रैगुण्यं प्रणवं विधिशक्तिर्वाग्भवं विष्णुशक्तीरमाबीजं महेशशक्तिर्भुवनेश्वरीबीजं॥ ध्यानार्चनप्रयोगश्च तारिण्याः पूर्ववद्भवेत्॥ प्रणवं भुवनेशानीं हां कूर्च्चबीजं नमस्तारायै सकलदुस्तरं तारय २ प्रणवयुग्मं वह्निवल्लभा॥ तदुक्तं नीलतंत्रे॰ प्रणवं[illegible]पूर्वमुद्धृत्य सहल्लेखाबीजमुद्धरेत्॥ गगनं शेषसंयुक्तं बिंदुनादविभूषितं॥ कूर्च्चबीजं च हहरयं तारायै च समुद्धरेत्॥ सकलदुस्तरं तारय तारयेति यथा पुनः॥ तारयुग्मं वह्निजायामंत्रोयं सुरपादपः॥ ध्यानपूजादिकं सर्वं पूर्ववत्समाचरेत्॥ अस्य पुरश्चरणं चतुर्लक्षजपः॥ तदुक्तं तत्रैव॥ चतुर्लक्षजपेनास्याः सिद्धयोष्टौ भवंति हि॥ मायातंत्रे॥ श्रीभगवानुवाच॰ तारा चोग्रा महोग्रा च वज्रा नीला स

---

१ रुद्रेति पुस्तकांतरे

रस्वती॥कामेश्वरी भद्रकाली इत्यष्टौ तारिणी स्मृताः॥१॥उष्मवर्णगतो जीवो निगमस्वरसंयुतः॥नादबिंदुसमाक्रांतस्तत्त्वरश्मिसमन्वितः॥कपिलो वामकर्णस्थो नादाढ्यो बिंदुशेखरः॥पार्श्वोन्त्यं च तथाद्यं संशरांतं परिकीर्तितं॥मध्यादिमाया कवचं द्वितीयं मंत्रमुद्धृतं॥विपरीतं त्रिधा ज्ञेयं कूर्चाद्यं त्वतुरीयकं॥मायादिकवचांतं च पंचमं परिकीर्तितं। मायामध्यगतं षष्ठं द्वितीयांत्यं च सप्तमं॥अष्टमं कवचं मध्यमेवं भेदाष्टकं भवेत्॥अस्यार्थः॥उष्मवर्णो रेफः जीवो हकारः निगमस्वरः ईकारः नादबिंदुयुतः तत्त्वरश्मिर्वधूबीजं कपिलो हकारः वामश्रवणनादबिंदुयुतः शरांतं फडंतं तेन पंचाक्षरः फडंतश्चेदेका विद्या तेन पंचाक्षरः प्रकृतिः मध्यादि इति॥तेन वधूर्माया कूर्चं फट् इति द्वितीया॥विपरीतमिति आद्यंतबीजयोर्वैपरीत्यमंत्रेण कूर्चं वधूर्माया फट् तृतीया॥कूर्चाद्यं चेति तुरीया॥मायादीति माया वधूः फट् कूर्चमिति पंचमी॥मायेति वधूर्माया फट् कूर्चं इति षष्ठी॥माया कूर्चं वधूः फट् इति सप्तमी॥अष्टमेति वधूः कूर्चं माया फट् स्यादष्टकं॥ऋषिः स्यादष्टकं छंदो अनुष्टुब्देवता तथा॥शंभुपत्नी महेशानि चातुर्वर्णेषु योजयेत्॥काललक्षं जपेन्मंत्रमेवमुक्तेन वर्त्मना॥ध्यानपूजादिकं सर्वं पूर्ववच्च समाचरेत्॥अक्षरस्यैव भेदोयं फटौ यत्र न तत्र वै॥प्रजपेत् अक्षरं यस्तु न्यासे सर्वं प्रतिष्ठितम॰ ॥प्रणवं तारे तारेतततारा वह्निवल्लभा॥तदुक्तं गांधर्वे॥प्रणवं पूर्वमुद्धृत्य तारे तारे तु वै तथा॥तत्तारा स्वाहेति मंत्रोयं दशाक्षर उदाहृतः॥अस्या ध्यानं स्वतंत्रतंत्रे॰ श्यामांगी च त्रिनयना द्विभुजा वरपंकजे॥दधाना बहुवर्णाभिर्वहुरूपाभिरावृता॥शक्तिभिः स्मेरवदना स्मेरमौक्तिकभूषणाम्॥रत्नपादुकयोर्न्यस्तपादांबुजयुगा स्मरेत्॥१॥अस्याः पूजादिकं सर्वं पूर्ववत्॥पुरश्चरणं तु वर्णलक्षजपः॥तदुक्तं तत्रैव॰ वर्णलक्षं जपेद्धीमान् नियमेन यथाविधि॥दशांशं जुहुयान्मंत्री घृताक्तै रक्तपुष्पकैः॥वाग्भवं

॥ ॥

१दशेति पुस्तकांतरे॥१

वर्मेतिपुस्तकांतरे॥६॥

॥३॥प्रणवंपूर्वमुद्धृत्यपद्मेयुग्मंतथैवच॥महापद्मेसुगंधेब्रूयात्पद्मावनिपदंततइतिपुस्तकांतरेपाठांतरं॥

भुवनेश्वरीप्रणवंवाग्भवंभुवनेश्वरीफट्स्वाहा॥तदुक्तंमातृकार्णवे॰॥वाग्भवंकुलबीजंतुतारकंवाग्भवंतथा॥हृल्लेखाचास्त्रमंत्रांतेवह्निजायावधिर्मनुः॥अष्टाक्षरोमनुःप्रोक्तोवेदमातुरनुत्तमः॥पंचांगान्यस्यमंत्रस्यपंचबीजैःप्रकल्पयेत्॰अस्त्रंशेषाक्षरैर्न्यस्यकृतकृत्योभवेन्नरः॥ध्यानपूजादिकंसर्वंपूर्ववच्चसमाचरेत्॥मत्स्यसूक्ते॰प्रणवंपूर्वमुद्धृत्यपद्मंमुखितथैवच॥महापद्मपदंब्रूयात्पद्मावनिपदंततः॥मायेस्वाहेतिमंत्रोयंप्रोक्तःसप्तदशाक्षरः॥पूजापूर्ववदुद्दिष्टाअर्द्धरात्रेचतुष्पथे॥जपमस्याश्चरेद्यस्तुससाद्गुतकविस्तया॥हंसःप्रणवंमायावधूकूर्चंहंसः॥तदुक्तंस्वच्छंदसंग्रहे॰शिवबीजंमहेशानिशक्तिबीजंततःपरं॥विंदुसर्गसमायुक्तंवेदाद्यंतदधःक्रमात्॥मायांस्त्रीकूर्चंबीजान्तेहंसबीजमुदाहृतं॥अष्टाक्षरीमहाविद्याकथिताभुविदुर्लभा॥पंचाक्षरीमहाविद्याहंसाद्यंतामहोदया॥केवलंलज्जयत्नेनतनवस्नेहाप्रकीर्तिता॥अनयोर्जपपूजादीन्पंचाक्षरीवदाचरेत्॥तंत्रांतरे॥लज्जामृगंवधूबीजंततोदीर्घंतनुच्छदं॥सारस्वतोपरोमंत्रःसंप्रोक्तश्चतुरक्षरः॥तदंतेपदिफट्कारोमनुःपंचाक्षरोभवेत्॥तथा॥तारशक्तिवधूबीजान्यंतेदीर्घतनुच्छदं॥अस्त्रमग्निवधूरंतेमनुःसप्ताक्षरोभवेत्॥मंत्रमात्रेष्वयंप्रोक्तस्तदादीर्घेणवर्मणा॥पुटितंचवधूबीजमपरोसौगुणाक्षरः॥अथरहस्यपुरश्चरणम्॰अशक्तानांचमेदेवपुरश्चरणमुच्यते॥अथवान्यप्रकारेणपुरश्चरणमिष्यते॥कुजेवाशनिवारेवानरमुण्डंसमाहृतं॥पंचगव्येनमिलितंचंदनाद्यैर्विशेषतः॥निक्षिप्यभूमौहस्तार्द्धमानतःकाननेवने॥तत्रतद्दिवसेरात्रौसहस्रंयदिमानवः॥एकाकीप्रजपेन्मंत्रंसभवेत्कल्पपादपः॥अथवान्यप्रकारेणपुरश्चरणमिष्यते॥शवमानीयतत्रह्यरित्तेनैवपरिखन्यच॥तद्दिनात्तद्दिनंयावत्तावदष्टोत्तरंशतं॥तेनैवसर्वसिद्धीशोनात्रकार्याविचारणा॥अथवान्यप्रकारेणपुरश्चरणमिष्यते॥अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोरपि॥सूर्योदयंसमारभ्ययावत्सूर्योदयं

सभवेदितिप्रत्यंतरे॥२

५॥विशेषत इति पुस्तकांतरे॥

तरं॥ तावज्जपेन्निरातंकः सर्वसिद्धीश्वरो भवेत्॥ अथ वान्यप्रकारेण पुरश्चरणमिष्यते॥ शरत्काले चतुर्थ्यादिनवम्यंतं विशेषतः॥ भक्तितः पूजयित्वा तु रात्रौ तावत्सहस्रकम्॥ जपेदेकाकी विजने केवलं तिमिरालये॥ अष्टम्यादिनवम्यंतमुपवासपरो भवेत्॥ ततो भवति सिद्धीशः साधको नात्र संशयः॥ ती ब्राकल्पे० तारार्णवे॥ चतुर्थ्यादिनवम्यंतं भुंक्ते रात्रौ तु कानने॥ जपेदेकाकी तिमिरे दिनशः षट्सहस्रकं॥ अष्टम्यां च नवम्यां च सोपवासो स्थिरः सदा॥ मुण्डमालातंत्रे॥ कृष्णाष्टमीं समारभ्य यावत्कृष्णाष्टमी भवेत्॥ सहस्रसंख्यं जप्त्वा तु पुरश्चरणमिष्यते॥ कृष्णां चतुर्दशीं प्राप्य नवम्यंते महोत्सवे॥ अष्टमीनवमीरात्रौ पूजां कुर्याद्विचक्षणः॥ दशम्यां पारणं कुर्यान्मत्स्यमांसादिभिर्युतं। षट्सहस्रं जपेन्नित्यं देव्या भक्तिपरायणः॥ चतुर्दशीं समारभ्य यावदन्या चतुर्दशी॥ तावज्जपेन्महेशानि पुरश्चरणमिष्यते॥ केवलं जपमात्रेण सिद्धमंत्रो भवंति हि॥ सूर्योदयं समारभ्य यावत्सूर्योऽस्तगो भवेत्॥ तावत्संख्या जपेनास्य पुरश्चरणमिष्यते॥ विश्वसारे॥ पूजास्थाने विनिक्षिप्य नरमुंडं तदूर्ध्वके॥ कोमला सनमास्तीर्य पूजयेत्परदेवतां॥ षट्सहस्रप्रमाणेन प्रत्यहं किं न सिध्यति॥ अथ वीरसाधनम्॥ तदुक्तं वीरतंत्रे॥ अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि॥ कृष्णपक्षे विशेषेण साधयेद्वीरसाधनं॥ तस्यार्द्धप्रहरे यामे गते च सुरसुंदरि॥ शवं वापि चितां वापि नीतां गत्वाथवा सुखं॥ साधयेत्स्वहितं मंत्री मंत्रध्यानपरः शुचिः॥ भयं नैव च कर्तव्यं हास्यं तत्र विवर्जयेत्॥ चतुर्दिक्षु नवीक्षेत मंत्रमेव समभ्यसेत्॥ अस्य पूजाद्रव्यं॥ सामिषान्नं गुडं छागं सुरापायसपिष्टकं॥ नानाफलं च नैवेद्यं स्वस्वकल्पोक्तसाधितं॥ चितास्थानं समानीय सुहृद्भिः शस्त्रपाणिभिः॥ समानगुणसंपन्नैः साधको वीतभीः स्वयं॥ योगिनीहृदये० बल्यर्थं सामिषान्नं च गुडं छागं तथा मधु॥ पिष्टकं परमान्नं च पयो मूलं फलं तथा॥ सप्त पात्रे बलिं कृत्वा चतुष्पात्रं चतुर्दिशि॥ पात्रत्रयं सदा मध्ये स्थापयेन्मनुनामुना॥ गुरुं वा भ्रातरं वापि ब्राह्मणानपि सुव्रतान्॥ अन्यानपि च रक्षार्थं विधाय दूरे निवेश

अथ साधकेति पाठांतरं ५

येत्॥ चितालक्षणं यथा॥ असंस्कृता चिताप्रोक्ता न तु संस्कारसंयुता॥ चंडालादिषु संप्राप्ता केवलं शीघ्रसिद्धिदा॥ अत्राधिकारिलक्षणं॰ म
हाबलो महाबुद्धिर्महासाहसिकश्शुचिः॥ महास्वच्छो दयावांश्च सर्वभूतहिते रतः॥ ततः सामान्यार्घ्यं विधाय स्वस्तिवाचनं कृत्वा संकल्पं कुर्या
त्॥ यथा॰ अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा अमुकमंत्रसिद्धिकामः श्मशानसाधनमहं करिष्ये इति संकल्प्य॥ वस्त्रालंकार
भूषाद्यैर्भूषितः पूर्वसंमुखः॥ अस्त्रांत मूलमंत्रेण प्रोक्षणं यागभूमिषु॥ मूलमंत्रेण फट्कारांतेनेत्यर्थः॥ तथा॰ गुरुपादरजो ध्या
त्वा गणेशं बटुकं तथा॥ योगिनीमातृकाश्चैव वामपादपुरस्सरं॥ तथा च गणेशादिकं संपूज्य अस्त्रमंत्रेणात्मानं संरक्ष्य॥ अस्त्रमं
त्रेण मंत्रज्ञो रक्षामात्मनि कारयेत्॥ ततः पुष्पांजलित्रयं क्षिपेत्॥ तदुक्तं वीरतंत्रे॥ ये चात्र संस्थिता देवा राक्षसाश्च भयानकाः॥ पि
शाचाः सिद्धयक्षाश्च गंधर्वाप्सरसां गणाः॥ योगिन्यो मातरो भूताः सर्वाश्च खेचरस्त्रियः॥ सिद्धिदास्ते भवंत्वत्र तथा च मम रक्षकाः॥ प्र
णम्य मनुनानेन पुष्पांजलित्रयं क्षिपेत्॥ श्मशानाधिपतिं पश्चाद्भैरवं कालभैरवं॥ महाकालं यजेद्यत्नात्पूर्वादिदिक्चतुष्टये॥ पाद्यादिभि
श्च मंत्रज्ञो बलिं पश्चान्निवेदयेत्॥ तद्यथा॥ पूर्वस्यां श्मशानाधिपतिं पंचोपचारैः संपूज्यानेन मंत्रेण बलिं दद्यात्॥ यथा॰ ॐ हूं श्मशानाधिप
इमं सामिषान्नबलिं गृह्ण २ गृह्णापय २ विघ्ननिवारणं कुरु २ सिद्धिं मम प्रयच्छ स्वाहा॥ ततो दक्षिणस्यां पूर्ववद्भैरवं संपूज्य॥ ॐ ह्रीं भै
रव भयानक इमं सामिषान्नबलिमित्यादि मंत्रेण बलिं दद्यात्॥ पश्चिमे पूर्ववत्कालभैरवं संपूज्य ॐ हूं कालभैरव श्मशानाधिप इममित्या
दि॥ उत्तरे पूर्ववन्महाकालं संपूज्य॥ ॐ हूं महाकालभैरव श्मशानाधिपेत्यादि॰ तथा च॰ शब्दबीजं ततः पश्चाच्छ्मशानाधिप तत्परं
इमं मंते सामिषान्नं बलिं गृह्ण ततः परं॥ गृह्णापय द्वंद्वं विघ्ननिवारणं ततः॥ कुरु सिद्धिं मम युतं प्रयच्छ स्वाहयान्वितं॥ प्रणवाद्येन म
नुना प्रथमो बलिरीरितः॥ भयांते भैरवं पश्चाद्भयानक ततः परं॥ पूर्ववद्बलिमुद्धृत्य दक्षिणे बलिमुद्धरेत्॥ हूं मंते च महाकालान् पूर्वव

हृलिमुद्धरेत् ॥ पश्चिमे कालदेवाय प्रणवाद्येन कल्पयेत् ॥ शब्दान्ते कालशब्दान्ते भैरवेति ततः परम् ॥ श्मशानाधिप इत्येवं पूर्ववचो नरे हरेत् ॥ चिनामध्येन नोरण्याद्य हृलित्रयमनुत्तमं ॥ कालरात्रि महाकालिकालिके घोरनिस्वने ॥ गृहाणेमं बलिं मातर्देहि मे सिद्धिमुत्तमाम् ॥ कालिकायै बलिं दत्वा भूतनाथाय प्रदापयेत् ॥ शब्दान्ते भूतनाथान्ते श्मशानाधिप इत्यपि ॥ प्रणवाद्येन मनुना दापयेद् हृलिमुत्तमं ॥ हूं शब्दान्ते सर्वगणनाथान्ते चाधिपाय चे ॥ श्मशानमस्तके दत्वा पूर्ववच्चममुद्धरेत् ॥ नाराद्येन बलिं दत्वा पंचगव्येन सुन्दरि ॥ अद्भिः संप्रोक्षणं कृत्वा पीतवस्त्रं न्यसेत्ततः ॥ भूर्जे वा वटपत्रे वा ततः पीठमनुं न्यसेत् ॥ पीठमालीर्य्य चैतस्मिन् बद्ध्वा वीरासनं ततः ॥ वीरार्द्दनेन देवेशि रक्षां दिक्षु प्रकल्पयेत् ॥ अस्यार्थः ॥ भूर्जपत्रादौ तत्कल्पोक्तपीठमन्त्रं लिखित्वा तत्र व्याघ्रचर्मादिपीठमास्तीर्य्य तत्र वीरासनक्रमेणोपविश्य वीरार्दनमंत्रेण चतुर्दिक्षु रक्षां कुर्य्यात् ॥ वीरार्दनमंत्रस्तु ॥ हूं हूं ह्रीं ह्रीं कालिके घोरदंष्ट्रे प्रचंडे चंडनायिके दानवान्दारय २ हन २ शवशरीरे महाविघ्नं छेदय २ स्वाहा हूं फट् ॥ अनेन मंत्रितं तोयं दशदिक्षु विनिःक्षिपेत् ॥ तन्मध्ये भैरवो देवो न विघ्नैः परिभूयते ॥ तथा च० कूर्चद्वयं ततो देवि मायायुग्मं ततः परं ॥ कालिके घोरदंष्ट्रे च प्रचंडे चंडनायिके ॥ दानवान्दारयेत्युक्त्वा हनेति द्वितयं ततः ॥ शवशरीरे महाविघ्नं छेदयद्वितयं ततः ॥ द्विठांतो वर्मशस्त्रान्तो वीरार्दनमनुर्मतः ॥ यदि प्रमादाद्देवेशि साधको भयविह्वलः ॥ ततस्तैस्तैः सुहृद्दुर्गै रक्षितो नाभिभूयते ॥ सितार्के सितवाटपालतूलैर्वर्त्तिकां निर्माय तत्र दीपं संस्थाप्य देव्यस्त्रेभ्ये नम इत्यस्त्रं संपूज्य अधश्च कुलदीपकं निखनेत् ॥ तथा च० अर्केंदु सितवाटपालतूले निर्मितवर्त्तिकां ॥ प्रदीपं तत्र संस्थाप्य अस्त्रं तत्र प्रपूजयेत् ॥ हनेनस्मिन्महादीपे विघ्नैश्च परिभूयते ॥ तदधश्चास्त्रमंत्रेण निखनेत्कुलदीपकं ॥ ततस्तत्तत्कल्पोक्तभूतशुद्ध्यादिन्यासजालं विधाय इष्टदेवतां संपूज्य संकल्प्य मंत्रं जपेत् ॥ संकल्पस्तु ॥ ॐ अद्येत्याद्यमुकगोत्रः श्रीअमुकदेवशर्म्मा अद्यामुकमंत्रसिद्धिकामोऽमुकमंत्रस्यामु

लभ्यतेतिपुस्तकांतरे ४ ३॥विरोदितिपाठःपुस्तकांतरे॥ १ नारकमितिपुस्तकांतरे

कर्तव्यजपमहंकरिष्येइतिसंकल्प्य देवताध्यानपरस्सन्मंत्रंजपेत्॥तथाच॰ ततल्कस्यविधानेनभूतशुद्ध्यादिकंचरेत्॥षोढा वाइतरांवा
पिविन्यस्यपूजयेत्ततः॥मंत्रध्यानपरोभूत्वाजपेन्मंत्रमनन्यधीः॥जपनियमस्तु॥एकाक्षरंयदिभवेद्दिक्तहस्रं ततोजपेत्॥द्व्यक्षरेऽष्टसहस्रं
तुत्र्यक्षरेचायुतार्द्धकं॥अतःपरंतुमंत्रज्ञोगजांतकसहस्रकं॥निशायांवासमारभ्यउदयांतंसमाचरेत्॥गजांतकमष्टोत्तरसहस्रमित्यर्थः॥
यद्यसह्यभयंकर्णनेत्रवस्त्रेणबंधयेत्॥ततोऽर्द्धरात्रपर्यंतंयदिकिंचिन्नलभ्यते॥जयदुर्गाख्यमनुनातेनैवसर्षपान्क्षिपेत्॥जयदुर्गामंत्र
स्तु॥ ॐदुर्गे२रक्षिणिस्वाहा॥ ॐतिलोसिसोमदैवत्योगोसवस्तृप्तिकारकः॥पितॄणांस्वर्गदातात्वंमर्त्यानांममरक्षकः॥भूतप्रेतपिशाचा
नांविघ्नेषुशांतिकारकः॥इतिपठित्वाईशानादिषुचतुर्दिक्षुक्षिपेत्॥ततःसप्तपदंगत्वापुनस्तत्रैवसंक्षिपेत्॥पुनर्देवतांसंपूज्यजपेत्॰ त
३ तोयदिवरंवरयइतिवदेत्तदासत्यंकारयेत्॥तथाच॥वरंवरयेत्युक्तेसाधकःस्थिरमानसः॥सत्यंचकारयित्वातुवरयेद्वरमुत्तमं॥जपादौतुबलिं
दत्वापश्चादपिबलिंहरेत्॥जपांतेजपमध्येवादेहिदेहीतिभाषिते॥तदापिचबलिंदद्यान्महिषंवापिछागलं॥बलिंचयवपिष्टेन॥यद्वाबलिं
प्रार्थयतेनरकुंजरमेववा॥दिनांतरेचदास्यामिस्वीकृत्यस्वगृहंव्रजेत्॥अपरेह्नितनोदद्यात्पिष्टेननरकुंजरान्॥पिष्टेनेतियवोद्भवेनधा
न्योद्भवेनच इत्यर्थः॥तथाचतंत्रांतरे॥यवक्षोदमयंवापिधान्योद्भवमयंचवा॥चंद्रहासेनविधिवत्तत्तन्मंत्रेणघातयेत्॥योगिनीहृदये॥ज
पांते चबलिंदद्याद्देवतायैयथाविधि॥महिषंछागलंवापिगृहीत्वावरमेवच॥गृहंगच्छेत्स्वसुहृदासार्द्धंसंहृष्टमानसः॥ततोदक्षिणां
दद्यात्॥समाप्यसाधनेदेविदक्षिणांविभवावधि॥गुरवेगुरुपुत्रायतत्पत्न्यैवानिवेदयेत्॥अथशवसाधनं॥तत्रस्थाननियममाह भावचू-
डामणौ॥शून्यागारेनदीतीरेपर्वतेनिर्जनेवने॥बिल्वमूलेश्मशानेवातत्समीपेरणस्थले॥अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोरपि॥भौमवारे
तमिस्रायांसाधयेत्सिद्धिमुत्तमां॥माषभक्तंचबल्यर्थंधूपदीपादिकंतथा॥तिलाःकुशाःसर्षपाश्चस्थापनीयाःप्रयत्नतः॥ततःपूर्वोक्तमन्यत्तमं

शालिक्षोदेतिपुस्तकांतरे॥५

८॥ रज्जुविद्धमिति पुस्तकान्तरे

स्थानं गत्वा सामान्यार्घ्यं विधाय पूर्वमुखोऽपि मूलान्ते फट्कारं कृत्वा यागभूमिं संप्रोक्ष्य गुरुं गणेशं वटुकं योगिनीं च चतुर्दिक्षु पूर्वादितः संपूज्य पूर्वोक्तवीरार्दनमन्त्रं भूमौ विलिख्य ये चात्रेत्यादिपूर्वोक्तमन्त्रेण भूमौ पुष्पाञ्जलित्रयं दत्त्वा प्रणम्य श्मशानाधिपतिं पूर्वोक्तक्रमेण बलिं दत्त्वा अघोरमन्त्रेण शिखाबन्धनं कृत्वा सुदर्शनास्त्रेण मन्त्रेणात्मानं रक्ष २ इति हृदि हस्तं दत्त्वा स्वरक्षां कुर्यात्॥ अघोरसुदर्शनमन्त्रौ ॐ ह्रीं स्फुर २ प्रस्फुर २ घोरघोरतरतनुरूप चट २ प्रचट २ कह २ वम २ बंध २ घातय २ हुं फट् ॐ सहस्रारहुं फट्॥ तथा च तन्त्रान्तरे॥ मायास्फुरद्वयं भूयः प्रस्फुरद्वितयं पुनः॥ घोरघोरतरस्यान्ते तनुरूपपदं ततः॥ चटयुग्मं तदन्ते च प्रचटद्वितयं पुनः॥ कहयुग्मं वमद्वंद्वं ततो बन्धयुगं पुनः॥ घातयद्वितयं वर्मफडन्तः समुद्धृतः॥ एकपञ्चाशद्वर्णोऽयमघोराख्यो मनुर्मतः॥ हलो हलं समुद्धृत्य सहस्रारस्वरूपकं॥ वर्मास्त्रान्तमहामन्त्रं सुदर्शनस्य कीर्तितं॥ हलो हलप्रणवे॥ ततः पूर्वोक्तक्रमेण भूतशुद्धिन्यासजालं विधाय जयदुर्गामन्त्रेण दिक्षु सर्षपान् विकीर्य तिलोऽसीति मन्त्रेण तिलांश्च विकीर्य विहितशवसमीपं गच्छेत्॥ अथ विहितशवो यथा॥ तदुक्तं भावचूडामणौ॰ यष्टिविद्धं शूलविद्धं खड्गविद्धं पयोमृतं॥ वज्रविद्धं सर्पदष्टं चंडालेचाभिभूतकं॥ तरुणं सुन्दरं शूरं रणे नष्टं समुज्ज्वलं॥ पलायनविशून्यं तु संमुखे रणवर्त्तिनं॥ भैरवतन्त्रे॰॥ यष्टिविद्धं शूलविद्धं चाभिभूतं रणे मृतं॥ शवमानीय कर्त्तव्यं नाहरेत्स्वेच्छया मृतं॥ स्त्रीवैश्यपतितास्पृश्यनयवर्ज्जं हितं वरं॥ अव्यक्तलिंगं कुष्ठिं वा वृद्धभिन्नं शवं हरेत्। न दुर्भिक्षमृतं वापि न पर्युषितमेव वा॥ स्त्रीजनं चेदृशं रूपं सर्वथापरिवर्जयेत्॥ कालीतन्त्रेऽपि॥ ब्राह्मणं गोमयं त्यक्त्वा साधयेद्वीरसाधनं॥ महाशवाः प्रशस्ताः स्युः प्रधाने वीरसाधने॥ क्षुद्राः प्रयोगकर्त्तॄणां प्रशस्ताः सर्वसिद्धये। एवमुक्तं शवं गृहीत्वा मूलमन्त्रेण पूजास्थानमानयेत्॥ ततस्तत्समीपं गत्वा ॐ हुं फडिति मन्त्रेण शवमभ्युक्ष्य ॐ हूं मृतकाय नमः फडिति पुष्पाञ्जलित्रयं दत्त्वा शवं स्पृष्ट्वा प्रणमेत्॥ तदुक्तं भावचूडामणौ॥ प्र

वन्येति पाठान्तरं॥४

४ कूबरमित्यपि

यष्टिप्रभृति विद्धं वाचाभिभूतं जले मृतमिति पुस्तकान्तरे॥५॥

णवाद्यस्त्रमंत्रेण शवस्य प्रोक्षणं चरेत् ॥ प्रणवं कूर्चबीजेन मृतकायनमस्त्र फट् ॥ पुष्पांजलित्रयं दत्वा प्रणमेत्स्पर्शपूर्वकम् ॥ ॥ प्रणाममंत्रस्तु ॥ वीरेश परमानंद शिवानंद कुलेश्वर । आनंदभैरवाकार देवीपर्य्यंकशंकर ॥ वीरोहं त्वां प्रपद्यामि उत्तिष्ठ चण्डिकार्चने ॥ अनेन मंत्रेण प्रणम्य प्रक्षालयेत् ॥ ॐ हूं मृतकाय नमः इति क्षालयित्वा सुगंधिजलेन च स्नापयित्वा वाससा जलसुत्तोल्य धूपैर्धूपितं कृत्वा चंदनादिना शवं प्रलिप्य शवस्य कटिदेशे धृत्वा पूजास्थानं समानयेत् ॥ तदुक्तं कालीतंत्रे॰ तारं शब्दमृतकायनमोंतं मंत्रमुच्चरेत् ॥ शवस्नानमंत्रोयमिति ॥ भावचूडामणौ ॥ धूपेन धूपितं कृत्वा गंधादिना प्रलिप्य च ॥ रक्ताक्तो यदि देवेशि भक्षयेत्कुलसाधकं ॥ ततः कुशशय्यां कृत्वा पूर्वशिरः कृत्वा शवं स्थापयेत् ॥ तदुक्तं तत्रैव॰ कुशशय्यापरिस्तृत्य तत्रैव स्थापयेच्छवं ॥ एलालवंगकर्पूरजातिखादिरमात्रकं ॥ तांबूलं तन्मुखे दत्वा कुर्य्याच्छवमधोमुखं ॥ तत्पृष्ठं चंदनेनापि प्रलिप्य प्रयतः सुधीः ॥ बाहुमूलादिकट्यंतं चतुरस्रं विधाय च ॥ मध्ये पद्मं चतुर्द्वारं दलाष्टकसमन्वितं ॥ पीठमंत्रं लिखेन्मध्ये ततः कल्पविधानतः ॥ ॐ ह्रीं फडिति मंत्रेण तत्र कल्पोक्तपीठमनुं लिखेत् ॥ तदुपरि कंबलाद्यासनं न्यसेत् ॥ तंत्रांतरे ॥ गत्वा शवस्य सान्निध्यं धारयेत्कटिदेशतः ॥ यद्युपद्रवयेत्तस्य दद्यान्निष्ठीवनं शवे ॥ पुनः प्रक्षालनं कृत्वा जपस्थानं समानयेत् ॥ ततो द्वादशांगुलयंत्रकाष्ठानि दशदिक्षु पूर्ववत्संस्थाप्य क्रमेण इंद्रादिदेवताः संपूज्य स्वाभिधानेन बलिं हरेत् ॥ तदुक्तं तंत्रांतरे ॥ द्वादशांगुलमानानि यंत्रकाष्ठानि दिक्षु च ॥ संस्थाप्य पूजयेत्तत्र इंद्रादिदशदेवताः ॥ तत्र क्रमः ॥ बीजमि[illegible]संलिख्य सुराधिपतये ततः ॥ इमं बलिं गृह्ण युग्मं गृह्णापय युग्मं ततः ॥ विघ्ननिवारणं कुरु सिद्धिं प्रयच्छ ठद्वयं ॥ अनेन मनुना पूर्वं बलिं दद्याच्च[illegible]मेवं ॥ ॥ स्वस्वनामादिकं कृत्वा पूर्ववद्बलिमाहरेत् ॥ सर्वेषां लोकपालानां ततः साधकसत्तमः ॥ ॐ लां इंद्राय सुराधिपतये ऐरावतवाहनाय वज्रहस्ताय शक्तिपारिषदाय सपरिवाराय सवाहनाय नमः इत्यादि पाद्यादिभिः संपूज्य बलिं दद्यात् ॥ ॐ लां इंद्राय सुराधिपतये इत्यादि सवाहनाय५ यंत उच्चार्य्य इमं ब

६ आईकमिति पाठः पुस्तकांतरे

इद्यादिति पाठः ५

५ [illegible]दिति पाठः पुस्तकांतरे ॥

लिं गृह्ण २ गृह्णापय २ विघ्ननिवारणं कुरु २ मम सिद्धिं प्रयच्छ स्वाहा एषमाषभक्तबलिः ॐ इन्द्राय स्वाहा १॥ ॐ रां अग्नये तेजोधिपतये मेषवाहनाय शक्तिहस्ताय सायुधाय सपरिवाराय सवा हनाय नमः इत्यनेन संपूज्य बलिं दद्यादनेन ॐ रां अग्नये तेजोधिपतये सायुधेत्यादिना बलिं दद्यात् २॥ ॐ यां यमाय प्रेताधिपतये दण्डहस्ताय महिषवाहनाय सायुधायेत्यादिना संपूज्य बलिं दद्यादनेन ॐ यां यमाय प्रेताधिपतये इत्यादिना पूर्ववत् ३॥ ॐ क्षां नैर्ऋताय रक्षोधिपतये ऽसिहस्ताय अश्ववाहनाय सपरिवारायेत्यादिना संपूज्य ॐ क्षां निर्ऋतये रक्षोधिपतये सायुधायेत्यादि पूर्ववत् ४॥ ॐ वां वरुणाय जलाधिपतये पाशहस्ताय मकरवाहनाय सपरिवारायेत्यादिना संपूज्य बलिं दद्यादनेन इममित्यादि पूर्ववत् ५॥ ॐ यां वायवे प्राणाधिपतये हरिणवाहनाय पाशांकुशहस्ताय सपरिवारायेत्यादिना पूर्ववत् संपूज्य बलिं दद्यादनेन ६॥ ॐ कुं कुबेराय यक्षाधिपतये गदाहस्ताय सपरिवारायेत्यादि बलिं दद्यात्॥ ७॥ ॐ हां ईशानाय भूताधिपतये शूलहस्ताय वृषवाहनायेत्यादिना पूर्ववत् संपूज्य बलिं दद्यादनेन ८॥ इन्द्रेशानयोर्मध्ये ॐ आं ब्रह्मणे लोकाधिपतये हंसवाहनाय पद्महस्ताय सपरिवारायेत्यादिना पूर्ववत्॥ ९॥ निर्ऋतिवरुणयोर्मध्ये ॐ अनन्ताय नागाधिपतये चक्रहस्ताय रथवाहनाय सपरिवारायेत्यादिना संपूज्य बलिं दद्यादनेन पूर्ववत् १०॥ ततः पूर्ववद्भूतबलिं दद्यात्॥ सर्वत्र सामिषान्नेन बलिं दद्यात्॥ ततोधिष्ठातृदेवताभ्यो बलिं च सुरया ततः॥ ततश्चतुःषष्टियोगिनीभ्यो डाकिनीभ्योपि संदिशेत्॥ अथ पूजासामग्री॥ समीपे दूरे चोत्तरसाधकं संस्थाप्य मूलान्ते ह्रीं फट् शवासनाय नमः इति शवं संपूज्य ह्रीं फडन्तमूलमुच्चरन् अश्वारोहक्रमेण शवोपर्युपविश्य स्वपादतले कुशान्दत्वा शवकेशान्प्रसार्य जुटिकां बध्वा गुरुं गणपतिं देवीं च नमस्कृत्य प्राणायामषडंगन्यासौ कृत्वा पूर्वोक्तवीराष्टकमंत्रेण दशदिक्षु लोष्टं निःक्षिप्य संकल्पं कुर्यात्॥ तदुक्तं भावचूडामणौ॥ पूजाद्रव्यसन्निधौ च दूरेवो

२ हूमिति पुस्तकान्तरे

तरसाधकं॥संस्थाप्यासनमभ्यर्च्यमूलांतेचपरंततः॥फडित्यनेनमंत्रेणततुशवारोहणंविशेत्॥कुशान्पादतलेदत्वाशवकेशान्प्रसार्यच॥दृढं
निबध्यजुटिकांतेनसंल्पसाधकः॥संकल्पोयथा॥ॐअद्येत्या घमुकगोत्रःश्रीअमुकदेवशर्माऽमुकदेवतायाःसंदर्शनकामोमुकमंत्र
स्यामुकसंख्यजपमहंकरिष्येइतिसंकल्प्य॥ॐह्रींआधारशक्तिकमलासनायनमः इत्यासनंसंपूज्यस्ववामेशवसमीपेऽर्घ्यपात्रादि
कंसंस्थाप्यशवजुटिकायांपीठपूजांकृत्वाषोडशोपचारैःपंचोपचारैर्वादेवींसंपूज्यशवमुखेदेवींगंधादिनासंतर्प्ययेत्॰ततःशवादुत्थायसंमु
खेगत्वामंत्रंपठेत्॥यथा॥ॐवशोमेभवदेवेशममवीरसिद्धिंदेहि२महाभागकृताश्रयपरायण॥ततःपट्टसूत्रेणशवचरणौदृढंबंध
येत् मूलेन॥यथा॥मद्वशोभवदेवेशवीरसिद्धिंकृतास्पद॥ॐभीमभीरुभयाभावभावलोचनभावुक॥त्राहिमांदेवदेवेशशवानामधि
पाधिप॥इत्यनेनशवस्य पादतलेत्रिकोणंयंत्रमालिख्य ततः शवोपर्युपविश्यहस्तद्वयंपार्श्वयोःप्रसार्यतदुपरिकुशान्दत्वातत्र
स्वपादौनिधाय प्राणायाममत्रयंपुनः कृत्वाशिरसिगुरुंविभाव्यहृदिदेवींध्यात्वाओष्ठौसंपुटौकृत्वाविहितमाल[illegible]मौनीभूत्वावीतभीर्जपेत्॥
ततःश्मशानसाधनक्रमेणजपःकार्यः॥यद्यर्द्धरात्रपर्यंतंकिंचिन्नलभ्यतेतदापूर्ववत्सर्षपतिलविकिरणंस[illegible]दृढमनःकृत्वाजपंकुर्या
त्॥भयेजातेसतिएवंपठेत्॥यथा॥नैसकृच्चेद्भयंनास्तिभयेजातेवदेत्ततः॥यन्मार्थयसिबलित्वेनदातव्यंकुंजरादिकं॥दिनांतेषुप्रदास्यामि
स्वनामकथयस्वमे॥इत्युक्त्वासंस्कृतेनैवनिर्भयःसन्पुनर्जपेत्॥ततश्चेन्मधुरंवक्तिवक्तव्यंमधुरंततः॥ततःसत्यंकारयित्वावरंचप्रार्थयेत
तः॥यदिसत्यंनाकरोतिवरंवानप्रयच्छति॥तदापुनर्जपेद्धीमान्एकाग्रमनसस्तथा॥अस्यार्थः॥यदिजपकालेआकाश[illegible]त्याकुंजरादिकंप्रार्थ
येत् तदादिनांतरेदास्यामिममस्थानेस्वनामकथयेत्युक्त्वापुनर्जपेत्॥यदिस्वनाममधुरंकथयतितदात्वंअमुकइतिसत्यंकुरु कृतेसत्येवरंप्रा

४ चलासनादितिपाठःपुस्तकांतरे
५ लक्ष्यतेतिपुस्तकांतरे

ई ओजः क्रेति पुस्तकांतरे॥ ६॥ तेन चेद्विति पुस्तकांतरे॥ ६

र्थयेत्॥ यदि कश्चापि सख्यं न करोति वरं वा न प्रयच्छति तदा पुनर्जपेत्॥ सख्ये कृते वरं लब्ध्वा संत्यजेच्च जपादिकं॥ फलं आनयिति त्वा जुटिकां मोचयेत्ततः॥ शवं प्रक्षाल्य संस्थाप्य मोचयेत्पादबंधनं॥ पादचक्रं मोचयित्वा पूजाद्रव्यं जले क्षिपेत्॥ शवं जले वा गर्ते वा निक्षिप्य स्नानमाचरेत्॰ ततस्तु स्वगृहं गत्वा बलिं दद्याद्दिनांतरे॥ मंत्रस्तु॥ अग्निमरात्रौ येषां यजमानोहं तेगृह्णन्त्विमं बलिं॥ अथ येयोभिन्ना नश्वान्तरकुंजरशूकरान्॥ दत्त्वा पिष्टमयान्नंते कर्तव्यं समुपोषणं॥ ततः परेह्नि नित्यक्रियां कृत्वा पंचगव्यं पिबेत्॥ पंचविंशतिसंख्याकान्ब्राह्मणान्भोजयेद्यथा।परेह्नि नित्यमाचार्य्य पंचगव्यं पिबेत्ततः॥ ब्राह्मणान्भोजयेत्तत्र पंचविंशतिसंख्यकान्॥ सप्तपंचविहीनान्वा क्रमेणैवं दशावधि॥ ततः स्नात्वा च भुक्त्वा च निवसेद्गुप्तस्थले॥ यदि न स्याद्धि प्रतोष्यं तदा निर्धनतां व्रजेत्॥ नैर्दैवेन्निर्द्दनत्वं स्यात्तदा देवी प्रकुप्यति॥ त्रिरात्रं वा षड्रात्रं नवरात्रं तु गोपयेत्॥ स्त्रीशय्यां यदि गच्छेत्तु तदा व्याधिं विनिर्दिशेत्॥ गीतं श्रुत्वा भवेद्बधिरो नेत्रैचक्षुर्नृत्यदर्शने॥ यदि वक्ति दिने वाक्यं तदास्य मूकता भवेत्॥ पंचदशदिवसं यावद्देहे देवस्य संस्थितिः॥ न स्वीकुर्यादहघपुष्प वहिर्याति यदा तदा॥ तदा वस्त्रं परित्यज्य गृह्णीयाद्वसनांतरं॥ गोब्राह्मणविनिंदां च न कुर्याच्च कदाचन॥ दुर्जनं पतितं क्लीबं न स्पृशेच्च कदाचन॥ देवगोब्राह्मणादींश्च प्रत्यहं संस्पृशेच्छुचिः॥ प्रातर्नित्यक्रियां तेन च बिल्वपत्रोदकं पिबेत्॥ ततः स्नात्वा तु गंगायां प्राप्ते षोडशवासरे॥ स्नानांते मंत्रमुच्चार्य्य तर्पणांते नमः पदं॥ एवं शतत्रयाहूहूँ देवान्संतर्प्पयेज्जलैः॥ स्नानतर्प्पणशून्यस्य न स्याद्देवस्य तर्पणं॥ इत्यनेन विधानेन सिद्धिं प्राप्नोति साधकः॥ इह भुक्त्वा वरान्भोगानंते याति हरेः पदं॥ ततो दक्षिणां दत्त्वाऽच्छिद्रावधारणं कुर्यादिति वीरसाधनं॥ मत्स्यसूक्ते॥ सर्वेषामेव मंत्राणां वीरसाधनमीदृशं॥ भावचूडामणौ॥ शवाभावे श्मशाने वै कार्यं वै वीरसाधनं॥ इति शवसाधनप्रकरणं समाप्तं॥ विद्याभेदाः॥ चंडोग्रशूलपाणिमंत्राः॥ तत्र कुब्जिकातंत्रे॰ प्रणवं च ततो मायाकू

देवीमिति पुस्तकांतरे॥३

६॥प्र पूजयेदितिपुस्तकांतरे॥

५मोहयेदितियुक्तः पाठः॥

चैवाजं समुच्चरेत्॥ शिवाय फडिति प्रोक्तश्चंडोग्रो यं महमनुः॥ चंडोग्रशूलपाणेश्च मंत्रः सर्वार्थसाधकः॥ अस्य ब्रह्मा ऋषिर्गायत्री छंदो मायाबीजं देवश्चंडोग्र ईरितः॥ षड्दीर्घभाजा बीजेन प्रणवाद्येन षडंगकं॥ ध्यानं तु॰ शुद्धस्फटिकसंकाशं चतुर्बाहुं किरीटिनं॥ शूलं कपालं दक्षे तु वामे तु पाशमंकुशं॥ सुरापानरसाविष्टं साधकाभीष्टदायकं॥ ध्यात्वा संपूजयेद्देवं सहस्रपंचकं जपेत्॥ दशांशं संस्कृते वह्नौ हुनेद्रक्तोत्पलेन च॥ अथात्र प्रयोगः॥ त्रिमध्वक्तेन लभते कवितां धनमाप्नुवेत्॥ रक्तपद्मस्य होमेन महतीं श्रियमाप्नुयात्॥ पायसस्य तु होमेन शत्रून्नाशयते चिरात्॥ कुसुंभतैलहोमेन रिपून्हन्यान्न संशयः॥ करवीरस्य होमेन वाक्स्तंभो जायते ध्रुवम्॥ शुक्लपद्मस्य होमेन विजयैदखिलं जगत्॥ षट्कोणाष्टदलं पद्मं मध्ये मूलं च कल्पयेत्॥ केवलं शुद्धभावेन हविष्याशी दिवा जपेत्॥ अस्य पुरश्चरणमात्रेण न च विघ्नैर्विलिप्यते॥ अस्यैव जपमात्रेण सर्वसिद्धिमुपालभेत्॥ ॥ इति चंडोग्रशूलपाणिः॥ अथ मातंगी॥ वामकेश्वरतंत्रे॥ अथ वक्ष्ये महादेवीं मातंगीं सर्वसिद्धिदां॥ अस्या उपासनमात्रेण वाक्सिद्धिं लभते ध्रुवं॥ प्रणवं च ततो मायां कामबीजं च कूर्चकं॥ मातंगी ङेयुता स्वं च वह्निजायावधिर्मनुः॥ ऋषिः स्याद्दक्षिणामूर्तिर्विराट्छंदः प्रकीर्तितं॥ मातंगी देवता देवी सर्वसिद्धिप्रदायिनी॥ अंगन्यासकरन्यासौ कुर्यान्मंत्री समाहितः॥ षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत्॥ षट्कोणाष्टदलं पद्मं लिखेत्स्वैव्यं मनोहरं॥ ततः पूजा प्रकर्तव्या जवापुष्पेण मंत्रवित्॥ अष्टशक्तीश्चाष्टदले पूजयेत्तु समाहितः॥ रतिः प्रीतिर्मनोभवा क्रिया श्रद्धा च शक्तयः॥ अनंगकुसुमानंगमदना मदनालसा॥ इत्यष्टशक्तीः संपूज्य उपहारसमन्वितः॥ ततो देवीं परां ध्यात्वा साधकः स्थिरमानसः॥ अथ ध्यानम्॥ श्यामांगीं शशिशेखरां त्रिनयनां रत्नाद्यसिंहासनां हस्ताब्जैर्दधतीमसिं च [illegible] खेटं च पाशांकुशौ॥ भक्तेभ्यो विशदाननां विभवदां सिद्ध्यष्टसंसेवितां सिद्धाद्यां मुनिवंदितां सदुदितां मातंगिनीं तां भजे॥ १॥ एवं ध्यात्वा महेशानीं गंधपुष्पैर्मनो

यंत्रमितियुक्तः पाठः॥४

पायसमितिपुस्तकांतरे २

रमैः॥नैवेद्यंतुमहादेव्यैपापशंशर्करान्वितं॥पुरश्चरणकालेतुषट्सहस्रंमनुंजपेत्॥तद्दशांशंहुनेदाज्यैःशर्करामधुमिश्रितैः॥ब्रह्मवृक्षोद्भवैः
काष्ठैःसाधकःशक्तिभिःसह॥एवंपुरस्क्रियांकृत्वाप्रयोगविधिमाचरेत्॥चतुष्पथेश्मशानेवाकलामध्येचमांत्रिकः॥मत्स्यमांसंपिष्टकंचदद्यात्स
पंचगुग्गुलुं॥रात्रियोगेनकर्तव्यंसदापूर्णश्चसाधकः॥एवंप्रयोगमात्रेणकविताजायतेध्रुवं॥अग्निस्तंभंजलस्तंभंवाक्स्तंभंकारयेध्रुवं॥मंत्रीजयं
तिशत्रूंश्चनार्स्त्रीभोगिकुलंयथा॥शास्त्रेवादेकवित्वेचबृहस्पतिरिवापरः॥अनेनैवविधानेनमातंगीसिद्धिदायिनी॥नूनंतत्क[illegible]मागत्यकुवेरोदीयते
वस्तु॥विनामत्स्यैर्विनामांसैर्नार्चयेत्परदेवतां॥इतिमातंगी॥ अथोच्छिष्टचांडालिमंत्राः॥ उच्छिष्टचांडिलिनीसुमुखीदेवीमहापिशाचिनी
लज्जावीजंतथाठंःठंठं॥॥तदुक्तंफेत्कारिण्यां॥उच्चार्योच्छिष्टशब्दंतुतथाचांडालिनीतिच॥सुमुखीतिततोदेवीकीर्त्तयेत्तदनंतरं॥महापिशा
चिनीपश्चाल्लज्जावीजंततःपरं॥नादविंदुसमायुक्तंठकारत्रितयंपुनः॥सविसर्गंमहादेविसर्वसिद्धिप्रदायकं॥मंत्रांतरं॰उच्छिष्टचांडालि
निमातंगिसर्ववशंकरिनमःस्वाहा॥तदुक्तंतंत्रांतरे॰ अथोच्छिष्टचांडालिनिमातंगिपदमीरयेत्॥ततःसर्ववशंचांतेकरिद्वह्निवल्लभा॥ए
कोनविंशतिवर्णैःसर्वाभीष्टकराभवेदिति॥ ।मंत्रांतरं॥मंत्रदेवप्रकाशिकायां॰ वाग्भवंमायाकामःसौःऐंज्येष्ठमातंगिनमामिउच्छि
ष्टचांडालिनित्रैलोक्यवशंकरिस्वाहेतिमंत्रः॥इमांविद्यांजपेद्देविचापराहूंसमाश्रिता॥इयंविद्यामहाविद्यासर्वपापापहारिणी॥स्वर्गदामोक्षदा
चैवराजसौभाग्यदायिका॥यांयांप्रार्थयतेसिद्धिंहठात्तांतामवाप्नुयात्॥विधानंचप्रवक्ष्यामिशृणुदेविवरानने॥भोजनानंतरंदेविविनैवाच
मनेकृते॥वलिंदद्यात्प्रथमतोमूलमंत्रेणसाधकः॥ततोमंत्रंजपेस्थालादेवीताभिष्टसिद्धये॥वलिमप्युच्छिष्टेन॥तथाच॥नतिथिर्नचन
क्षत्रंनचांगन्यासमेवच॥नारिदोषोनवाविघ्ननाशोचंनियमोनच॥यस्यतिष्ठतिमंत्रोयंनचविघ्नैःसबाध्यते॥ध्यानंतु॰ शवोपरिसमासीनां

४ अग्रेऽग्निमिति पुस्तकांतरे॥ उच्छिष्टेनेति प्रत्यंतरे॥२

रक्तांबरपरिच्छदां॥रक्तालंकारसंयुक्तां गुंजाहारविभूषितां॥षोडशाब्दां च युवतीं पीनोन्नतपयोधरां॥कपालकर्तृकाहस्तां परंज्योतिःस्वरूपिणीं॥वामदक्षिणयोगेन ध्यायेन्मंत्रविदुत्तमः॥स्थंडिले च बलिं दत्वा जपेन्नद्गतमानसः॥उच्छिष्टेन च कर्तव्यो जपोऽस्याः सिद्धिमिच्छता॥उच्छिष्टजपमानस्य जायंते सर्वसिद्धयः॥अपरं च प्रवक्ष्यामि शृणु देवि फलप्रदं॥होमं च तर्पणं चैव सर्वकामार्थसिद्धये॥स्थंडिले मंडलं कृत्वा चतुरस्रं समंततः॥पूजयेन्मंडले देवि मूलमंत्रेण साधकः॥ततो मूलमुच्चार्य्य मंडलाय नमः इति मंत्रेण वह्निस्वरूपां देवतां ध्यात्वा होमयेत्॥जध्याच॰ ततो देवीं समाधाय वह्निरूपव्यवस्थितां॥देवीं ध्यात्वा चरेद्धोमं दधिसिद्धान्नतंडुलैः॥सहस्रमात्रहोमेन राजानं वशमानयेत्॥मार्जाररसतुमांसेन देव्या होमं समाचरेत्॥संप्राप्नोति परां विद्यां सर्वशास्त्रवशीकृतां॥कुर्याच्छागस्य मांसेन होमं मधुसमन्वितम्॰॥सहस्रैकविधाने न भवंति कुलसिद्धयः॥विद्याकामश्चरेद्धोमं शर्करायुतपायसैः॥नूनं तस्य भवेद्देवि सद्यो विद्या चतुर्दश॥बिल्वपत्रैस्त्रिमध्वक्तैर्मासमेकं समाहितः॥वंध्यापि लभते पुत्रं चिरंजीविनमुत्तमं॥कर्कंधुकुसुमं हुत्वा छागरक्तसमन्वितं॥दुर्भगा या हठाद्देवि सौभाग्यं शुभदायकं॥रजस्वलाया वस्त्रेण मधुना पायसेन च॥होमं कृत्वा महादेवि त्रैलोक्यं वशमानयेत्॥इत्येषा कथिता देवि सर्वपापप्रणाशिनी॥मंत्रस्योच्चारणाद्देवसर्वपापप्रणाशिनी॥उच्छिष्टदूषणं त्यक्त्वा सपवित्रो जपेन्मनुं॥अत्र यद्यपि पुरश्चरणं नोक्तं तथाप्यष्टसहस्रजपः तद्दशांशेन होमादिकं बोध्यं॥यथा॥येषां जपे च होमे च संख्या नोक्ता मनीषिभिः॥तेषामष्टसहस्राणि संख्या स्याज्जपहोमयोः इत्यनेनाभिधानादष्टोत्तरसहस्रमिति संप्रदायः॥आसां सिद्धविद्यात्वात् पुरश्चरणं नास्तीति निबंधकारः॥अथ धूमावतीमंत्राः॥ तदुक्तं फेत्कारिण्यां॥दांतावर्गीश विंदुतो बीजं धूमावती हृदि ठः॥धूमावतीमनुः प्रोक्तो वैरिनिग्रहकारकः॥अस्याः पूजा प्रातःकृत्यादिकं कृत्वा भूतशुद्धिप्राणायामौ च कृत्वा क

१॥ धूं धूमावती स्वाहा॥ भूषणांकृत्वेति पुस्तकांतरे॥४ ६ रक्तं मधुसमन्वितमिति पुस्तकांतरे

वृहतीतिपुस्तकांतरे॥१ ॥२रूक्षासेतिपुस्तकांतरे॥

व्यादिन्यासंकुर्यात्॥यथा॥शिरसिपिप्पलादऋषयेनमः॥मुखेनिचृच्छंदसेनमः॥हृदिधूमावतीदेवतायेनमः॥त[illegible]ःकरांगन्यासौ॥धांअंगुष्ठाभ्यांनमः॥धींतर्जनीभ्यांस्वाहेत्यादि॥धांहृदयायनमःइत्यादिच॥ततोध्यानं॥विवर्णाचंचलादुष्टादीर्घाचमलिनांबरा॥विमुक्तकुंतलारूक्षाविधवाविरलद्विजा॥काकध्वजरथारूढाविलंबितपयोधरा॥शूर्पहस्तातिरूक्षाक्षीधृतहस्तावरान्विता॥प्रवृद्धघोणा[illegible]भृशंकुटिलाकुटिलेक्षणा॥क्षुत्पिपासार्दितानित्यंभयदाकलहास्पदा॥विरलद्विजाविरलदंतेत्यर्थः॥जपेल्लक्षंचतुर्दश्यांपुरश्चरणसिद्धये॥उपवासरतोमंत्रीशून्यागारेदिवानिशं॥श्मशानेविपिनेवापिजपेल्लक्षंजितवाग्यतः॥सोष्णीषःसार्द्रवासाश्चपुरश्चरकर्मणि॥आख्योपरि[illegible]लिखेन्मंत्रंतत्क्षिन्स्थाप्यशिवंयजेत्॥अवष्टभ्यशिवंशत्रुनाम्नानुप्रजपेन्मनुं॥सहस्रार्द्धमतःशत्रुर्ज्वरेणपरिगृह्यते॥पंचगव्येनशांतिःस्यात्ज्वरस्यपयसापिवा॥पूर्ववंन्यंचोपचारैःसंपूज्यजपेत्॥यथा॥कृत्वामंत्रैरिपोराख्यामरण्येयामिनीदले॥उत्सादोजायतेशत्रोर्मनोरस्युतजापतः॥बध्वाकाकंश्मशानागतोतद्रक्तमादायमंत्रितं॥विरोधिनाम्नाष्टाशासुसद्यउच्चाटनेरिपोः॥मंत्रितंअष्टोत्तरशतमिति अष्टाशासुक्षिपेदितिशेषः॥श्मशानभस्मनाकृत्वा॥शिवंतस्योपरिन्यसेत्॥विरोधिनामसंरुद्धंकृष्णपक्षेसमर्चयेत्॥महिषीक्षीरधूपंचययच्छत्रुविपक्षकं॥महिषीरूपमासाद्यस्वप्नेशत्रुंविनाशयेत्॥मंत्रेणानेननिखनेत्तद्रक्तंरिपुमंदिरे॥शत्रुमुच्चाटयेन्नूनंनात्रकार्याविचारणा॥श्मशानभस्मनालिंगंकृत्वापुष्पादिनार्चयेत्॥भगवन्नितिसंभाष्यमनसाकर्मचिंतयन्॥निंबकाकच्छदावेकीकृत्यचाष्टशतंजपेत्॥दद्याद्धूपंसाध्यनाम्नासद्योविद्वेषयेदरीन्॥अस्यार्थः॥निंबकाकच्छदावेकीकृत्यतदुपरिअष्टोत्तरशतंजप्त्वातेनद्रव्येणअमुकंद्वेषय२मूलमुक्त्वाधूपंदद्यात्॥तथाच॥चितिकास्थानलेक्षीरहोमाच्छांतिःसदाभवेत्॥तथाच॥रजोधूपप्रदानेनगृध्ररूपेणकालिका॥मारयत्यरिमागत्यशांतिर्निर्माल्यधूपतः॥वराहकर्णधूपेन

४॥ हौं कालि महाकालि किलि२ फट् स्वाहा मंत्र भद्रकालि॥४

तं॰सा॰ हन्यात् शूकररूपिणी॥ अश्वत्थपत्रधूपेन शांतिर्भवति नान्यथा॥ शांतिः सर्वाभिचारस्य पंचगव्येन जायते॥ क्षीरेण चापि देवेशि मधुरत्रितयेन
१४१ वा॥ कीले क्षीरतरोर्विदर्भ्य विलिखेन्मंत्रेण नामाक्षरं॥ विदर्भितं तु तन्त्रोक्तं सर्वरक्षाकरं परमिति वचनात्॥ मंत्रादौ नामाक्षरद्वयोरंतरे साध्यनामाक्षर
द्वयं योजयेत्॥ साध्याक्षराणां द्वयोरंतरे मंत्राणामेकैकाक्षरं योजयेदिति सुभगानंदः॥ जप्त्वा लिख्य पटद्वये तु निखनेदुच्चाटनं विद्विषां तस्माद्द्व
य धूलिकीर्णं हविषा दद्यात् द्विजेभ्यो बलिं तज्जप्त्वा चितिभस्मकीलितमरेर्गेहे तदुच्चाटनमित्यादि प्रयोगः॥ अथ भद्रकालीमंत्रः॥ प्रौं सादं बीजं समु
द्धृत्य कालीति पदमुच्चरेत्॥ महाकालि पदं चोक्त्वा किलियुग्ममतः परं॥ अस्त्रमग्निप्रियांतो यं भद्रकालीमनुर्मतः॥ आराध्य प्रजपेन्नित्यमष्टोत्तरशतं
मनुं॥ जपमाला विधातव्या अष्टोत्तरशतेन वा॥ ध्यानध्येयं महाकाली देवी सर्वभयापहा॥ आराध्येति भूतशुद्धिप्राणायामौ कृत्वा पंचोपचारैः शिव
लिंगं पूजयेदित्यर्थः॥ ध्यानं यथा॥ क्षुत्क्षामा कोटराक्षी मसिमलिनमुखी मुक्तकेशी रुदंती नाहं तृप्ता वदंती जगदखिलमिदं ग्रासमेकं करोमि॥
हस्ताभ्यां धारयंती ज्वलदनलशिखासन्निभं पाशमुग्रं दंतैर्जंबूफलाभैः परिहरतु भयं पातु मां भद्रकाली॥ प्रयोगमंत्रं कर्तव्यं वैरिनि
ग्रहकारक॥ इयं देवी महादेवी शत्रुनिग्रहकारिणी॥ यथेष्टचिंतयाचिंत्या धर्मकामार्थसिद्धिदा॥ अत्र पुरश्चरणादिकं दक्षिणकालीमंत्रवदिति केचि
त्॥ वस्तुतस्तु पुरश्चरणमष्टोत्तरसहस्रजपः॥ अथोच्छिष्टगणेशमंत्रः॥ ॐ हस्तिपिशाचिलिखे ठद्वयं॥ तंत्रांतरे॥ हस्तिपदं समुच्चार्य पिशाची
ति पदं ततः॥ देवराजं सनेत्रं च कांतमीशस्वरान्वितं॥ वह्निजायावधिर्मंत्रस्ताराद्यः सर्वकामदः॥ प्रणवस्थाने गमिति वा केचित्॥ ॥ अस्य श्री उ
च्छिष्टमहागणपतिमंत्रस्य॥ मतंगभगवानृषिः॥ गायत्री छंदः॥ उच्छिष्टमहागणपतिर्देवता॥ गं बीजं॥ स्वाहा शक्तिः॥ श्रीं कीलकं॥ खे
हस्तिमुखाय अंगुष्ठा०॥ लंबोदराय त०॥ महात्मने म०॥ आं क्रों ह्रीं०॥ उच्छिष्टाय क०॥ ह्रीं श्रीं ग्लौं क्लीं गं स्वाहा करत०॥ एवं हृदयादिषु०॥ अथ राम
ध्यानं प्रवक्ष्यामि रत्नसिंहासनोपरि॥ पद्मासने समासीनं रक्तवर्णं भुजद्वयं॥ नग्नाय श्यामवर्णाय मत्ताय मधुपानतः॥ वामांकगतसुदर्यास्म १४१

४ ॐ हस्तिपिशाचिलिखेस्वाहा॥ ।अस्य श्री उच्छिष्टेत्यारभ्य उच्छिष्टाय स्वाहेत्यंतग्रंथो बहुपुस्तकेषु नास्ति॥ ४॥

रागारेप्रतिष्ठितं॥२॥प्रवेशयित्वानस्तेत्रंस्थितपीयूषपानतः॥चषकंसव्यहस्तेनपललंवामतःकरे॥३॥दधानंदेवदेवेशंसर्वाभरणभूषितं॥ॐहस्तिमुखायलम्बोदरायउच्छिष्टायमहात्मने॥आंक्रोंह्रींश्रींग्लौंक्लींगंघे२उच्छिष्टायस्वाहा॥सारभूतमिमंमं[illegible]नदेयंयस्यकस्यचित्॥गुह्यंसर्वागमेष्वेवहितबुद्ध्याप्रकाशितं॥तथाच॥नतिथिर्नचनक्षत्रंनोपवासोविधीयते॥यथेष्टचिंतयामंत्रःसर्वकामफलप्रदः॥अस्यपूजाप्रतःकृत्यादिभूतशुद्ध्यंतंविधायऋष्यादिन्यासंकुर्यात्॥यथा॥शिरसिसुधीरऋषयेनमः॥मुखेनिवृद्गायत्रीछंदसेनमः॥हृदिउच्छिष्टगणपतयेदेवतायैनमः॥ततःप्रणवेनकरांगन्यासौकृत्वाध्यायेत्॥रक्तमूर्तिंगणेशानंसर्वाभरणभूषितं॥रक्तवस्त्रंत्रिनेत्रंचरक्तपद्मासनेस्थितं॥चतुर्भुजंमहाकायंह्रिदंतंसस्मिताननं॥इष्टंचदक्षिणेहस्तेदंतंचतदधःकरे॥पाशांकुशौचहस्ताभ्यांजटामंडलवेष्टितं॥ललाटेचंद्ररेखाढ्यंसर्वालंकारभूषितं॥एवंध्यात्वाकरस्थपुष्पेणमूलेनशिरसिसंपूज्यबहिःपूजामारभेत्॥अष्टदलपद्मंलिखित्वापूजयेत्॥प्रथमंमूलेनार्घ्यपात्रंसंस्थाप्यदशधाप्रजप्यगंगेचेत्यादिनातीर्थान्यावाह्यतेनोदकेनात्मानंपूजोपकरणंचाभ्युक्ष्यपुनर्ध्यात्वाष्टदले पद्ममध्येस्थापयेत्॥ततःपंचोपचारैःसंपूज्यपत्रेषुपूर्वादि ॐवक्रतुंडायस्वाहा॥एवंएकदंतायलंबोदरायविकटायविघ्नायगजवक्त्रायविनायकायगणपतयेमध्येहस्तिमुखायपुनर्देवंत्रिःसंपूज्ययथाशक्तिजप्त्वासमर्प्यबलिंनैवेद्यमानीयउच्छिष्टगणेशायमहाकालायएषबलिंनमः॥इतिबलिंदत्वाचमनीयादिकंदद्यात्॥विशेषफलाकांक्षिभिःपुनः॥ॐह्रांह्रींह्रूंह्रैंह्रौंह्रः हूंफट्स्वाहेत्यनेनबलिंदद्यात्॥ततःपुष्पमेकंदक्षिणदिशिक्षिप्त्वाक्षमस्वेतिविसर्जयेत्॥अस्यपुरश्चरणंषोडशसहस्रजपः॥तथाच०॥कृत्वाचतुर्थीमारभ्ययावत्शुक्लाचतुर्थिका॥सहस्रंहिजपेन्मंत्रंयोषिन्नियमपूर्वकम्॥स्नापयेन्मधुनानित्यंनैवेद्यंगुडपायसं॥भुक्त्वोच्छिष्टोजपेन्मंत्रंगणेशोहंसदाप्रिये॥श्वेतार्केणकृतिंकृ

५ कुबेरेणउपासितः५ ६॥ वानरास्थिसमुद्भूतमितिपुस्तकांतरे॥६

त्वारक्तचंदनकेनवा॥अंगुष्ठमात्रंप्रतिष्ठाप्यद्विजाग्निगुरुसंनिधौ॥जप्त्वाषोडशसाहस्रंसिद्धमंत्रोभवेद्ध्रुवं॥ योषिदिंतियोषिदुपगमेनिय
मपुरःसरमित्यर्थः॥नतुत्यागनियमः॥अप्रसंगादनेनौचित्यादनाचांतइतिदर्शनात्॥उच्छिष्टचाशुचिर्भूत्वाजपपूजनमाचरेत्॥अनुच्छिष्टेनसि
ध्येतजपमेनंसमाचरेत्॥अथात्रप्रयोगाः॥राजद्वारेतथारण्येसभायांगोत्रसंसदि॥विवादेव्यवहारेचसंग्रामेशत्रुसंकटे॥नौकायांविपिने
चापिसूतेचव्यसनेतथा॥ग्रामदाहेचौरवह्निसिंहव्याघ्रादिसंकटे॥स्मरणाद्देवदेवस्यसर्वंवैविद्रुतंभवेत्॥तत्सर्वंनश्यतिक्षिप्रंसूर्येणेवय
थातमः॥सद्योच्छिष्टगणेशानोयक्षराजेनधीमता॥आराधितःसोपहारैःसस्यादिष्टफलप्रदः॥एवंकृत्वाव्यवस्थांतुनदनेश्वरजोगतः॥अ
पामार्गसमिद्धोमेसौभाग्यंलभतेध्रुवं॥अष्टोत्तरशतैर्मंत्रीमूलमंत्राभिमंत्रितं॥नराणांमस्थिसंभूतंयंत्रंमंत्राभिमंत्रितं॥निखनेन्मंदिरेयस्य
भवेदुच्चाटनंपरं॥अश्ववीथ्यांलिखेद्यस्यक्रयविक्रयतांहरेत्॥मानुषास्थिसमुद्भूतंकीलकंचाभिमंत्रितं॥निखनेन्मंदिरेयस्यमरणंनिश्चि
तंभवेत्॥उद्धृतेतुभवेच्छांतिरितिसर्वस्यसंमतं॥यस्यनाम्नाजपेन्मंत्रंसहस्रंसवशोभवेत्॥पंचसहस्रहोमेन्तुउद्वहेच्चवरांस्त्रियं॥सह
स्रदशहोमेनराजासद्योवशोभवेत्॥लक्षजपेनराजेवद्विलक्षेराजपक्षयः॥दशलक्षेणतद्वाक्सूवश्यंनर[illegible]जनसर्वदा॥अणिमा
दिमहासिद्धिःकोटिजापान्नसंशयः॥खेचरत्वंभवेन्नित्यंसर्वज्ञत्वंचजायते॥मंत्रंलिखित्वाशिरसिकंठेवाधारयेद्यदि॥सौभाग्यस
र्वस्वंचभवेत्तत्रसुनिश्चितं॥अथधनदामंत्राः॥तत्तूर्यबिंदुसंयुक्तंलज्जाबीजंसमुद्धरेत्॥लक्ष्मीबीजंततोदेविसंबोध्याचरतिप्रिया॥ व
ह्निजायावधिःप्रोक्तोमंत्रराजोत्तमोत्तमः॥तंत्रांतरे॰ तत्तूर्यबिंदुनायुक्तंलक्ष्मीप्रणवमेवच॥मायाबीजंसमुद्धृत्यसंबोध्याचरतिप्रिया॥वह्नि
जायावधिःप्रोक्तोमंत्रराजोत्तमोत्तमः॥लक्ष्मीप्रणवंश्रीबीजंकुबेरानुमतोयंमंत्रः॥अस्यपूजा॥प्रातःकृत्यादिप्राणायामांतंकृत्वाऋष्या

६॥स्वास्थ्यमितिपुस्तकांतरे॥ १॥धंह्रींश्रींरतिप्रियेस्वाहा॥१ २॥तंत्रांतरेमनुर्यमितिपाठेरमितिबीजंसिद्धं॥२

कणलग्रंथकारमतेन १ धनदाप्रिकाम्भिनिमुख्यःपाठः ४

दिन्यासं कुर्यात्॥ यथा॥ शिरसि कुँबेरँऋषये नमः॥ मुखे पंक्तिछंदसे नमः हृदि धनदायै देवतायै नमः॥ ततः करांगन्यासो॥ ह्रां अंगुष्ठाभ्यां न
मः॥ ह्रीं तर्जनीभ्यां स्वाहेत्यादि॥ ह्रां हृदयाय नमः इत्यादि॥ ततो ध्यानम्॥ कुंकुमारुणगर्भाभां किंचिद्यौवनशालिनीं॥ मृणालकोमलभुजां के
यूरांगदभूषितां॥ तुलाकोटिपरिभ्रांतपादपद्मद्वयान्वितां॥ माणिक्यहारमुकुटां कुंडलादिविभूषितां॥ नीलोत्पलदृशं किंचिदुद्यत्कुचविरा
जितां॥ कराभ्यां भ्राम्यत्कमलां रक्तवस्त्रांगरागिणीं॥ हेमप्राकारमध्यस्थां रत्नसिंहासनोपरि॥ ध्यायेत्कल्पतरोर्मूले देवीं तां गणनायिकां॥ ए
वं ध्यात्वा मानसैः संपूज्य बहिः पूजामारभेत्॥ अस्य पूजायंत्रं॥ नवयोन्यात्मकं चक्रं विलिखेत्कर्णिकोपरि॥ दिग्दलं पद्ममालिख्य चतुरस्रं।
लिखेद्बहिः॥ कोणेषु वज्रान्संलिख्य मध्ये बीजं समुद्धरेत्॥ ॥ततोर्घ्यस्थापनं॥ फडिति पात्रं प्रक्षाल्य नम इत्यनेनापूर्य तत्र प्रणवेन गंधपुष्पनिः
क्षिप्य तीर्थमावाह्य धेनुमुद्रां प्रदर्श्य तदुपरि मूलं दशधा जप्त्वा तज्जलं किंचित्प्रोक्षणीपात्रे संस्थाप्य तेनोदकेनात्मानं पूजोपकरणं मूलेन त्रिः संप्रो
क्ष्याधारशक्त्यादि ह्रीं ज्ञानात्मने नमः इत्यंतं पीठपूजां विधाय ॐ पद्मायनमः इति मध्ये संपूज्य पुनर्ध्यात्वा पीठे आवाह्य पंचोपचारादिना पूज
येत्॥ ततो योनिमुद्रां प्रदर्श्य केसरेषु अग्न्यादिकोणमध्ये दिक्षु च॥ ह्रां हृदयाय नमः इत्यादिना षडंगेन पूजयेत् ततो दलेषु पूर्वादि ॐ लक्ष्म्यै
नमः एवं पद्मायै· पद्मालयायै· श्रियै· हरिप्रियायै· हरायै·। कमलायै· अब्जायै· चंचलायै· लोलायै· मध्ये देवीं च पुनः पूजयेत्॥ ततो यथाश
क्ति जप्त्वा जपं समर्प्य क्षमस्वेति विसर्जयेत्॥ अस्य पुरश्चरणं लक्षजपः॥ तथा च॰ प्रजपेदक्षसूत्रेण रत्नादिकृतकेन च॥ लक्षे जप्ते मंत्रसिद्धिः
पुरश्चर्यां समाचरेत्॥ विनियोगान्यथाकुर्यात्साधकः स्वमनोरथान्॥ रात्रौ चेज्जप्यते चाष्टसहस्रं सप्तवासरान्॥ एतेनैव सुसिद्धः स्यात्पुर
॥ ॥

७ मंडलंतुचतुरस्रंवेष्टितंदत्तंकुर्यादिस्पर्यः ७ ऐंह्रींश्रींक्लींकालिकेऐंह्रींश्रींक्लीं॥९ ५सप्तनिरितिपुस्तकांतरे॥

श्चर्य्यादिकोविधिः॥किमिहदुर्लभंदेविसाधयेद्यदिसाधकः॥भुक्त्वावाप्यथवाभुक्त्वापायसान्नंप्रदापयेत्॥दशकृत्वोथवाशौचंकृत्वावापिकुचेलतां॥यःस्मरेद्देविविद्यांतांदारिद्र्येनोभिभूयते॥कामदेवंयजेन्नाशैवंदेव्याःप्रत्यहमादरात्॥तेनदेव्यामहाप्रीतिर्वांछितार्थंददातिच॥पूजांतेचसमायातिरात्रौदेवीधनेश्वरी॥सर्वालंकारमुत्सृज्यदत्वायातिनिजालयं॥धनंचविपुलंदत्वासाधकस्यमनोरथान्॥पूरयित्वामहेशानिवशगाजायतेशुभा॥यद्वा भक्त्यामहेशानिचंदनेनानुलेपनं॥दातव्यंसर्वदानस्यैनित्यंदारिद्र्यशांतये॥नैवेद्यंचप्रदातव्यंनित्यंदारिद्र्यशांतये॥स्वयमाहेतियक्षिणीयोमांस्मरतिमानवः॥तस्यदारिद्र्यसंत्यासंदासीवत्करवाण्यहं॥सहस्रैस्सप्तभिर्यावत्पुरश्चरणमिष्यते॥तथाघृतेनखंडेनमधुनाचदशांशतः॥होमोपिचविधातव्यःक्षणाद्दारिद्र्यशांतये॥पूजाकार्य्यामहादेव्याश्चंदनेनानुलेपिते॥ताम्रपात्रेतथाकार्यंमंडलंसुमनोहरं॥तत्रपूजाविधातव्यादेव्याएवंमनीषिणा॥कुतोदारिद्र्यशंकास्यसहि कोटीश्वरोभवेत्॥अंगन्यासकरन्यासौनागेन्द्रेवास्यदेवता॥कुबेरस्यमतेनास्याःपूजापिक्रियतेतथा॥अथश्मशानकाली॥तदुक्तंकालीतंत्रे०॥वाणीमायांततोलक्ष्मीकामबीजंततःपरं॥कालिकेसंपुटत्वेन चतुष्कंबीजमालिखेत्॥एकादशार्णादेवेशिचतुर्वर्गप्रदायिनी॥अस्याःपूजायंत्रं॥पद्ममष्टदलंदत्तंतद्बाह्येधरणीतलं॥चतुर्द्वारसमायुक्तंमध्येमूलंसमालिखेत्॥दलेष्वष्टसुविलिखेत्कवर्गाद्यष्टवर्गकं॥धरण्यांविलिखेद्बीजंचतुष्कंचचतुष्कके॥पूर्वादिउत्तरांतंचमध्येदेवींप्रपूजयेत्॥अस्याःपूजाक्रमः॥प्रातःकृत्यादिप्राणायामांतकर्मकृत्वा ऋष्यादिन्यासंकुर्यात्॥शिरसिभृगुऋषयेनमः॥मुखेनिचृच्छंदसेनमः॥हृदिश्मशानकालिकायैदेवतायैनमः॥गुह्येवाग्बीजायनमः॥पादयोर्मायाशक्तयेनमः॥सर्वांगेकामराजायकीलकायनमः॥ततःकरांगन्यासौ०॥ऐंअंगुष्ठाभ्यांनमः॥ह्रींतर्जनीभ्यांस्वाहा॥श्रींमध्यमाभ्यांवषट्॥क्लींअनामिका

वे

भ्यां हुं॥ कालिके कनिष्ठाभ्यां वौषट्॥ क्रीमादिवाग्भवांतं करतलकरपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ ततो ध्यानं ॥ अंजनाद्रिनिभां देवीं श्मशानालयवासिनीं॥ रक्तनेत्रां सुक्तकेशीं शुष्कमांसातिभैरवीं॥ पिंगाक्षीं वामहस्तेन मद्यपूर्णसमांसकं॥ सद्यःकृंतशि[illegible]ोदक्षहस्तेन दधतीं शिवां॥ स्मितवक्त्रां सदा चाममांसचर्वणतत्परां॥ नानालंकारभूषांगीं नग्नां मत्तां सदाशवैः॥ एवं ध्यात्वा जपेन्मंत्रं श्मशा[illegible]तु विशेषतः॥

गृहे वापि गृहस्थोपि मत्स्यमांसैः सुभोजनैः॥ नग्नोभूत्वा महापूजां कुर्याद्रात्रौ समाहितः॥ पूजनंतु॰ एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा पुनर्ध्यात्वा पंचोपचारैः संपूज्य पत्रेषु ब्राह्म्यादिमातृकाः पूजयेत्॥ तद्बहिः असितांगादीन् पूजयेत्॥ अस्य पुरश्चरणमेकादशलक्षजपः॥ तथा च॥ वर्णलक्षं जपेन्मंत्रं तद्दशांशेन होमयेत्॥ मंत्रांतरं तत्रैव॥ कामबीजं समालिख्य कालिकायै समालिखेत्॥ नमोंतेन च देवेशि सप्तार्णो मनुरुत्तमः॥ षडंगं कालिकादेव्या अन्यत्सर्वं तु पूर्ववत्॥ अथ बगलामुखी॥ तदुक्तं तंत्रांतरे॥ ब्रह्मास्त्रं च प्रवक्ष्यामि सद्यः प्रत्ययकारणं॥ साधकानां हितार्थाय स्तंभनाय च वैरिणां॥ यस्याः स्मरणमात्रेण पवनोपि स्थिरायते॥ प्रणवं स्थिरमायां च ततश्च बगलामुखि॥ तदंते सर्वदुष्टानां ततो वाचं मुखं पदं॥ स्तंभयेति ततो जिह्वां कीलयेति पदं ततः॥ बुद्धिं नाशय पश्चात्तु स्थिरमायां समालिखेत्॥ लिखेच्च पुनरोंकारं स्वाहेति पदमंततः॥ षट्त्रिंशदक्षरी विद्या सर्वसंपत्करा मता॥ स्थिरमाया ह्लींकारः॥ तंत्रांतरे॰ वह्निहीनं ईमायायुक् बगलामुखि सर्वयुक्॥ दुष्टानां वाचमित्युक्त्वा मुखं स्तंभय कीर्तयेत्॥ जिह्वां कीलय बुद्धिं तु विनाशय पदं वदेत्॥ पुनर्बीजं ततस्तारं वह्निजायावधिर्भवेत्॥ तारादिका चतुस्त्रिंशदक्षरात्मा लामुखी इत्यपि॥ मंत्रांतरं॥ तस्य ध्यानं॥ गंभीरां च मदोन्मत्तां स्वर्णकांतिसमप्रभां॥ चतुर्भुजां त्रिनयनां कमलासनसंस्थितां॥ मुद्गरं दक्षिणे पाशं वामे जिह्वां च वज्रकं॥ पीतांबरधरां देवीं दृढपीनपयोधरां॥ हेमकुंडलभूषां च पीतचंद्रार्द्धशेखरां॥ पीतभूषणभूषां च स्वर्णसिंहासने स्थितां मिति॥ अस्य पू

॥ ॐ ह्लीं वगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा॥४॥ रेफहीनः लकारः १ लकारः कीदृशः मायायुक्तः १

द्वयमिति पुस्तकांतरे॥५

जाप्रातःकृत्यादिप्राणायामांतंकृत्वाऋष्यादिन्यासंकुर्यात्॰ शिरसिनारदऋषयेनमः॥मुखेत्रिष्टुप्छंदसेनमः॥हृदिबगलायैदेवतायैन
मः॥लिंगेह्लींबीजायनमः॥पादयोःस्वाहाशक्तयेनमः॥नारदोस्यऋषिर्मूर्द्धि त्रिष्टुप्छंदश्चाननमुखे॥श्रीबगलामुखीदेवीहृदयेविन्यसेत्ततः॥
ह्लींबीजंगुह्यदेशेतुस्वाहाशक्तिस्तुपादयोरिति॥ततःकरांगन्यासौ॥ॐ ह्लीं अंगुष्ठाभ्यांनमः॥बगलामुखितर्जनीभ्यांस्वाहा॥सर्वदुष्टानांमध्य
माभ्यांवषट्॥ वाचंमुखंपदंस्तंभयअनामिकाभ्यांहुं॥जिह्वांकीलयकनिष्ठाभ्यांवौषट्॥बुद्धिंविनाशयह्लींॐस्वाहाकरतलकरपृष्ठाभ्यांफट्
॥एवंहृदयादिषु॰॥तथाचदिव्यतंत्रे॥युग्मबाणेषुसप्ताहिशेषान्येश्वमनूद्भवैः॥करशाखासुतलयोःकरांगन्यासमाचरेत्॥ततोमूलांतेआत्मत
त्वव्यापिनीबगलामुखीश्रीपादुकांपूजयामीतिमूलाधारे॥मूलांतेविद्यातत्वव्यापिनीबगलामुखी श्रीपादुकांपूजयामीतिहृदये॥मूलांते
शिवतत्वव्यापिनीबगलामुखीश्रीपादुकांपूजयामीतिशिरसि॥मूलांतेसर्वतत्वव्यापिनीबगलामुखीश्रीपादुकांपूजयामीतिसर्वांगे ॥ततश्च
॥मूर्ध्निभालेभ्रुवोःश्रोत्रेगंडयोर्नसयोःपुनः॥ओष्ठयोर्मुखवृत्तेचदक्षिणांसेचकूर्परे॥मणिबंधेंगुलेमूलेभालेचकुच योर्हृदि॥नाभौकट्यांगुह्य
देशेवामांसेकूर्परेतथा॥मणिबंधेंगुलेमूलेततश्चविन्यसेत्पुनः॥दक्षवामेचोरुजान्वोर्गुल्फयोरंगुलिमूलयोः।क्रमेणमंत्रवर्णांस्तुन्यस्त्वाध्यायेद्यथा
विधिः॥ततोध्यानं॥मध्येसुधाब्धिमणिमंडपरत्नवेदी सिंहासनोपरिगतांपरिपीतवर्णां॥पीतांबराभरणमाल्यविभूषितांगीं देवींनमामिधृत
मुद्गरवैरिजिह्वां॥१॥जिह्वाग्रमादायकरेणदेवींवामेनशत्रूंपरिपीडयंतीं॥गदाभिघातेनचदक्षिणेनपीतांबराढ्यांद्विभुजांनमामि॥ २॥
एवंध्यात्वामानसैःसंपूज्यबहिःपूजामारभेत्॥तत्रप्रथमतोऽर्घ्यस्थापनं॥तद्यथा॰ अष्टांगुलंचतुरस्रंविधायईशानादिषुपूर्वादिदिक्षुच
कुसुमाक्षतचंदनैः॥ग्लौंगणपतयेनमः॥इत्यनेनगजदानेनसंपूज्यतेनमधुनाचार्घ्यमारोपयेत्॥ततोवारत्रयंविद्ययासंपूज्यांगानित्य

सेत्॥ ततो धेनुयोनिमुद्रे प्रदर्श्य तेनोदकेनात्मानं पूजोपकरणं चाभ्युक्षयेत्त्रिः॥ अस्याः पूजायंत्रं॥ त्र्यस्रं षडस्रं वृत्ताष्टदलं भूपुरसमन्वितं॥ ततो मूलमुच्चार्याधारशक्तिकमलासनाय नमः॥ एवं शक्तिबीजमुच्चार्य पद्मासनाय नमः॥ ततः पूर्ववत् ध्यात्वा पीठे आवाह्य षडंगानि विन्यसेत्॥ ततो मुद्राः प्रदर्श्य पूर्ववत्षडंगेन मंडलं यजेत्॥ ततो मूलेन मंत्रयित्वा धेनुयोनिमुद्रे प्रदर्शयेत्॥ ततश्चात्मविद्याशिवैस्तत्त्वै[illegible]त्रयं मुखे सिक्त्वा तर्जन्यगुष्ठयोगेन सांगां सावरणां बगलामुखीं तर्पयेत्॥ ततो यथासंभवमुपचारैः पूजयेत्॥ तत आवणरपूजामारभेत्॥ त्रिको[illegible]णे सं सत्वाय रं रजसे तं तमसे नम इति॥ ततः षट्कोणेषु पूर्वे ॐ सुभगायै नमः॥ अग्निको॰ ॐ भगसर्पिण्यै नमः॥ ईशाने ॐ भगावहायै नमः॥ पश्चिमे ॐ भगसिद्धायै नमः॥ नैर्ऋते ॐ भगपातिन्यै नमः॥ वायौ ॐ भगमालिन्यै नमः॥ अष्टपत्रेषु ब्राह्म्याद्या मातरः पूज्याः॥ पत्राग्रेषु· जयायै नमः ॐ विजयायै· अजितायै· अपराजितायै· जंभिन्यै· स्तंभिन्यै· मोहिन्यै आकर्षिण्यै नमः॥ ततो द्वारेषु· ॐ भैरवाय नमः॥ तद्बाह्ये॰ इन्द्रादीन्वज्रादींश्च संपूज्य धूपादिविसर्जनांतं कर्म समापयेत्॥ यथाशक्ति जपं विधाय त्रिशूलमुद्रां प्रदर्श्य पुष्पांजलित्रयं दत्वा देव्यै योनिमुद्रां प्रदर्शयेत्॥ ततो भैरवाय बलिं दत्वा विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं लक्षजपः॥ तथा च॥ पीतांबरधरो भूत्वा पूर्वाशाभिमुखः स्थितः॥ लक्षमेकं जपेन्मंत्री हरिद्राग्रंथिमालया॥ ब्रह्मचर्यरतो नित्यं प्रयतो ध्यानतत्परः॥ प्रियंगवाश्वरसेनापि पीतपुष्पैश्च होमयेत्॥ ततः प्रयोगाः॥ कुरुते वाग्गतिःस्तंभं दुष्टानां बुद्धिनाशनं॥ जपहोमप्रयोगे च मंत्रं चाप्ययुतं जपेत्॥ प्रियंगुहरितालाभ्यां लवणं जुहुयान्निशि॥ स्तंभयेत्पर सैन्यानि नात्र कार्या विचारणा॥ अथवा पीतपुष्पैश्च होमयेत्स्तंभनेषु च॥ स्तंभनेषु च सर्वेषु प्रयोगः प्रत्ययावहः॥ ॐकारयोः संपुटयोरूर्ध्वाधः शिरसो लिखेत्॥ मध्यगं नाम साध्यस्य तद्बाह्ये चाद्यमस्वरैः॥ बीजं द्वितीयवर्गस्य तृतीयं बिंदुभूषि

१ संमुखयोरिति वा

॥अक्षरद्वयमिति १॥ ॥४॥ प्रियंगुकुसुमेनापीति पुस्तकांतरे॥४

२॥ त्रिमध्वक्तैश्च होमयेदिति पुस्तकांतरे॥२

तं॥चतुर्दशस्वरोपेतं संलिखेत्पृथिवीगतं॥ठकारेण समावेष्ट्य चतुष्कोणपुटं बहिः॥तत्कोणरेखासंसक्तैः शूलैर्वज्राष्टकं लिखेत्॥त्रिशूलं मध्यरेखायां पृथ्वीबीजानि पार्श्वयोः॥अष्टस्वपि च कोणेषु तद्बहिर्बगलां लिखेत्॥पृथिव्यंतरितं बाह्ये मातृकापरिमंडलं॥आवेष्ट्य चाष्टधापश्चात्तद्बाह्ये स्थिरमायया॥निरुध्यांकुशबीजेन नादसंमिलितां त्रिणा॥लिखेत्पूर्ववदावेष्ट्य पश्चाच्च बगलामुखीं॥पट्टे पाषाणपट्टे वा हरिद्रोन्मत्ततालकैः॥दिव्यस्तंभे मुखस्तंभे लिखित्वा गाढमाक्रमेत्॥विवादे यंत्रमालिख्य भूर्जैतैरेव वस्तुभिः॥कुंभकारस्य चक्रस्य भ्रमतो विपरीतकः॥मृत्तिकां समुपादाय यद्वृषभं कारयेत्ततः॥यंत्रं तस्योपरिन्यस्य तालकेन विलिप्य च॥तन्नासायां विनिःक्षिप्य पीतरज्जुं निजे गृहे॥अर्चयेत्तच्चतुष्कालं नित्यं पीतोपचारतः॥दुष्टस्य स्तंभयत्येव मुखं वाचस्पतेरपि॥विश्वसारे॥काली तारा महाविद्या षोडशी भुवनेश्वरी॥भैरवी छिन्नमस्ता च विद्या धूमावती तथा॥बगला सिद्धविद्या च मातंगी कमलान्विता॥एता दश महाविद्याः सिद्धविद्याः प्रकीर्तिताः॥अथ कर्णपिशाचिनीमंत्रः॥तदुक्तं तंत्रांतरे॥ ॥कर्णांते स्वर्णलोहितो बकगतो नंतश्चिकारो वदातीनानागतशब्दयुक्भुवनेशीवह्निजायान्वितः॥ताराद्यो मनुरेकलक्षजपतो न्यासेन संसेवितः सार्वज्ञं लभतेऽचिरेण नियतं पैशाचिकी भक्तितः॥ध्यानम्॥कृष्णां रक्तविलोचनां त्रिनयनां खर्वां चलम्बोदरीं बंधूकारुणजिह्विकां वरखराभीतीकरामुन्मुखीम्॥धूम्रार्चिर्जटिलां कपालविलसत्पाणिद्वयां चंचलां सर्वज्ञां शवहृत्कृताधिवसतिं पैशाचिकीं तां नुमः॥अस्य पूजा॥निशायामर्द्धरात्रौ च हृदि न्यस्य पिशाचिकां॥दग्धमीनं बलिं दत्त्वा रात्रौ संपूज्य संजपेत्॥ॐ कर्णपिशाचि दग्धमीनबलिं गृह्ण २ मम सिद्धिं कुरु २ स्वाहेति दग्धमीनबलिं दद्यात्॥रक्तचंदनबंधूकजवापुष्पादिकं च यत्॥अमृतं कुरु देवि स्वाहेति प्रोक्षयेज्जलैः॥पूर्वाह्णे किंचिज्जप्त्वा मध्याह्ने एकभक्तं निरामिषं कृत्वा रात्रावपि नत्संख्यं जपेत्॥अन्यत्किंचिन्न भोक्तव्यं तांबूलादिकं विना॥जपस्य दशांशं तर्प्पणं॥ॐ कर्णपिशाचीं तर्पयामि स्वाहा॥

७॥ यो बरितिपुस्तकांतरे॥

स्वाहा॥ एवंक्रमेणलक्षमेकंपुरश्चरणंकृत्वादशांशंहोमयेत् तदभावेदशांशंतर्पणंकृत्वावरंप्रार्थयेत्॥ मूलंरक्तचंदनेनलिखित्वायंत्रोपरिइष्टदेवतांपूजयेत्॥ सिद्धलक्षणमुच्यते॰ गगनेहूंकारादिश्रवणदीर्घाग्निशिखारूपसंदर्शनात् सिद्धिर्भविष्यतीतिज्ञात्वातथ[illegible]विधमाचरेत्॥ प्रणवंमायाकर्णपिशाचिमेकर्णेकथयहुंफट्स्वाहा॥ प्रदीपतैलंपादयोर्दत्वारात्रौलक्षंजपेत् ततःसर्वज्ञोभवति॥ नास्याः[illegible]पूजाध्यानं॥ तथान्तरंकामबीजंजपादेविस्वाहा॥ अस्यापिन्यासादेरभावः॥ पूर्वेलक्षजप्त्वागृहगोधिकांनिशान्यनदुपरिजयादेवीयथाशक्तिसंपूज्यतावज्जपेत् यावजीवतिसाततःसिद्ध्यति सिद्धिस्तुमंनसादिप्रश्नेकृतेसाआयाति तस्याःपृष्टेसर्वंभूतभविष्यादिकंपश्यति॥ अथमंजुघोषः॥ जाड्यौघतिमिरध्वंसः संसारार्णवतारकः॥ श्रीमंजुघोषोजयतिसाधकानांसुखावहः॥ ततःआगमांतरे॥ मातृकादिंसमुद्धृत्यवह्निबीजंसमुद्धरेत्॥ वामांसंकूर्मसंतंचततोमेषंसमुद्धरेत् ॥ मीनेशंचततःकुर्याद्वामनेत्रेंदुसंयुतं॥ षडक्षरोमनुःप्रोक्तोमंजुघोषस्यशंभुना॥ इयंतुदीपनीप्रोक्तामूलमंत्रस्यकथ्यते॥ अंकुशंशक्तिबीजंचरमाबीजंततःप्रिये॰ बीजत्रयात्मकोमंत्रोजाड्यौघध्वांतनाशनः॥ मंत्रांतरं॥ शक्तिबीजंरमाबीजंकामबीजंतथाप्रिये॥ विद्यास्तुतिधरीप्रोक्ताएषावर्णत्रयात्मिका॥ हकारोवह्निमारूढोवामनेत्रेंदुभूषितः॥ प्रोक्तासर्वज्ञविद्येयंएकवर्णात्मिकाप्रिये॥ सिद्धःसाध्यःसुसिद्धोवासाधकस्यरिपुःसदा॥ तदामंत्रोभवेद्भक्त्याशुभदोवृद्धिदोभवेत्॥ मध्याह्नेसलिलेचैवभोजनेभाजनेतथा॥ गोमयेतुबहिर्देशेमैथुनेरमणीकुचे॥ गोष्ठेचनिशिगोमुण्डेपत्रेडमरुसन्निभं॥ विलिख्यमंत्रवर्णांश्चत्रिशहूर्द्धे अधस्तथा॥ लिखेच्चंदनलेखिन्याप्रयत्नात्साधकोत्तमः॥ उच्चाटनेलिखेद्यंत्रंगोचर्मणिविशेषतः॥ सलिलेविजयीनित्यंभोजनेचमहेश्वरः॥ गोमयेवावेदूकैःस्याद्गोष्ठेसर्वज्ञतांलभेत्॥ कुचेश्रुतिधरोनित्यंगोमुण्डेचमहाकविः॥ गोमूत्रंबदरीमूलंचंदनंपांशुमेवच॥ एकीकृत्यापृथाजप्त्वातिलकंकारयेत्सदा॥ नमस्कृत्यवरंश्रेष्ठंप्रार्थयेद्भक्तिभावितः॥ वरंप्रार्थ्यचतस्माद्देविहरेत्तुयथाउ

ई क्रौंह्रींश्रीं   वाचालः॥२ ॥७॥अरवचनंधी७   ई ह्रौंश्रींह्रौं॥   प्राप्येतिपुस्तकांतरे १

३खड्गांगपाणिमितिपुस्तकांतरे॥३ २विपुलंधनंदि॰२

खं॥नान्यदेवार्चनंस्नानंप्रणवोच्चारणंनतु॥वस्त्राचलेनदंतानांशोधनंलवणेनवा॥रात्रिवासोनसंचेत्तुनशुचिःस्यात्कदाचन॥एवंकृतेप्रयत्नेनज्ञात्वा
गुरुमुखात्सुधीः॥मासैकेनकवीन्द्रःस्याद्द्विमासेनैवईश्वरः॥त्रिभिर्मासैर्भवेन्मर्त्यःसर्वशास्त्रविशारदः॥पुत्रार्थीलभतेपुत्रंधनार्थीलभतेधनं॥आ
युरारोग्यकामस्तुसर्वान्कामानवाप्नुयात्॥अथध्यानं॥शशधरमिवशुभ्रंखड्गपुस्तांगपाणिंसुरुचिरमतिशांतंपंचचूडंकुमारं॥पृथुतरवरमुख्यं॥
पद्मपत्रायताक्षंकुमतिदहनदक्षंमंजुघोषंनमामि॥१॥पीठपूजांततःकुर्य्यादाधारशक्त्यादिशक्ति तः॥भूतप्रेतादिभिःकुर्य्यात्पीठासनमनंतरं॥
ज्ञानदात्रेनमःपाद्यंबुद्धिकर्त्रेतथाचमेत्॥जाड्यनाशायगंधंस्यादर्घ्यंयक्षाधिपायवै॥सर्वसिद्धिप्रदायेतिपुष्पंदद्याद्विचक्षणः॥गंधपुष्पंसमादाय
भैरवान्पूजयेत्ततः॥असितांगोरुरुश्चंडःक्रोधउन्मत्तसंज्ञकः॥कपालीभीषणश्चैवसंहारश्चाष्टमःस्मृतः॥१॥ततोधूपादिकंकृत्वाप्रसूना
निविसर्जयेत्॥तैःपुष्पैःपूजयेदष्टौयक्षिणीश्चविशेषतः॥सुरादिसुंदरीचैवमनोहारिण्यनंतरं॥कनकावतीतथाकामेश्वरीरतिकार्यकरीतथा
॥पद्मिनीचनटीचैवअनुरागिण्यनंतरं॥पूज्याएताश्चयोगिन्याह्रस्वाबीजपूर्विकाः॥एवंसंपूज्यदेवेशंलक्षषट्कंजपेन्मनुम्॥घृताक्तंकुंदपुष्पैश्च
एकादशशतानिच॥जुहुयादेधितेवह्नौकांतारेपितृवेश्मनि॥एवंसिद्धमनुर्मंत्रीमहावागीश्वरोभवेत्॥कुक्कुटेश्वरतंत्रे॰ मेरुपृष्ठेसुखासीनंदेव
देवंजगद्गुरुं॥शंकरंपरिपप्रच्छपार्वतीपरमेश्वरं॥श्रीपार्वत्युवाच॰ भगवन्सर्वशास्त्रज्ञसर्वशास्त्रागमादिषु॥वांछितार्थप्रदंलोकेमंजुघोषंब्रवी
हिमे॥विशेषतोपिजप्तःकिंकवित्वपदंनृणां॥सर्वकर्मप्रदंचैवमनःसिद्धिप्रदंतथा॥भक्तानांकामदंमंत्रंकल्पवृक्षमिवापरं॥श्रीशंकरउवा
च॰ शृणुदेविमहामंत्रंसाधकानांसुखावहं॥यज्ज्ञात्वाजडधीःप्रायोवाचस्पतिसमोभवेत्॥अंगन्याससकरन्यासबहिर्न्याससमन्वितं॥जपा
त्सिद्धिप्रदंमंत्रंविनाहोमार्चनादिभिः॥जपेद्वाजापयेद्वापिसाधकोविधिपूर्वकं॥सर्वज्ञत्वमवाप्नोतिसत्यंसत्यंहिपार्वति॥ कार्तिकेयमुखंयावत्ना

कुंदपुष्पेतिप्रत्यंतरे॥१

वत्सरं जपेन्मनुं॥ सर्वशास्त्रेषु सोप्युच्चैर्बृहस्पतिरिवापरः॥ श्रीपार्वत्युवाच॰ कोप्यत्रापि ऋषिश्छंदो देवतापूज्यनेत्रका॰ ध्येयः कोवात्रतत्
त्वं ब्रूहि मे भक्तवत्सल॥ ईश्वर उवाच॰ बृहदारण्यको नाम ऋषिर्विराट्छंद एव च॥ स एव मंजुघोषाख्यो भक्तिदाने मुक्तिदः॥ ध्यात्वा भै
रवरूपेण जपेन्मंत्रमनन्यधीः॥ तदा मुक्तिप्रदो मंत्रो नात्र कार्या विचारणा॥ ध्यानं तत्र प्रवक्ष्यामि भैरवस्य महात्मनः॥ यथा ध्यात्वा जपेन्मंत्रं
तन्मे निगदितं शृणु॥ सात्विकं राजसं चैव तामसं तदनंतरं॥ ध्यानं वक्ष्ये महादेवि क्रमेण हितकाम्यया॥ सद्यः सिद्धिकरं रूपं ध्यात्वा जपेच्च सा
त्विकं॥ सिद्धिदं साधकादीनां भक्तानां चिंतितप्रदं॥ मंत्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्लभम्॥ अप्रकाश्यं परं गुह्यं न देयं यस्य कस्यचित्॥ मं
त्रोद्धारं प्रवक्ष्यामि गुह्याद्गुह्यतरं प्रिये॥ विं छं वं ग्निपा शिशशियुक् चन धी स्वरूपः षड्वर्णमंत्र उदितो भजतां सुखदश्च॥ ॥सर्वज्ञतां सदसि वाक्पटुतां
प्रसूते वेदान्न वेदनिरतस्य वसुप्रदः स्यात्॥ आद्यमंत्रं जपेन्मंत्री अयुतं यदि साधकः॥ बलिनैवेद्यमुक्तस्तु बृहस्पतिरिवापरः॥ मासमात्रेण यः
कुर्यात्सुरश्चरणवान्नरः॥ तस्यापि वदनाद्वाणी निःसरेत्सर्ववर्तिनी॥ मासमात्रेण संततं कविरेव न संशयः॥ गोमुंडे गविपृष्ठे च पात्रे वापि च गोम
ये॥ यंत्रे मंत्रं लिखित्वादौ पश्चान्मंत्रं जपेन्नरः॥ ध्यानमात्रं विधायादौ भावयित्वा चिरं सुधीः॥ निर्जनस्थानमासाद्य जपेन्मंत्रमधोमुखः॥ पौर्ण
मास्यां समासाद्य कुंदस्य कुसुमैः शुभैः॥ अष्टाधिकेश्व संपूज्य जपेन्मंत्रं चतुष्पथे॥ त्रिमुंडारोहणं कृत्वा निशीथे मुक्तकुंतलः॥ षण्मासमात्रं पुरु
षो जपं कृत्वा विधानवित्॥ बृहस्पतिसमो वक्ता नात्र कार्या विचारणा॥ ॥कुक्कुटस्य च मुंडैकं मुंडं क्रोष्टुर्वृषस्य च॥ त्रिमुंडमेतदाख्यातं साधकानां सु
भावहं॥ आसनं चैव गोमुंडे वामे कुक्कुटमुंडकं॥ दक्षिणे च शिवामुंडं कृत्वा पूजां समाचरेत्॥ अर्धचंद्राकृतिं सांसाद्बालचंद्रोपमं स्फुटं॥ यंत्रं लिखे
त्तत्र पूजां कुंदस्य कुसुमेन च॥ सव्येन पाणिकमलेन जपादि पूजां शृंगारशीलनविधौ खलु दक्षिणेन॥ राकासुधाकरमरीचितुषारगौरं ध्यात्वा च

च॥ अकारः रकारः वकारः चकारः नकारः धीकारः तेन। अरवचनधीं॥ मंत्रोयं षडक्षरः॥ ४

तं·सा·
१४७

५वडहर॥ ६भुक्तान्नमेवकदलीतरुमूलेति पुस्तकांतरे ४अशोकवृक्ष॥ २श्वन्नैःपलाशैरितिपुस्तकांतरे२ यजनीतिपुस्तकांतरे १ ४वदनेतिप्रत्यंतरे॥४ ५॥त्रिपक्षेतियुक्तःपाठइतिभाति ५

तुष्यथनटेरुषमस्तकस्थं॥संचिंत्यकुकुटशिराःशिरसाधिरूढंकुंदेनसाधकनमोजपतिप्रकामं॥गोचर्मणाविरचितंरसलक्षमात्रंचक्रंततोपिनव
कुंकुमरोचनाभिः॥निर्मायसव्यविधिनाविजने श्मशानेसंपूजयेद्वनभवैःकुसुमैःप्रवालैः॥संपूर्णमंडलतुषारमरीचिमध्येवालंविचिंत्य
धवलंवरखड्गहस्तं॥उद्दामकेशनिवहंवरपुस्तकाढ्यंनंतयजेत्सततजपंकजमायताक्षं॥अरिष्टगेहेनिशितैलमेवंआसाद्ययत्नात्करपल्लवे
न॥तेनांचितंकांचनपुष्पमेव निवेद्यतस्मैजपतिप्रकामं॥अर्किंशुकाशोकतरोश्चमूलेविलिप्यपादौरसनामृतेन॥त्रिमुंडमात्रास्थितमेवरात्रौज
पेद्यथाशक्तितुपौर्णमास्यां॥लकुचतरुतलस्थोमुंडमात्रैकरूढोहिमकरकरगौरंचिंतयित्वानिशीथे॥यदिजपतिजडात्मामंत्रमेनंत्रिलक्षं भवति
जगतिसाक्षाद्गीष्पतिर्नात्रचित्रं॥भुक्त्वातुशेषकदलीतरुमूलसंस्थःस्वास्तीर्णपुष्परचितासनसन्निविष्टः॥राकाविधूदयमुपेत्यकरोतिपूजां यः
सोपिजेयइहवाक्पतिरीश्वरःस्यात्॥जिह्वांविमृज्यनिजपाणिसरोरुहाभ्यांरोसैःप्रसूनशतकैःपरिपूज्यगोष्ठे॥योवैजपेदनुदिनंरसलक्ष
मात्रमीशंयजेत्किमुतवाक्पतिरेवचित्रं॥स्थित्वानिशीथसमयेरजकस्यकाष्ठखड्गान्वितोजपतियद्यपिपौर्णमास्यां॥संपूर्णमासमथवानर
सापितस्यवक्त्राद्विनिःसरतिगीरमृतायमाना॥योदंतधावनकृतेश्वकरंजकाष्ठैस्तस्यापिगीष्पतिवचोनियतंसुलभ्यं॥तिलतैलेनमतिमानकुंद
कैरवपुष्पकैः॥जुहुयाद्यत्ततोमंत्रीसर्वसिद्धिमवाप्नुयात्॥मंजिष्टतोयैदवचासितभानुमूलैःस्त्रीयांगशोणितयुतैःसमकुष्टकैश्च॥कृत्वाललला
टफलकेतिलकंजपस्थो विद्याप्रबोधविषयेनवगीष्पतिःस्यात्॰॥भैरवतंत्रेपि॰॥मंजुघोषाख्यममलंमंत्रमाकर्णयप्रिये॥धनवंशप्रदंरम्यंस
र्वज्ञत्ववाग्मितास्पदं॥अदोषकवितामूलममलंप्रतिभास्पदम्॥देव्युवाच॰॥भगवन्गिरिजानाथकथयस्वयथोदितं॥मंजुघोषःसकःकीदृक्कृत
स्यानुष्ठानमेवच॥ईश्वरउवाच॰ श्रूयतांदेविमेवाक्यंनात्रकार्याविचारणा॥मंजुघोषस्तुयोदेवःसोहंदेविनसंशयः॥ एकोहंशंकरोदेविनानामू

कमलपुष्पकैः॥४॥ नरेतिप्रत्यंतरे॥३ ६॥नागरमोथा॥६॥ अर्कमूलैः
वालपुष्प७

राम
१४७

एरंडपुष्प ४ ॥गुणिनमितियुक्तःपाठः ४कुंदुरु[illegible] जाप्यएवसुरेस्विनइतिप्रत्यंतरे १

र्तिधरःस्वयं॥ तस्मात्तुष्टानमधुनाश्रूयतांममतत्त्वतः॥ मंत्रःषडक्षरःसारःसद्यःकुमतिनाशकः॥ रसलक्षावधिश्चास्यकार्यएवसुरेस्वितेः॥ त्रिलक्षज
पनाद्देविवाग्मीभवतिमानवः॥ सुकवित्वंभवेत्तस्यप्रतिभाविश्वजित्वरी॥ मासत्रयंजपेद्यस्तुपंडितोऽपंडितोपदि॥ षण्मासंयस्तुजपतिससर्वज्ञः
कुशाग्रधीः॥ अब्देनसिद्धयःसर्वाभवंतिसत्यमीश्वरि॥ आहारोस्यनृणांवर्चोनैवेद्यंचक्षुषोमलं॥ मूत्रैःपाद्यंहृदेतस्यगंधोविट्खदिरोद्भवः॥ ए
रंडयजातपुष्पाणिपत्राण्येवसुनिश्चितं॥ एरंडमूलैःकार्पासबीजमर्घ्यंप्रचक्षते॥ तैंटंकीलालैःपानेनभवेदाचमनीयकं। ध्यानंवक्ष्येमहादेविसर्वे
सिद्धिप्रदायकं॥ शशधरमिवशुभ्रंखड्गपुस्तांकपाणिंसुरुचिरमतिशांतंपंचचूडंकुमारं॥ पृथुतरवरमुख्यंपद्मपत्रायताक्षंकुमतिदहनदक्षंमंजु
घोषंनमामि॥ मंत्रोद्धारंप्रवक्ष्यामिनमस्कारोपदेशतः॥ शृणुदेविमहाभागेकलौसद्यःफलप्रदं॥ मंत्रंसर्वार्थदंसारंवशीकरणमुत्तमं॥ अ
मलंनिर्गुणंसारंनिर्गुणंसर्वकामदं॥ तंनमामिहितंसारंमंजुघोषंनमाम्यहं॥ रवीशंपरमंसारंरक्तंतंब्रह्मादिभिःसुरैः॥ रक्तंरजोगुणैर्युक्तं
मंजुघोषंनमाम्यहं॥ ॥ वचनेननजानंतिकायेनचनकोविदाः
तंसारंतमसायुक्तंमंजुघोषंनमाम्यहं॥ चरणेपतितायस्यदैत्यानांजयहेतवे॥ चरणेपतितोजीवोबुद्धयेतंनमाम्यहं नजानंतिसुरायस्यत
त्त्वंतत्त्वगुणेनवै॥ हृष्टंसमस्तसारंचमंजुघोषंनमाम्यहं॥ धीशंविश्वेश्वरंचैव प्रतिपद्यादिहेतुकं॥ सकलंनिष्कलंचैवतंनमामिहितप्रभुं॥ ऋ
षिःकैल्लोभवेत्पंक्तिश्छंदोंगानिषडक्षरैः॥ दक्षिणांशक्तितोदद्याद्गुरुतुष्टिर्यथाभवेत्॥ गुरुसंतोषमात्रेणसिद्धिर्भवतिनिश्चितम्॥ पितागुरुर्नेकायो
वैदीक्षाकर्मणिपार्वति॥ तावत्कालंसुतोदुःखीपितातुनरकंव्रजेत्॥ इतिमंजुघोषस्तवः॥ ॥ अथतारिणीकल्पः॥ ॥तारिणीतंत्रे०॥ ईश्वरउवा
च०॥ श्रूयतांशैलतनयेजाड्यनाशकरीपरा॥ चतुर्वर्गफलाविद्यामंत्रसिद्धिप्रदायिका॥ वर्गाद्यंवह्निसंयुक्तंवामाक्षिपरिभूषितं॥ नादबिंदुसमा

शांतंचतमसायुक्तंपीतवस्त्रंनमाम्यहमितिपुस्तकांतरे।५। देवाइतिप्रत्यंतरे॥५ रूपकमितिप्रत्यंतरे॥८
कर्णइतिप्रत्यंतरे॥३

॥ क्रीं क्लीं ह्लस्रें देवीं ह्रीं क्रीं ऐं ॥ २

युक्तं वसुसिद्धिप्रदायकं॥ पुनश्चतुर्मुखं देवि लकारेण विभूषितं॥ स्वरेणैव चतुर्थेन चंद्रखंडेन च प्रिये॥ लांछितं वै महाबीजं चतुर्वर्गफलप्रदं॥ ततः
कूर्चपदं चोक्त्वा ततो देवि पदं स्मृतं॥ ह्रींकारं च ततो दद्यात् स्वपूर्वमुद्धरेत्ततः॥ ईकारेण च रेफेण मकारेण विभूषितं॥ ततो वाग्भवमुच्चार्य मंत्रमे
तं समुद्धरेत्॥ नवाक्षरो मनुर्देवि तारिण्याः समुदीरितः॥ इयमेव महाविद्या स्वर्गमर्त्ये च दुर्लभा॥ अष्टसिद्धिप्रदा देवि चतुर्वर्गफलप्रदा॥ अनयास
दृशी विद्या अनया सदृशो मनुः॥ आनया सदृशी सिद्धिर्न भूतं न भविष्यति॥ यो विद्यां लभते देवि किमुतस्य न जायते॥ अचिराल्लभते वाणीं गद्यपद्यप्र
मोदिनीं॥ ज्ञानमात्रेण विद्यायाः क्षिप्रं कुतक विर्भवेत्॥ विना छंदो विना शिक्षां विनाभ्यासेन पार्वति॥ विना ज्ञानं विना यत्नं विनालापं कवेरपि॥ जिह्वा
ग्रे जायते तत्र स्तबकविल्वरसनिर्मितं॥ तत्र पूजाक्रमः॥ प्रथमं जलमानीय पादप्रक्षालनं स्मृतं॥ हृद्राचम्य शिखां बध्यान ततो भूमिविशोधनं॥ विघ्नानु
त्सारणं कृत्वा ततः पुष्पविशोधनं॥ करौ संशोध्य देवेशि चास्त्रमंत्रेण तत्परः॥ गुरुं गणपतिं नत्वा भूतशुद्धिं समाचरेत्॥ स्वाधिष्ठाने स्थितं बीजं वाग्भवं स
र्वसिद्धिदं॥ ततस्तत्राग्नि बलिभिः शरीरं दह्यते बुधैः॥ तद्भस्मपुंजमुत्साप्य ह्रीमसमुद्भूतवायुना॥ ललाटे कामबीजं तु तदुद्भूतामृतेन च॥ तद्^
स्थिपञ्ज्ञाविनं कृत्वा दृढीभूतं भवेत्ततः॥ निर्लेपं निर्गुणं शुद्धमात्मानं देवतामयं॥ सर्वपापविनिर्मुक्तं देहं संचिन्त्य साधयेत्॥ शरीरस्य
विशोधेन प्राणायामं चरेत्ततः॥ आद्येन मूलबीजेन प्राणायामत्रयं चरेत्॥ मंत्रन्यासं ततो देवी श्रूयतां सर्वसिद्धिदं॥ शक्तिरस्य ऋषिः प्रोक्तो बृ
हती छंद ईरितं॥ तारिणी देवता प्रोक्ता ह्रींकारं बीजमुच्यते॥ वाग्भवं शक्तिरित्युक्तमिति न्यासादिकं चरेत्॥ बीजेन तु षडंगेषु षडंगानि प्र
कल्पयेत्॥ धर्मादि विन्यसेन्मंत्री ततो धर्मादि विन्यसेत्॰ उपर्युपरि मध्ये च क्रमेणैतान्न्यसेत्ततः॥ कल्पवृक्षं समुच्चार्य मणिपीठं ततः स्म
रेत्॥ शवमुच्चारयित्वा तु तत्रोपरि कपालकं॥ चतुर्दिक्षु न्यसेद्देवि चितामग्निसमन्वितां॥ ॥ ॥ ४ साधक इति पुस्तकांतरे ॥

५ चरेदिति पाठांतरं

॥ हृत्पद्माष्टदले तत्र चाष्टशक्तीर्न्यसेत्ततः ॥ दुर्गा जया ततो मेधा विजया सुप्रभा मता ॥ काली गौरी शिवा चैव इत्यष्टौ शक्तयः स्मृताः ॥ ततएव स्वदेहेषु पंचयोनिं न्यसेद्बुधः ॥ केशांते दक्षिणे भागे योनिबीजं न्यसेत्ततः ॥ केशांते वामभागे च योनिबिम्बं ततो न्यसेत् ॥ नासामूले च देवेशि योनिरूपां विभागतः ॥ योनिकामां योनिहारां नेत्रयोः सव्यवामयोः ॥ योनिरूपां न्यसेदोष्ठे साधकः सर्वसिद्धये ॥ मुखकोणे च देवेशि सव्यवामादिभेदतः ॥ चिबुके च महादेवि विन्यसेत्साधकोत्तमः ॥ योनिच्छायां योनिकामां योनिरूपां ततः परं ॥ बाहुमूले तथा वामे हृदि चैव वरानने ॥ योनिचिंतां योनिनित्यां योनिरूपां न्यसेद्बुधः ॥ स्तनयोर्नाभिदेशे तु योनिस्थानं सदा स्मरेत् ॥ योनिसिद्धां योनिविद्धां योनिरूपां न्यसेत्ततः ॥ एताः स्मृताश्चतुर्थ्यंता नमोंताश्च विचक्षणैः ॥ देहपीठे ततो देवीं ध्यायेत्सुस्थिरमानसः ॥ अथ ध्यानं ॥ कृष्णां लंबोदरीं भीमां नागकुंडलशोभितां ॥ रक्तमुंडीं ललज्जिह्वां रक्तावरधरां करौ ॥ पीनोन्नतस्तनीं सुग्रां महानागेनवेष्टितां ॥ शवस्योपरि देवेशि तस्योपरि कपालके ॥ नासाग्रध्याननिरतां महाघोरां वरप्रदां ॥ चतुर्भुजां दीर्घकेशीं दक्षिणस्योर्द्ध्वबाहुना ॥ बिभ्रतीं नलिनीमेकां वामोर्द्ध्वे पानपात्रकं ॥ वराभयधरां देवीमधस्ताद्दक्षवामयोः ॥ पिबंतीं रौधिरीं धारां पानपात्रं सदा शिवे ॥ सर्वसिद्धिप्रदां देवीं नित्यां गिरिनिवासिनीं ॥ लोचनत्रयसंयुक्तां नागयज्ञोपवीतिनीं ॥ दीर्घास्यां दीर्घजंघां तु दीर्घांगीं दीर्घजिह्विकाम् ॥ चंद्रसूर्याग्निभेदेन लोचनत्रयसंयुतां ॥ शत्रुनाशकरीं देवीं महाभीमां वरप्रदां ॥ व्याघ्रचर्मशिरोबद्धां जगत्त्रयविभाविनीं ॥ साधकानां सुखंकर्त्रीं सर्वलोकभयंकरीम् ॥ एवंभूतां महादेवीं तारिणीं प्रणमाम्यहं ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् तारावत् ॥ अस्याः पूजायंत्रं यंत्रं निर्माय देवेशि स्थापयेन्मंत्रमध्यतः ॥ रक्तमलयजेनापि वसुपत्रं लिखेत्ततः ॥ तद्बाह्ये द्व्यष्टपत्राणि लिखेत्साधकसत्तमः ॥ वह्निमंडलयुग्मं च यंत्रमध्ये लिखेत्ततः ॥ पूर्वदले च देवेशि आद्यबीजं लिखेत्ततः ॥ द्वितीयं दक्षिणे पत्रे तृतीयं पश्चिमे दले ॥ उत्तरे च दले दे

५ दीर्घनासामिति पुस्तकांतरे ॥ ५

५भोगदामितिपुस्तकांतरे॥५ २सहांतकमितिपुस्तकांतरे २

विपद्मंपंचलिखेत्ततः॥चतुर्द्वारसमायुक्तमष्टवज्रसमन्वितं॥तत्रपूर्वोक्तमार्गेणपीठंसंपूज्यपूर्ववत्॥ध्यात्वावाह्यमहेशानींयजेद्देमंत्रमुच्च
रन्॥षडंगेनेवरदेवेशिपूजयित्वातुपार्वतीं॥क्षेत्रपालंभैरवंचगणनाथंसहांबिकां॥एतच्चतुष्टयंदेवियजेद्वारचतुष्टये॥पूर्वाद्यष्टदलेदेविस
तान्संपूज्यसाधकः॥अणिमानंगमदनालघिमामदनातुरा॥अनंगकुसुमादेवीतथाष्टकर्णिकातथा॥कपालिकाचदेवेशिततोष्टयोगिनीस्तथा
॥तथाषोडशपत्रेषुपूजयेत्परिचारिकाः॥सुखदांमोक्षदांतत्रभक्तिदांभोगदांतथा॥मुक्तिदांसिद्धिदांचैवकामदांधनदामपि॥क्षेमदांशिवदांचापि
परदामात्मदांतथा॥योगदांभाग्यदांदेविमुक्तिदांसर्वसिद्धिदां॥अणिमाद्यष्टसिद्धिंचपूर्वद्वारेयजेत्ततः॥चतुर्दशकलादेविद्वारेचदक्षिणेतथा
॥पाश्चात्यद्वारेदेवेशिकलाश्चंद्रस्यपूजयेत्॥उत्तरेचतथादेविरवेरपिकलास्ततः॥षडंगेनयजेद्देवींततश्चास्त्राणिपूजयेत्॥एतास्तुदेवदे
वेशिचतुर्थ्यंताःसमीरिताः॥नमोंताश्चमहादेविप्रोक्ताःसकलसिद्धिदाः॥पुष्पैर्बहुविधैश्चैवरक्तचंदनचर्चितैः॥रक्तपुष्पैर्महादेविनानागं
धसमन्वितैः॥बिल्वपत्रैस्तथागंधैर्जपापुष्पैर्विशेषतः॥श्वेतरक्तपरागैश्चकरवीरैर्मरूबकैः॥बिल्वपुष्पैःकुंदपुष्पैर्लवंगैश्चसुशोभनैः॥अपरा
जितपुष्पैश्चचंपकैःकेसरैस्तथा॥एभिःपुष्पैर्महादेविपूजयेन्नित्यतारिणीं॥मालतीबकपुष्पैश्चसदूर्वैश्चार्चयेत्तथा॥कदंबैःश्वेतकुसु
मैर्बहुलैःकांचनैस्तथा॥एवंसंपूजयित्वातुएभिर्द्रव्यैर्महेश्वरि॥लक्षमात्रंजपेन्मंत्रंहविष्याशीदिवाशुचिः॥इतितारिणीकल्पः॥ अथसा
रस्वतकल्पः॥नारदउवाच०॥केनोपायेनदेवेशविद्योत्पत्तिर्भवेन्नृणां॥वेदविद्याप्रकाशश्चतन्मेब्रूहिजगत्प्रभो॥ब्रह्मोवाच० साधुसाधु
त्वयापृष्टंलोकानांहितकारकं॥एतदेवपुरापृष्टंकल्पादौविष्णवेमया॥ब्रह्मशब्दस्वरूपेणप्रसन्नेनांतरात्मना॥यत्प्रोक्तंतेनमेब्रह्मंस्तत्ते
वक्ष्यामियत्नतः॥विष्णुरुवाच० शृणुब्रह्मन्परंगुह्यंकल्पंसारस्वतंमहत्॥यस्यविज्ञानमात्रेणजाड्यापहरणंभवेत्॥सर्वशास्त्रप्रयोगश्चस

लकांतरे॥१ ंतरे॥४

मुद्रारविंदमिति पुस्तकांतरे॥२ ओं ऐं॥ द्व्यक्षरो मंत्रः॥२ व्याप्तिमिति [illegible]

र्वज्ञो जायते चिरात्॥ अभ्यासात्स्वभवेत्तस्य वाचश्चित्रा भवंति हि॥ अवापुस्त्रिदशाः स्वर्गं वागीशत्वं बृहस्पतिः तद्ध्यायनोपियां तां तां वेदव्यासो भ
वन्मुनिः॥ मंत्रोद्धारं प्रवक्ष्यामि सांगावरणपूजनैः॥ अनंतं बिंदुनायुक्तं वामगंडान्तभूषितम्॥ जपेद्द्वादशलक्षाणि मूकोपि वाक्पतिर्भवेत्॥ नाभौ
हृद्दशबिंदुं तु ध्यायेद्दशदलं सुधीः॥ तन्मध्ये भावयेन्मंत्री मंडलानां त्रयं चिरं॥ रत्नसिंहासने ध्यायेद्धूर्णज्योत्स्नामये पुनः॥ तस्योपरि पुनर्ध्यायेद्दे
वीं वागीश्वरीं ततः॥ रत्नकांतिनिभां देवीं ज्योत्स्नाजालविकाशिनीं॥ मुक्ताहारयुतां शुभ्रां शशिखंडविभूषितां॥ विभ्रतीं दक्षहस्ताभ्यां व्याख्यां व
र्णस्य मालिकां॥ अमृतेन तथा पूर्णं घटं च दिव्यपुस्तकं॥ दधतीं वामहस्ताभ्यां पीनस्तनभरान्विताम्॥ मध्ये क्षीणां तथा स्वच्छां नानारत्नविभूषितां॥ आ
त्माभेदेन ध्यात्वैवं ततः संपूजयेत्क्रमात्॥ आद्येन दीर्घयुक्तेन कुर्यादंगानि हस्तयोः॥ हृदयादौ तथा कुर्याद्बीजेनांगक्रियां पुनः॥ भ्रुवोर्मध्ये
तथा नाभौ गुह्ये च देशिकस्तथा॥ न्यसेद्बीजं पुनर्वस्तौ व्यापकं विन्यसेत्ततः॥ पीठन्यासं ततः कुर्याद्देवताभावसिद्धये॥ मातृकायाश्च यन्त्रो
क्तं पीठमभ्यर्च्य यत्नतः॥ वर्णाब्जेनासनं दद्यान्मूर्तिं मूलेन कल्पयेत्॥ आवाह्य पूजयेत्तस्यां देवीं वागीश्वरीं ततः॥ अंगैः प्रथमावृत्तिः स्याद्द्वितीया
शक्तिभिस्ततः॥ दलाग्रेषु समभ्यर्च्य ब्रह्माण्याद्या यथाविधि॥ लोकपाला बहिः पूज्यास्तेषामस्त्राणि तद्बहिः॥ एवं संपूजयेन्मंत्री जपहो
मरतः सदा॥ कवित्वं लभते वाग्मी लक्षैर्द्वादशभिर्ध्रुवं॥ प्रातर्जप्त्वा सहस्रं तु पिबेद्ब्राह्मीवचान्वितं॥ न विस्मरति मेधावी श्रुतान्वेदागमानपि
॥ कंठमात्रोदके स्थित्वा ध्यायेन्मार्तंडमंडले॥ ज्योतिःपुंजनिभां देवीं परिवारसमन्वितां॥ वराभययुतां हस्ते मुद्रापुस्तकधारिणीं॥ जपन्सह
स्रमानेन षण्मासं विजितेंद्रियः॥ श्रीमान्संप्राप्य वाक्सिद्धिं कवीनामग्रणीर्भवेत्॥ अथ योगं प्रवक्ष्यामि जाड्यनाशकरं परं॥ रात्रिशेषे समुत्थाय
शुचिर्भूत्वा समाहितः॥ शुद्धभावेन चात्मानं द्रव्यं च परिकल्पयेत्॥ तत्प्रभापटलव्याप्तं जगत्सर्वं विचिंतयेत्॥ मूलाधारे स्थितां देवीं कुंडली

बीजेति पुस्तकांतरे

परदेवतां॥ सुप्तांप्रोत्थाप्यतांशक्त्याक्रमाच्चक्राणिभेदयेत्॥ ततःपरशिवेनीत्वासौधीचप्रापयेत्ततः॥ ऊर्द्ध्वंग्रंथिंविनिर्भिद्यजिह्वांदीपस्वरूपिणीं॥ जीवस्वरूपशक्त्यातुप्रेरयंतींपरात्मिकां॥ शब्दब्रह्मस्वरूपांचतांदेवींचिंतयेत्पुनः॥ तत्प्रभापटलव्याप्तंशरीरंचिंतयेदिमं॥ नित्यंसहस्रमानेनजपेत्संवत्सरंयदि॥ ततःसंजायतेमंत्रीवाचस्पतिरिवापरः॥ छंदोलंकारतर्कादिनानाशास्त्रार्थविद्भवेत्॥ कवित्वंज्ञानशक्त्यातुपांडित्यमधिकंभवेत्॥ अथापरंप्रवक्ष्यामिप्रयोगंसुविदुर्लभं॥ नाभिचक्रेस्थितांसौम्यांरक्ताकारांविचिंतयेत्॥ क्षौमाबद्धनितंबांचरत्नाभरणभूषितां॥ पाशांकुशधरांदिव्यांवराभययुतांपुनः॥ दृष्ट्याचामृतवर्षिण्यापूरयंतींमनोरथान्॥ एवंध्यात्वाजपेल्लक्षंसमनुजोविहितंततः॥ होमंकुर्यात्त्रिमध्वक्तंरक्तोत्पलयुतैर्द्विजः॥ ततःसंतर्पयेद्देवींदुग्धयुक्तेनसर्पिषा॥ पायसेनबलिंदद्याद्दधिपिष्टमधुप्लुतैः॥ एवंध्यात्वाविधानेनतुसासाहेश्रवणोभवेत्॥ सिद्धार्थैर्मधुरोपेतैर्हुत्वाजगद्वशंनयेत्॥ पद्महोमेनमहतींप्राप्नुयाच्छ्रियमूर्जितां॥ देवीहृदयविद्यायानास्तिकिंचित्सुदुर्लभं॥ स्नेहाभावेनसंप्रोक्तंनदेयंयस्यकस्यचित्॥ एतत्तेकथितंगुह्यंविद्योत्पत्तेश्चकारणं॥ विष्णुनादत्तमस्माभ्यंमयातुभ्यंद्विजोत्तम॥ सिद्धमंत्रोयदामंत्रीबालिशस्यापिमूर्द्धनि॥ हस्तंदत्त्वादिशेत्सोपिसौधीवाचमनर्गलां॥ ॥इतिस्वायंभुवमातृकामंत्रेसारस्वतःपटलः॥ ॥अथकात्यायनीकल्पः॥ भगवानुवाच॰ ॥ इतिगुह्यतमंमंत्रंएषवानस्मिपार्वति॥ भक्तिभावेनतेदेविकथयामिशुचिस्मिते॥ प्रसन्नतांयथायातिदेवीकात्यायनीतथा॥ [३]कवितामतुलैश्वर्यंददातिपरमुत्तमं॥ स्त्रीणामाकर्षणंचैवमारणोच्चाटनेरिपोः॥ नृपाणांवश्यतांचैवजायते[४]त्रतथाप्रिये॥ कथयामितथासर्वंभक्त्याकर्णयमद्वचः॥ आदौशृणुमहामंत्रंवाग्भवादिनमोंतिकं॥ वह्न्यासनेशिंवंवांनेंविंदुशांतिविभूषितं॥ चकारंविंदुनायुक्तंचतुर्दशस्वरसंयुते॥ ङेयुताचंडिकाचैवमंत्रःप्रोक्तोदशाक्षरः॥ चिंतामणिरितिख्यातोनामयाचापिविचिंत्यते॥ देवताचंडिकाछंदोगायत्रीकपिलोमुनिः

---

३ कवितामंडलैश्वर्यंददाति परमीप्सितमितिपुस्तकांतरे॥३॥

४ अतीतिपुस्तकांतरे॥

अथ[illegible]तिपुस्तकांतरे।१

॥लक्षमेकंजपेन्मंत्रंदशांशंजुहुयात्ततः॥मातृकोक्तेयजेत्पीठेबीजेनांगक्रियामता॥आशावेगानिसंपूज्यशस्त्रपूजाततःपरम्॥लोकपालास्ततः
पूज्यास्तेषामस्त्राणितद्बहिः॥डाकिनीयोगिनीचैवखेचरीशाकिनीतथा॥दिक्षुपूज्याइमादेव्यःसुसिद्धफलदायिकाः॥अथध्यानं॥सव्यपादस
रोजेनालंकृतोरुमृगाधिपां॥वामपादाग्रदलितमहिषासुरनिर्भरां॥सुप्रसन्नांसुवदनांचारुनेत्रत्रयान्वितां॥हारनूपुरकेयूरजटामुकुटम
डितां॥विचित्रपट्टवसनामर्द्धचंद्रविभूषितां॥खड्गखेटकवज्राणित्रिशूलंविशिखंतथा॥धारयंतींधनुःपाशंशंखघंटेसरोरुहं॥बाहुभिर्ल
लितैर्देवींकोटिचंद्रसमप्रभां॥समाहृतैर्द्विषद्देवैराकाशसंस्थितैः॥स्तूयमानांमेरुमानैर्लोकपालादिभिःसदा॥एवंसंचिंतयेद्देवींजायते
नरपुंगवः॥क्षत्रियेषुयथासमोदेवेषुचपुरंदरः॥पतंगेषुयथातार्क्ष्यःक्रूरकार्येयथाशनिः॥शकुंनेषुयथाश्येनोमंत्रज्ञोबलवांस्तथा॥इतितेप
रमंगुह्यंसंक्षेपात्कथितंमया॥इदानींजपहोमानांविधानंचशृणुप्रिये॥मंत्रोयंचिंत्यतेदेविसभायांपुरतोयदि॥कोटिसूर्यप्रतीकाशोदृश्य
तेवादिभिःसदा॥पलायन्तेमहादेविसाध्वसेनक्षणात्ततः॥इषेमासस्यसितेपक्षेनवम्यामारभेज्जपं॥सहस्रंप्रत्यहंकृत्वासंप्राप्यनवमींसितां॥
विजयंखड्गमादायपूजयित्वायथाविधि॥अर्द्धरात्रौबलिंदत्वाप्रातर्यात्रांसमाचरेत्॥रणभूमिंसमासाद्यसहस्रंप्रजपेन्मनुं॥तंदृष्ट्वापुरुषंदेविदृ
ष्टोभोजायतेरिपोः॥सद्भूतंयममायांतंमन्यमानानराधिपाः॥पलायन्तेमहादेविनात्रकार्याविचारणा॥शुक्लांबरधरोमौनीब्रह्मचारिव्रते
स्थितः॥शुक्लवर्णांमहादेवींध्यात्वाशुक्लविभूषणां॥सहस्रंमासमेकंतुजपेन्नित्यंयथाविधि॥मालतीबकुलैःकुंदैर्मंत्रीमधुरसंप्लुतैः॥सहस्र
त्रितयंहुत्वावागीशोजायतेचिरात्॥हेलयाकवितांदेविविशदांकुरुतेध्रुवं॥जपंयाकुरुतेनित्यंशतशोवत्सरावधि॥वंध्यापिलभतेपुत्रंकार्त्ति
केयमिवापरं॥दुर्भगायाभवेत्पुंसुःसुभगातिमनोरमा॥रूपंविचिंत्यपूर्वोक्तंलक्षंजप्त्वायुतंततः॥नीलोत्पलैःसरोजैर्वाहुत्वावै

मृगचर्म·६

४ ह्रीं ह्रूं चौं चौं कालि२खाद२य२वशीकुरुमहासत्वान् ह्रूं ह्रूं स्वाहा॥ त्रीं त्रीं इति वा

श्रवणायते॥ध्यानम्॥व्याघ्रचर्मपरीधानांमुंडमालाविभूषितां॥रक्तवर्तुलभीमाक्षींजिह्वयालोलयाऽसुरान्॥चर्वयंतींमहाकालींकालरात्रि
मिवापरां॥क्षोभयंतींजगत्सर्वंससुरासुरपर्वतं॥एवंध्यात्वाजपेद्देविश्मशानेवाचतुष्पथे॥सप्ताहंत्रिशतंकृत्वाव्रतस्थःस्थिरमानसः॥जपेद्योनि
यंतरेविसरिपून्नाशयेद्ध्रुवं॥अनेनैवविधानेनबलिंदद्याच्चतुष्पथे॥दग्धमत्स्यंसरक्तान्नंपिंडीकृत्यसमाहितः॥आममांसंहरिद्राक्तंयंविचिंत्य
प्रदापयेत्॥सप्ताहाल्लभतेशत्रुर्यमसद्मनसंशयः॥हरिर्वाशंकरोवापिनशक्तोरक्षितुंक्वचित्॥बलिमंत्रस्तु॥उमाबीजयुगंचादौचामुंडाबी
जयुग्मकं॥कालिकालिपदंचोक्त्वाखादयद्वितयंपुनः॥वशीकुरुमहासत्वानादिहूंहूंपुनर्वदेत्॥वह्निजायांततःप्रोक्तोबलिमंत्रःशुभावहः।
।उमाबीजंहृल्लेखाबीजं॥चामुंडाबीजंश्यामाबीजं॥एणाजिनंपरिधायउपविश्यनिजांगणे॥आत्मानंघोररूपंचचिंतयित्वासमाहितः॥अंगारक
दिनेचैवनिंदितासुतिथिष्वपि॥पूजितेनखड्गमादायनिशीथेबलिमाहरेत्॥प्रहारंशोणितंचास्यदद्याद्देव्यैयथाविधि॥अछेद्याभेद्यकायःस्या
द्धिपूर्णोनात्रसंशयः॥मंत्रांतरम्॥मायाबीजंसमुद्धृत्यरमाबीजंततःपरं॥कात्यायनीपदंङेंतंवह्नेर्भार्याततःपरं॥अष्टाक्षरीमहाविद्यासर्वे
कामफलप्रदा॥ध्यानपूजादिकंसर्वंपूर्ववच्चसमाचरेत्॥ ॥इतिकात्यायनीमहाकल्पः॥ ॥अथदुर्गामंत्राः॥ ॥विश्वसारे॥ ॥अथदुर्गाम
नून्वक्ष्येशृणुष्वकमलानने॥येषांप्रसादमात्रेणभवेद्गंगाधरःस्वयं॥थांतेबीजंसमुद्धृत्यवामकर्णविभूषितं॥इंदुबिंदुसमायुक्तंबीजंपरमदु
र्लभं॥चतुर्वर्गप्रदंसाक्षान्महापातकनाशनं॥एकाक्षरीसमानास्तिविद्यात्रिभुवनेश्वरि॥विनागंधैर्विनापुष्पैर्विनाहोमपुरस्सरैः॥विना
न्यासैर्महादेविजपमात्रेणसिद्धिदा॥मंत्रस्यास्यऋषिर्देविनारदःपरिकीर्तितः॥गायत्रीछंदआख्यातंजगद्धात्रीचदेवता॥चतुर्वर्गप्रदादुर्गास
र्वसत्वेषुसंस्थिता॥विविधासामहाविद्यानच्छृणुष्वगणेश्वरि॥कूर्चाद्यांवाजपेद्विद्यांनदंतेवह्निसुंदरी॥लज्जाद्यांवाजपेद्विद्यांफडंतांवाजपे॥

१ तंत्रेषु गोपितेति   पुस्तकांतरे॥१   ७ प्रहाज्येतिपुस्तकांतरे   ६॥ह्रीं श्रीं कात्यायनी स्वाहा॥६

६ गर्भेरितिवा॥६
५ शुक्रैरिति प्रत्यंतरे॥५
२ बीजैनेति पुस्तकांतरे॥२

त्सुधीः॥ वधूबीजयुतां वापि स्वाहांतां वा जपेत्पुनः॥ लक्ष्म्याद्यां वा जपेद्विद्यां चतुर्वर्गफलाप्तये॥ वाग्भवाद्यां जपेद्वापि प्रणवाद्यां जपेत्पुनः॥ कामबीजादिकां वापि फडंतां वा जपेत्पुनः॥ त्र्यक्षरी विविधा विद्या कथिता ब्रह्मणा पुरा॥ दीर्घस्वरसमायुक्तनिजबीजानि पार्वति॥ विन्यसेदात्मनो देहे हृदयादिषु पूर्ववत्॥ पूर्वन्न्यासवर्गं तु पूर्ववत्क्रमेवाचरेत्॥ कालीवदाचरेद्विद्यां जपेद्विद्यामहर्निशं॥ लक्षद्वादशकैर्वापि पुरश्चरणमीरितं॥ यथास्थाने यथाकाले यथाचारविधानतः॥ प्रजपेत्परया भक्त्या दुर्गां दुर्गतिनाशिनीं॥ मत्स्यैर्मांसैः सूपपूपैर्मृगैः शशकशल्लकैः॥ पूजयेत्परया भक्त्या दुर्गां दुर्गतिनाशिनीं॥ स्वयंभुकुसुमैः शुक्रैः सुगंधिकुसुमान्वितैः॥ जवायावकसिंदूरै रक्तचंदनसंयुतैः॥ नानामांसैर्नानाद्रव्यैः पूजयेत्परमेश्वरीं॥ काकसूकैः पेचकैश्च महिषैश्छागलैर्नरैः॥ आजैरुष्ट्रैः खरैर्गृध्रैः पूजयेद्विधिनामुना॥ तदा भवेन्महासिद्धिर्नात्र कार्या विचारणा॥ ध्यानम्॥ सिंहस्कंधसमारूढां नानालंकारभूषितां॥ चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीं॥ शंखचक्रधनुर्बाणधरां च शशिशेखरां॥ रक्तवस्त्रपरीधानां बालार्कसदृशीतनुं॥ नारदाद्यैर्मुनिगणैः सेवितां भवगेहिनीं॥ त्रिवलीवलयोपेतनाभिनालसुवेशिनीं॥ रत्नद्वीपे महाद्वीपे सिंहासनसमन्विते॥ प्रफुल्लकमलारूढां ध्यायेत्तां भवगेहिनीं॥ दुर्गायंत्रं प्रवक्ष्यामि शृणुष्व हरवल्लभे॥ त्रिकोणं विन्यसेत्पूर्वं नवकोणसमन्वितं॥ त्रैबिंबसहितं सर्वमष्टपत्रसमन्वितं॥ त्रिरेखासहितं वज्रभूपुरद्वयसंयुतं॥ समीकृत्य यथोक्तेन विलिखेद्विधिनामुना॥ नानास्त्रसंयुतं लेख्यं चक्रं मंत्रविभूषितं॥ तत्र तां पूजयेद्देवीं मूलप्रकृतिरूपिणीं॥ पद्मस्थां पूजयेद्दुर्गां सिंहपृष्ठनिषेदुषीं॥ प्रभाद्याः शक्तयः पूज्या गंधाद्यैर्नवकोणके॥ प्रभां मायां जयां सूक्ष्मां विशुद्धां नंदिनीं पुनः॥ सुप्रभां विजयां सर्वसिद्धिदां नवशक्तयः॥ ह्रीमाद्याः पूजयेत्तास्तु गंधचंदनवारिणा॥ ॐकारं पूर्वमुच्चार्य ह्रीकारं तदनंतरं॥ यथापदं चतुर्थ्यंतं पूजयेत्क्रमतः प्रिये॥ शंखपद्मनिधी देव्या वामदक्षिणयोगतः॥ पूज

५॥ रत्नस्वर्णमये द्वीपे इति पुस्तकांतरे॥

मृणालिनीमिति पुस्तकांतरे॥६

४प्रियेइतियुक्तःपाठः॥ ३॥ॐह्रींविशालाक्ष्यैनमः॥३॥

येन्परस्यामनयारक्तचंदनदूर्वकैः॥अर्घ्यदानंसदाकुर्यात्पूजांतेपर्वतात्मजे॥अंगावृत्तिःपुनःपूज्यापत्रकोणेषुमातरः॥वज्राद्यायुधसंयुक्ताभूपु
रेलोकनायकाः॥वज्रशक्तीदंडखड्गौपाशांकुशौगदातथा॥शूलंपद्मंतथाचक्रंपूजयेत्साधकोत्तमः॥इतिदुर्गामंत्राः॥ अथविशालाक्षीमंत्राः॥
आदियामले॥ ईश्वरउवाच॥ध्रुवमाद्यंसमुद्धृत्यमायाबीजंसमुद्धरेत्॥विशालाक्षीपदंङें·तंहृदयंमंत्रमुद्धरेत्॥त्र्यष्टाक्षरीमहाविद्याअष्ट
सिद्धियुताशिवे॥प्रसंगात्कथिताविद्यात्रैलोक्येदुर्लभाभवेत्॥ऋषिरस्यामहेशानिसदाशिवोमहाप्रभुः॥पंक्तिश्छंदश्चकथिताविश
लाक्षीचदेवता॥शक्तिःप्रणवमित्युक्तंलज्जाबीजंचबीजकं॥धर्मार्थकाममोक्षेषुविनियोगःप्रकीर्तितः॥अंगन्यासकरन्यासौय
थावदभिधीयते॥षट्दीर्घभाजाबीजेनप्रणवाद्येनकल्पयेत्॥मूलेनव्यापकंन्यस्यध्यायेद्देवींपरांशिवां॥ध्यायेद्देवींविशाला
क्षींतप्तजांबूनदप्रभां॥द्विभुजामंबिकांचंडींखड्गखर्परधारिणीं॥नानालंकारसुभगांरक्तांबरधरांशुभां॰सदाषोडशवर्षीयांप्रसन्नास्यांत्रि
लोचनां॥मुंडमालावलीरम्यांपीनोन्नतपयोधरां॥शवोपरिमहादेवींजटामुकुटमंडितां॥शत्रुक्षयकरींदेवींसाधकाभीष्टदायिनीं॥सर्वसौ
भाग्यजननींमहासंपत्प्रदांस्मरेत्॥एवंध्यात्वामहादेवींसुपचारैःप्रपूजयेत्॥पुरश्चरणकालेतुवर्णलक्षंजपेत्सुधीः॥यंत्रमध्येसमा
वाह्यप्रतिष्ठांकारयेत्ततः॥त्रिकोणंचाष्टपत्रंचततोवृत्तंसमालिखेत्॥चतुरस्रंचतुर्द्वारमेवंमंडलमालिखेत्॥तत्रबाह्येयजेद्देवींदेवींसौ
भाग्यसुंदरीं॥विशालाक्षींविशालास्यांयथाविधिप्रपूजयेत्॥त्रिकोणान्तेमहादेवींसंपूज्यमातरःक्रमात्॥पंकजाक्षीविरूपाक्षीरक्ताक्षीचसु
लोचना॥एकनेत्राद्विनेत्राचकोटराक्षीत्रिलोचना॥एताःपूज्यामहेशानिपत्राग्रेत्वष्टयोगिनी॥पश्चिमादिक्रमेणैवचाष्टसिद्धिस्वरूपिणी॥च
तुरस्रेमहादेविलोकपालान्समर्चयेत्॥तद्बहिश्चैववज्राद्यान्पूजयेद्भाग्यहेतवे॥ततोयथाशक्तिजप्त्वापूर्ववच्छेषमाचरेत्॰॥ इतिविशाला

५॥ सुलभायै नमः। एवंरतिकांका मदायिनीमिति पुस्तकांतरे॥

स्री॥ अथ गौरीमंत्राः॥ तंत्रे०॥ ॥ ह्रीं गौरि रुद्रदयिते योगेश्वरि सवर्म फट्॥ द्विठांतः षोडशार्णोयमंत्रः सद्भिरुदीरितः॥ ॥ अस्य पूजा॥ प्रातः कृत्यादि प्राणायामांतं कर्म समाप्य ऋष्यादिन्यासं कुर्य्यात्॥ यथा शिरसि पर्वतऋषये नमः॥ सुखे गायत्रीछंदसे नमः॥ हृदि कौमार्यै देवतायै नमः॥ ततः करांगन्यासौ॥ ह्रां अंगुष्ठाभ्यां नमः इत्यादि० ह्रां हृदयाय नमः इत्यादि च॥ ततो ध्यानं॥ हेमाभां बिभ्रतीं दोर्भिर्दर्पणं जनसाधने॥ पाशांकुशौ सर्वभूषां तां गौरीं सर्वदा भजे॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनादि पीठमन्वंतं संपूज्य पुनर्ध्यात्वावाह्य देवीं प्रपूजयेत्॥ ततो रत्नादिकेशरेषु ह्रां हृदयाय नमः इत्यादिना पूजयेत्॥ पत्रेषु पूर्वादि ॐ सुभगायै नमः॥ एवं रतिकामिनीकामपालिनीपाशांकुशदर्पणांजनशालाकान् पूजयेत् ततइंद्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं लक्षजपः॥ आज्येन दशांशहोमः॥ तथा च॥ लक्षमेकं जपेन्मंत्रं हविष्याशी जितेन्द्रियः॥ दशांशं होमयेदाज्यैः पुरश्चरणसिद्धये॥ फलं तु पुष्पांजनमभ्युक्ष्य चंदनादिकं मूलमंत्राभिमंत्रितं यस्मै यस्मै दीयते स वश्यो भवति॥ तथा च॥ रात्रौ हरिद्रया वामोरुमध्ये स्त्रिग्धस्त्रीनामाभिलिख्य वामकरेण पिधाय शतं सहस्रं वा जपन्निष्टां प्रियामाकर्षयति॥ एतत्पूजादिकं सर्वसौभाग्यवश्यसर्वसंपत्करं॥ अथ ब्रह्मश्रीमंत्राः॥ मंत्रदेवप्रकाशिकायां॥ हृल्लेखानमस्कारादि ब्रह्मश्री राजिते राजपूजिते जये विजये गौरि गांधारि त्रिभुवनवशंकरि सर्वलोकवशंकरि सर्वस्त्रीपुरुषवशंकरि सु सु दु दु घे घे वा वा ह्रीं स्वाहा॥ अस्य पूजा प्रातःकृत्यादिकं कृत्वा करांगन्यासौ कुर्यात्॥ अंगन्यासः॥ राजिते राजपूजिते हृदयाय नमः॥ जये विजये शिरसे स्वाहा॥ गौरि गांधारि शिखायै वषट्॥ सर्वलोकवशंकरि कवचाय हुं॥ सर्वस्त्रीवशंकरि नेत्रत्रयाय वौषट्॥ सु २ दु २ घे २ वा २ ह्रीं स्वाहा अस्त्राय फट्॥ ततो ध्यानं॥ अविकलशशिराजन्मौलिराबद्धपाशांकुशरुचिरकराब्जाबंधुजीवारुणांगी॥ अमरनिकरवंद्या त्रीक्षणा शोणलेपांशुककुसुमयुता सास्तु संपदे पार्व

५॥ स्त्रियमिति पुस्तकांतरे

तीवः॥अस्यांगैर्मातृभिर्लोकपालैस्त्रीण्यावरणानि॥अस्यायुतजपः पुरश्चरणं॥पायसेन दशांशहोमः॥मधुत्रययुक्तैस्तिलतंदुलैर्लवणैर्वा दिनत्रयं सहस्रहोमः॥शीघ्रवशीकरः॥प्रातःकाले सूर्यमंडलमध्यस्थां देवीं संचिंत्याष्टोत्तरशतं जपन् त्रिभुवनवश्यकर ब्रह्मश्रीमंत्रेति॰। ॥अथ राजमुखीमंत्रः॥स तु सप्तचत्वारिंशदक्षरः॥अंगन्यासेन विरच्यते॥यथा॥ॐ राजमुखे हृदयाय नमः॥वश्यमुखि ह्रीं श्रीं क्लीं शिरसे स्वाहा॥देविदेवि शिखायै वषट्॥महादेवि कवचाय हुं॥देवाधिदेवि नेत्रत्रयाय वौषट्॥सर्वजनस्य मुखं मम वशं कुरु स्वाहा अस्त्राय फट्॥सर्वे ब्रह्मश्रीमणेरिव॥जपादौ सर्वजनस्थाने साध्यनाम देयमिति॥अथ इंद्रमंत्रः॥स च मंत्रो देवप्रकाशिकायां॥ईं इंद्राय हृत्॥अस्य ब्रह्मा ऋषिः॥पंक्तिश्छंदः॥इंद्रो देवता॥ई बीजं॥आयेत शक्तिः॥बीजेनांगन्यासः॥यथा॥ईं अंगुष्ठाभ्यां नमः इत्यादि॥ईं हृदयाय नमः इत्यादि॥ध्यानम्॥पीतवर्णं सहस्राक्षं वज्रपद्मकरं विभुं॥सर्वालंकारसंयुक्तं नौमींद्रं दिक्पतीश्वरं॥१॥एवं ध्यात्वा बाह्यपूजयेत्॰ तत्र इंद्र हृदयाय नमः इत्यादि षडंगेन पूजयेत्ततः॥ततः पत्रेषु पूर्वादिकं कार्त्तिकेयाय नमः॥एवं रं अग्नये नमः॥यं यमाय॥सं नैर्ऋतये॥वं वरुणाय॥यं वायवे॥सं सोमाय॥ईं ईशानाय॥ततो वज्रादीन् पूजयेत्॥अस्य पुरश्चरणं लक्षजपः॥आज्येन तिलैरयुतहोमः॥ततः प्रयोगः॥चैतुष्कोणस्थपद्मे नववस्त्रवेष्टितं कुंभं स्थापयित्वा गंधोदकेन संपूर्य तत्र सपरिवारमिंद्रमाराध्य सहस्रं जप्त्वा तज्जलाभिषेकेन भ्रष्टराज्यप्राप्तिः॥अन्येषां परमा प्रीतिर्भवति॥इति इन्द्रमंत्रः॥अथ गरुडमंत्रः॥संवर्तको नेत्रयुतः पार्श्वेस्तारा रतिसुंदरी॥गारुडो मनुराख्यातो विषद्वयविनाशकः॥स्मरन् गरुडमात्मानं मंत्रमेतं जपेन्नरः॥विषमालोकनेनैव हन्यात्नागकुलोद्भवं॥अस्याः पूजा॥प्रातःकृत्यादि वैष्णवोक्तपीठमन्वंतं विन्यस्य ऋष्यादिन्यासं कुर्याद्यथा॥शिरसि रुद्रऋषये नमः॥मुखे पंक्तिछंदसे नमः॥हृदये पक्षीन्द्रदेवतायै नमः॥प्रणवो बीजं स्वाहा शक्तिः॥ततोंगन्यासः॥ज्वल २ महामतिस्वा

३॥क्षिप ॐ स्वाहा॥

५।षट्कोणेति पुस्तकांतरे

४ छेरीतिपुस्तकांतरे॥४

हा अंगुष्ठे॥गरुडचूडामणेस्वाहा तर्जन्यां॥गरुडशिखाशिखेस्वाहा मध्यमायां॥गरुडप्रभंजन२प्रभेदन२विद्रावय२विमर्दय२स्वाहा अनामिकाभ्यां॥उग्ररूपधरसर्वविषहर भीषय२स्वाहा कनिष्ठाभ्यां॥सर्वंदह२भस्मीकुरु२स्वाहा करतलकरपृष्ठाभ्यां॥इत्येगकल्पना०॥करहृदयांगुष्ठादिकनिष्ठांगुलिषुमंत्रवर्णान्न्यसेत्॥पारकटिहृदयवक्त्रमूर्द्धसुमंत्रवर्णान्विन्यसेत्॥ततोध्यानम्॥वर्मांतेवह्नियुग्मासरकमलगतं पंचभूताद्यं वर्णं कृष्णाकल्पं फणीद्रैरभयवरकरंपद्मनेत्रंसुवक्त्रं॥दुष्टाहिहृ[४]षितुंडंस्मरदखिलविषप्रोषणंप्राणभूतं प्राणाग्रण्यंत्रिवेदीतनुममृतमयंपक्षिराजंभजेहं॥१॥एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंकृत्वा वैस्नवोक्तपीठमन्वंतंपीठंसंपूज्यपुनर्ध्यात्वावाह्येरेफहृदयहुंकारमध्यस्थसकारेकारबिंद्वात्मकबीजयुक्तकर्णिकं स्वरदं द्वाष्टकंकेशरेषु कचटतपयशलाष्टवर्गयुक्ताष्टदलेमातृकापद्मेपक्षिराजंपूजयेत्॥अंगैःप्रथमावरणं॥अनंतवासुकितक्षककर्कोटकपद्ममहापद्मशंखकुलिकाष्टनागैर्द्वितीयम्॥इन्द्रादिभिस्तृतीयं॥अस्यपुरश्चरणंपंचलक्षजपः॥अथवापुरश्चरणार्थंमूलमयुतंप्रत्येकाक्षरसंख्या सहस्रंमालामंत्रंजपेत्॰ घृताक्तैःकृष्णपुष्पैर्दशांशहोमः॥मालामंत्रस्तूच्यते॥ॐनमोभगवतेगरुडायकालाग्निवर्णायएह्येहिकालानललोलजिह्वायपातय२मोहय२विद्रावय२भ्रम२भ्रामय२हन२दह२पच२हुंफट्।स्वाहा॥क्षीराब्धिमध्येतत्रोत्पन्नंपूर्वोक्तमातृकाक्षरमयममृतात्मकंश्वेतपद्मंविचिंत्यतन्मध्येदष्टंविचिंत्यदष्टस्यमूर्द्धिवक्त्रहृदयनाभिषुरंहंठंवंइतिबीजचतुष्टयममृतस्रावित्वेनसंचिंत्यदष्टशिरसि[३]चतुर्वर्णसुधामयंगरुडंध्यात्वातद्धस्तस्थितामृतपूरितशंखनिर्गतामृतधारयादष्टंप्लावयंतंगरुडंध्यायन्मंत्रंजपेत्॥एवंध्यानमात्रेणदष्टोनिर्विषोभवेत्चिरंजीवेत्॥ॐनमोभगवतेगरुडायमहेंद्ररूपायपर्वतशिखराकाररूपायसंहर२मोचय२चालय२निर्विष२विषमप्यमृतेनाहारसदृशरूपमिदंप्रज्ञापयामिस्वाहानमः॥नल२वर२क्षिप२हर२

३ चंद्रकांतवर्णमितिपुस्तकांतरे॥३

ईसहस्रेवा·॥

स्वाहा॥ अनेन गरुडमंत्रेण मंत्री गरुडो भूत्वाभिमंत्रितं स्थावरविषं भक्षितमप्यमृतं भवति किमुतान्नपानादिकमिति॥ अथ गरुडस्तवः॥ सुपर्णं वैनतेयं च नागारिं नागभीषणं॥ जितांतकं विषारिं च अजितं विश्वरूपिणं॥ गरुत्मंतं खगश्रेष्ठं तार्क्ष्यं कश्यपनंदनं॥ द्वादशैतानि नामानि गरुडस्य महात्मनः॥ यः पठेत्प्रातरुत्थाय स्नाने वा शयनेपि वा॥ विषं नाक्रमते तस्य न च हिंसंति हिंसकाः॥ संग्रामे व्यवहारे च विजयस्तस्य जायते॥ बंधनान्मुक्तिमाप्नोति यात्रायां सिद्धिरेव च॥ ॥इति गरुडस्तवः॥ ॥अथ विषहरणाग्निमंत्रः॥ ॥स च विसर्गबिंदुयुक्तः खकारहृदयरूपः॥ अस्य पूजा प्रातःकृत्यादिकं कृत्वा ऋष्यादिन्यासं कुर्यात्॥ शिरसि अग्नये ऋषये नमः॥ मुखे पंक्तिश्छंदसे नमः॥ हृदि अग्नये देवतायै नमः॥ खकारो बीजं॥ बिंदुः शक्तिः दीर्घस्वरयुक्तेन खकारेण करांगन्यासौ कुर्यात्॥ ध्यानार्चने वैश्वानरमंत्रवत्॥ अस्य पुरश्चरणं द्वादशलक्षजपः॥ आज्येन दशांशहोमः॥ स्ववामहस्ततले पंचदलं श्वेतपद्मं ध्यात्वा कर्णिकाग्रे सविसर्गं खकारं तत्पंचदलेषु सानुस्वारं ध्यात्वा रक्तवर्णममृतमयं विचिंत्य तत्स्पर्शात् सर्वं विषं नाशयेत्॥ इत्थंभूते विषरोगस्थं स्पृष्ट्वा अष्टोत्तरशतं जपेत्॥ सर्वं वृश्चिकादिविषज्वराजीर्णविसर्पदद्र्वादिशूलनेत्ररोगादिसर्ववेदनां च नाशयेत्॥ इति विषहराग्निमंत्रः॥ अथ वृश्चिकादिविषहरमंत्रः॥ ॐ सर २ स्फुर २ ॐ हिलि २ मिलि २ विलि स्फुः २ ॐ हिलि २ मिलि २ चिलि २ स्फुः ब्रह्मणे स्फुः सर्वेभ्यो देवेभ्यः स्फुः॥ एते वृश्चिकविषहराः॥ ॐ गोवरठः॥ इति मूषिकविषहरमंत्रः॥ ॐ शरणे स्फुः अशरण विशरणे स्फुः एतन्मंत्रं जप्त्वा श्वेतसर्षपप्रक्षेपान्मूषिकविषनाशनं॥ ॐ ह्रीं श्रीं भूं जय २ स्वाहा गरुडाय हुं फट्॥ इति दुर्गामंत्रेण लूताविषहरः॥ ॐ नमो भगवते विष्णवे सर २ हन २ हुं फट् स्वाहा॥ इति विष्णुमंत्रेण सर्वकीटजातिविषहरमंत्रः॥ अथ हनुमत्कल्पः॥ देव्युवाच॥ शैवानि गाणपत्यानि शाक्तानि वैष्णवानि च॥ साधनानि च सौराणि चान्यानि यानि तानि च॥ श्रुतानि देवदेवेश त्वद्वक्त्रान्निःसृतानि च॥

२ हंहनूमते रुद्रात्मकाय हुंफट्॥२

२वियत्सकलेति पुस्तकांतरे२

किंचिदस्ति तु देवानां साधनं यद्विकथ्यतां॥ शंकर उवाच॰ शृणु देवि प्रवक्ष्यामि सावधानावधारय॥ हनूमत्साधनं पुण्यं महापातकनाशनं॥ ए
तद्गुह्यतमं लोके शीघ्रसिद्धिकरं नृणां॥ जयो यस्य प्रसादेन लोकत्रयजितो भवेत्॥ तत्साधनमहं वक्ष्ये नृणां सिद्धिकरं द्रुतं॥ वियत्स्तनादेकं ह
नूमते च तदनंतरं॥ रुद्रात्मकाय कवचं फडिति हि दशाक्षरं॥ एतन्मंत्रं समाख्यातं गोपनीयं प्रयत्नतः॥ तव स्नेहेन भक्त्या च दासोस्मि न वसुंध
रि॰ एतन्मंत्रमर्जुनाय प्रदत्तं हरिणा पुरा॥ जपेन साधनं कृत्वा जितं सर्वं चराचरं॥ नदीकूले विष्णुगेहे निर्जने पर्वते वने॥ एकाग्रचित्तमाधाय
साधयेत्साधनं महत्॥ महाशैलं समुत्पाट्य धावंतं रावणं प्रति॥ तिष्ठ२ रणे दुष्ट घोररावं समुच्चरन्॥ लाक्षारक्तारुणं नेत्रं कालांतकयमोपमं॥
ज्वलदग्निसमं नेत्रं सूर्यकोटिसमप्रभं॥ अंगदाद्यैर्महावीरैर्वेष्टितं रुद्ररूपिणं॥ एवं रूपं हनूमंतं ध्यात्वा यः प्रजपेन्मनुं॥ लक्षजपात्प्रसन्नः स्या
त्सत्यं ते कथितं मया॥ ध्यानेकमात्रतः पुंसां सिद्धिरेव न संशयः॥ प्रातः स्नात्वा नदीतीरे उपविश्य कुशासने॥ प्राणायामं षडंगं च मूलेन सकलं
चरेत्॰ पुष्पांजल्यष्टकं दत्वा ध्यात्वा रामं ससीतकं॥ ताम्रपात्रे ततः पद्ममष्टपत्रं सकेसरं॥ रक्तचंदनघृष्टेन लिखेत्तस्य शलाकया॥ कर्णिकायां
लिखेन्मंत्रं तत्रावाह्य कपिप्रभुं॥ कर्णिकायां हनूमंतं ध्यात्वा पाद्यादिभिस्ततः॥ गंधपुष्पादिकं चैव नैवेद्यं मूलमंत्रतः॥ सुग्रीवं लक्ष्मणं चै
व चाङ्गदं नलनीलकं॥ जाम्बवंतं च कुमुदं केशरिणं दले दले॥ पूर्वादिक्रमतो देवि पूजयेद्गंधचंदनैः॥ पवनं चांजनं चैव पूजयेद्दक्षवामतः
॥ दलाग्रेषु कपिभ्योपि पुष्पांजल्यष्टकं ततः॥ ध्यात्वा जपेन्मंत्रराजं लक्षं यावत्तु साधकः॥ लक्षांतदिवसं प्राप्य कुर्याच्च पूजनं महत्॥ एका
ग्रचित्तमनसा तस्मिन्पवननंदने॥ दिवारात्रौ जपं कुर्याद्यावत्संदर्शनं भवेत्॥ सुदृढं साधकं मत्वा निशीथे पवनात्मजः॥ सुप्रसन्नस्ततो
भूत्वा प्रयाति साधकाग्रतः॥ यथेप्सितं वरं दत्वा साधकाय कपिप्रभुः॥ वरं लब्ध्वा साधकेंद्रो विहरेदात्मनः सुखैः॥ एतद्धि साधनं पुण्यं दे

६ ताम्रशलाकयाइत्यर्थः॥

ह्रां २ ह्रं २अपृथेनिपुस्तकांतरे २

यानामपिदुर्लभं॥तवस्नेहान्मयाख्यातं भक्तास्मिमयिपार्वति ॥ इतिगारुडेतंत्रेहनुमत्साधनम्॥॥हनूमतो हिगुह्यंतु लिख्यतेवीरसाधनं
॥ब्राह्मेमुहूर्तेउत्थायकृतनित्यक्रियोद्विजः॥गत्वानदींततःस्नात्वातीर्थमावाह्यचांभसि॥मूलमंत्रंततोजप्त्वासिंचेद्वारिसंख्यया॥अ
थोवासःपरिधायगंगातीरेपर्वतेवाउपविश्य ह्रां अंगुष्ठाभ्यांनमः इत्यादि ह्रां हृदयायनमः इत्यादि करांगन्यासौकुर्य्यात्॥ततःप्राणायामो
यथा॥अकारादिवर्णानुच्चार्यवामनासापुटेवायुंपूरयेत्॥पंचवर्गानुच्चार्य्यकुंभयेत्॥यकारादिवर्गानुच्चारयन्वायुंरेचयेत्॥एवंवारत्रयंकृ
त्वामंत्रवर्णैरंगन्यासंकृत्वाध्यायेत्॥ध्यायेद्रणेहनूमंतंकल्पकोटिसमप्रभं॥धावंतंरावणंजेतुंदृष्ट्वासत्वरमुत्थितं॥लक्ष्मणंचमहावीरंपति
तंरणभूतले॥गुरुंचक्रोधमुत्पाद्यग्रहीत्वागुरुपर्वतं॥हाहाकारैःसदर्पैश्चकंपयंतंजगत्त्रयं॥आब्रह्मांडंसमाव्याप्यकृत्वाभीमंकलेवरं॥इति
ध्यात्वाषट्सहस्रंजपेत्॥अस्यमंत्रः॥स्वंबीजंपूर्वमुच्चार्यपवनंचततोवदेत्।नंदनंचततोदेयंङेवसानेनलप्रिया॥ईदृशोयंमनुःप्रोक्तो
नराणांसुरपादपः॥सप्तमदिवसेदिवारात्रिंव्याप्यजपेत् ततोमहाभयंदत्वात्रिभागशेषासुनिशासुनियतमागच्छति॥साधकोयदिभीतोन
भवतितदेप्सितंवरंप्राप्नोति॥विद्यांवापिधनंवापिराज्यंवाशत्रुनिग्रहं॥तत्क्षणादेवमाप्नोतिसत्यंसत्यंसुनिश्चितम्॥इतिहनूमत्कल्पः॥
अथार्द्रपटी॥प्रणवोहृदयंततोभगवतिचामुंडेरक्तवाससेऽप्रतिहतरूपपराक्रमेऽमुकवधायविचेतसेवह्निवल्लभा॥आर्द्रपटेनरक्तपटेनावृतः
समुद्रगामिनीनदीतीरेऊषरभूमौवादक्षिणामुखःऊर्ध्वबाहुर्जपेत्॥ यावत्पटःशुष्यतितावत्प्राणाःशुष्यंतिशत्रोः॥अथश्मशानभैरवी॥श्म
शानभैरविनररुधिरांत्रवसाभक्षिणिसिद्धिंमेदेहि मममनोरथान् पूरयहूं फट्स्वाहा॥अथज्वालामालिनीमंत्रः॥ॐ नमोभगवतिज्वालामालिनि
॥

ई॥ हंपवननंदनायस्वाहा॥ ॥

फ्रोंमिति प्रत्यंतरे॥१ ई तिंवः

गृध्रगणपरिवृते स्वाहा ॥ अथ महाकाली॥ ॐ फें २ क्रों २ पशुं गृहाण हुं फट् स्वाहा॥ श्मशानभैरवीमंत्रेणायावत्क्रूरकर्माणि साधयेत्॥ अथ महाकालीमंत्रप्रयोगः॥ तत्र ऋष्यादिन्यासादिकं न कर्तव्यं॥ तथा च॥ न्यासशुद्ध्यादिकं किंचिन्नात्र कार्यो विचारणा॥ कृष्णतोयैश्च संपूर्णे कृष्णकुंभेऽथ कालिकां॥ पंचवक्त्रां महारौद्रीं प्रतिवक्त्रं त्रिलोचनां॥ शक्तिशूलधनुर्बाणखड्गखेटवराभयान्॥ दक्षादक्षभुजैर्देवीं बिभ्राणां परिभूषणां॥ ध्यात्वैवं साधकः साध्यं साधयेन्मनसि स्थितं॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ वाराही च तथैवेंद्री चामुंडा चण्डिकाऽष्टमी॥ पूर्वादीशानपर्यंतं कुंभस्थाने स्थिता इमाः॥ तत्रक्रमः॥ देवीं ध्यात्वा यथाविध्युपचारेण संपूज्य ब्राह्म्याद्यष्टशक्तीः पूर्वादिक्रमेण पूजयेत्॥ तथा॥ नामोच्चारेण संख्यां वह्नौ प्रज्वलितेंबरे॥ जुहुयाद्वैरिसंमुद्धौ देवीमंत्रं जपेत्तथा॥ समिधः पिचुमंदस्य तथा विभीतकाष्ठिकाः॥ गृहधूमश्मशानांतर्विभीतांगारहोमतः॥ सप्तांहाद्वैरिणं हंति कालिकामंत्रयोगतः॥ उच्चाटनं वा पराह्णे संध्यायां मारणं तथा॥ दक्षिणस्यां दिशि स्थित्वा नमादेद्दक्षिणामुखः॥ इति महाकालीमंत्रप्रयोगः॥ ॥ अथ ज्वालामालिनीमंत्रप्रयोगः॥ तत्रांगन्यासः॥ ॐ नमो हृदयं प्रोक्तं भगवतीति शिरः स्मृतं॥ ज्वालामालिनी च शिखा गृध्रगणपरिवृते नेत्रतः॥ वर्म स्वाहा स्त्वमित्युक्तं जातियुक्तं न्यसेत्ततो॥ प्रयोगस्तु॥ ॐ नमो हृदयायेत्यादि॥ अमुका निपतंत्येव जपेन्मंत्रं जपाजयी॥ जपेदष्टसहस्रं तु त्रयोविंशतिवासरान्॥ प्रत्यहं सासुवर्णं च ददातीति न संशयः॥ स्मृतिमात्रेण वै मंत्री रिपून्सर्वान्विनाशयेत्॥ फेत्कारीये॥ ओं ठं ठां ठिं ठीं ठुं ठूं ठें ठैं ठों ठौं ठं ठः अमुकं हूं २ ठः ठः॥ इति मंत्रेण शृगालास्थिमयं कीलकं पंचांगुलं सहस्रेणाभिमंत्रितं यस्य गेहे श्मशाने वा निखनेत्स उन्मत्तो भवति॥ ॐ डं डां डिं डीं डुं डूं डें डैं डों डौं डं डः अमुकं गृह्ण हूं ठः ठः अनेन मंत्रेण मनुष्यास्थिमयं कीलकं वितस्तिप्रमाणं सहस्रेणाभिमंत्रितं यस्य गेहे श्मशाने वा निखनेत्स समूलपरिवारो नश्यति उद्धनेख

३॥ गृह्ण गृह्णेति प्रत्यंतरे॥

३षडंगुलमिति पुस्तकद्वयान्तरे ॥३

लुशांतिः॥ यथा॥ ॐ सः सं सं हः अमुकस्य शांतिर्भवतु स्वाहा॥ अनेन मंत्रेण घृतमधुसिक्तं क्षीरं हुनेत्तेन शांतिर्भवति॥ ओं ढं ढां ढिं ढीं ढुं ढूं ढें ढैं ढों ढौं ढं ढः अमुकं मारय २ ठः ठः अनेन मंत्रेण गार्दभास्थिमयं कीलकं त्रयोदशांगुलं सहस्रेणाभिमंत्रितं यस्य नाम्ना चितामध्ये निखनेत्स च ज्वरेण नश्यति॥ ओं णं णां णिं णीं णुं णूं णें णैं णों णौं णं णः अनेन मंत्रेण खदिरकाष्ठमयं कीलकं त्रयोदशांगुलं सहस्रेणाभिमंत्रितं यस्य नाम्ना गृहे श्मशाने वा निखनेत्तस्य सर्वं नाशयति॥ इति आई पटी संपूर्णम्॥ अथ निगडबंधमोक्षणम्॥ ॐ नमः ऋते निर्ऋते तिग्मतेजो यस्मयं विचृता बंधनमेनं॥ यमेन दत्तं तस्मासं विदानोनमेनाके अधोरोह वेरं॥ अस्य निगडबंधनमंत्रस्य प्रजापतिर्ऋषिर्निर्ऋतिर्देवता त्रिष्टुप्छंदो बंधादिव्यसनपरिहारे विनियोगः॥ एवं ऋष्यादिकं विन्यस्य अयुतं प्रजपेत्सुधीः॥ ततो बंधाद्व्यसनाच्च मुक्तो भवति नान्यथा॥ तारं चिटि द्वयं पश्चाच्चंडालिनि ततः परं॥ महदाद्वयं ततो ब्रूयादमुकं मे ततः परम्॥ वशमानय ठ हुं हुं चिटि मंत्र उदाहृतः॥ सप्तभिर्दिवसैभूपान्वशयेद्विधिनामुना॥ विधिमहः॥ विलिख्य तालपत्रे तं साध्यनाम्ना विदर्भितं॥ निक्षिप्य क्षीरसंमिश्रे जले तत् क्वाथयेन्निशि॥ वश्यो भवति साध्यश्च नात्र कार्या विचारणा॥ तालपत्रे लिखेदेतद्भद्रकालीगृहे खनेत्॥ वश्याय सर्वजंतूनां प्रयोगोयमुदाहृतः॥ अथ त्र्यंबकमंत्रः॥ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्स्वाहा॥ १॥ वसिष्ठो मुनिराख्यातश्छंदोनुष्टुबुदाहृतं॥ देवतास्य समुद्दिष्टा त्र्यंबकः पार्वतीप्रियः॥ विभक्तैर्मंत्रवर्णैः स्यात्षडंगानां च कल्पनम्॥ तत्र प्रयोगः॥ भूतशुद्ध्यादि प्राणायामांतं कर्म समाप्य ऋष्यादिन्यासं कुर्यात्॥ शिरसि वसिष्ठऋषये नमः॥ मुखेनुष्टुप्छंदसे नमः॥ हृदि त्र्यंबकाय देवतायै नमः॥ अमुकस्याऽमुकशांतये विनियोगः॥ अथ करांगन्यासः॥ यथा॥ त्र्यंबकं अंगुष्ठाभ्यां नमः॥ यजामहे तर्जनीभ्यां स्वाहा॥ सुगंधिं पुष्टिवर्द्धनं मध्यमाभ्यां वषट्॥ उर्वारुकमिव बंधनात् अनामिकाभ्यां हुं

१०॥ ॐ नमः सुते निर्ऋते तिग्मतेजोयस्मयं विचृता बंधमेतं॥ यमेन दत्तं यम्यासं विद्नोत्तमेनाके अधिरोहयेनमिति प्राचीनतरपुस्तके पाठः॥१०

क्ष्मा त्वरे दि नि पुस्तकांतरे॥४ ।४॥ हस्तांभोजयुगस्थकुंभयुगलादुद्धृत्य तोयं शिरःसिंचंतं करयोर्युगेन दधतं स्वांके सकुंभौ करौ॥ अक्षस्रक्मृगहस्तमंबुजगतं मूर्धस्थचंद्रस्रवत्पीयूषोन्नततनुं भजे सगिरिजं मृत्युंजयं त्र्यंबकं

॥ मृत्योर्मुक्षीय कनिष्ठाभ्यां वौषट्॥ मामृतात् करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ ततः॥ पूर्वपाश्चात्ययाम्येंदुवक्त्रेषु तदनंतरं॥ उरोगलास्ये
षु पुनर्नाभिहृत्पृष्ठकुक्षिषु॥ लिंगपायूरुमूलांतर्जानुजंघे ततः परं॥ उहृत्युग्मे स्तनयोः पार्श्वयोः पादयोः पुनः॥ पाण्योर्नासिकयोः शीर्षे मंत्र
वर्णान्न्यसेत्क्रमात्॥ ततः पदान्येकादश विन्यसेत्॥ शिरोभ्रूयुगलाऽक्षिषु॥ वक्त्रे गंडद्वये भूयो हृदये जठरे पुनः॥ गुह्योरुजानुपादेषु न्यास
मेवं समापयेत्॥ ततो ध्यानं॥ हस्ताभ्यां कलशद्वयामृतरसैराप्लावयंतं शिरो द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहंतं परं॥ अंकन्यस्तकरद्व
यामृतघटं कैलासकांतं शिवं स्वच्छांभोजगतं नवेंदुमुकुटं देवं त्रिनेत्रं भजे॥१॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ तथा शैवो
क्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ ततोग्न्यादिकोणेकेशरेषु त्र्यंबकं हृद
याय नमः इत्यादि षडंगैः संपूज्य अष्टपत्रेषु अर्काय नमः एवं इंदवे वसुधायै जलाय वह्नये वायवे वियते यजमानाय॥ तद्बाह्ये पूर्वादि॥ रमा
राकाप्रभाज्योत्स्नापूर्णापूषापूरणीसुधा॥ वाक्यं तु रमायै नमः इत्यादि॥ तद्बाह्ये॥ विश्वा विद्या सिता प्रह्वा सारा संध्या शिवा निशा॥ वाक्यं तु ॐ
विश्वायै नमः इत्यादि॥ तद्बाह्ये॥ ओंआर्यायै नमः एवं प्रज्ञायै प्रभायै मेधायै कान्त्यै शान्त्यै पुष्ट्यै धृत्यै मत्यै॥ तद्बाह्ये॥ प्रभायै उमायै पार्वत्यै
पद्मायै शांतायै अमोघायै जयायै कमलायै॥ ततो धूपादिविसर्जनांतं कर्म समापयेत्॥ एकलक्षं पुरश्चरणं दशांशहोमादिरिति॥ प्रयोगस्तु॥ श
निदिवसेऽन्यदिवसे वाऽश्वत्थमूलं स्पृष्ट्वा सहस्रं जपेत्॥ तथा च॥ शनिवारदिनेऽश्वत्थमूलं स्पृष्ट्वा जपेत्सुधीः॥ सोक्षान्मृत्योर्विमुच्येत कि
मन्यत् सुदृक्काः क्रियाः॥ तथा च॥ स्नात्वा सहस्रं प्रजपेदादित्याभिमुखो मनुं॥ व्याधिव्याधिविनिर्मुक्तो दीर्घमायुरवाप्नुयात्॥ अं मृतायो श्वस
मिधोज्जुहुयादयुतावधि॥ धनधान्यसमृद्धिः स्यादचिरेणैव सिध्यति॥ अथ मृतसंजीविनी॥ आदौ प्रासादबीजं तदनु मृतिहरं तारकं व्याहृतिश्च प्रोच्य
र्त्र्यंबकं यो जपति च सततं संपुटं चानुलोमं॥ मृतिहरंत्र्यबकमृत्युंजयमंत्र॥ अस्य जपात्सर्वसिद्धिर्भवति॥ अथ शुक्रोपासिता मृतसंजी ६ ॥ ८ ॥

३ वरदहस्त्येति पुस्तकांतरे॥
१॥ शक्रेतिवा॥

॥६॥ ॐ क्लीँ ह्रीँ त्रिपुरादेवि अमुकी आकर्षय२ स्वाहा॥

६॥ दृहमिति पुस्तकांतरे॥

विनी॥ यथा॥ गायत्री प्रथमं पादं त्र्यंबकपादैकं ततः॥ गायत्री द्वितयं पादं त्र्यंबक द्वितीय पादं॥ गायत्री त्रितय पादं त्र्यंबक शेष पादं॥ मंत्रो यथा॰ ॐ तत्सवितुर्वरेण्यं त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं भर्गो देवस्य धीमहि उर्वारुकमिव बंधनात् धियो यो नः प्रचोदयात् मृत्योर्मुक्षीय मामृतात्॥ ध्यानम्॥ स्वच्छं स्वच्छारविंदस्थितमुभयकरे संस्थितौ पूर्णकुंभौ द्वाभ्यामेणाक्षमाले निजकरकमले द्वौ घटौ नित्यपूर्णौ॥ द्वाभ्यां तौ च स्रवंतौ शिरसि शशिकलाचामृतैः प्लावयेद्यो देहं देवो दधानो वितरतु विशदाकल्पजालः श्रियं वः॥ एवं ध्यात्वा त्र्यंबकाय महारुद्राय नमः इत्यनेन पूजयेत्॥ अस्य जपात् सर्वशांतिर्भवति॥ इति त्र्यंबकमंत्रः॥ ॥अथाकर्षणविधानानि कथयामि समासतः॥ यदुक्तं त्रिपुरे तंत्रे यदुक्तं भूतडामरे॥ श्रीबीजं मान्मथं बीजं लज्जाबीजं समुद्धरेत्॥ प्रथमं प्रणवं दत्वा त्रिपुरादेवि पदं ततः॥ अमुकीति पदं दत्वा आकर्षय द्विधा पदं॥ स्वाहांत मंत्रमुच्चार्य प्रजपेद्दशसहस्रकं॥ षट्कोणं च समालिख्य रक्तचंदनकर्दमैः॥ षडंगं कारयेन्मंत्री लज्जाबीजसमन्वितं॥ षड्दीर्घभाक्स्वरेणैव नादबिंदुविभूषितैः॥ रक्तपुष्पासनधूपादिनैवेद्यैः परिपूज्य तां॥ भावयन् चेतसा देवीं त्रिनेत्रां चंद्रशेखरां॥ बालार्ककिरणप्रख्यां सिंदूरारुणविग्रहां॥ पद्मं च दक्षिणे पाणौ जपमालां च वामके॥ मंत्रस्यास्य प्रभावेण रंभामपि तथोर्वशीं॥ आकर्षयेन्न संदेहः किं पुनर्मानुषीमिह॥ भूर्जपत्रे समालिख्य कुंकुमालक्तवारिणा॥ काश्मीरारुणकस्तूरीरोचनामिलितेन च॥ अनामारक्तमिश्रेण कामलास्मि मनुं जपेत्॥ ओं श्रीकामलास्मि अमुकीमाकर्षय२ ओं फट्॥ इमं मंत्रं जपेद्दादोसहस्रैकं ततः पुनः॥ तद्भूर्जपत्रमादाय गुलिकां कारयेत्ततः॥ तेनैव साध्यपादोत्थमृत्तिकापंकवेष्टितं॥ शोषितं तेजसा भानोर्वेष्ट्ये त्रिकट्टकैः पुनः॥ प्रतिमां स्त्रीनिभां कृत्वा तस्याः क्षिपेत्तथोदरे॥ गुलिकां पातयेत्पात्रे प्रतिमां साध्यरूपिणीं॥ तादृगाशासुखो भूत्वा निर्जने निशि साधकः॥ यावद्गच्छति चित्तं च तावद्रूपं मनुं जपेत्॥ यावदायाति संत्रस्ता मदना

७॥ ॐ श्रीं क्लीं ह्रीं त्रिपुरामुकीमाकर्षयाकर्षय स्वाहा मंत्रः ७॥

७॥सुरसुरइतिपुस्तकांतरे॥
४॥तयोरितिप्रत्यंतरे॥

लसमानसाः॥ ॥इतिआकर्षणं ॥अथचामुंडामंत्रः॥ नारंचामुंडे जयचामुंडे मोहयवशमानयामुकं स्वाहा॥ ध्यानं॥ दंष्ट्राकोटिविशंकटासुव
क्त्रासात्राहकारेस्थिता खड्गांगासिनि गूढदक्षिणकरावामेनपाशंशिरः॥ श्यामापिंगलमूर्द्धजाभयकरी शार्दूलचर्मावृता चामुंडा शववाहिनी जपवि
धौध्येयः सदासाधकैः॥ लक्षंजप्त्वा दशांशं किंशुककुसुमैर्वह्निमध्ये च देवी चामुंडा साधकानां भवति च फलदा मासमात्रे सुशीघ्रं॥ अथविद्वेषः॥
अन्योन्यसमसंरंभाद्वेषितौ समरे तु तौ॥ तदीयनखरोद्भूतधूलिमादायसाधकः॥ धूलिनानेन विद्वेषस्ताडनाद्भिजायते॥ परस्परं रिपोर्वैरंमि
त्रेणसह निश्चितं॥ महिषाश्वपुरीषाभ्यां गोमूत्रेण समालिखेत्॥ यस्यनाम भवेत्तस्य विद्वेषश्च परस्परम्॥ रक्तेन महिषाश्वेन श्मशानवस्त्रके लि
खेत्॥ यस्यनामभवेत्तस्य विद्वेषं च परस्परं॥ षट्कोण चक्रमध्ये तु रिपोर्नामसमन्वितं॥ मंत्रेणसंप्रवक्ष्यामि महाभैरवसंज्ञकं ॥ ओंनमो महाभैरवा
यश्मशानवासिनेऽमुकामुकयोर्विद्वेषं कुरु २ हुं फट् स्वाहा॥ एतन्मंत्रं लिखेत्तत्र विद्वेषो जायते ध्रुवं॥ अन्यं योगमहं वक्ष्ये दुर्लभं वसुधातले ॥
॥येन ज्ञातेन शत्रूणां विद्वेषो जायते ध्रुवं॥ ॐ नमो भगवति श्मशानकालिकेऽमुकं विद्वेषय हन २ पच २ मथ २ हूं हूं फट् स्वाहा॥ अमुना मंत्रराजे
नहोमयेत्प्रयतः सुधीः॥ वह्निकुंडे निंबपत्रैः कटुतैलान्वितेन च॥ प्रज्वाल्य खदिरं वह्निं श्मशानजे ततः पुनः॥ दशसाहस्रसंयुक्तं तिलयवाक्ष
तान्वितं॥ भावयन्कालिकां देवीमिंद्रनीलमणिप्रभां॥ व्योमनीलां महाचंडां सुरासुरविमर्द्दिनीं॥ त्रिलोचनां रक्तनेत्रां सर्वाभरणभूषितां॥ कपा
लकर्तृकाहस्तां चंद्रसूर्योपरिस्थितां॥ शिवैजालगतां चैव प्रेतभैरववेष्टितां॥ वसंतीं पितृकोनारे सर्वसिद्धिप्रदायिकां॥ होमयेद्विविधैः पुष्पैर्व
लिच्छागोपहारकैः॥ पूजयित्वा महेशानीं भक्तियुक्तेन चेतसा॥ तद्भस्म च समादाय धारयेदभिमंत्रितं॥ भस्मनानेन यान्हन्याद्विद्वेषं न द्रवेन्नृ
णां॥ वह्निश्च शीततां याति पतेद्भूमौ यदारविः॥ यदा शुष्यंति पाथोधिश्चंद्रमापतते यदि॥ तदा मिथ्याभवेद्वियोगैराजःसुदुर्लभः॥ षङ्गोणच

२ शरेतिपुस्तकांतरे॥

१मंत्रेतिपुस्तकांतरे॥१
४॥महारावमितिपुस्तकांतरे॥ ४

३॥पट्टेति पुस्तकांतरे॥३ ४॥हुनेति युक्तः पाठ इति प्रतिभाति॥

तं·सा· करञ्जं तु शत्रूणां नामटंकितं॥ पूर्वद्रव्येण विद्वेषं कारयेद्यसाधकः॥ नामयुक्तमंत्रमाह॥ ओंह्रां विद्वेषिणि अमुकाऽमुकयोः परस्परं विद्वेषं कुरु
१५८ स्वाहा॥ चक्रवास्त्रे लिखेन्मंत्रमिमं पूर्वोक्तवस्तुभिः॥ परस्परं भवेद्द्वेषो योगोयं कुब्जिकामते॥ अथोच्चाटनं॥ उच्चाटनविधिं वक्ष्ये पथ्योक्तं श्रीमनाव
वै॥ निंबपत्रे लिखेन्नाम महिषाश्वपुरीषकैः॥ काकपक्षस्य लेखिन्या लेखनीयमनंतरं॥ लेख्यमंत्रमाह॥ ॐ नमः काकतुंडि धवलामुखि अमु
कमुच्चाटय २ हुं फट्॥ एतन्मंत्रं समभ्यर्च्य लिखित्वा पूर्ववस्तुभिः॥ निंबवृक्षस्थितं सर्वकाकालयं हरेदथ॥ श्मशानेऽग्निमानीय धत्तूरकाष्ठदी
पितम्॥ वह्निं कृत्वा महातैलैरथ वा कटुवस्तुभिः॥ पूर्वोक्तमनुना तस्य पत्रं राजीकटुप्लुतं॥ संपूज्य धवलामुखीं पंचोपचारपूजया॥ तद्भस्मप्रक्षि
पेच्छत्रोर्मंदिरोपरि मंत्रवित्॥ ध्यानयुक्तेन मनसा शत्रोरुच्चाटनं भवेत्॥ धूम्रवर्णां महादेवीं त्रिनेत्रां शशिशेखरां॥ जटाजूटसमायुक्तां व्याघ्रच
र्मपरिच्छदां॥ कृशांगीमस्थिमालां च कर्तृकाढ्यकरांबुजां॥ कोटराक्षीं सुदंष्ट्रां च पातालसन्निभोदरां॥ एवंविधां धियाभाव्य कार्यमुच्चा
टनं रिपोः॥ एषयोगविधिः प्रोक्तो वीरतंत्रे महेश्वरि॥ गोपनीयं प्रयत्नेन न प्रकाश्यं कदाचन॥ इत्युच्चाटनम्॥ तथा॥ सौरारयोर्दिने ग्राह्यं नरास्थि
चतुरंगुलं॥ निशारसेन संलिख्य प्रधानभवने क्षिपेत्॥ सप्ताहाभ्यंतरे शत्रोरुच्चाटनकरं भवेत्॥ मंत्रस्तु॥ हूं अमुकस्योच्चाटनं कुरु २ स्वाहा हुं अमु
कं हन २ स्वाहा॥ अथारिनिग्रहः॥ रिपोर्मलं वृश्चिकं च खनित्वा तु विनिक्षिपेत्॥ म्रियते मलरोधेन उद्धृते च सुखावहं॥ मंत्रस्तु॥ स्तंभिनि अमुकस्य
मलं स्तंभय २ हुं फट्॥ अथाभिचारः॥ ॐ विरुद्धे रूपिणि चंडिके वैरिणममुकं देहि २ स्वाहा॥ इति खड्गमभिमंत्र्य खड्गमंत्रांश्च पठित्वा खड्गं संपू
ज्य छागादिकममुकोसीति वैरिनाम्नाभिमंत्र्य रक्तसूत्रेण त्रिधा मुखं बद्ध्वा वैरिनाम्ना प्राणप्रतिष्ठां कृत्वा॥ ओं अयं स वैरी यो द्वेष्टि तमिमं पशुरूपि रा·म
णं॥ विनाशय महादेवि रिं स्फें स्फें खादय २ इति पठित्वा॥ बलिशिरसि पुष्पं दत्वा बलिमंत्रान्पठित्वा बलिं संपूज्य ॐ अद्येत्यादि आश्विने मासि १५८

॥५॥ निशावसानेति प्रत्यंतरे॥

४॥अर्क'सेभर'कपास'रेशम पंकजतंतु॥४
३।क्ष्वैंद्ररसमयद्भिति पुस्तकांतरे॥

शुक्लपक्षे महानवम्यांतिथौ अमुकशत्रुंनाशय२ इमंछागंमहिषंवा अमुकदैवतं अमुकगोत्रोऽमुकदेवशर्माभगवत्यैदुर्गायैसंप्रददेइतिउत्सृज्य अहुंफट् इति छित्त्वामूलमंत्रंपठित्वा३तद्रुधिरंदुर्गायैनमः इतिरक्तंशिरश्च दत्त्वा अष्टांगमांसैर्होमंमूलमंत्रेणकुर्यादिति॥ अथसुखप्रसवमंत्रः॥ ओंमन्मथमन्मथवाहि२लंबोदर२मुंच२स्वाहा॥ ओंमुक्ताःपाशाविपाशाश्चमुक्ताःसूर्येणरश्मयः॥ मुक्तःसर्वभयाद्गर्भएह्येहिमारीच२स्वाहा॥ एतदन्यतरेणाष्टवारंजलमभिमंत्र्यदेयं ततःसुखप्रसवोभवति॥ अथदर्शनप्रयोगः॥ अर्कशाल्मलिकार्पासपट्टपंकजतंतुभिः॥ पंचभिर्वर्तिकाभिस्तन्नृकपालेषुपंचसु॥ नरतैलेनदीपाःस्युःकज्जलंनृकपालकैः॥ ग्राहयेत्तंचभिर्यत्नात्पूर्ववच्चशिवालये॥ पंचस्थानीयजातंतुएकीकुर्याच्चतंपुनः॥ मंत्रयित्वांजयेन्नेत्रेदेवैरपिनदृश्यते॥ मंत्रस्तु॥ ॐहूंफट्कालि२महाकालिमांसशोणितंखादय खादयदेविमांपश्यंतुमानुषेतिहूंफट्स्वाहा॥ इतिमंत्रेणाष्टोत्तरसहस्रजपेनमंत्रयेत्॥ अथमूलमंत्रेणाष्टोत्तरसहस्राभिमंत्रितंकृत्वातत्कज्जलंनेत्रेदत्त्वात्रैलोक्यादृश्योभवति॥ अथयोगिनीसाधनं॥ तदुक्तंभूतडामरे॥ उन्मत्तभैरवउवाच॰ अथातःसंप्रवक्ष्यामियोगिनीसाधनोत्तमं॥ सर्वार्थसाधनंनामदेहिनांसर्वसिद्धिदं॥ अतिगुह्यामहाविद्यादेवानामपिदुर्लभा॥ यासामभ्यर्च्चनंकृत्वायक्षेशोऽभूद्धनाधिपः॥ तासांमध्येप्रवक्ष्यामिसुरापांसुंदरीप्रिये॥ अस्याअभ्यर्च्चनेनैवराजलंलभ्यतेनरः॥ अथप्रातःसमुत्थायकृत्वास्नानादिकंशुभं॥ प्रासादंचसमासाद्यकुर्यादाचमनंततः॥ प्रणवाद्येसहस्रारेहुंफट्दिग्बंधनंचरेत्॥ प्राणायामंततःकुर्यान्मूलमंत्रेणतंत्रवित्॥ षडंगमाययाकुर्यान्मध्यमष्टदलंलिखेत्॥ तस्मिन्मध्येतथामंत्रीजीवन्यासंसमाचरेत्॥ पीठेदेवींसमभ्यर्च्यध्यायेद्देवींजगत्प्रियां॥ पूर्णचंद्राननांगौरींविचित्रांबरधारिणीं॥ पीनोन्नतकुचांरामांसर्वज्ञामभयप्रदां॥ इतिध्यात्वाचमूलेनदद्यात्पाद्यादिकंशुभं॥ पुनर्धूपंनिवेद्यैवंनैवेद्यंमूलमंत्रतः॥ गंधचंदनतांबूलंकर्पूररससशोभितं॥ प्रणवांतेतुभुवनेशी

अंतेति प्रत्यंतरे॥४

२॥मंत्रमितिप्रत्यंतरे॥ मासांतंप्राप्यदिवसमितिप्रत्यंतरे १ ४॥वस्त्रमितिवा॥

आगच्छसुरसुंदरि ।। वह्नेर्भार्यांजपेन्मंत्रंत्रिसंध्यंचदिनेदिने ।। सहस्रैकप्रमाणेनध्यायेद्देवींसदाबुधः ।। मासांतेदिवसेप्राप्यबलिपूजांसुशोभनां ।। कृ
त्वाचप्रजपेन्मंत्रंनिशीथेयातिसुंदरि ।। सुदृढंसाधकंमत्वायातिसासाधकालये ।। सुप्रसन्नासाधकाग्रेसदास्मेरमुखींततः ।। दृष्ट्वादेवींसाध
केंद्रोदद्यात्पाद्यादिकंशुभं ।। सुचंदनंसुमनसोदत्वाभिलषितंवदेत् ।। मातरंभगिनींवापिभार्यांवाभक्तिभावतः ।। यदिमातातदावित्तंद्रव्यंचसु
मनोहरम् ।। भूपतित्वंप्रार्थितंयत्तद्ददातिदिनेदिने ।। पुत्रवत्पालितंलोकेसत्यंसत्यंसुनिश्चितं ।। स्वसाददातिवित्तंचदिव्यंवस्त्रंतथैवच ।। दिव्यकन्यां
समानीयनागकन्यांदिनेदिने ।। यद्यद्भवतिभूतंचभविष्यतीतियत्पुनः तत्सर्वंसाधकेंद्रायनिवेदयतिनिश्चितं ।। यद्यत्प्रार्थयतेसर्वंददातिसादिनेदिने ।।
भ्रातृवत्पालितंलोकेकामनाभिर्मनोगतैः ।। भार्यास्याद्यदिसादेवीसाधकस्यमनोहरा ।। राजेंद्रंसर्वराजानांसंसारेसाधकोत्तमः ।। स्वर्गेमर्त्ये
चपातालेगतिर्भवतिनान्यथा ।। यद्यद्ददातिसादेवीकथितुंनैवशक्यते ।। तयासार्द्धंचसंभोगंयदिदैवात्करोतिसः ।। अन्यस्त्रीगमनंत्यक्त्वा
चान्यथानश्यतिध्रुवम् ।। ततोन्यत्साधनंवक्ष्येनिर्मितंब्रह्मणापुरा ।। नदीतीरंसमासाद्यकुर्यात्स्नानादिकंततः ।। पूर्ववत्सकलंकार्यंचंदनेनमं
डलंलिखेत् ।। स्वमंत्रंतत्रसंलिख्यावाह्यध्यायेन्मनोहरां ।। कुरंगनेत्रांशरदिंदुवक्त्रांविद्याधरींचंदनगंधलिप्तां ।। चेलांशुकांपीनकुचां
मनोज्ञांश्यामांसदाकामदुघांविचित्रां ।। १ ।। एवंध्यात्वायजेद्देवीमगुरुधूपदीपकैः ।। गंधपुष्परसंचैवतांबूलादींश्चमूलतः ।। तारंमाया
तथागच्छमनोहरेपावकवल्लभा ।। कृत्वायुतंप्रतिदिनंजपेन्मंत्रंप्रसन्नधीः ।। मासांतदिवसंप्राप्यकुर्याच्चजपमुत्तमं ।। आनिशीथंजपे
न्मंत्रंज्ञात्वाचसाधकंदृढं ।। गत्वाचसाधकाभ्यासेसुप्रसन्नामनोहरा ।। वरंवरयशीघ्रंत्वंयत्तेमनसिवर्त्तते ।। साधकेंद्रोपितांभक्त्यापाद्या
द्यैरुपचारकैः ।। धूपंदीपंचनैवेद्यंयोगिन्यार्च्चयेन्मुदा ।। चंदनोदकपुष्पेणफलेनचमनोहरं ।। ततोऽर्च्चितांप्रसन्नास्यांसुस्मा

३गच्छेतिपुस्तकांतरे॥३ करोतिसाधकोत्तमइतिप्रत्यंतरे॥७ ४॥ॐ ह्रींआगच्छमनोहरेस्वाहा॥४
१॥अर्चयेन्मुदाइतिप्रत्यंतरे॥

६ कूवेरस्येतिपुस्तकांतरे

१ शतमितिपुस्तकांतरे॥ २ पूजयेदितिपुस्तकांतरे॥ ४ उक्तस्येतिपुस्तकांतरे॥

तिप्रार्थितं च यत्॥ स्वर्णभारं साधकाय सा ददाति दिने दिने॥ सावशेषं व्ययं कुर्यान्नित्यं नेन तु न दास्यति॥ अन्यस्त्रीगमनं कृत्वा महापातकि
नो भवेत्॥ सत्यं सत्यं पुनः सत्यं तवाग्रे सत्यमीरितं॥ अव्याहतगतिस्तस्य भवतीति न संशयः॥ इति ते कथिता विद्या सुगोप्या या सुरासुरैः
॥ न वस्नेहेन भक्त्या च वक्ष्येहं परमेश्वरि॥ ततो वक्ष्ये महाविद्यां शृणुष्वैकमना प्रिये॥ गत्वा वटतटं देवीं पूजयेत्साधकोत्तमः॥ प्राणायामं
षडंगं च मायया ऽथ समाचरेत्॥ सद्यो मांसं बलिं दत्त्वा पूजयेत्तां समाहितः॥ अर्घ्यं सुच्छिद्रपूरकेन दद्यात्तस्यै दिने दिने॥ अथ ध्यानम्॥ प्र
चंडवदनां गौरीं पक्वबिंबाधरां प्रियां॥ रक्तांबरधरां रामां सर्वकामफलप्रदां॥ एवं ध्यात्वा जपेन्मंत्रमयुतं साधकोत्तमः॥ सप्त दिनं सम
भ्यर्च्य चाष्टमे विधिवच्चरेत्॥ कायेन मनसा वाचा प्रजपेच्च दिने दिने॥ तारं माया तथाद्यं चे रक्तैवर्माणि तद्बहिः॥ आगच्छ कनकांते चरति
स्वाहा महामनुः॥ आनिशीथं जपेन्मंत्रं बलिं दत्त्वा मनोहरं॥ साधकेंद्रं दृढं ज्ञात्वा याति सा साधकालये॥ साधकोपि च तां दृष्ट्वा दद्यादर्घ्या
दिकं ततः॥ ततस्सपरिवारेण भार्या स्यात्कामभोजनैः॥ वस्त्रभूषादिकं त्यक्त्वा याति सा निजमंदिरं॥ एवं भार्या भवेन्नित्यं साधकाज्ञानुरूप
तः॥ आत्मभार्यां परित्यज्य भवेत्तां च विचक्षणः॥ ततः कामेश्वरीं वक्ष्ये सर्वकामफलप्रदां॥ प्रणवं भुवनेशानीं चागच्छ कामेश्वरि ततः॥ ॥
वन्हे भार्यां महामंत्रं साधकानां सुखावहं॥ पूर्ववत्सकलं कृत्वा भूर्जपत्रे सुशोभने॥ गोरोचनाभिः प्रतिमां विनिर्माय स्वलंकृतां॥ शय्यामारु
ह्य च जपेन्मंत्रमेकमना मयं॥ सहस्रैकप्रमाणेन मासमेकं जपेन्मनुं॥ घृतेन मधुना दीपं दद्याच्च सुसमाहितः॥ कामेश्वरीं शशांकास्यां
खेलत्खंजनलोचनां॥ सदा लोलगतिं कांतां कुसुमास्त्रशिलीमुखां॥ एवं ध्यात्वा जपेन्मंत्रं निशीथे याति सा तदा॥ गत्वा च साधकाभ्या
से आज्ञां देहीति भाषिते॥ स्त्रीभावेन मुदा तस्यै दद्यात्पाद्यादिकं ततः॥ सुभसन्ना तदा देवी साधकं तोषयेत्सदा॥ अन्नाद्यै रतिभोगेन पति

१॥ ॐ ह्रीं आगच्छ कामेश्वरि स्वाहा॥१ ३॥ ततइतिपुस्तकांतरे॥३ ५॥ भजेदितियुक्तः पाठः॥५ चोक्तेतिप्रत्यंतरे॥६ २ दद्याच्च साधकश्रेष्ठ माज्ञां देहीति तं वदेदिति प्रत्यंतरे पाठः॥२
१॥ ॐ ह्रीं रक्तवर्माणि आगच्छ कनकावति स्वाहा॥१ ॐ आगच्छ कामेश्वरि स्वाहा ५

८॥ ॐ ह्रीं आगच्छ पद्मिनी वल्लभा स्वाहा॥ ४॥ ॐ ह्रीं आगच्छ रतिसुंदरि स्वाहा॥ ४ १ वस्त्रालंकारभूषादीनि पुस्तकांतरे॥ १

वस्त्रालयेत्सदा॥ नीलारात्रिंसुखैश्वर्यैर्दद्याच्च विपुलं धनं॥ दत्वालंकारद्रव्यादीन्प्रभाते याति निश्चितं॥ एवं प्रतिदिनं तस्य सिद्धिः स्यात्कामरूपनः॥ ४॥ ततः पटे विनिर्माय पुत्तलीं ध्यानरूपतः॥ सुवर्णवर्णां गौरांगीं सर्वालंकारभूषितां॥ नूपुरांगदहाराढ्यां रम्यां च पुष्करेक्षणां॥ एवं ध्यात्वा जपेन्मंत्रं दद्यात्स्वपाद्यमुत्तमं॥ सचंदनेन पुष्पेण जातीपुष्पेण यत्नतः॥ गुग्गुल्वगुरुधूपं च दीपं मूलेन साधकः॥ तारं माया तथागच्छ रतिसुंदरिपदं ततः॥ वह्निजायाष्टसाहस्रं जपेन्मंत्रं दिने दिने॥ मासांतदिवसं प्राप्य कुर्यात्पूजादिकं शुभं॥ घृतदीपं तथा गंधं पुष्पं ताम्बूलमेव च॥ तावन्मंत्रं जपेद्विद्वान्यावदायाति सुंदरी॥ ज्ञात्वा दृढं साधकेंद्रं निशीथे याति निश्चितं॥ ततस्तामर्चयेद्धन्यां जातीकुसुममालया॥ सुसंतुष्टा साधकेंद्रं तोषयेत्प्रीतिभोजनैः॥ भूत्वा भार्या च सा तस्मै दद्याति वांछितं वरं॥ भूषादिकं परित्यज्य प्रभाते याति सा ध्रुवं॥ साधकाज्ञानुरूपेण प्रयाति सा दिने दिने॥ निर्जने प्रांतरे देशे सिद्धः स्यान्नात्र संशयः॥ त्यक्त्वा भार्यां भजेत्तां तु अन्यथा नश्यति ध्रुवम्॥ ५॥ ततोऽन्यत्साधनं वक्ष्ये स्वगृहे शिवसन्निधौ॥ वेदाद्यं भुवनेशानी चागच्छ पद्मिनि वल्लभा॥ पावकस्य महामंत्रं पूर्ववत्सकलं ततः॥ मंडले चंदनैः कृत्वा मूलमंत्रं लिखेत्ततः॥ पद्मानना श्यामवर्णा पीनोन्नतपयोधरा॥ कोमलांगी स्मेरमुखी रक्तोत्पलदलेक्षणा॥ एवं ध्यात्वा जपेन्मंत्रं सहस्रं च दिने दिने॥ मासांते पूर्णिमां प्राप्य विधिवत्पूजयेत्सुधीः॥ आनिशीथं जपेन्मंत्रं दृढाभ्यासेन साधकः॥ सर्वत्र कुशलं दृष्ट्वा याति सा साधकालयं॥ भूत्वा भार्या साधकं हि तोषयेद्विविधैः सुखैः॥ भोग्यैर्द्रव्यैर्भूषणाद्यैः पद्मिनी सा दिने दिने॥ पतिवत्पालितं लोके नित्यं स्वर्गे च सर्वदा॥ त्यक्त्वा भार्यां भजेत्तां च साधकश्च सदा प्रिये॥ ६॥ ततो वक्ष्ये महाविद्यां विश्वामित्रेण धीमता॥ ज्ञात्वा यां साधिता विद्या बलाच्चातिबला प्रिये॥ प्रणवांते महामाया नटिनि पावकवल्लभा॥ महाविद्येह कथिता गोपनीया प्रयत्नतः॥ अशोकस्य तटे गत्वा स्नात्वा पूर्ववदाचरेत्॥ मूलमंत्रेण सकलं कुर्याच्च सुसमाहितः

२॥ ॐ ह्रीं नटिनि स्वाहा॥ २

॥त्रैलोक्यमोहनीगौरीविचित्रांबरधारिणी॥विचित्रालंकृतांरम्यांनर्तकीवेशधारिणी॥एवंध्यात्वाजपेन्मंत्रंसहस्रंचदिनेदिने॥मांसोपहारैःसंपू
ज्यधूपदीपंनिवेदयेत्॥गंधचंदनतांबूलंदद्यात्तस्यैसदाबुधः॥मासमेकंतुतामनयापूजयेत्साधकोत्तमः॥मासांतदिवसंप्राप्यकुर्य्याच्चपूज
नंमहत्॥अर्द्धरात्रौभयंदत्वाकिंचित्साधकसत्तमे॥सुदृढंसाधकंज्ञात्वायातिसासाधकालयं॥विद्याभिःसकलाभिश्चकिंचित्स्मेरमुखीततः॥
वरंवरयशीघ्रंत्वंयत्तेमनसिवर्त्तते॥तच्छ्रुत्वासाधकःश्रेष्ठोभावयेन्मनसाधिया॥मातरंभगिनींवापिभार्य्यांवाप्रीतिभावतः॥कृत्वासंतोषयेद्दत्वा
नटिनीनतूकरोत्यलम्॥मातास्याद्यदिसादेवीपुत्रवत्पालितंमुदा॥स्वर्णशतंस्थितिद्रव्यंददातिसादिनेदिने॥भगिनीयदिसाकन्यांदेवस्त्रीना
गकन्यकां॥राजकन्यांसमानीयददातिसादिनेदिने॥अतीतानागतंवार्त्तांसर्वंजानातिसाधकः॥भार्य्यास्याद्यदिसादेवीददातिविपुलंधनं
॥अन्नाद्यैरुपहारैश्चददातिकामभोजनं॥स्वर्णशतंसदातस्मैसाददातिध्रुवंप्रिये॥यद्यद्वांछतिसर्वंचददातिनात्रसंशयः॥७॥महाविद्यां
प्रवक्ष्यामिसावधानावधारय॥कुंकुमेनसमालिख्यभूर्जपत्रेस्त्रियंमुदा॥ततोष्टदलमालिख्यकुर्यान्न्यासादिकंप्रिये॥जीवन्यासंततःकु
र्य्याद्ध्यायेत्तत्रप्रसन्नधीः॥शुद्धस्फटिकसंकाशांनानारत्नविभूषितां॥मंजीरहारकेयूररत्नकुंडलमंडितां॥एवंध्यात्वाजपेन्मंत्रंसहस्रंचदि
नेदिने॥प्रतिपद्दिनमारभ्यपूजयेत्कुसुमादिभिः॥धूपदीपविधानैश्चत्रिसंध्यंप्रजपेन्मुदा॥पूर्णिमांप्राप्यगंधाद्यैःपूजयेत्साधकोत्तमः॥घृत
दीपंततोधूपंनैवेद्यंचमनोहरं॥रात्रौचदिवसेजापंकुर्य्याच्चसुसमाहितः॥प्रभातसमयेयातिसाधकस्यांतिकंमुदा॥प्रसन्नवदनाभूत्वातोषयेद्र
तिभोजनैः॥देवदानवगंधर्वविद्याधर्य्यप्सरस्समां॥कन्याभीरत्नभूषाभिःसाधकेन्द्रंमुहुर्मुहुः॥चर्व्यचोष्यादिकंद्रव्यंनित्यंददातिसाध्रुव॥स्व
र्गेमर्त्येचपातालेयद्वस्तुविद्यतेप्रिये॥आनीयदीयतेसापिसाधकाज्ञानुरूपतः॥स्वर्णशतंसदातस्मैददातिसादिनेदिने॥साधकायव
रंदत्वायातिसानिजमंदिरं॥तस्यावरप्रसादेनचिरंजीवीनिरामयः॥ सर्वज्ञःसुंदरःश्रीमान्सर्वगोभवतिध्रुवम्॥ रैमेसाईतया १॥

१ दिव्यमितिपुस्तकांतरे॥१

१॥ॐह्रींआगच्छानुरागिणिमैथुनप्रियेस्वाहा१

देविसाधकेन्द्रोदिनेदिने॥ताँरंमाँयातथागच्छानुरागिणिमैथुनप्रिये॥वह्नेर्भार्यामनुःप्रोक्तःसर्वसिद्धिप्रदायकः॥एषामधुमतीतुस्यात्सर्वसिद्धिप्रदाप्रिये॥गुह्याद्गुह्यतराविद्यातवस्नेहात्प्रकीर्तिता॥८॥देव्युवाच॰॥श्रुतंचसाधनंसर्वंयक्षिणीनांसुखप्रदं॥कस्मिन्कालेप्रकर्तव्यंविधिनाकेनवाप्रभो॥अत्राधिकारिणःकेवासमासेनवदस्वमे॥ईश्वरउवाच॰॥वसंतेसाधयेद्धीमान्हविष्याशीजितेंद्रियः॥सदाध्यानपरोभूत्वातद्दर्शनमहोत्सवः॥उज्जटेप्रांतरेवापिकामरूपेविशेषतः॥स्थानेष्वेकतमंप्राप्यसाधयेत्सुसमाहितः॥अनेनविधिनासासाक्षाद्वश्यैवनसंशयः॥देव्याश्चसेवकाःसर्वेपरंचात्राधिकारिणः॥तारकब्रह्मणोभृत्यविनाप्यत्राधिकारिणः॥ इतियोगिनीसाधनम्॥अथपूजाधारोनिरूप्यते॥तत्रनारदीये॥॥आपोऽग्निर्हृदयंविष्णोश्चक्रेसेत्रसमुद्भवम्॥यंत्रंचप्रतिमास्थानमर्चनेसर्वदाहरेः॥इतिगौतमीये॥शालिग्रामेमणौयंत्रेप्रतिमामंडलेषुवा॥नित्यंपूजाहरेःकार्यानतुकेवलभूतले॥शालग्रामशिलास्पर्शात्कोटिजन्माऽघनाशनं॥किंपुनरर्चनंतत्रहरिसान्निध्यकारणं॥बहुभिर्जन्मभिःपुण्यैर्यदिकृष्णशिलांलभेत्॥गोष्पदेनतुचिह्नेनतेननप्राप्यतेजनुः॥एतेनविष्णुपूजायांशिलायामपिप्राधान्यं॥मंडलादीनांतुसर्वसाधारणत्वात्॥योगिनीतंत्रे॰ लिंगस्थांपूजयेद्देवींपुस्तकस्थांतथैवच॥मंडलस्थांमहादेवींयंत्रस्थांप्रतिमासुच॥जलस्थांचशिलास्थांवापूजयेत्परमेश्वरी॥एतत्सर्वंयंत्राभावे॥कौलावलीये॰ यत्रापराजितापुष्पंजवापुष्पंचविद्यते॥करवीरेशुक्लरक्तेद्रोणंवायदिविद्यते॥तत्रदेवीवसेन्नित्यंतद्यंत्रेचंडिकार्चनं॥तथा॥यंत्रंमंत्रमयंप्रोक्तंमंत्रात्मादेवतेतिच॥देहात्मनोर्यथाभेदोयंत्रदेवतयोस्तथा॥तथाआदौलिखेद्यंत्रंदेवतायाश्चविग्रहं॥कामक्रोधादिदोषोत्थसर्वदुःखनियंत्रणात्॥यंत्रमित्याहुरेतस्मिन्देवःप्रीणातिपूजितः॥विनायंत्रेणपूजायांदेवतानप्रसीदति॥दुःखनियंत्रणाद्यंत्रमित्याहुस्तंत्रवेदि

३ अर्चनमितिपुस्तकांतरे॥३ ४॥बुधइतिपुस्तकांतरे॥

नः॥ इतियंत्रेपूजायाःप्राधान्यं॥ अथयंत्रसंस्कारः॥ वामकेश्वरतंत्रे॥ भैरव्युवाच॰ चक्रभेदंमहादेवत्वत्प्रसादान्मयाश्रुतं॥ इदानींश्रोतुमिच्छामिप्रतिष्ठाकर्मनिर्णयं॥ श्रीशंकरउवाच॰ शृणुदेविमहाभागेजगत्कारणिकौलिनी॥ तस्योद्यापनकर्मांगंसर्वकर्मविनिर्णयं स्नात्वासंकल्पयेन्मंत्रीगुरोर्वैवचनेनमाचरेत्॥ पंचगव्यंततःकृत्वाशिवमंत्रेणमंत्रितं॥ तच्चक्रंनिःक्षिपेन्मंत्रीप्रणवेनसमाकुलं॥ तदुद्धृत्यततश्चक्रंस्थापयेत्स्वर्णपात्रके॥ पंचामृतेनदुग्धेनशीतलेनजलेनच॥ चंदनेनसुगंधेनकस्तूरीकुंकुमेनच॥ पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात्॥ तोयधूपांतरैःकुर्यात्पंचामृतविधिंपुनः॥ हाटकैःकलशैर्देवीमष्टभिर्वारिपूरितैः॥ कषायजलसंपूर्णैःकारयेत्स्नानमुत्तमं॥ स्नानंसमाप्यतांदेवींस्थापयेत्स्वर्णपात्रके॥ यंत्रराजायविद्महेमहायंत्रायधीमहि॥ तन्नोयंत्रःप्रचोदयात्॥ स्पृष्ट्वायंत्रंकुशाग्रेणगायत्र्यावाभिमंत्रयेत्॥ अष्टोत्तरशतंदेविदेवताभावसिद्धये॥ आत्मशुद्धिंततःकृत्वाषडंगैर्यजनंचरेत्॥ तत्रावाह्यमहादेवींजीवन्यासंचकारयेत्॥ उपचारैःषोडशभिर्महामुद्रादिभिःसदा॥ फलतांबूलनैवेद्यैर्देवींतत्रसमाचरेत्॥ पट्टसूत्रादिकंदद्याद्वस्त्रालंकारमेवच॥ मुकुरंचामरंघंटांयथायोग्यंमहेश्वरि॥ सर्वमेतत्प्रयत्नेनदद्यादात्महितेरतः॥ ततोजपेत्सहस्रंचसकलेप्सितसिद्धये॥ बलिदानंततःकुर्यात्प्रणमेच्चक्रराजकं॥ ॥अष्टोत्तरशतंहुत्वासंपाताज्यंविनिःक्षिपेत्॥ होमकर्मण्यशक्तश्चेद्द्विगुणंजपमाचरेत्॥ धेनुमेकांसमानीयस्वर्णशृंगाद्यलंकृतां॥ गुरवेदक्षिणांदद्यात्ततोदेव्याविसर्जनं॥ तत्रप्रदीपे॥ फलेभित्तौतथा१देस्थाप१येद्यंत्रमीश्वरि॥ धनधान्यपुत्रपौत्रयशआयूंषिमुंचति॥ अन्यत्रापि॥ नभित्तौस्थापयेद्यंत्रंनपट्टेफलकेतथा॥ यस्त्वैममतादेविपुत्रपौत्रगृहादिषु॥ अथप्रयोगः॥ कृताह्निकःस्वस्तिवाचयित्वासंकल्पः ॐ अद्येत्यादि अमुकगोत्रामुकदेवशर्म्मोऽमुकदेवतायाःपूजार्थममुकयंत्रसंस्कारमहंकरिष्ये इतिसंकल्प्य पंचगव्यमानीयह्रौमितिमंत्रेणाऽष्टोत्तरशत

८॥पीठकेइतिपुस्तकांतरे॥८ ९॥समर्चयेदितिपुस्तकांतरे॥९

मभिमंत्र्य प्रणवेन यंत्रं तत्र निःक्षिपेत्॥ तस्मादुत्तोल्य पात्रांतरे स्थापयेत्॥ ततः शीतलजलकुंकुमकस्तूरीभिः स्नापयित्वा पंचामृतमानीय ह्रौमिति मंत्रेण पूर्ववच्छोधयित्वा स्नापयेत्॥ तत्र क्रमः॥ प्रथमं क्षीरेण स्नापयित्वा पुनर्जलेन स्नापयित्वा धूपं दद्यात्॥ एवं दध्ना घृतेन मधुना शर्करया च॥ ततोऽष्टभिः कलशैः स्नापयेत्॥ कुंकुमरोचनाचंदनमिश्रितैस्तोयैः स्नापयेत्॥ सर्वत्र स्नानं तु मूलमंत्रेण॥ ततो यंत्रमुत्तोल्य पीठे निधाय कुशाग्रेण यंत्रं स्पृष्ट्वा ओं यंत्रराजाय विद्महे महायंत्राय धीमहि॥ तन्नो यंत्रः प्रचोदयात्॥ इत्यष्टोत्तरशतमभिमंत्र्य प्राणप्रतिष्ठां कुर्यात्॥ अस्य प्राणप्रतिष्ठामंत्रस्य ब्रह्माविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छंदांसि चैतन्यं देवता प्राणप्रतिष्ठायां विनियोगः॥ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हौं सः अमुकदेवतायाः प्राणा इह प्राणाः॥ एवं आं १३ अमुकदेवतायाः जीव इह स्थितः॥ आं १३ अमुकदेवतायाः सर्वेंद्रियाणि॥ आं १३ अमुकदेवतायाः वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा॥ इति प्राणान्प्रतिष्ठाप्य तत्र प्रकृतदेवताभावात्स्वस्वकल्पोक्तक्रमेण षोडशोपचारादिना संपूज्य षडंगेन पूजयेत्॥ ततः पट्टसूत्रादिकं दत्वाऽष्टोत्तरसहस्रं जपेत् शक्तश्चेद्बलिं दद्यात्॥ ततोऽष्टोत्तरशतहोमं कृत्वा प्रत्याहुतिसंपातं यंत्रे दद्यात्॥ होमासामर्थ्ये द्विगुणो जपः कार्यः॥ ततो दक्षिणां गुरवे दत्वाऽच्छिद्रावधारणं कुर्यादिति यंत्रसंस्कारः॥ ॥ इति श्रीमहामहोपाध्यायकृष्णानंदवागीशभट्टाचार्यविरचिते तंत्रसारे द्वितीयः परिच्छेदः॥ २॥

॥ यमाहुरेकं पुरुषं पुराणं ब्रह्मेति यं वेदविदो वदंति॥ विष्णुं विरिंचिं गिरिशं तथान्यं गोविंदमाद्यं तमहं भजामि॥ १॥

अथ प्रकीर्णकं॥ अन्यपूजायां विहितनिषिद्धानि॥ तत्रादौ दिग्विधानम्॥ विष्णुविषये नारदीये॥ शुक्लांबरधरः स्नातः आचांतः पूर्वदिङ्मुखः॥ शुद्धासनं समासाद्य भूतोत्सारणमाचरेत्॥ अन्यत्र तु निबंधे॰ उपविश्यासने मंत्री प्राङ्मुखो वाप्युदङ्मुखः॥ बद्धपद्मासनो मंत्री समाहितजितेंद्रियः॥ सारसमुच्चये॰ स्नात्वा

अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः॥
ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥ २

यथाविधिविधौतकराननांघ्रिराचम्यसम्यगमलांबरपत्तसूत्रः॥ प्रागाननो धनददिग्वदनोऽथवापिबद्धासनोगणपतिंचगुरुंचनत्वा इति॥ रात्रौपूजायांनायंनियमः॥ तथाचस्मृतिः॥ रात्रावुदङ्मुखःकुर्याद्देवकार्यंसदैवहि॥ शिवार्चनेसदाप्येवंशुचिःकुर्यादुदङ्मुखः॥ मंत्रतंत्रप्रकाशे॥ लिंगद्वयंतथानार्च्यंगणेशद्वयमेव च॥ शक्तित्रयंतथा सूर्यद्वयमेकत्रनार्चयेत्॥ द्वेचक्रेद्वारिकायाश्चशालग्रामशिलाद्वयं॥ समेषुद्वितयंनैवविषमेषुत्रयंनच॥ एतेषामर्चनान्नित्यमुद्वेगंप्राप्नुयाद्गृही॥ लैंगे॰ एकीकृत्यचलिंगानिदशपंचशतानिवा॥ प्रत्येकेनाथवादैंबिल्वपत्रैःप्रपूजयेत्॥ एकंपाशुपतंलिंगंमृच्छिलादिविनिर्मितं॥ शालग्रामशिलामेकांगृहस्थोनैवपूजयेत्॥ यामलेनाक्षतैरर्च्चयेद्विष्णुंनतुलस्यागणाधिपं॥ नदूर्वयायजेद्दुर्गांबिल्वपत्रैर्दिवाकरं॥ उन्मत्तमर्कपुष्पंचविष्णौवर्ज्यंसदाबुधैः॥ गौतमीये॥ नरक्तचंदनंजातुगृह्णीयाद्रक्तपुष्पकं॥ बिल्वपत्रैस्तन्मूस्तैर्नार्चयेद्देवकीसुतं॥ तत्रैव॥ कमलेकरवीरेद्वेतुलस्यौजातिकेतकी॥ नागकेशरपार्वतीकल्हारंचंपकोत्पले॥ नंद्यावर्तंचयूथींचमल्लिकांनवमल्लिकां॥ कुंदंमंदारकंचैवसौगंधिकंचकेसरं॥ कुरंटकसर्जविल्वार्जुनंचमुनिपुष्पकं॥ पत्रंचामलकंमुद्गंकर्णिकारंपलाशकं॥ एतान्यन्यानिपुष्पाणियथालाभंसमर्पयेत्॥ इतियद्बिल्वविधानंतद्विहितपुष्पाभावे॥ तंत्रांतरे॥ देवीनामर्कमंदारमादित्येतगरंतथा॥ गणेशायचसूर्यायरक्तपुष्पमतिप्रियं॥ शिवेकुंदमदंतींचयूथींबंधूककेतके॥ जवांरक्तांत्रिसंध्येद्वेमालतींकेतकींतथा॥ घुसृणंकुसुदंरक्तंहयारिंवर्वरांत्यजेत्॥ तथाच॥ उग्रगंधमगंधंचकृमिकेशादिदूषितं॥ वासोभिःसंभृतंनैवंमतिमान्नार्पयेच्छिवे॥ शिवइत्युपलस्पर्णं॥ तथाच॰॥ कलिकाभिस्तथान्याज्यंविनाचंपकपद्मकैः॥ तथाच॥ शुष्कैश्चनार्च्चयेद्विद्वान्पुष्पैः पत्रैःफलैरपिस्नात्वानीतैःपर्युषितैर्याचितैःकृष्णवर्णकैः॥ स्वयंविकसितैःपुष्पैःस्वयंचपतितंभुवि॥ वर्जयेद्दहतीपुष्पमगंधंचविशेषतः॥ स्वयंविकसितैरितिस्वयंपुरुषेणविका-

पुष्पैरितिप्रत्यंतरे॥१

कुरुंटाशोकसर्जानिबिल्वंचमुनिपुष्पकमितिप्रत्यंतरे॥२
मुनिपुष्पकमितिपुस्तकांतरे॥ ३॥

तं·सा· सितैरित्यर्थः॥ त्रिपत्रन्यूनकुसुमैर्नार्चयेत्तु कदाचन॥ भूगतं चांगसंस्पृष्टं केशकीटादिदूषितं॥ कुसुंदं पाटलां चैव शिरीषं परिवर्जयेत्॥ पाटलं वनपा

१६३ टलं॥ भूगतं वर्जयेत् पुष्पं शेफालीबकुलं विना॥ तथा॥ बिल्वस्य खादिरस्यैव तथा धात्रीदलस्य च॥ तमालस्य च पत्रस्य छिन्नभिन्नेन दुष्यति॥ गौतमीये॥

मलिनं भूमिसंस्पृष्टं कृमिकेशादिदूषितं॥ पर्युषितानि पुष्पाणि वर्जयेद्देवतार्चने॥ तिष्ठेद्दिनत्रयं शुद्धं पद्मामामलकं तथा॥ तुलसी सर्वदा शुद्धा त

था बिल्वदलानि च॥ दिने कंकरवीराणि योग्यानि त्वतपोधन॥ ज्ञानार्णवे॥ पुष्पैः पर्युषितैर्देवि नार्चयेत्स्वर्णजैरपि॥ निर्माल्यभूतैः कुसुमैरु

च्छिष्टैः परमेश्वरि॥ योगिनीतंत्रे॰ तुलसीश्वेतमंदारे कल्हारे च लमालके॥ नार्चयेच्च महालक्ष्मीं कुशकाशोद्भवेन च॥ विष्णुक्रांताजवानाग

केसरं नागवल्लभं॥ बंधूकं चैव मंदारं सहृतेन समर्चयेत्॥ न स्पृशेद्दत्तवर्जं च भूगतं च न संस्पृशेत्॥ शेफालीबकुले भद्रे भूगते सममर्चयेत्॥

मालूरं भूगतं देयं तस्य काष्ठस्य चंदनं॥ बिल्वस्य मुकुलं वर्ज्यं कदल्याः पत्रकं तथा॥ बिल्वपत्रं च माध्यं च तमाला मलकीदलं॥ कल्हारं तु

लसीं चैव पद्मं च मुनिपुष्पकं॥ एतत्पर्युषितं न स्याद्यच्चान्यत्कलिकात्मकं॥ नीपस्यसैं च बिल्वस्य तुलसीदलमेव च॥ न दुष्येच्छिन्नभिन्न

च जातीपुष्पं च शांकरि॥ देवीमधिकृत्य तत्रैव॥ नार्चयेत्किंटिपुष्पेण पीतेन तगरेण च॥ श्वेतोड्रेण च कृष्णेन वर्जयेत्पूजनं तथा॥ त्रिपुराम

धिकृत्य वाराहीये॰ पलाशकाशकुसुमैर्नार्चयेद्दूरतस्त्यजेत्' धात्रीतमालजैः पत्रैस्तुलसीद्वितयं तथा॥ पूतनाम्लातकी च सलगैश्चापि श्रि

यं हरेत्॥ तथा त्रिपुरासारसमुच्चये॥ त्रिपुरापूजने वर्ज्या तुलसी सर्वदा बुधैः॥ तुलसीगंधमात्रेण रुष्टा भवति सुंदरी॥ कुलावलीये॰ रक्तमाल्य

श्वेतदूर्वा नीलकंटकुरंटकं॥ न दद्याच्च महादेव्यै यदीच्छेच्छ्रेयमात्मनः॥ तथा च नक्षत्रविद्या सौमनस्यसूक्ते॥ पुष्पं श्रेष्ठं कोकनदं बंधूकं श राम·

तपत्रकं॥ वर्वराद्वितयं चैव कर्णिकारद्वयं तथा॥ बकमंदारचूतानि करवीराणि शस्यते॥ मल्लिकाद्वितयं जाति सौमपुष्पं जयंतिका॥ बि १६३

नीरजस्येति पुस्तकांतरे॥ ई

॥श्वेतउडहुरपुष्पेण॥ ५

तिलेति प्रत्यंतरे॥६

ल्वपत्रं कुरुवकं मुनिपुष्पं च केशरं॥ वासंती द्वितयं चैव काशपुष्पं मरूवकं॥ मदनं च लवंगं च यूथी शेफालिका तथा॥ सुगंधिभिश्चैतसौरभ्यैः कुसुमैरर्चयेद्दलैः॥ बिल्वैर्मरुवकाद्यैश्च तुलसीदलवर्जितैः॥ यद्यपि तुलसीवर्जिता पूजा सा पूजा विफला भवेदिति नियमस्तु न त्रिपुरादौ॥ तथा च भैरवी सुंदरी काली ब्रह्म विष्णु सरस्वती॥ तुलसीवर्जिता पूजा न जातु विफला भवेत्॥ अविफला भवेदित्यर्थः॥ तेन भैरव्यादि पूजायां तुलसी सदैव वर्ज्या पूर्ववद्वचनादितरेषां तु पूजायां तदसत्त्वे वा न कश्चिद्विशेषः॥ नासत्तैरर्चयेद्विष्णुमिति पुष्पाभावेऽतिदेशप्रप्रसक्तं तुलस्या निषेधपरम्॥ तथा च॥ पुष्पाभावे जलेनापि दूर्वया तंडुलेन च॥ नित्यपूजा हरेः कार्या भक्तिभावेन सुंदरि॥ न त्वर्घ्यादि निषेधपरम्॥ तथा च॥ गंधपुष्पाक्षतयवकुशाग्रश्चैतसर्षपैः॥ सदूर्वैः सर्वदेवानामेतदर्घ्यं प्रकीर्तितं॥ इत्येवं न दूर्वया पार्वतीमित्यपि॥ तथा च राघवभट्टैः॥ सर्वैः पुष्पैः सदा पूजा विहिता विहितैरपि॥ कर्तव्या सर्वदेवानां भक्तियोगोऽत्र कारणं॥ तथा च तंत्रांतरे० देवीपूजा सदा कार्या जलजैः स्थलजैरपि॥ विहिताविहितैर्वापि भक्तियुक्तेन चेतसा॥ इदं तु विहिताभावेऽत्यंतभक्तविषयं॥ तथा च० कालीतंत्रे॥ अपामार्गभृंगराजैस्तुलसीवर्जितैः शुभैः॥ चामुंडातंत्रे॥ धत्तूराशोकबकुलश्वेतकह्लापराजिता॥ इत्यादिपुष्पनियमो बोध्यः॥ अथ जपविशेषः तथा सेतुं विना जपस्य दुष्टत्वात्तन्निरूप्यते॥ कालिकापुराणे॥ शास्त्राणां प्रणवः सेतुर्मंत्रे तु प्रणवः स्मृतः॥ स्रवत्यऽवहतः पूर्वं परस्ताच्च विशीर्यति॥ निःसेतुः सलिलं यद्वत्क्षणान्निम्नं प्रसर्पति॥ मंत्रस्तथैव निःसेतुः क्षणात्स्रवति निस्वनम्॥ चतुर्दशस्वरो योऽसौ मे रुरौकारसंज्ञकः॥ स चानुस्वारनादाभ्यां शूद्राणां सेतुरुच्यते॥ अथ पूजायां पंचशुद्धिः पंचशुद्धिं विना पूजायाः फलजनकत्वाभावात्तन्निरूप्यते॥ तदुक्तं ज्ञानार्णवे॥ आत्मस्थानमंत्रद्रव्यदेवशुद्धिस्तु पंचमी॥ यावन्न कुरुते देवि तस्य देवार्चनं कुतः॥ पंचशुद्धिं विना पूजा अभिचाराय कल्पते

ओं शूद्राणां प्रणवः॥२

३॥ क्षरतीत्यज्वनामिति पुस्तकांतरपाठः॥

स्रवत्यनाकृतेइति पुस्तकांतरे॥४

सेतुरिति प्रत्यंतरे॥१

७ रोधनमित्यपि पाठः ॥७
४॥द्रव्यादीनिति पुस्तकांतरे ॥४

सुस्नाते भूतशुद्धेश्च प्राणायामादिभिः प्रिये ॥ षडंगाद्यखिलन्यासैरात्मशुद्धिरितीरिता ॥ सम्मार्जनानुलेपनाद्यैर्दर्पणोदरसन्निभां ॥ वितानधूपदीपादिपुष्पमाल्यादिशोभितं ॥ पंचवर्णरजोभिश्च स्थानशुद्धिरितीरिता ॥ ग्रथिता मातृकावर्णैर्मूलमंत्राक्षराणि च ॥ क्रमोत्क्रमात् द्विरावृत्या मंत्रशुद्धिरितीरिता ॥ पूजाद्रव्याणि मूलास्त्रैः प्रोक्षणीयैर्विशेषतः ॥ दर्शयेद्धेनुमुद्रादिद्रव्यशुद्धिरितीरिता ॥ ॥ पीठे देवीं प्रतिष्ठाप्य सकलीकृत्य मंत्रवित् ॥ मूलमंत्रेण दीपादीन्माल्यादीनुदकेन च ॥ त्रिवारं प्रोक्षयेद्विद्वान्देवशुद्धिरितीरिता ॥ पंचशुद्धिं विधायेत्थं पश्चाद्यजनमाचरेत् ॥ अथ मंत्रसिद्ध्युपायाः ॥ गौतमीये ॥ सम्यगनुष्ठितो मंत्रो यदि सिद्धिर्न जायते ॥ पुनस्तेनैव कर्तव्यं ततः सिद्धो भवेद्ध्रुवं ॥ पुनरप्यनुष्ठितो मंत्रो यदि सिद्धिर्न जायते ॥ पुनस्तेनैव कर्तव्यं ततः सिद्धो न संशयः ॥ पुनः सोऽनुष्ठितो मंत्रो यदि सिद्धिर्न जायते ॥ उपायास्तत्र कर्तव्याः सप्तशंकरभाषिताः ॥ भ्रामणं रोधनं वश्यं पीडनं पोषशोषणे ॥ दहनांतं क्रमात्कुर्यात्ततः सिद्धो भवेद्ध्रुवं ॥ भ्रामणं वायुबीजेन ग्रथनं क्रमयोगतः ॥ एतन्मंत्रं यंत्रे आलिख्य सिल्हकर्पूरचंदनैः ॥ उशीरचंदनाभ्यां तु यंत्रं संपुटमालिखेत् ० ॥ ॥ क्षीराज्यमधुतोयानां मध्ये तल्लिखितं भवेत् ॥ पूजनाज्जपनाद्धोमाद्भ्रामितः सिद्धिदो भवेत् ॥ भ्रामितो यदि न सिद्ध्येद्रोधनं तस्य कारयेत् ॥ सारस्वतेन बीजेन संपुटीकृत्य संजपेत् ॥ एवं रुद्धो भवेत्सिद्धो न चेदेन वशीकुरु ॥ अलक्तचंदनं कुष्ठं हरिद्रा मादनं शिला ॥ एतैस्तु यंत्रमालिख्य भूर्जपत्रे सुशोभने ॥ धार्यः कंठे भवेत् सिद्धः प्रीणनं तस्य कारयेत् ॥ अधरोत्तरयोगेन पदानि परिजप्य वै ॥ ध्यायेच्च देवतां तद्वदधरोत्तररूपिणीं ॥ विद्यामाहिंत्यदुग्धेन लिखित्वाक्रम्य चाघ्रिणा ॥ तथाभूतेन मंत्रेण होमः कार्यो दिने दिने ॥ पीडितो लज्जयाविष्टः सिद्धः स्यात्तत्र पोषयेत् ॥ बालायास्त्रितयं बीजमाद्यंतेन, तस्य योजयेत् ॥ गोक्षीरमधुनालिख्य विद्यां पाणौ विधारयेत् ॥ पोषितो यं भवेत्सिद्धो न चेत्कुर्वीत शोषणम् ॥ द्वाभ्यां च वायुबीजाभ्यां मंत्रं कुर्या

६ कुंकुमैरिति प्रत्यंतरे ॥ मंत्रं संग्रथितमिति पुस्तकांतरे पाठः ६ ॥ ऐंबीजेन ॥५ अर्कदुग्धेन ॥३

।विभावयेदिति प्रत्यंतरे १ ऐं क्लीं सौः ५ ॥२

हिद्रर्मितं॥ एषाविद्यागलेधार्यालिखित्वावरभस्मना॥ शोषितोनचसिद्ध्येच्चेद्दहनीयोग्निबीजतः॥ आग्नेयेनतुबीजेनमंत्रस्यैकैकमक्षरं॥ आद्यंतमधऊर्द्ध्वंचयोजयेद्दाहकर्मणि॥ भल्लातकस्यतैलेनमंत्रमालिख्यधारयेत्॥ कंठदेशेततोमंत्रःसिद्धःस्यात्शंकरोदितं॥ इत्येतत्कथितंसम्यक्केवलंतवभक्तितः॥ एकेनैवकृतार्थःस्याद्बहुभिःकिमुसुव्रते॥ अथान्यत्संप्रवक्ष्यामिमंत्रसिद्ध्यैककारणं॥ मातृकापुटितंकृत्वास्वस्वमंत्रंजपेत्सुधीः॥ क्रमोत्क्रमात्स्थितादृन्यानदंतेचमनुंजपेत्॥ एवंतुप्रत्यहंकृत्वायावल्लक्षंसमाप्यते॥ निश्चितंमंत्रसिद्धिःस्यादित्युक्तंतंत्रवेदिभिः॥ अथमंत्रसिद्धिलक्षणम्॥ मनोरथानामक्लेशसिद्धिरुत्तमलक्षणं॥ मृत्यूनांहरणंतद्वद्देवतादर्शनंतथा॥ प्रयोगस्याक्लेशसिद्धिःसिद्धस्तुलक्षणंतथा॥ परकायप्रवेशश्चपुरप्रवेशनंतथा॥ ऊर्द्ध्वोत्क्रमणमेवंहिचराचरपुरेगतिः॥ खेचरीमेलनंचैवतत्कथाश्रवणादिकं॥ भूच्छिद्राणिप्रपश्येततदुत्तमस्यलक्षणं॥ ख्यातिर्भूषणवाहादिलाभःसुचिरजीवनं॥ नृपाणांतद्गणानांचवशीकरणमुत्तमं॥ सर्वत्रसर्वलोकेषुचमत्कारकरंसुधीः॥ रोगापहरणंदृष्ट्याविषापहरणंतथा॥ पांडित्यंलभतेमंत्रीचतुर्विधमयत्नतः॥ वैराग्यंचमुमुक्षुत्वंत्यागितासर्ववश्यता॥ अष्टांगयोगाभ्यसनंभोगेच्छापरिवर्जनं॥ सर्वभूतेष्वनुकंपासर्वज्ञत्वादिगुणोदयः॥ इत्यादिगुणसंपत्तिर्मध्यसिद्धेस्तुलक्षणं॥ ख्यातिर्भूषणवाहादिलाभःसुचिरजीवनं॥ नृपाणांतद्गणानांचवात्सल्यंलोकवश्यता॥ महैश्वर्यंधनित्वंचपुत्रदारादिसंपदः॥ अधमाःसिद्धयःप्रोक्तामंत्रिणांप्रथमभूमिका॥ सिद्धमंत्रस्तुयःसाक्षात्सशिवोनात्रसंशयः॥ इदानींमंत्राणांदोषारूपोनिरूप्यंते॥ मुंडमालातंत्रे॥ ईश्वरउवाच॰ भुवनेशीमहाविद्यादेवराजेनवैपुरा॥ आराधितामहाविद्याबीजहीनाभवेत्तदा॥ एकाक्षरीबीजहीनावाग्भवेनोज्ज्वलापुरा॥ कामराजाख्यविद्यायाविद्धासापुष्पधन्वना॥ घोरेणपीडितापूर्वंभुवनेश्याप्रतिष्ठिता॥ कुमारीयाचविद्येयंत्वयाशप्ता

२॥ वीर्येतिप्रत्यंतरे॥

२॥मदोन्मत्ता घूर्णिता च हीनवीर्या च स्तंभितेति पुस्तकांतरे पाठः॥२

२वीर्येति पाठांतरं

पतिव्रते॥केवलंशिवरूपेणशक्तिरूपेणकेवलं॥मयाप्रतिष्ठिताविद्याताराचक्रस्वरूपिणी॥भैरव्यादिमधिकृत्य॥सुप्तादग्धाकीलिताचसैवसंहाररूपिणी॥घूर्णितामूर्छिताचैवहीनवीर्याचस्तंभिनी॥छिन्नारुद्धाचहृद्धाचनिर्बीजाशक्तिहीनका॥तथाचनिबंधेविश्वसारे०॥छिन्नोरुद्धःशक्तिहीनःपराङ्मुखउदीरितः॥बधिरोनेत्रहीनश्चकीलितःस्तंभितस्तथा॥दग्धःस्तंभश्चभीतश्चमलिनश्चतिरस्कृतः॥भेदितश्चसुषुप्तश्चमदोन्मत्तश्चमूर्छितः॥हृतवीर्यश्चहीनश्चप्रध्वस्तोबालकःपुनः॥कुमारश्चयुवाप्रौढोवृद्धोनिस्त्रिंशकस्तथा॥निर्बीजःसिद्धिहीनश्चमंदःकूटस्तथापुनः॥निरंशकःसत्वहीनःकेकरोबीजहीनकः॥धूमितालिंगितौस्यातांमोहितश्चक्षुधार्तकः॥अतिदृप्तोंगहीनःस्यादतिक्रुद्धःसमीरितः॥अतिक्रूरश्चसव्रीडःशांतमानसएवच॥स्थानभ्रष्टश्चविकलोनिःस्नेहश्चप्रकीर्तितः॥अतिवृद्धःपीडितश्चवक्ष्याम्येषांचलक्षणं॥मनोर्यस्यादिमध्येवाचांतेनिलंबीजमुच्यते॥संयुक्तंवावियुक्तंवास्वराक्रांतंत्रिधापुनः॥चतुर्धापंचधावाथसमंत्रश्छिन्नसंज्ञकः॥आदिमध्यावसानेचभूबीजद्वयलांछितः॥रुद्धमंत्रःसविज्ञेयोभुक्तिमुक्तिविवर्जितः॥मायात्रितयश्रीबीजवह्निहीनस्तुयोमनुः॥शक्तिहीनःसकथितोयस्यमध्येनविद्यते॥कामबीजंमुखेमायाशिरस्यकुशमेववा॥असौपराङ्मुखःप्रोक्तोहकारद्वयलांछितः॥आद्यंतमध्येबिंदुर्वानभवेद्बधिरःस्मृतः॥पंचवर्णोमनुर्यःस्याद्रेफार्केंदुविवर्जितः॥नेत्रहीनःसविज्ञेयोदुःखशोकामयप्रदः॥आदिमध्यावसानेषुहंसप्रासादवाग्भवं॥हकारंवाफट्कारंवासकारंवातथैवच॥अंकुशंवातथामायांनमामिचततःपरं॥सएवकीलकोमंत्रःसर्वसिद्धिविवर्जितः॥यस्यमुखेनास्तिमायाप्रणवंवाविधानतः॥भीतःसकथितोमंत्रःसर्वसिद्धिविवर्जितः॥आदौमध्येतथाचांतेयस्यामलचतुष्टयं॥सएवमलिनोज्ञेयःसर्वविघ्नसमन्वितः॥यस्यमध्येदकारोवाकवचंमूर्ध्निदृश्यते॥त्रिविधंदृश्यतेचास्त्रंतिरस्कृतः

२॥ त्रिंशदितिवा॥

उदाहृतः ॥ यो हृं यं हृदये शीर्षे वषट्वौषट्च मध्यतः ॥ स एव भेदितो मंत्रः सर्वशास्त्रविवर्जितः ॥ त्रिवर्णो हंसहीनो यः स सुप्तश्च उदाहृतः ॥ मंत्रो वाप्यथवा विद्या सप्ताधिकदशाक्षरः ॥ फट्कारपंचकादिर्यो मदोन्मत्त उदाहृतः ॥ सप्तदशाक्षरो मंत्रो मध्येऽस्त्रं च यदा भवेत् ॥ मूर्छितो कथितो मंत्रः सर्वसिद्धिविवर्जितः ॥ पंचफट्यस्य मंत्रस्य विरामस्थानसंयुतः ॥ हतवीर्यः स कथितो नास्ति तेन प्रयोजनम् ॥ सप्तवर्णो भवेद्बालः कुमारोऽष्टाक्षरः परः ॥ षोडशार्णो युवा मंत्रः सर्वसिद्धिविवर्जितः ॥ चतुर्विंशल्लिपिर्यः स्यात्प्रौढः स परिकीर्तितः ॥ आदौ मध्ये तथा चांते चतुरस्त्रयुतो मनुः ॥ स एकहीनमंत्रः स्यात्तथा चाष्टादशाक्षरः ॥ एकोनविंशो यो मंत्रस्तारार्णवसमन्वितः ॥ हृल्लेखांकुशबीजाढ्यः प्रध्वस्तेत प्रचक्षते ॥ द्वाविंशत्यक्षरा विद्या मायाकामविवर्जिता ॥ ध्वस्तरूपा च सा विद्या सर्वसिद्धिविवर्जिता ॥ षड्विंशत्यक्षरा विद्या फडंतास्त्रविवर्जिता ॥ मूर्छिता कथिता विद्या मंत्रिणां हानिकारिणी ॥ त्रिंशद्वर्णचतुःषष्टिवर्णो मंत्रः शताक्षरः ॥ चतुःशताक्षरश्चापि वृद्धः स परिकीर्तितः ॥ नवाक्षरो ध्रुवयुतो मनुर्निस्त्रिंश ईरितः ॥ यस्यावसाने हृदयं शिरो मंत्रौ च मध्यतः ॥ शिखा वर्म च संयुक्तं फड्वौषड एव च ॥ शिवशक्त्यर्णहीनो वा स निर्बीज उदाहृतः ॥ एषु स्थानेषु फट्काराः षोढा यस्मिन्न दृश्यते ॥ स मंत्रः सिद्धिहीनः स्यान्नेदः पंचाक्षरो मनुः ॥ कूट एकाक्षरो मंत्रः स एवोक्तो निरंशकः ॥ द्विवर्णः सत्वहीनः स्याच्चतुरर्णस्त्वकेकरः ॥ षडक्षरो बीजहीनः स्तब्धः सप्ताक्षरो मनुः ॥ सार्द्धद्वादशवर्णोपि धूमितः स तु निंदितः ॥ सार्द्धबीजहृयंतद्वेकविंशतिवर्णकः ॥ विंशद्वर्णस्त्रिंशद्वर्णो यः स्यादालिंगितः स्मृतः ॥ द्वाविंशत्यक्षरो मंत्रो मोहितः परिकीर्तितः ॥ चतुर्विंशतियो मंत्रो यः सप्तविंशवर्णकः ॥ क्षुधार्तः स तु विज्ञेयः सर्वतंत्रसमन्वितः ॥ चतुर्विंशतियो मंत्रो यः सप्तविंशतिवर्णकः ॥ एकादशाक्षरो वापि पंचविंशस्त्रिधापि वा ॥ त्रयोविंशतिवा वर्णः मंत्रस्सुप्त उदाहृतः ॥ षड्विंशत्यक्षरो मंत्रः षड्विंशद्वर्णकस्तथा ॥ त्रिंशदे

निर्वीर्येतिपुस्तकांतरे॥५

सार्द्धेतिवा॥४

५॥हुंफट्एकाक्षरः॥

३॥अष्टेतिपुस्तकांतरे॥२

कोनवर्णोयस्त्वंगहीनःसउच्यते॥ अष्टाविंशत्यक्षरोयएकत्रिंशद्यापिवा॥ अतिक्रुद्धःसविज्ञेयोनिंदितःसर्वकर्मसु॥ चत्वारिंशतमारभ्यत्रिष
ष्टिर्यावताभवेत्॥ तेसर्वेमंत्रवर्णाःसुव्रीडिताःसर्वकर्मसु॥ पंचषष्ट्यक्षरायेस्युर्मंत्रास्तेभ्रांतमानसाः॥ एकोनशतपर्यंतंपंचषष्ट्यक्षरादितः॥
तेसर्वेकथितामंत्राःस्थानकुष्टानशोभनाः॥ त्रयोदशाक्षरायेस्युर्मंत्राःपंचदशाक्षराः॥ तेसर्वेविफलाज्ञेयाःशतंसार्द्धशतंतथा॥ शतद्वयंद्विनव
तिरेकहीनानथ्यापिवा॥ यावत्शतत्रयंसंख्यानिःस्नेहास्तेप्रकीर्तिताः॥ चतुःशतमथारभ्ययावद्वर्णसहस्रकं॥ अतिवृद्धःसमंत्रस्तुसर्वशास्त्र
विवर्जितः॥ सहस्रार्णाधिकामंत्राःषंडकाःपीडिताह्वयाः॥ द्विसहस्राक्षरामंत्राःखंडशःसप्तधाकृताः॥ ज्ञातव्यास्तोत्ररूपास्तेमंत्राएतेयथास्मृ
ताः॥ तथाविद्याश्चबोद्धव्यामंत्रिभिःकाम्यकर्मसु॥ दोषानिमानविज्ञाययोमंत्रंभजतेबुधः॥ सिद्धिर्नजायतेतस्यकल्पकोटिशतैरपि॥ एतान्दोषा
नविज्ञायमंत्रविद्यांभजेन्नरः॥ सिद्धिर्नजायतेतस्यकल्पकोटिशतैरपि॥ अथदोषशांतिमाहतत्रैव॥ छिन्नादिदुष्टायेमंत्रास्तंत्रेतंत्रेनिरूपि
ताः॥ तेसर्वेसिद्धिमायांतिमातृकार्णप्रभावतः॥ मातृकार्णैःपुटीकृत्यमंत्रविद्यांविशेषतः॥ शतमष्टोत्तरंपूर्वंप्रजपेत्फलसिद्धये॥ तदा
मंत्रोमहाविद्यायथोक्तफलदाभवेत्॥ मातृकापुटितंकृत्वामध्येवर्णनिधायच॥ मंत्रवर्णास्ततःकुर्याच्छोधनंमंत्रसंमतं॥ बद्धाचयोनिमु
द्रांतांसंकोच्याधारपंकजं॥ तदुत्पन्नान्मंत्रवर्णान्सर्वतश्चगतागतान्॥ ब्रह्मरंध्रावधिध्यात्वावायुमापूर्यकुंभयेत्॥ सहस्रंम जपेन्मंत्रंमंत्रदो
षोपशांतये॥ तथा॥ एषुदोषेष्वशेषेषु मायांकाममथापिवा॥ सिद्धाचादोप्रियश्चैवतद्दूषणविमुक्तये॥ तथा॥ तारसंपुटितोवापिदुष्टमंत्रोपि
सिद्ध्यति॥ यस्ययत्रभवेद्भक्तिःसोपिमंत्रोस्यसिद्ध्यति॥ तथा॥ प्रणवोमातृकादेवीहृल्लेखेत्यमृतत्रयं॥ अमृतत्रयसंयोगाद्दुष्टमंत्रोपिसिद्ध्यति
॥अथहोमार्थकुंडनिर्णयः॥ तत्रतावद्गृहनिर्णयः॥ प्रथमंभूमिनिर्णयः॥ गौतमीये॰ भूमेःपरिग्रहंकुर्याद्यावदायतनंभवेत्॥ शुक्लस्मृ

५॥तंत्रेतिग्रंथांतरे॥

२ संग्रहेतिपुस्तकांतरे॥२

ताच्चयाभूमिर्ब्राह्मीसापरिकीर्तिता॥क्षत्रियारक्तसृङ्भूमिर्हरिद्वैश्याप्रकीर्तिता॥कृष्णाभूमिर्भवेच्छूद्राचतुर्धाभूःप्रकीर्तिताः॥ब्राह्मीसर्वार्थ
सिद्धिःस्यात्क्षत्रियाराज्यदायिका॥ धनधान्यकरीवैश्याशूद्रातुनिंदिताभवेत्॥तथा० गणेशविमर्शिन्याम्० वास्तोःसंपूज्यपूर्वास्यामैशान्या
मुत्तरेथवा॥दिशिसंकल्पयेन्मंत्रीमंडपंचविधानतः॥नवहस्तप्रमाणवासप्तहस्तमथापिवा॥पंचहस्तप्रमाणंवाचतुरस्रंसमंततः॥पंचह
स्तंतुएककुंडपक्षेतदुक्तंतत्रैव॥एककुंडमतेनान्यत्पंचहस्तंगृहंभवेत्॥तदेककुंडंगृहस्योत्तरभागेप्रशस्तं॥यथा॥अथोत्तरेनयाकुंडमे
कंवेदास्रमुद्धरेत्॥लक्षहोमेतुतत्कुर्य्याद्गृहमध्येनदूषणं॥तथावसिष्ठसंहितायाम्॥वास्तोरीशानभागेतुमंडपंरचयेत्सुधीः॥षड्वाद्दशा
भिर्हस्तैःषोडशैर्वासमंततः॥चतुर्द्वारसमायुक्तंतोरणाद्यैरलंकृतं॥निबंधे० तत्त्रिभागमितेक्षेत्रेरत्निमात्रसमन्विते॥चतुरस्रांततोवे
दीमंडलायप्रकल्पयेत्॥अथप्रसंगान्नवकुंडानि॥तत्रशारदायाम्॥प्राक्प्रोक्तेमंडपेविद्वान्वेदिकायाबहिस्त्रिधा॥भागंविभज्यमध्यां
शेपूर्वादिपरिकल्पयेत्॥अष्टास्वाशासुकुंडानिरम्याकाराण्यनुक्रमात्॥चतुरस्रंयोनिमर्द्धचंद्रंत्र्यस्रंसुवर्त्तुलं॥षडस्रंपंकजाकारमष्टास्रं
तानिनामतः॥आचार्यकुंडंमध्येस्याद्गौरीपतिमहेंद्रयोः॥हस्तमात्रमितांभूमिंपूर्ववत्परिसूत्रयेत्॥समंतात्कुंडमेत तुचतुरस्रंशुभावहं॥
चतुरस्रीकृतंक्षेत्रंपंचधाविभजेत्सुधीः॥न्यसेत्पुरस्तादेकांशंकोणार्द्धार्द्धप्रमाणतः॥भ्रामयेत्कोणमानेनतथान्यदपिमंत्रवित्॥सूत्रयुग्मंततो
दद्यात्खंडयोनिनिभंभवेत्॥चतुरस्रीकृतंक्षेत्रंदशधाविभजेत्सुधीः॥एकमेकंत्यजेदंशमतऊर्द्धंचतंत्रवित्॥ज्यासूत्रंपातयेदग्रेतन्मानाद्भ्रा
मयेत्ततः॥अर्द्धचंद्रनिभंकुंडंरणीयमिदंभवेत्॥अग्रेसंमुखेप्रक्षिप्यशराकारधनुषवदितिभट्टव्याख्यानात्॥तथाच॥ज्यासूत्रंपातयेदग्रे
शरवद्भूतयोगतैः॥चतुर्धाभेदितेक्षेत्रेन्यसेदुभयपार्श्वयोः॥एकैकमंशंतन्मानादग्रतोलांछयेत्ततः॥सूत्रयुग्मंबुधःकुर्यात्त्र्यस्रंकुंडमुदाहृतं॥

७॥क्षेत्रमितिग्रंथांतरे॥७

१ शराआहुतयोयतइतिपुस्तकांतरे॥१

॥अष्टादशांशे क्षेत्रे तु न्यसेदेकं बहिर्बुधः॥ भ्रामयेत्तेन मानेन वृत्तं कुंडमुदाहृतं॥ अष्टधा विभजेत् क्षेत्रं मध्ये सूत्रस्य पार्श्वयोः॥ भागं न्यसेदेकमेकं मानेनानेन मध्यतः॥ कुर्यात्पार्श्वद्वये मत्स्यचतुष्कं मंत्रवित्तमः॥ सूत्रषट्कं ततो दद्यात्षडस्रं कुंडमुत्तमं॥ चतुरस्रीकृतं क्षेत्रं विभज्याष्टादशांशतः॥ एकभागं बहिर्न्यस्य भ्रामयेत्तेन वर्तुलं॥ वृत्तानि कर्णिकादीनां बहिस्त्रीणि प्रकल्पयेत्॥ पद्मकुंडमिति प्रोक्तं विलोचनमनोहरं॥ बहिरिति मध्ये बहिःशब्दो मध्यवाचकः॥ अन्यथा नामनेकार्थत्वादिति गुरवः॥ कर्णिकादीनां वृत्तानि॥ क्षेत्रैवं पूर्ववद्वृत्तं तन्मध्ये वर्तुलत्रयं॥ भ्राम्यैवं पंकजाकारं कारयेत्कर्णिकादिभिरिति क्रियासारवचनाच्च बहिः कुर्यादिति भट्टः॥ अन्यथा मानाधिक्यापत्तेः॥ तथा च॰ चतुरस्रेऽष्टधा भक्ते कुर्याद्वृत्तचतुष्टयं॥ कर्णिकाकेसरयोर्मध्ये तृतीय पत्रकान्यथ॥ तदग्राणि चतुर्थे स्युर्वृत्तान्येवं प्रकल्पयेत् इति भट्टः॥ पूर्वोक्तं विभजेत्क्षेत्रं चतुर्विंशतिभागतः॥ एकं भागं बहिर्न्यस्य चतुरस्रं प्रकल्पयेत्॥ अंतस्थचतुरस्रस्य कोणार्द्धार्द्धप्रमाणतः॥ तद्बाह्यचतुरस्रस्य कोणाभ्यापरिलांछयेत्॥ दिशं प्रति यथान्यायमष्टौ सूत्राणि पातयेत्॰॥ अष्टास्रं कुंडमेतद्धि तत्रविद्भिरुदीरितं॥ कुंडानां यादृशं रूपं मेखलानां च तादृशं॥ एवं प्रोक्तानि कुंडानि कथ्यते स्रुक्स्रुवौ ततः॥ प्रकल्पयेत्स्रुचं यागे वक्ष्यमाणेन वर्त्मना॥ श्रीपर्णी शिंशपा क्षीररक्षारिविध्वेकतसंगुरुः॥ गृहीत्वा विभजेद्धस्तमात्रे सूत्रं त्रिंशतांगुले॥ हस्तमात्रं बाहुमात्रं॥ तथा चागस्त्यः॥ स्रुचं बाहुप्रमाणेन होमार्थे विदधीत वै॥ विंशत्यंशे भवेत्कुंडो वेदिस्तैरष्टभिर्भवेत्॥ एकांशेन मितः कंठः सप्तभागमितं मुखं॥ वेद्यंशेन विस्तारः कंठस्य परिकीर्तितः॥ मुखं कंठसमानं स्यान्मुखे मार्गं प्रकल्पयेत्॥ कनिष्ठांगुलिमानेन सर्पिषो निर्गमाय च॥ वेदीमध्ये विधातव्या भागेनैकेन कर्णिका॥ विदधीत बहिस्तस्या एकांशेनाभितोऽवटं॥ तस्य खातं त्रिभिर्भागैर्वृत्तमध्यो शतो भवेत्॥ अंशेनैकेन परितो दलानि परिकल्पयेत्॥ मेखला मुखवेद्योः स्यात्परितोऽर्द्धांशमानतः॥ दंडमूलाग्रयोः कुंभो गुणवेदांगुलैः कृ

१॥ वहिरिति पाठांतरं॥

मात्॥गंडीयुग्मं समांशः स्यात्कुंडस्यानाह ईरितः॥षड्विंशैः पृष्ठभागे वेद्याः कूर्माकृतिर्भवेत्॥हंसस्य वा हस्तिनो वा पोत्रिणो वा मुखं लिखेत्॥मुखस्य पृष्ठभागे स्युः संप्रोक्तं लक्षणं स्रुचः॥स्रुवश्चतुर्विंशतिभिर्भागैर्वा रचयेत्स्रुवं॥द्वाविंशत्या दंडमानमंशैरेतस्य कीर्तितं॥चतुर्भिरंशैर्नाहः कर्षाद्यग्राहि तच्छिरः॥अंशद्वयेन निखनेत्स्यंके मृगपदाकृतिः॥दंडमूलाग्रयोर्गंडी भवेत्कंकणभूषितः॥स्रुवस्य विधिराख्यातः सर्वतंत्रसमन्वितः॥तथा च॥गंडीकंकणकुंभयोरिति भागुरिः। तयोरभावे तु वा सिष्टे॥पलाशपत्रे निःछिद्रे रुचिरे स्रुक्स्रुवौ तथा॰ विरच्या द्वाश्वत्थस्य पत्रे संदीप्ते होमकर्मणि॥अथ कुंडानां विशेषफलानि तत्रैव॥सर्वसिद्धिकरं पुंसां चतुरस्रमुदाहृतम्॥पुत्रप्रदं योनिकुंडमर्द्धेंद्वाभं शुभप्रदम्॥शत्रुक्षयकरं त्र्यस्रं वर्तुलं शांतिकर्मणि॥छेदमारणयोः कुंडं त्र्यस्रं चैव पद्मसन्निभम्॥पुष्टिदं रोगशमनं कुंडमष्टास्रमीरितं॥अथ काम्यहोमार्थे कुंडनियमः॥तदुक्तं सिद्धिसारस्वते॥शांतो पुष्टौ तथारोग्ये कुंडं च चतुरस्रकं॥आकर्षणे त्रिकोणं स्यादुच्चाटे वर्तुलं तथा॥मारणे च तथा योज्यं वर्तुलं मे त्रिभिः सदा॥तंत्रांतरे॥उदीच्यां पौष्टिके कुंडं वारुणे शांतिकादिषु॥उच्चाटे चानिलं कुंडं याम्ये च मरणं भवेत्॥तथा॥विप्रा णां चतुरस्रं स्याद्राज्ञां वर्तुलमिष्यते॥वैश्यानामर्द्धचंद्राभं शूद्राणां त्र्यस्रमीरितं॥चतुरस्रं तु सर्वेषां केचिदिच्छंति तांत्रिकाः॥चतुरस्रे महेशानि सर्वकर्माणि साधयेत्॥तथा॥सर्वाधिकारिकं कुंडं सर्वदं चतुरस्रकं॥गृह्यादिकरणे हस्तनियममाह॥गौतमीये॥रथ्यादि दोलिकां चैवपोतं मंडलमेव च॥मानांगुलेन कर्तव्यं नान्येनापि कदाचन॥मुष्टिरत्निप्रमाणानि यत्किंचित्कथितानि ह॥यजमानस्य कर्तव्यं नान्यस्यापि कदाचन॥तथा०॥मानक्रियायायामुक्तायामनुक्ते मानकर्तरि॥मानकृद्यजमानः स्याद्विदुषामेष निश्चयः॥चतुर्विंशत्यंगुलात्मा हस्तस्तत्रविदो विदुः॥कर्तुर्दक्षिणहस्तस्य मध्यमांगुलिपर्वणः॥मध्यस्य दीर्घमानेन मानांगुलमुदाहृतं॥यजमानसन्निधौ पुनः॥यवानां तंडुलैरेकम

६॥ एकमितिपुस्तकांतरे॥

गुलं चाष्टभिर्हरेत्॥ अदीर्घयोजिते हस्ते चतुर्विंशतिरंगुलैः॥ वयसोनुक्रमे पुनः॥ अष्टभिस्तैर्भवेज्ज्येष्ठं मध्यमं सप्तभिर्यवैः॥ कन्यसं षड्भिरुद्दि
ष्टमंगुलं मुनिसत्तम॥ सहस्रे खलु होतव्ये कुर्यात्कुंडं करात्मकं॥ द्विहस्तमयुतेतत्स्याल्लक्षहोमे चतुष्करं॥ षट्करे वेदलक्षे चाष्टकरे दशलक्षकं॥
दशहस्तं तु कोट्यां वै हस्तसंख्या व्यवस्थिता॥ दशहस्तात्परं कुंडं नास्ति होमे महीतले॥ शारदायाम्॥ कोट्यामष्टकरं स्मृतमिति द्रव्यस्य गुरुत्वा
गुरुत्वेन बोद्धव्यं॥ तथा॥ एकहस्तमितं कुंडं लक्षहोमे विधीयते॥ अत्रापि आज्यहोमे लघुद्रव्ये करवीरादिहोमे च बोद्धव्यं॥ तथा॥ मुष्टिमात्र
मितं कुंडं शतार्द्धे च प्रचक्षते॥ शतहोमे रत्निमात्रं हस्तमात्रं सहस्रके॥ द्विहस्तमयुते लक्षे चतुर्हस्तं सुदाहृतम्॥ दशलक्षे तु षड्हस्तं कोट्या
मष्टकरं स्मृतं॥ एकहस्तमिते कुंडे लक्षमात्रं विधीयते॥ लक्षाणां दशकं यावत्तावद्धस्तेन वर्द्धयेत्॥ इति यन्मानवैषम्यं तद्द्रव्यगुरुत्वागुरुत्वे बोद्ध
व्यं॥ द्विहस्तादिकुंडमानं तु॥ गौतमीये॥ पूर्वपूर्वस्य कुंडस्य कोणसूत्रं तु यद्भवेत्॥ उत्तरोत्तरकुंडानां मानं तदुदीरितं॥ तथा॥ कर्णसूत्रस्य
मानेन द्विहस्तं कुंडमुद्धरेत्॥ सर्वकुंडेषु सर्वत्र वर्द्धयेद्बुद्धिमानमुना॥ कुंडप्रकरणे विशेषमाह· गौतमीये॥ ततः कुंडं खनेत्तत्र यथाशास्त्र
विधानतः॥ त्यक्त्वा सर्पस्य गात्रं च शिरोदेशं प्रयत्नतः॥ शिरोघाते भवेन्मृत्युः पिंडेषु पितृघातनं॥ पृष्ठे चतुःखसंभूतिः क्रोडे सर्वार्थसाधनं
॥ नागशिरआदिनिर्णयो यथा॰ वास्तुप्रमाणेन तु गात्रकेन वामेन शेते खलु नित्यकालं॥ त्रिभिस्त्रिभिर्मासैः परिवर्त्य भूमौ नवांकनागं
प्रवदंति संतः॥ भाद्रादिके वासरदिक्शिरास्तान्मार्गादिकेषु त्रिषु याम्यमूर्ध्नी॥ प्रत्यक्शिराः स्यात्खलु फाल्गुनादौ ज्येष्ठादिको[3] दक्शि
राः स नागः॥ यावान्कुंडस्य विस्तारः खननं तावदीरितं॥ खाताधिके भवेद्रोगी खातहीने वसुक्षयः॥ वक्रकुंडे तु संतापो मरणं छिन्नमे
खले॥ मेखलारहिते शोको ह्यधिके वित्तसंक्षयः॥ भार्याविनाशकं कुंडं प्रोक्तं योन्या विनाकृतं॥ अपत्यध्वंसनं प्रोक्तं कुंडं यत्कंठवर्जितं॥ स

३॥ केसौम्यशिरा इति ग्रन्थांतरे॥ ३

रत्सेतिप्रत्यंतरे३

त्विकीमेखलापूर्वाद्वितीयाराजसीस्मृता॥तृतीयातामसीप्रोक्तामेखलायाविनिर्णयः॥कुंडानांमेखलास्तिस्रोमुष्टिमात्रोन्नताःक्रमात्॥ ॥
उत्सेधायामतोज्ञेयाद्व्येकार्द्धांगुलसंमिताः॥अरत्निमात्रेकुंडेषुद्वित्र्येकांगुलिकात्मकाः॥हस्तमात्रमितेकुंडेवेदाग्निनयनांगुलाः॥कुंडेद्विह
स्तेताज्ञेयावसुवेदगुणांगुलाः॥चतुर्हस्तेतुताज्ञेयावसुनर्कयुगांगुलाः॥कुंडेरसकरेतास्युःपंक्त्यष्टद्व्यंगुलाःक्रमात्॥बाहुहस्तमितेकुं
डेभानुपंक्त्यष्टकांगुलाः॥दशहस्तमितेकुंडेमनुभानुदशांगुलाः॥विस्तारोत्सेधतोज्ञेयामेखलाःसर्वतोबुधैः॥होतुरग्रेयोनिरासामुपर्य्य
श्वत्थपत्रवत्॥मेखलानांभवेदंतःपरितोनेमिरंगुलीः॥एकहस्तस्यकुंडस्यवर्धयेत्ताक्रमात्सुधीः॥दशहस्तांतमन्येषामर्द्धांगुलवशात्त्र
यकं॥एकहस्तस्यएकहस्तांतस्यनाभियोन्योरेकमानस्यदृष्टत्वात्॥गौतमीये॥प्रथमेमेखलेयोनिंकुण्डोष्ठीहोतुरग्रतः॥कुर्याद्गजोष्ठ
वत्तांतुकुंडवित्सर्वलक्षणां॥मुष्ट्यरत्न्येकहस्तानांकुंडानांयोनिरीरिता॥षट्चतुर्द्व्यंगुलायामविस्तारोन्नतिशालिनी॥एकांगुलंतुयोन्य
ग्रंकुर्यादीषदधोमुखं॥एकैकांगुलितोयोनिंकुंडेष्वन्येषुवर्द्धयेत्॰॥यवद्वयप्रमाणेनयोन्यग्रमपिवर्द्धयेत्॥गणेशविमर्शिन्याम्॥मेख
लानांबहिःस्थानंस्थलमित्यभिधीयते॥चतुरस्रस्थलारब्धंनालंमध्येसरंध्रकं॥स्थलमूलेतुसूक्ष्माग्रंतन्मानेस्यान्मनोहरं॥बाह्यस्थ
मेखलाबाह्यस्थलादारभ्यकारयेत्॥यथा॥स्थलादारभ्यनालंस्याद्योन्यामध्येसरंध्रकं॥सरंध्रकमित्युभयत्रसंबध्यते॥तदुक्तंगौतमी
ये॰स्थलादारभ्यनालंस्यात्सरंध्रंयोनिमध्यतः॥सूक्ष्माग्रंस्थूलमूलंचसरंध्रंयोनिमिष्यते॥योन्यामध्येबिलंकुर्यात्तदाज्यग्राहिसं
ज्ञकं॥मध्यतोमध्यपर्य्यंतमित्यर्थः॥तथाचवासिष्ठे॥एषोन्नतागजोष्ठीवसच्छिद्रामध्यमोन्नता॥सरंध्रमितिमध्यमेखलायामित्यर्थः॥त
थाच॰नालमेखलयोर्मध्येपरिधेःस्थापनायच॥रंध्रंकुर्यात्तथाविद्वान्द्वितीयमेखलोपरि॥परिधिस्तु॥बाहुमात्राः परिधयऋजवःस

त्वचोऽव्रणाः॥ मुष्टमरत्न्येक हस्तानां नाभिरुत्सेधईरितः॥ नेत्रवेदांगुलोपेता कुण्डेष्वन्येषु वर्द्धयेत्॥ यव द्वयक्रमेणैव नाभिं पृथगुदारधीः
॥ योनिकुंडे योनिमब्जकुंडे नाभिं च वर्जयेत्॥ नाभिक्षेत्रं त्रिधा कृत्वा मध्ये कुर्वीत कर्णिकां॥ बहिरंश द्वयेनाष्टपत्राणि परिकल्पयेत्॥ नवकुंडपक्षे
योनिनियममाह॥ सिद्धांतशेखरे॥ इंद्राग्नियमदिक्कुंडे योनिः सौम्यमुखी स्मृता॥ योनिः पूर्वमुखान्येषु पूर्वे शान्येन वा स्मृताः॥ हस्त-
मात्रं स्थंडिलं वा संक्षिप्ते होमकर्मणि॥ अंगुलोत्सेधसंयुक्तं चतुरस्रं समंततः॥ आदाय दक्षिणे पाणौ श्रुवं त्रिमधुरं हविः॥ प्राङ्मुखो वह्निजा-
यां तेजुहुयात्स्रुक्पाणिना॥ नमोंते नन मो दद्यात्स्वाहांते द्विठमेव च॥ पूजायामाहुतौ चापि सर्वत्रायं विधिः स्मृतः॥ नमोंतेति पौराणिकमंत्रप-
रं॥ तथा च ब्रह्मपुराणे ॐकारादिसमायुक्तं नमस्कारांतकीर्तितं॥ स्वनाम सर्वदेवानां मंत्र इत्यभिधीयते॥ यथा॥ इदं पाद्यं ॐ आदित्याय नमः
॥ इदमर्घ्यं ॐ आदित्याय नम इत्यादि॥ द्रव्यादीनि समुल्लिख्य पश्चादुल्लेखयेत्सुरान् इति वचनात्॥ न तु ओं आदित्याय नम इदं पाद्यं सूर्याय-
नमः इत्यादि॥ तांत्रिके नायं नियमः॥ अर्घ्यादौ वैषम्यं स्यात्किं च ह्लौं नमः ओं ग्लुं नमः इत्यत्र द्रव्यादेरुल्लेखस्यावश्यकत्वात्॥ मंत्रेणोंकारपूते-
न स्वाहांतेन विचक्षणः॥ स्वाहावसाने जुहुयाद्ध्यायन्वै मंत्रदेवतां॥ ओंकारपूतेनेत्यादि इति इदमपि वैदिकमंत्रपरं॥ अन्यथा मंत्रांतरप्र-
संगात्॥ तेन स्वाहांतमंत्रेण स्वाहांतरं न वक्तव्यं॥ श्रुवं तु पंचांगुलं त्यक्त्वा शंखमुद्रया धार्यं॥ तथा च॥ पंचांगुलं बहिस्त्यक्त्वा धारयेत् शंखमुद्रया
॥ यत्र होमे संख्या नोक्ता तत्र संख्यानुक्तौ शतं साष्टसहस्रं वा जपादिषु॥ अथ नित्यहोमपद्धतिः॥ तदुक्तं सोमभुजगावल्यां॥ नाजप्तः सिद्ध्यते
मंत्रो नाहुतश्च फलप्रदः॥ नानिष्टो यच्छते कामांस्तस्मात्त्रितयमर्चयेत्॥ पूजया लभ्यते पूजां जपात् सिद्धिर्न संशयः॥ विभूतिश्चाग्निकार्येण
सर्वसिद्धिं च विंदति॥ नीलतंत्रे॥ नित्यहोमं प्रवक्ष्यामि सर्वार्थं येन विंदति॥ सपर्यां सम्यगापाद्य बलिपूर्वं चरेद्विधिं॥ ततो जपं तर्पणं च चरेत्साधके

स्तनमः॥ बलिंवैश्वादिकंचैवब्राह्मणःसमुपाचरेत्॥ अर्घ्योदकेनसंप्रोक्ष्यतिस्रोरेखाःसमालिखेत्॥ विधिवदग्निमानीयक्रव्यादेभ्योनमस्तथा॥
मूलमंत्रंसमुच्चार्य्यकुंडेवास्थंडिलेपिवा॥ भूमौवासंस्तरेहूह्निंव्याहृतित्रिनयेणतु॥ स्वाहांतेनत्रिधाहुत्वाषडंगहवनंतथा॥ ततोदेवींसमावा
ह्यमूलेनषोडशाहुतिं॥ हुत्वास्तुत्वानमस्कृत्यविसृजेदिंदुमंडले॥ अथसंक्षेपहोमपद्धतिः॥ कुंडेवास्थंडिलेवापिवीक्षणादिभिरुक्ते
स्कृते॥ वीक्षणंमूलमंत्रेणशरेणताडनंमतं॥ तेनैवप्रोक्षणंचोक्तंवर्मणाभ्युक्षणंमतं॥ प्रागग्राउदगग्रावातिस्रोरेखाविनिर्लिखेत्॥ प्राग
ग्रेषुमुकुंदेशपुरंदरान्पूजयेत्॥ उत्तराग्रेषुब्रह्मवैवस्वतेंदून्पूजयेत्॥ ततोवह्नेर्योगपीठायनमः॥ चतुर्दिक्षुऔंवामायैनमः॥ एवंज्ये
ष्ठायैरौद्र्यैअंबि कायै॥ ततोमूलमुच्चार्य्यअंअमुकदेवताकुंडायनमः॥ ततस्तन्मध्येवागीश्वरींतत्तद्देवतास्वरूपांऋतुमतींध्यात्वासं
पूज्ययथोक्तंवह्निमानीयवीक्षणादिभिःसंस्कृत्यरमितितस्माद्वह्निमुद्धृत्यहुंफट्क्रव्यादेभ्यःस्वाहाइत्यनेनक्रव्यादांशंपरित्यज्यव
ह्निमस्त्रेणसंरक्ष्यहुमित्यवगुंठ्यरमितिधेनुमुद्रयामृतीकृत्यबाहुभ्यांसमुद्धृत्यकुंडोपरित्रिःपरिभ्राम्यमहीस्पृष्टजानुःशिवबीजंबुद्ध्या
आत्मनोभिमुखंदेव्यायोनौएनंनिःक्षिपेत्॥ ततोह्रींवह्निमूर्तयेनमः इत्यभ्यर्च्यरंवह्निचैतन्यंसंयोज्य ॐचित्पिंगलहन२पच
२सर्वज्ञाऽऽज्ञापयस्वाहेतिज्वालयेत्॥ ततोऽग्निंप्रज्वलितंवदेज्जातवेदंहुताशनं॥ सुवर्णवर्णममलंसमृद्धंविश्वतोमुखं॥ इत्युपतिष्ठेत्॥
ततोजिह्वान्यासंकुर्यात्॥ ओं अग्नेअमुकदेवतानामासीतिनामकृत्वाओंवैश्वानरजातवेदइहावहलोहिताक्षसर्वकर्माणिसाधयस्वाहा
अनेनार्घ्यादिभिःसंपूज्यअग्नेर्हिरण्यादिसप्तजिह्वाभ्योनमः॥ ओंसहस्रार्चिषेहृदयायनमः इत्यग्निषडंगेभ्योनमः॥ ओंअग्न
येजातवेदसेइत्यष्टमूर्तिभ्योनमः नेहाद्येब्रह्माद्यस्त्रेभ्योनमः॥ ततःप्रादेशमात्रंकुशाद्वयंघृतमध्येनिक्षिप्यसव्यापसव्यमध्यभागेषु

इडांपिंगलांसुषुम्नांध्यात्वाहोमंकुर्यात्॥स्रुवेणदक्षिणभागादाज्यंगृहीत्वाओंअग्नयेस्वाहा इत्यग्निदक्षिणनेत्रेजुहुयात्॥तथावामादाज्यं
गृहीत्वाओंसोमायस्वाहेतिवामनेत्रेजुहुयात्॥ततोमध्यभागादाज्यंगृहीत्वा॰ ओंअग्नीषोमाभ्यांस्वाहेत्यग्निनेत्रललाटेजुहुयात्॥तथापुन
र्दक्षिणतः श्रौंनमः इतिघृतंगृहीत्वा ॐअग्नयेस्विष्टकृतेस्वाहा इत्यग्निमुखे॥ततोव्याहृतिहोमः ओंभूःस्वाहा॥ॐभुवःस्वाहा॥ॐ
स्वःस्वाहा॥ओंवैश्वानरजातवेदइहावहलोहिताक्षसर्वकर्माणिसाधयस्वाहेत्यनेनमंत्रेणवारत्रयंजुहुयात्॥ततोऽग्नौमूलपीठपूर्वे
कंदेवतांसंपूज्यतन्मुखेघृतेनमूलमंत्रेणपंचविंशतिवारंजुहुयात्॥वह्निदेवतयोरात्मनासहैक्यंविभाव्यमूलेनैकादशाहुतीर्जुहुया
त्॥ततोमूलस्यांगदेवताभ्यःस्वाहा॥एवमावरणदेवताभ्यःस्वाहा॥शक्तेश्चेत्प्रत्येकमेकाहुतिंजुहुयात्॥ततःसंकल्पंविधायतत्तत्कल्पो
क्तद्रव्येणहोमंकुर्यात्॥ततोमूलेनपूर्णाहुतिंहुत्वासंहारमुद्रयास्वेष्टदेवतांहृदयेध्यात्वासमानीयक्षमस्वेत्यग्निंविसृज्यदक्षिणांदत्त्वाऽ
च्छिद्रावधारणंकुर्यात्॥इतिसंक्षेपहोमपद्धतिः॥ ॥अथबृहद्धोमपद्धतिः॥आचार्योऽलंकृतोयागमंडपद्वारमागत्यसामान्यार्घ्यंविधाय
द्वारपूजांचकृत्वागृहंप्रविश्यतत्तत्कल्पोक्तदेवतामैशान्यांदिशिहस्तप्रमाणांवेदिकांविधायतदुपरिघटंसंस्थाप्ययथाशक्तिसंपूज्य
वीक्षणादिभिःकुंडंसंस्कुर्यात्॥तदुक्तंब्रह्मसंहितायांहोमकांडे॥ऐशान्यांवेदिकांहस्तविस्तारोन्नतिशालिनीं॥कृत्वास्मिन्स्थापयेत्कुंभंय
थोक्तक्रमयोगतः॥तत्रसंपूजयेद्देवंयथाविध्युपचारकैः॥ततोहोमंप्रकुर्वीतदेवतासन्निधानतः॥वीक्षणंमूलमंत्रेणशरेणताडनंम
तं॥तेनैवप्रोक्षणंप्रोक्तंवर्मणाभ्युक्षणंमतं॥अस्त्रेणरक्षणंकृत्वाततःसंस्कारमारभेत्॥विशेषस्तुनीलतंत्रे॥मूलमंत्रेणकुंडानांवीक्षणंकुड राम
संस्कृतं॥ततोमूलमुच्चार्यकुंडायनमःइतिकुण्डंपूजयेत्॥तारादौतत्तद्देवतानामसमुच्चार्यकुंडायनमःइतिवदेत्॥ततःकुंडमध्येप्राग

ग्ना उदग्रगाश्चि स्त्रोरेखाः कुर्यात्॥ प्रागग्रेषु मुकुंदेशपुरंदरान्प्रादक्षिण्येन संपूज्य उदगग्रेषु ब्रह्मवैवस्वतेंदून्पूजयेत्॥ सुंदरीपक्षे तु सर्वत्र षट्कत
रीप्रयोगः॥ षट्कतारी च॥ ऐंह्रींश्रीं ऐं क्लीं सौः ई ब्रह्मणे नमः इत्यनेन पूजयेत्॥ ततः कुंडमध्ये षट्कोणं तत्र त्रिकोणं तद्बहिरष्टदलं पद्मं तद्बहिः च
तुरस्रं चतुर्द्वारसमेतं लिखित्वा तदुपरि मूलेन पुष्पांजलिं दद्यात्॥ सुंदरीपक्षे तु बालया॥ ततः सर्वाणि प्रणवेनाभ्युक्ष्य योगपीठमभ्यर्चयेत्॥ त
द्यथा॥ कर्णिकोपरि आधारशक्त्यादीन्संपूज्य अग्न्यादिकोणेषु ओं धर्माय एवं ज्ञानाय वैराग्याय ऐश्वर्याय॥ पूर्वादिदिक्षु अधर्माय अज्ञानाय अवैरा
ग्याय अनैश्वर्याय॥ मध्ये अनंताय नमः पद्माय अर्कमंडलाय द्वादशकलात्मने ॐ सोममण्डलाय षोडशकलात्मने नमः मं वह्निमंडलाय
दशकलात्मने नमः॥ ततः केसरेषु॥ पीता श्वेतारुणा कृष्णा धूम्रा तीव्रा स्फुलिंगिनी॥ रुचिरा ज्वालिनी एताः पूर्वादिदिक्षु मध्ये च पूजयेत्॥
ततो रं वह्न्यासनाय नमः॥ ततो ध्यानं॥ वागीश्वरीमृतुस्नातां नीलेंदीवरसन्निभां॥ वागीश्वरेण संयुक्तां इति ध्यात्वा ह्रीं वागीश्वराय नमः॥ ह्रीं वा
गीश्वर्यै नमः इति मंत्रेण पंचोपचारैः संपूज्य सूर्यकांतादिसंभूतं यद्वा श्रोत्रियगेहजं वह्निमानयेत्॥ सुंदरीपक्षे तु कामेश्वरं कामेश्वरीं पूज
येत्॥ गौतमीये॰ पाषाणभवमग्निं च यद्दिवारणिसंभवं॥ श्रोत्रियाणां गेहजं चैव नस्थ्यं वा थवा हरेत्॥ यदृच्छालाभसंप्राप्तो अयोग्येपागक
र्मणि॥ निरग्निब्राह्मणाल्लब्धो यद्दुर्लाभकरो भवेत्॥ क्षत्रबंधोश्च तुर्यांशं फलं दद्याद्धुताशनः॥ वैश्यशूद्राच्च विफलं जायते होमकर्मतत्॥
तस्मात्सर्वप्रयत्नेन वह्निं सुतं समाहरेत्॥ एवं वह्निं पात्रे निधाय क्रव्यादांशं परित्यजेत्॥ तंत्रे॥ द्विजातिभवनाद्वापि वह्निमानीय साधकः॥
वौषडंतेन मूलेन मंत्रितं तं विलोकयेत्॥ अग्निमावाहयेदस्त्रमंत्रेण तु रं नरं॥ हुं फडंतेन मूलेन क्रव्यादांशं परित्यजेत्॥ ततोऽग्निं वीक्षणा
दिभिः संस्कृत्य ओं दर्प्यैवैंद्रवाग्निप्र्यां भौमस्य वह्नेरैकं विभाव्य वह्नेश्चैतन्यं कल्पयामीति पावकचैतन्यं निधाय ॐकारेणाष्टोत्तरशत

भिमंत्र्य धेनुमुद्रयाऽमृतीकृत्य फडिति संरक्ष्य हुमित्यवगुंठ्य गंधपुष्पादिभिः संपूज्य रं वह्निमूर्तये नमः इति तमभ्यर्च्य कुंडस्योपरि त्रिः परि
भ्राम्य प्रणवोच्चारणपूर्वकं जानुस्पृष्टमहीतलः॥ शिवबीजधियात्मनोभिमुखं रेखायोनौ एनं निःक्षिपेत्॥ ततो वागीश्वरवागीश्वरीभ्यां
आचमनीयादिकं दत्त्वा तयागर्भे धृतं ध्यायेत्॥ वह्निरूपं तु देवतां॥ पश्चाद्गर्भस्य संस्कारार्थं प्रदद्याद्गर्भकंकणं॥ चित्पिंगल हन २ दह २ पच २ स
र्वज्ञाज्ञापय स्वाहेति मंत्रेनावह्निं ज्वालयेत्॥ ततो बद्धांजलिः सन्नग्निं प्रज्वलितं वंदे जातवेदं हुताशनं॥ सुवर्णवर्णममलं समृद्धं सर्वतो
मुखं॥ इत्यनेन वह्निमुपतिष्ठेत्॥ ततः स्वदेहे जिह्वान्यासं कुर्यात्॥ यथा लिंगे सरयूं हिरण्यायै नमः॥ पायौ षरयूं गगनायै॥ मूर्ध्नि शरयूं च
क्तायै॥ वक्त्रे वरयूं कृष्णायै॥ घ्राणे लरयूं सुप्रभायै॥ नेत्रे ररयूं बहुरूपायै॥ सर्वत्र यरयूं अतिरक्तायै॥ एताः सात्त्विको यागकर्मणि॥ काम्यक
र्मसु पद्मरागा सुवर्णा भद्रा लोहिता श्वेता धूम्रिणी करालिका एता राजसः॥ क्रूरकर्मसु विश्वमूर्तिः स्फुलिंगिनी धूम्रवर्णा मनोजवा लोहिता
कराला काली एतास्तामस्यः न्यासः स्वबीजयोगेन पूर्ववत्॥ एवं सर्वत्र बोद्धव्यं॥ वह्निरर्घीशसंयुक्ताः सौ दीर्घयांतौः सबिंदवः॥ वह्नेर्मंत्राः समुद्दि
ष्टजिह्वायां सप्तदेशिकैः॥ ततः करांगन्यासौ॥ सहस्रार्चिषे अंगुष्ठाभ्यां नमः॥ स्वस्तिपूर्णाय तर्जनीभ्यां नमः॥ उत्तिष्ठपुरुषाय मध्यमाभ्यां
वषट्॥ धूमव्यापिने अनामिकाभ्यां हुं॥ सप्तजिह्वाय कनिष्ठाभ्यां वौषट्॥ धनुर्धराय करतलकरपृष्ठाभ्यां फट्॥ सहस्रार्चिषे हृदयाय नमः
इत्यादि॥ तथा च॥ सहस्रार्चिः स्वस्तिपूर्ण उत्तिष्ठपुरुषः पुनः॥ धूमव्यापी सप्तजिह्वो धनुर्धर इति क्रमात्॥ सर्वत्र प्रणवादिः॥ ततो मूर्तिन्यासः॥ ॥
मूर्ध्नि अग्नये जातवेदसे नमः॥ दक्षांसे अग्नये सप्तजिह्वाय नमः॥ दक्षपार्श्वे ओं अग्नये हव्यवाहनाय नमः॥ दक्षकटौ ओं अग्नये अश्वोदर
जाय नमः॥ लिंगे ओं अग्नये वैश्वानरजाय नमः॥ वामकट्यां ओं अग्नये कौमारतेजसे नमः॥ वामपार्श्वे ओं अग्नये विश्वमुखाय नमः॥ वामां

६॥ स्र्यूं ष्र्यूं श्र्यूं व्र्यूं ल्र्यूं र्र्यूं य्र्यूं सप्तजिह्वा वह्नेः॥ ६॥

से ॐ अग्नये देवमुखाय नमः॥ तथा च शारदायां॥ मूर्त्तीरष्टौ ततो न्यस्येद्देशिको जातवेदसः॥ मूर्धास्यपार्श्वकट्यंघ्रुकटिपार्श्वांसकेषु च॥ जातवेदाः सप्तजिह्वो हव्यवाहनसंज्ञकः॥ अश्वोदरसंज्ञोन्यः पुनर्वैश्वानराह्वयः॥ कौमारतेजाःस्याद्विश्वमुखो देवमुखः स्मृतः॥ ताराद्याः स्वर्वन्हिसुखाङेन्ता वन्हिमूर्तयः॥ ततो वह्नेरासनं कल्पयित्वा मूर्तिं तत्र विचिंतयेत्॥ इष्टं शक्तिं स्वस्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयंतं जवाभं॰ हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्यायेद्वह्निं बद्धमौलिं जटाभिः १॥ ततो मेखलानां सुपरिशुद्धैस्तोयैः प्रतिषिच्य मेखलायां गर्भसूत्रैर्दर्भैरग्रेण मूल[illegible]नाद्वादयन्त्रिः परिवेष्टयेत्॥ ततः प्राचीवर्जं दिक्षु परिधीन्विनिःक्षिप्य तत्र प्रादक्षिण्येन ब्रह्मादिदेवताः पूज्याः॥ मेखलायां वामां ज्येष्ठां रौद्रीं अंबिकां च पूजयेत्॥ पुनर्वह्निं ध्यात्वा तत्र पीठे आवाह्यानेन मंत्रेण गंधादिभिः पूजयेत्॥ ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इदं पाद्यं वह्नये नमः इत्यादिक्रमेण॥ मध्ये षट्कोणेषु सरयूं हिरण्यायै नमः॥ षरयूं गगनायै नमः शरयूं रक्तायै वरयूं कृष्णायै लरयूं सुप्रभायै॰ ररयूं बहुरूपायै॰ यरयूं अतिरक्तायै नमः एतासामधिष्ठातृदेवतास्तु॥ तंत्रांतरे॰ अमर्त्यपितृगंधर्वयक्षनागपिशाचकाः॥ राक्षसाः सप्तजिह्वानामीरिता अधिदेवताः॥ काम्ये न मतभेदः सरयूं विश्वमूर्त्यै नमः इत्यादि॥ यद्वा गणेशविमर्शिन्यां॰ हिरण्या तप्तहेमाभा सूलपाणेर्दिशि स्थिता॥ वैडूर्यवर्णा कनका प्राचीदिशि समाश्रिता॥ अतिरक्ता रक्ताभासा वायव्यां दिशि समाश्रिता॥ बहुरूपा यथाख्याता दक्षिणोत्तरसंस्थिता॥ ततः केशरेषु अग्न्यादिकोणमध्ये दिक्षु च॥ ओं सहस्रार्चिषे हृदयाय नमः॥ स्वस्तिपूर्णाय शिरसे स्वाहा॥ ॐ उत्तिष्ठपुरुषाय शिखायै वषट्॥ ओं धूमव्यापिने कवचाय हुं॥ ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट्॥ ओं धनुर्धराय अस्त्राय फट्॥ ततः पूर्वादिदलेषु ओं अग्नये जातवेदसे नमः॥ एवं अग्नये सप्तजिह्वाय॥ अग्नये हव्यवाहनाय॥ अग्नयेऽश्वोदराय॥ ओं अग्नये वैश्वानराय॥ अग्नये कौमारतेजसे॥ अ

ग्नयेदेवमुखाय इति वह्निमूर्तीः शक्तिस्वस्तिकधारिणीः संपूज्य लोकपालान्स्वस्वदिक्षु पूजयेत्॥ ततो हस्ताभ्यां स्रुक्स्रुचौ गृहीत्वा अधोमुखौ कृ
त्वा वह्नौ त्रिवारं प्रतप्य दर्भानादाय यथाक्रमं तदग्रमूलमध्यानि शोधयित्वा दक्षिणेन ततो संप्रोक्ष्य पुनः प्रतप्य तद्दर्भानग्नौ निक्षिप्य आत्मनो दक्षि
णभागे कुशांतरे स्थापयेत्॥ ततः आज्यस्थालीमानीय अस्त्रजप्तेन वारिणा तां शोध्य तस्यामाज्यं विनिक्षिप्य वीक्षणादिभिस्तत्संस्कुर्यात् ततो वाय
व्यंऽगारसु धृत्यते पुनमः इति मंत्रेणाज्यस्थालीं निवेशयेत्॥ ततो दर्भयुगलं संदीप्य आज्ये क्षिप्त्वा अनले क्षिपेत्॥ नमः इति मंत्रेण दीप्तेन दर्भ
युग्मेनाज्यं विगाह्य तद्दर्भयुग्ममग्नौ विसर्जयेत्॥ ततः फडिति मंत्रेण घृते प्रज्वलितान्दर्भान्प्रदर्श्य तान् वह्नौ निक्षिपेत्॥ ततो घृतं गृहीत्वा पुन
रंगारान् वह्नौ संयोज्य जलं स्पृष्ट्वा दक्षिणहस्तोपरिभावेनाधोमुखेनांगुष्ठोपकनिष्ठाभ्यां प्रादेशसम्मितौ दर्भौ धृत्वा हस्तेन घृतं पवित्रीकृत्य न
मः इति मंत्रेण तत्कुशाभ्यामात्मसंमुखं घृतं प्लवनं कुर्यात्॥ ततः प्रादेशमात्रसमंग्रंथि दर्भयुग्मं घृतांतरे क्षिप्त्वा आज्यस्य द्वौ भागौ कृत्वा शुक्लकृष्णपक्षौ
स्मरेत्॥ ततो वामे इडां नाडीं दक्षिणे पिंगलां मध्ये सुषुम्णां ध्यात्वा होमं कुर्यात्॥ तद्यथा नमः इति मंत्रेण स्रुवेण दक्षिणभागादाज्यमादाय अग्नेर्द
क्षिणलोचने ॐ अग्नये स्वाहेति जुहुयात्॥ तद्वद्वामत आज्यमादाय सोमाय स्वाहेति अग्नेर्वामलोचने जुहुयात्॥ तन्मध्यादाज्यमादाय अग्ने
र्भाललोचने ॐ अग्नीषोमाभ्यां नमः इति जुहुयात्॥ ततो नमः इति मंत्रेण स्रुवेणाज्यं दक्षिणभागादादाय वह्निमुखे अग्नये स्विष्टकृते स्वाहेति
जुहुयात्॥ सर्वत्र स्वाहेति संपातः॥ ततो महाव्याहृतिहोमः॥ ॐ भूः स्वाहा॥ ॐ भुवः स्वाहा॥ ॐ स्वः स्वाहा॥ ततो वैश्वानर जातवेद इहाव
ह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इति मंत्रेण त्रिवारं हुत्वा अग्नेर्गर्भाधानादिकाः क्रियाः संपादयेत्॥ तद्यथा॥ गर्भाधानं पुंसवनं सी
मंतोन्नयनम् जातकर्म नामकरणं निष्क्रमणं अन्नप्राशनं चूडाकरणं उपनयनं महाव्रतं उपनिषत्स्नानं गोदानं उद्वाहाख्यं क्रूरकर्मणि मः

४॥ स्वाहेतियुक्तं

णांतं॥ तथा च॥ शुभे चैव विवाहांतामरणांताः क्रूरकर्मसु॥ तत्रक्रमः॥ ओं अग्नेर्गर्भाधानं कर्म संपादयामि स्वाहा इति प्रतिकर्मणि क्रमेणाष्टाहु
तीर्जुहुयात्॥ सुंदरीपक्षे तु॥ अग्नेर्गर्भाधानं कल्प यामि ऐं नमः इत्येकाहुतिं दद्यादिति कल्पसूत्रे॥ नामकरणे तु॥ मूलदेवीं समभ्यर्च्य तन्ना
मकरणाय च॥ हुनेत्पंचमबाणेन आहुतीनां त्रयं तथा॥ कामाग्निस्त्वं हुताशनेति नाम कुर्यादनंतरम्॥ ततो वह्नेः पितरौ संपूज्यात्मनि योजयित्वा
मूलाग्रमध्ये घृतप्लुताः समिधः पंच मनसा ध्यात्वा जुहुयात्॥ ततो वह्नेः पूर्वोक्तजिह्वाग्रमूर्तीनां एकैकामाहुतिं हुत्वा स्रुवेण चतुराज्यमव
दाय स्रुचि निधाय स्रुवेण तां पिधाय उत्तिष्ठन् ओं वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा वौषडित्यनेन जुहुयात्॥ त
तो विघ्नेश्वरमंत्रेण दशाहुतीर्जुहुयात्॥ तद्यथा॥ ओं स्वाहा॥ ओं श्रीं स्वाहा॥ ओं श्रीं ह्रीं स्वाहा॥ ओं श्रीं ह्रीं क्लीं स्वाहा॥ ॐ श्रीं ह्रीं क्लीं ग्लौं स्वा
हा॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद स्वाहा॥ ॐ श्रीं ह्रीं क्लीं
ग्लौं गं गणपतये वरवरद सर्वजनं मे स्वाहा॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा॥ एवं दशाहुतीर्हुत्वा पुनः समस्त
मंत्रेण चतुर्वारं जुहुयात्॥ तथा च प्रपंचसारे॥ ताराद्यैर्दशभिर्दैवि पूर्वपूर्वसमन्वितैः॥ मनुना गाणपत्येन हुनेत्पूर्वं दशाहुतीः॥ ततो देवता
याः पीठं ह्रौं समभ्यर्च्य वह्निरूपां देवतां विभाव्य पंचोपचारादिभिः संपूजयेत्॥ सुंदरीपक्षे तु षडासनमंत्रेणांगमंत्रेण च संपूज्य ऐं ह्रीं श्रीं स
मस्तप्रकटगुप्ततरसंप्रदायकुलकौलिनिगर्भरहस्यातिरहस्यपरमातिरहस्ययोगिनीचक्रश्रीपादुकां पूजयामि नमः इति विशेषः॥ ताराद्यो
तुन्नास्या दिलक्ष्म्यादिइंद्रादिवज्रादींश्च पूजयेत् इति विशेषः॥ ततो वह्निमुखे मूलेन घृतेन पंचविंशाहुतीर्जुहुयात्॥ ततो वह्निदेवत योरा
त्मनासहैक्यं विभाव्य मूलेनाज्येन एकादशाहुतीर्जुहुयात्॥ ततस्तत्तद्देवतायां घृतेनावरणदेवताया एकैकाहुतीर्जुहुयात्॥ पुनर्व्याह

कनकाख्येतिप्रत्यंतरे२
नि होमं कुर्यात् ॥ ततः संकल्पितं तत्तत्कल्पोक्तविहितद्रव्यैर्होमं कुर्यात् ॥ तद्यथा॰ बहुरूपाख्यजिह्वायां जुहुयात्सर्वकर्मणि ॥ यतः समस्त
सिद्धीनां सावित्री बहुरूपिकेति ॥ यामले ॥ कुंभमध्ये हिरण्याख्या वश्याकर्षणकर्मणि ॥ कामनीख्या स्तंभना दीरक्ताख्या द्वेषणे मता ॥ कृष्णा
ख्या मारणे शस्ता सुप्रभा शांतिकर्मणि ॥ उच्चाटनेऽतिरक्ताख्या बहुरूपा सुसिद्धिदा ॥ काम्यहोमेऽगुलिनियमस्तत्र ॥ तर्जन्यंगुष्ठयोगाच्चशं
त्यर्थं जुहुयान्नरः ॥ दाहज्वराभिचाराणां मनामांगुष्ठमुद्रया ॥ विद्वेषणोच्चाटने च मारणे च प्रशस्यते ॥ प्रदेशिनीमध्यमाभ्यां वाधोप शमनं म
हत् ॥ वपुर्मेधा तथा शांतिर्नीतिपुष्ट्यादिके तथा ॥ आकर्षणानि सर्वाणि दूरादनुगतानि च ॥ तर्जन्यनामिकायोगात्सद्य एव भवंति हि ॥ मोहनं वश्य
कामं च प्रीतिसंवर्द्धनं तथा ॥ प्रदेशिनीकनिष्ठाभ्यां सर्वमेतत्प्रसिद्ध्यति ॥ मोहनाकर्षणं चैव स्तोभणोच्चाटनं तथा ॥ कनिष्ठामध्यमांगुष्ठसंयोगेन
तु लीलया ॥ विधिमुक्तेन होमेन तथा द्रव्यानुयोगतः ॥ सर्वमंत्राः प्रसिद्ध्यंति मुद्रामंत्रप्रयोगतः ॥ ततः ओं भूरग्नये पृथिव्यै महते स्वाहा ॥ ओं भु
वो वायवेऽतरिक्षाय दिवे महते स्वाहा ॥ ओं स्वश्चंद्रमसे दिग्भ्यो नक्षत्रेभ्यो महते स्वाहा॰ ॐ भूर्भुवः स्वश्चंद्रमसे नक्षत्रेभ्यो दिग्भ्यो महते
स्वाहा ॥ ततो होमद्रव्याणि ॥ स्रुवेण स्रुचि निधाय तेनाच्छाद्य तेनाभीसंस्थाप्य ततः पूर्वमित्यादिमंत्रेण च पूर्णाहुतिं दत्वा संहारमुद्रया देवतामात्म
न्युद्वास्य पुनर्व्याहृतिभिर्हुत्वा अग्नेर्जिह्वाङ्ग॰मूर्तीनामेकैकाहुतिं दत्वा पूर्ववन्मेखलोपरि अद्भिः परिषिंच्यात्मनि संहारमुद्रया पावकं यो —
जयित्वा परिधीन्स्रुपरिस्तरणानग्नौ क्षिपेद्विशेषस्तु नैमित्तिके कर्मणि एतान्दहेत् ॥ नित्यकर्मणि न दहेत् ॥ तथा च शारदायाम् ॥ नैमित्तिके
दहेन्मंत्री नित्ये तु न दहेद्विमान् ॥ ततो दक्षिणा ॥ सुवर्णमयुते दद्याल्लक्षे दशसुवर्णकं ॥ दक्षिणा तु प्रदातव्या यथा होमे तथा जपे ॥ यदि दीक्षाङ्ग
होमः स्यात् तदा तद्देवतायाः आवरणदेवतानां प्रहोमानन्तरं आज्यान्वितैस्तिलैः कल्पविहितद्रव्यैर्वा अष्टोत्तरसहस्रं शतं वा जुहुयात् ॥

१ आस्येति वा पाठः॥१ ५ जनयेदिति पुस्तकांतरे॥५ अंधुमिति प्रत्यंतरे॥२

ततः सुधीनं दंत्तौ ढौंकं शिष्यं स्नातं कुंडांतिकमानीय दिव्यदृष्ट्या तं विलोकयन् तच्चैतन्यं गुरुरात्मनि संयोज्याध्वविशोधनं कुर्यात्॥ तद्यथा॥ कुशगुष्ठेन शिष्यपादं संस्पृश्य ॐ शोधयामि कलाध्वानं स्वाहेति आज्यान्वितैस्तिलैरष्टाहुतीर्जुहुयात्॥ लिङ्गं स्पृष्ट्वा ॐ शोधयामि तत्त्वाध्वानं स्वाहा॥ ॐ एवं नाभिं स्पृष्ट्वा ॐ शोधयामि भुवनाध्वानं स्वाहा॥ हृदयं स्पृष्ट्वा ॐ शोधयामि वर्णाध्वानं स्वाहा॥ भालं स्पृष्ट्वा ॐ शोधयामि पदाध्वानं स्वाहा॥ मूर्द्धानं स्पृष्ट्वा ॐ शोधयामि मंत्राध्वानं स्वाहा॥ सर्वत्राष्टाहुतीर्जुहुयात्॥ एवं क्रमेण तं परमशिवे संहृत्य पुनः सृष्टिवर्त्मना तं द्वाहुतिभिश्च क्रमेण पूजयेत्॥ तद्यथा॥ मन्त्राध्वा मंत्राध्वानः पदाध्वा पदाध्वानो वर्णाध्वां वर्णाध्वानो भुवनाध्वा भुवनाध्वानो तत्त्वाध्वा तत्त्वाध्वानो कलाध्वा कलाध्वानः॥ एवं क्रमेण जनयेत्॥ ततो दिव्यदृष्ट्या तं शिष्यं विलोकयन् आत्मस्थितं तच्चैतन्यं शिष्ये नियोजयेत्॥ ततः स्रुचा पूर्णाहुतिदानादिकर्म समाप्य पूर्वोक्तक्रमेणद्वैस्नाकारयेत्॥ इति होमपद्धतिः॥ अथ होमद्रव्याणां प्रमाणमभिधीयते०॥ कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतं॥ उक्तानि पंचगव्यानि तत्समानि मनीषिभिः॥ तत्सम मधुदुग्धान्नमक्षमात्रमुदाहृतं॥ दधिप्रसृतिमात्रं स्याल्लाजाः स्युर्मुष्टिसम्मिताः॥ पृथुकास्तत्प्रमाणाः स्युः सक्तवोपि तथोदिताः॥ गुडं पलार्द्धमानं स्यात् शर्करापि तथा स्मृता॥ ग्रासार्द्धं चरुमानं स्यादिक्षुः पर्वावधिः स्मृतः॥ एकैकं पत्रपुष्पाणि तथापूपानि कल्पयेत्॥ कदलीफलनारंगफलान्येकैकशो विदुः॥ मातुलुंगं चतुःखंडं पनसं दशधाकृतं॥ अष्टधा नारिकेलानि खंडितानि विदुर्बुधाः॥ त्रिधाकृतं फलं बैल्वं कपित्थं खंडितं द्विधा॥ उर्वारु कफलं होमे तंत्रे व कथितं त्रिधा॥ तथा॥ फलान्यन्यान्यखंडानि समिधः स्युर्दशांगुलाः॥ दूर्वात्रयं समुद्दिष्टं गुडूची चतुरंगुला॥ व्रीहयो मुष्टिमात्राः स्युर्मुद्गा माषा यवा अपि॥ तंडुलाः स्युस्तदर्द्धांशाः कोद्रवा मुष्टिसंमिताः॥ गोधूमा रक्तकैलैमा विहिता मुष्टिमात्रतः॥ तिलाश्चुलुकमात्राः स्युः सर्षपास्तत्प्रमाणकाः॥ शुक्तिप्रमाणं लवणं म

धान १ ३ ककरी॥ ४ विजोरा

भंक

गुगुल॥१ हिंगु १ लौंकी१

रीचस्यापिविंशतिः॥पुरंबदरमानंस्याद्रामठंतत्समंस्मृतं॥चंदनागुरुकर्पूरकस्तूरीकुंकुमानि च॥तिंतिडीबीजमानानिसमुद्दिष्टानिदेशिकैः॥अनुक्तानिहविर्द्रव्येतिलाज्यंहविरुच्यते॥तथा० वैश्वानरंस्थितंध्यायेत्समिद्धोमेषुदेशिकः॥शयानमाज्यहोमेषुनिषण्णंशेषवस्तुषु॥अस्यांतर्जुहुयाद्द्रह्मे विपश्चित्सर्वकर्मसु॥कर्णहोमेभवेद्व्याधिर्नेत्रेंधत्वमुदीरितं॥नासिकायांमनःपीडांमस्तकेधनसंक्षयः॥यतःकाष्ठंततःश्रोत्रंयतोधूमोत्रनासिका॥यत्राल्पज्वलनंनेत्रंयतोंगारस्ततःशिरः॥यत्रप्रज्वलिताज्वालाजिह्वासौजातवेदसः॥स्वर्णसिंदूरबालार्ककुंकुमक्षौद्रसन्निभः॥सुवर्णरेतसोवर्णःशोभनःपरिकीर्तितः॥भेरीवारिदहस्तींद्रनिनदोग्निःशुभावहः॥नागचंपकपुन्नागपाटलीयूथिकानिभः॥पद्मेंदीवरकल्हारसर्पिर्गुग्गुलुसन्निभः॥पावकस्यशुभोगंधःसुक्तस्तत्ववेदिभिः॥प्रदक्षिणास्त्यक्तकंपाःशुभ्राभाःशिखिनःशिखाः॥शुभदायजमानस्यराज्यस्यापिविशेषतः॥कुंदेंदुधवलोधूम्रोवह्नेःप्रोक्तःशुभावहः॥कृष्णःकृष्णगतेर्वर्णोयजमानविनाशकृत्॥श्वेतोराज्यंदहत्याशुवायसःस्वरसन्निभः॥खर स्वरसमोवह्नेर्ध्वनिःसर्वविनाशकृत्॥पूतिगंधोहुतवहोहोतुर्दुःखप्रदोभवेत्॥छिन्नाहूनाशिखाकुर्यान्मृत्युधनपरिगृहम्॥शुकपक्षनिभोधूमःपारावतसमप्रभः॥हानिंतुरगजातीनांगवांचकरुतेचिरात्॥एवंविधेषुदोषेषुप्रायश्चित्तायदेशिकः॥मूलेनाज्येनजुहुयात्पंचविंशतिमाहुतीः॥ इतिहोमप्रकरणंसमाप्तम्॥ अथषट्कर्मलक्षणंशारदायाम्॥ ॥अथाभिधास्येतंत्रेस्मिन्सम्यक् षट्कर्मलक्षणं॥सर्वतंत्रानुसारेणप्रयोगफलसिद्धिदं॥शांतिवश्यस्तंभनानिविद्वेषोच्चाटनेततः॥मारणांतानिशंसंतिषट्कर्माणिमनीषिणः॥रोगकृत्याग्रहादीनांनिरासःशांतिरीरिता॥वश्यंजनानांसर्वेषांविधेयत्वमुदीरितं॥प्रवृत्तिरोधःसर्वेषांस्तंभनंतदुदाहृतं॥स्निग्धानांद्वेषजननंमिथोविद्वेषणंमतम्॥उच्चाटनंस्वदेशादेर्भ्रंशनंपरिकीर्तितं॥प्राणिनांप्राणहरणंमारणं तदुदाहृतं॥स्वदेवता

२॥शमनमितिप्रत्यंतरे॥२

दिक्कालादीन्ज्ञात्वा कर्माणि साधयेत्॥ रतिर्वाणी रमा ज्येष्ठा दुर्गा काली यथाक्रमात्॥ षट्कर्मदेवताः प्रोक्ताः कर्मादौ ताः प्रपूजयेत्॥ ईशचंद्रेंद्रनिर्ऋतिवाय्वग्नीनां दिशो मताः॥ सूर्योदयं समारभ्य घटिकादशकं क्रमात्॥ ऋतवः स्युर्वसंताद्याः अहोरात्रं दिने दिने॥ वसंतग्रीष्मवर्षाख्यशरद्धेमन्तशैशिराः॥ यद्वा॥ अर्द्धरात्रं शरत्कालो हेमंतश्च प्रभातकं॥ पूर्वाह्णे च वसंतः स्यान्मध्याह्ने ग्रीष्म एव च॥ प्रावृट्कालो पराह्णः स्यात्प्रदोषः शैशिरः स्मृतः॥ अथवा॰ उषायोगे च हेमंतः प्रभाते शिशिरागमः॥ प्रहरार्द्धे वसंतश्च ग्रीष्मो मध्यंदिनागमे॥ तुर्ययामे च वर्षाख्यः शरदस्तंगते रवौ॥ हेमंतः शांतिके प्रोक्तो वसंतो वश्यकर्मणि॥ शिशिरः स्तंभने ज्ञेयो विद्वेषे ग्रीष्म ईरितः॥ प्रावृडुच्चाटने ज्ञेयो शरन्मारणकर्मणि॥ चामुंडाकल्पे॥ जपेत्पूर्वेमुखो वश्ये दक्षिणे चाभिचारके॥ पश्चिमे धनदं प्रोक्तमोत्तरं शांतिके मतं॥ तथाभिचारे कार्यां च दक्षिणाप्लवगा मही॥ वसनं लोहितं प्रोक्तं उष्णीषं लोहितं स्मृतम्॥ भूषणं लोहद्रव्येण वामेन पूजनादिकं॥ नरस्नायुविशेषेण मारणे रज्जुरीरिता॥ मृतस्यायुद्धस्मून्यस्य दशनैर्गर्धभस्य च॥ कृत्वा समालां जप्यं शत्रूणां वधमिच्छता॥ भगंतेभश्लरामालाभिर्जपेदाकर्षकर्मणि॥ साध्यकेशसूत्रप्रोतैः स्फुरंगदशनोद्भवैः॥ अक्षमालां समासाद्य विद्वेषोच्चाटने जपेत्॥ तिथिनियमस्तु॰ पंचमी च द्वितीया च तृतीया सप्तमी तथा॥ बुधेज्यवारसंयुक्ता ज्ञेया विद्वेषकर्मणि॥ कृष्णा चतुर्दशी तद्वदष्टमी मंदवारका॥ उच्चाटने तिथिः शस्ता प्रदोषे च विशेषतः॥ चतुर्दश्यष्टमी कृष्णा ह्यमावास्या तथैव च॥ भानुभौमदिनोपेता शस्ता मारणकर्मणि॥ बुधचंद्रदिनोपेता पंचमी दशमी तथा॥ पौर्णमासी च विज्ञेया तिथिः स्तंभनकर्मणि॥ शुभग्रहोदये कुर्यात् शुभानि चाशुभोदये॥ रौद्रकर्माणि रिक्तार्के मृत्युयोगे च मारणं॥ अथासनं॥ पद्मासनं स्वस्तिकं भूयो विकटं कुक्कुटं पुनः॥ वज्रं भद्रकमित्याहुरासनानि मनीषिणः॥ पद्मासनं तु संयोज्य जानू वीरं नरे करौ॥ विन्यस्य भूमौ संस्थाप्य व्योमस्थं कुक्कुटासनं॥ अन्यानि वक्तव्यानि॰ ॥ षण्मुद्राः क्रमतो ज्ञेयाः पद्मपाशगदाह्वयाः॥ मुशलाशनिखड्गाख्याः शांतिका

६॥ दंतमणिभिरितिप्रत्यंतरे॥

४॥ शनिभौमेतिप्राचीनतरपुस्तके॥४

द्विषुकर्मसु॥जलंशांतिविधौशस्तंवश्येवह्निरुदीरितः॥स्तंभनेपृथिवीशस्ताविद्वेषेव्योमकीर्तितं॥उच्चाटनेस्मृतोवायुर्भूयोग्निर्मारणेमतः॥तत्तद्भूतोदयेसम्यक्तत्तन्मंडलसंयुतम्॥तत्तत्कर्मविधातव्यंमंत्रिणानिश्चितात्मना॥शीतांशुसलिलंसोणीव्योमवायुहविर्भुजां॥वर्णाःस्युर्मंत्रबीजानिषट्कर्मसुयथाक्रमं॥ग्रथनंचविदर्भश्चसंपुटोरोधनंतथा॰योगःपल्लवइत्येतेविन्यासाःषट्सुकर्मसु॥मंत्रार्णांतरितान्कृत्वासाध्यवर्णान्यथाविधिः॥ग्रथनंतद्धिजानीयात्प्रशस्तंशांतिकर्मणि॥मंत्रार्णद्वयमध्यस्थसाध्यनामाक्षरंलिखेत्॥विदर्भएषविज्ञेयोमंत्रिभिर्वश्यकर्मणि॥आद्यावंतेचमंत्रःस्यान्नाम्नोसौसंपुटःस्मृतः॥एषस्यात्स्तंभनेशस्तइत्युक्तोमंत्रवेदिभिः॥नाम्नआद्यंतमध्येषुमंत्रःस्याद्रोधनंमतं॥विद्वेषणविधानेतुप्रशस्तमिदमुत्तमं॥मंत्रस्यांतेभवेन्नामयोगःप्रोच्चाटनेमतः॥अंतेनाम्नोभवेन्मंत्रःपल्लवोमारणेमतः॥सितरक्तपीतमिश्राःकृष्णाधूम्राःप्रकीर्तिताः॥वर्णतोमंत्रसंप्रोक्तादेवताःषट्सुकर्मसु॥मंत्राणांलेखनद्रव्यंचंदनंरोचनंनिशा॥गृहधूमश्चितांगारोमारणेऽसृविषाणिच॥श्येनाऽग्निलोणपिंडानिधत्तूरकरसःशुभः॥गृहधूमस्त्रिकटुकंविषाष्टकमुदीरितं॥देवताकालमुद्रादीन्सम्यक्ज्ञात्वाविचक्षणः॥षट्कर्माणिप्रयुंजीतयथोक्तफलसिद्धये॥अथकुलार्णवेपि॰॥उच्चाटनेवषट्प्रोक्तोहुंफडंतश्चमारणे॥स्तंभनेचनमःप्रोक्तःस्वाहाशांतिकपौष्टिके॥होमतर्पणयोःस्वाहान्यासपूजनयोर्नमः॥मंत्रांतेयोजयेन्मंत्रीजपकालेयथास्थितिः॥अस्यार्थः॥एतानितत्तत्कर्माणिजपकालेमंत्रांतेयोजयित्वामंत्रंजपेत्॥होमादिषुनायंनियमः इत्याह होमेतिकेचित्॰ तन्न अग्निकार्येवदेत्स्वाहानमः सर्वत्रचार्चने॥शांतिपौष्टिवश्येषुद्वेषाकृष्ट्युच्चाटनमारणे॥स्वधास्वाहावषट्हुंचवौषट्फट्योजयेत्क्रमात्॥वश्याकर्षणसंतापज्वरेस्वाहाप्रकीर्तयेत्॥क्रोधोपशमनेशांतौप्रीतौयोजयेन्नमोबुधैः॥वौषट्सम्मोहनोद्दीपपुष्टिमृत्युंजयेषुच॥फट्कारंछेदनेहुंचफट्विघ्नग्रहनिपातने॥पुष्टौचाप्यायनेवौषट्गेध

६।चित्रक ६॥पित्तानि॥६

६॥ स्वेडादीति प्रत्यंतरे॥

नेसलिलीकृतौ॥ हुंकारं प्रीतिनाशे च छेदने मारणे तथा॥ उच्चाटने च विद्वेषे वषट् पंचगवीकृतौ॥ कुंडोद्दीपनकार्येषु लाभालाभे वषट् स्मृतम्॥ ॥इति विशेषवचनाद्धोमेप्येवं विधिः॥ शांतिकादौ पात्रादिनियमस्तत्रैव॥ शांतिके राजतं ताम्रं भूर्जपत्रं तु वश्यके॥ सर्वकार्येषु सौवर्णं क्रूरे स्यात्प्रेतकर्पटं॥ त्रिगंधं शांतिके प्रोक्तं पंचगव्यं तु वश्यके॥ सर्वकार्येऽष्टगंधं स्यात् क्रूरे चाष्टविषाणि च॥ शांतिके लेखनी दूर्वा वश्यादौ शिखिपुच्छिका॥ हेम्न सर्वाणि कार्याणि क्रूरे स्यात्काकपुच्छिका॥ गृहेषु शांतिकर्म स्याद्वश्यं च चंडिकागृहे॥ देवालये च सर्वाणि श्मशाने क्रूरकर्म च॥ अथ भूतानामुदयः॥ दंडाकारा गतिर्भूमेः पुटयोरुभयोरपि॥ तोयस्य पावकस्योर्ध्वं गतिस्तिर्यङ्नभस्वतः॥ गतिर्व्योम्नो भवेन्मध्ये भूतानामुदयः स्मृतः॥ धारणे रुदये कुर्यात्स्तंभने वशमात्मवित्॥ शांतिकं पौष्टिकं कर्म तोयस्य समये वसोः॥ मारणादीनि मरुतो विपक्षोच्चाटनादिकं॥ सैन्यादिनाशने शस्तमुदये च विहायसः॥ भूतानां मण्डलानि [illegible] दिवस्तत्र षड्बिंदुमाजितं मातरिश्वनः॥ त्रिकोणं स्वस्तिकोपेतं वह्नेरर्द्धेंदुसंयुतम्॥ अंभोजमंभसो भूमेश्चतुरस्रं सवज्रकं॥ तत्तद्भूतसमाभानि मंडलानि विदुर्बुधाः॥ वर्णाः स्वैरं चितान्याहुः स्वस्वनामावृतान्यपि॥ स्वच्छं वियन्मरुत्कृष्णो रक्तोग्निर्विषदं पयः॥ पीता भूमिरित्यादि॥ प्रयोगानंतरं कर्तव्यमाह कुलार्णवे॥ एकलक्षं जपेन्मंत्रं ध्यानन्याससमन्वितं॥ प्रयोगदोषशांत्यर्थमात्मरक्षार्थकारणं॥ न चेत्फलं च नाप्नोति देवताशापमाप्नुयात्॥ यत्तु न शस्तं मारणं कर्म कुर्याच्चेदयुतं जपेत्॥ तत्तु प्रायश्चित्तपरं॥ अथ मृतवत्साबंध्याप्रशमनविधिः॥ अथेशानी प्रवक्ष्यामि कुब्जिकातंत्रमुत्तमं॥ रक्तमाद्री च षष्ठी च डाकुरो जलकुमारकः॥ चतुर्विधो बाधकः स्यान्मुनिभिः परिकीर्तितः॥ तेषां स्वभावं वक्ष्यामि यथाशास्त्रं निशाम्यहं॥ एतेषां सफलं कार्यं जनैः संततिकांक्षया॰ निःसारणं स्थापनं च बलिदानं विशेषतः॥ कर्तव्यं गुरुवाक्येन ज्ञात्वा शास्त्रस्य लक्षणं॥ चतुर्विधो बाधकः स्याज्जायते ऋतुकालतः॥ व्यथोत्कटस्तथा नाभेरधः पार्श्वे स्तने तथा

लांछितं॥७

॥रक्तमाद्रिप्रदोषेण जायते फलहीनता॥ नेत्रे ह्रस्वे भवेत्तस्या ज्वालायोनौ विशेषतः॥ नानासंयुक्तरक्तं च षष्ठीनां दूषणं भवेत्॥ उद्वेगो गुरुता देहे रक्त
स्रावो भवेद्बहु॥ नाभेरधो भवेत् शूलं डाकुरः सन्नबाधकः॥ सशूला च सगर्भा च सूक्ष्मदेहा स्यरक्तता॥ जलकुमारस्य दोषेण जायते फलहीन
ता॥ मासैकं वा द्वयं वापि ऋतुहीना भवेद्यदि॥ रक्तनाड्याप्रदोषेण जायते फलहीनता॥ मासैकेन भवेद्यस्या ऋतुस्नानद्वयं तथा॥ मलिना रक्त
योनिः स्यात्षष्ठीनां दूषणं भवेत्॥ मासत्रयं चतुर्थ्यां वा ऋतुहीना भवेद्यदि॥ कृशांगी करपाणिः स्याज्ज्वालाडांकुरदूषणं॥ सदाकुद्धा भवेत्तेनब
हुकालऋतुस्तथा॥ गुरुस्तनी स्वल्परक्ता जलकुमारस्य दूषणं॥ अथ प्रशमनविधिः॥ त्रिकोणमथ षट्कोणं नवकोणं मंडलाकृति॥ यंत्रं तत्र स
मालिख्यावाहयेन्मंत्रपूर्वकं॥ षष्ठिमातृकयो ध्यानं गौरांगीं शशिशेखरां॥ स्वस्तिकास्ते भयवरापुत्रस्तेय भुजद्वयां॥ ध्यायेत्त्रिजगतां धात्रीं सू
तिकालयवासिनीं॥ अथ डांकुरकुमारयो ध्यानं॥ शुक्लवर्णं द्विबाहुं च सूतिकागृहसंस्थितं॥ स्त्रीरजःपापिनं शांतं भजे त्रिभुवनेश्वरि॥ षोडशोप
चारैस्तु पूजयेत्त्रिदिनावधिः॥ सुवर्णरौप्यताम्रादि पट्टवस्त्रादिभूषणैः॥ अष्टोत्तरशतं मंत्रं सहस्रं वापि भैरव॥ एवं पूजादिकं कृत्वा बलिं दद्या
द्विचक्षणः॥ बलिं तु त्रिविधं दद्यात्खभूजलचरं तथा॥ बलिं दत्वा प्रयत्नेन भस्म यो दोषधं शुचिः॥ ॐ मां यां तथा लक्ष्मी हुं फट् स्वाहांतिके मनुः
॥जपेदष्टोत्तरशतं रक्तमातृविधिविद्बुधः॥ तारं काम बीजयुग्मं फट् स्वाहांतो मनुर्मतः॥ मंत्रोयं षष्ठिकादेव्याः पुत्रसिद्धिप्रदायकः॥ ओं ह्रीं वा
विमलाबीजयुग्मं देविरलयोगिनीमनुः॥ स्वाहांतो यं महामंत्रो डांकुरस्य तु वै जपेत्॥ तारं शूलाय वज्रेति हस्तायन दनं नर॥ स्वाहांतो य
मनुर्देवि जलकुमारस्य निश्चितम्॥ स्नानकाले समुत्पन्ने देयमौषधमुत्तमं॥ रक्तकार्पासमूलं च नागदानं तथैव च॥ विटबलापार्श्वमूलं म
रीचेन समन्वितं॥ देयं दिनत्रयं यावदशुचिः स्याद्वरांगना॥ स्नानोपरि च दातव्यो वार्तवयाः क्षीरमुत्तमं॥ एकविंशद्दिनं यावद्दुग्धेन सह मेथिकां

५॥ ॐ ह्रीं श्रीं हुं फट् स्वाहा॥५॥

५ कंवाव ५ ४ तेजपात-मूल॥ ४ सतावरि॥ ५ ४ असगंध ४ गेंहू ५ मधु॥
॥मेथीतोलकमेकंचखंडकंतोलकद्वयं॥घृततोलकमेकंचपिबेद्दुग्धेनमिश्रितं॥मृतवत्सामृतगर्भाकाकवंध्यातथैवच॥पुत्रहीनाचवंध्या
चपाचनैवप्रकीर्तिता॥संहरेत्सर्वदोषांश्चमेथीभक्षणमुत्तमं॥नाडीशुद्धायांस्त्रियामपरस्त्रुतुकालमिदमौषधंदेयं॥अश्वगंधवदव्याले
मूलंलक्ष्मचमूलकं॥भक्षयेत्सप्तरात्राणिदुग्धंपिष्टापुनःपुनः॥अवश्यंसंततिस्तस्याःपुंहीनागर्भधारिणी॥इतिकुब्जिकातंत्रेभैरवभैरवी
संवादेवंध्याप्रशमनविधिः॥अथपुंवंध्याप्रशमनविधिः॥तेजमूलीशतंमूलीभूरिकूष्मांडमेवच॥अश्वगंधाचगोधूमःशाल्मलेःकुड्मलंतथा
॥गोक्षुरंवानरीबीजंसम्यगानीयसाधकः॥कोकिलाक्षीचकाकोलीसमभागंत्रिभिःफलैः॥पिष्ट्वामहिषसर्पीभिर्मोदकंशर्करायुतं॥माक्षिकेनस
मायुक्तंगंधद्रव्यसमन्वितं॥मोदकंसमदंनामपुंवंध्यत्वविनाशनं॥अनुपानंघृतंदुग्धंपक्षिणोमांसभक्षणं॥क्षीणशुक्रोप्यशुक्रश्चमंददृष्टिस्तथैव
च॥बलहीनोक्षीणदेहोवराकपारुष्यसंकुलः॥बहुदारश्चवृद्धश्चकन्यासंततिरेवच॥भक्षयेदौषधंमासेदेहोपितरुणायते॥इतिश्रीभैरवीतं
त्रेपुंवंध्याप्रशमनोनाम विधिः॥अथस्त्रीपुंसोःशुद्धिः॥सार्द्धहस्तपरिमितांवेदिकांकृत्वातत्रकूर्मपृष्ठंसंस्थाप्यतदुपरिसिंदूरेणकूर्मंनिधायतत
त्रह्रींइतिबीजत्रयंलिखित्वातत्रस्त्रियंपूर्वाभिमुखींसंस्थाप्यचतुर्दिक्षुकांडानचतुरःसमारोप्यसप्तधासूत्रेणवेष्टयित्वाहुतिश्वेतसर्षपैरक्षांवि
धायपंचगव्यादिभिःस्नापयेत्॥तत्रप्रथमंपंचगव्यादिभिःॐह्रींइतिगोमूत्रेणक्रांइतिगोमयेनॐइतिदुग्धेनहुंइतिदध्नाक्रोंमितिकुशोद
केनशर्करयाचकंइतिघृतेनह्रींमितिसर्वौषध्यामहौषध्याचकमितिगंगामृत्तिकयाचशंखजलेनताम्रपात्रोदकेनचपुष्पजलेनचपंचर
त्नधान्योदकेनदूर्वायाःपुनःसर्वमेकीकृत्य॥ॐह्रींह्रींइतिमंत्रेणसहस्रधारयास्नापयेत्॥ततस्तांस्त्रियंस्थानांतरेनीत्वापरिधापयित्वापूर्वा
भिमुखींकृत्वापंचगव्यंपाययेत्॥एतदनंतरंसाओषधंपिबतिततोरक्तनारिकेलमादायतत्रसिंदूरेणह्रीं ॐह्रींइतिबीजत्रयंलिखित्वातस्याः

क्रोडे स्थापयेत् द्वादशदिनं यावत्॥ इति स्त्रीपुंसोः शुद्धिः प्रयोगः समाप्तः॥ वाराहीतंत्रे॥ प्रणवं चादौ जप्त्वा स्तोत्रं वा संहितां पठेत्॥ अंते च प्र-
णवं दद्यादित्युवाचादिपुरुषः॥ सर्वपाठे च विज्ञेयो ह्यन्यथा निष्फलं भवेत्॥ इत्यादीनि स्तवकवचानि निरूप्यंते॥ ॥तत्रादौ भुवनेश्वरीस्तोत्रम्॥
ॐ॥ अथानंदमयीं साक्षाच्छब्दब्रह्मस्वरूपिणीं॥ ईडे सकलसंपत्त्यै जगत्कारणमंबिकां॥१॥ आद्यामशेषजननीमरविंदयोनेर्विष्णोः शि-
वस्य च वपुः प्रतिपादयित्रीं॥ सृष्टिस्थितिक्षयकरीं जगतां त्रयाणां स्तुत्वा गिरं विमलयाप्यहमंबिके त्वां॥ पृथ्व्या जलेन शिखिना मरुता-
वरेण होत्रेंदुना दिनकरेण च मूर्तिभाजः॥ देवस्य मन्मथरिपोरपि शक्तिमत्ता हेतुस्त्वमेव खलु पर्वतराजपुत्रि॥ त्रिस्रोतसः सकलदेवसम-
र्चिताया वैशिष्ट्यकारणमवैमि तदेव मातः॥ त्वत्पादपंकजपरागपवित्रितासु शंभोर्जटासु सततंपरि वर्तनं यत्॥ आनंदयेत्कुमुदिनीमधिपः
कलानां नान्यामिनः कमलिनीमथ नेतरां वा॥ एकस्य मोहनविधौ परमेकइष्टं त्वं तु प्रपंचमभिनंदयसि स्वदृष्ट्या॥ आद्याप्यशेषजगतां नवयौ-
वनासि शैलाधिराजतनयाप्यतिकोमलासि॥ त्रय्याः प्रसूरपि तया न समीक्षितासि ध्येयासि गोरिमनसो न पथि स्थितासि॥ आसाद्य जन्म मनुजेषु
चिरादुरापं तत्रापि पाटवमवाप्य निजेंद्रियाणां॥ नाभ्यर्चयंति जगतां जनयित्रि ये त्वां निःश्रेणिकाग्रमधिरुह्य पुनः पतंति॥ कर्पूरचूर्णहिम-
वारिविलोडितेन ये चंदनेन कुसुमैश्च सुगंधिगंधैः॥ आराधयंति हि भवानि समुत्सुकास्त्वां ते खल्वशेषभुवनाधिभुवः प्रथंते॥ आविश्य मध्य-
पदवीं प्रथमे सरोजे सुप्ताहिराजसदृशी विरचय्य विश्वं॥ विद्युल्लतावलयविभ्रममुद्वहंती पद्मानि पंच विदलय्य समश्नुवाना॥ तन्निर्गतामृत-
रसैः परिषिक्तगात्री मार्गेण तेन निलयं पुनरप्यवाप्ता॥ येषां हृदि स्फुरसि जातु न ते भवेयुर्मातर्महेश्वरकुटुंबिनि गर्भभाजः॥ आलंब्यकुंतलभरा-
मभिरामवक्त्रामापीवरस्तनतटीं तनुवृत्तमध्यां॥ चिंताक्षसूत्रकलशालिखिताढ्यहस्तामावर्तयामि मनसा तव गौरि मूर्तिं॥ आस्थाय योगमव-

४ सुजातेति प्रत्यंतरे॥४

तंत्रेतिप्रत्यंतरे ५

जित्वाचवैरिषड्वर्गमाबध्यचेंद्रियगणंमनसिप्रसन्ने॥पाशांकुशाभयवराढ्यकरांसुवक्त्रामालोकयंतिभुवनेश्वरियोगिनस्त्वां॥उत्तप्तहाटकनिभांकरिभिश्चतुर्भिरावर्जितामृतघटैरभिषिच्यमाना॥हस्तद्वयेननलिनेरुचिरेवहंतीपद्मापिसाभयवराभवसित्वमेव॥अष्टाभिरुग्रविविधायुधवाहिनीभिर्दोर्वल्लरीभिरधिरुह्यमृगाधिराजं॥दूर्वादलद्युतिरमर्त्यविपक्षपक्षान्न्यक्कुर्वतीत्वमसिदेविभवानिदुर्गा॥आविर्निदाघजलशीकरशोभिवक्त्रांगुंजागणेनपरिकल्पितहारयष्टिं॥पीतांशुकामसितकांतिमनंगतंत्रामाद्यांपुलिंदतरुणीमसकृत्स्मरामि॥हंसैर्गतिक्वणितनूपुरदूरकृष्टैर्मूर्तैरिवार्थवचनैरनुगम्यमानौ॥पद्माविवोर्ध्वमुखरूढसुजातनालौश्रीकंठपत्निशिरसाविदधेतवांघ्री॥द्वाभ्यांसमीक्षितुमतृप्तिमतेवदृग्भ्यामुत्पाद्यभालनयनंवृषकेतनेन॥सांद्रानुरागतरलेननिरीक्ष्यमाणौजंघेशुभेअपिभवानिजवाननतोस्मि॥ऊरूस्मरामिजितहस्तिकरावलेपौस्थौल्येनमार्दवतयापरिभूतरंभौ॥श्रोणीभरस्यसहनौपरिकल्प्यदत्तौस्तंभाविवांबवयसातवमध्यमेन॥श्रोण्यौस्तनौचयुगपत्प्रथयिष्यतोच्चैर्बाल्यात्परेणवयसापरिहृत्तसारः॥रोमावलीविलसितेनविभाव्यमूर्तिर्मध्यस्तवस्फुरतुमेहृदयस्यमध्ये॥सख्युःस्मरस्यहरनेत्रहुताशशांत्यैलावण्यवारिभरितंनवयौवनेन॰आपाद्यदत्तमिवपल्वलमप्रधृष्यंनाभिंकदापितवदेविनविस्मरेयं॥ईशोपगूहपिशुनंभसितंदधानेकाश्मीरकर्दमममूस्तनपंकजेते॥स्नातोत्थितस्यकरिणःक्षणलक्ष्यफेनौसिंदूरितौस्मरयतःसमदस्यकुंभौ॥कंठातिरिक्तगलदुज्ज्वलकांतिधाराशोभौभुजौनिजरिपोर्मकरध्वजेन॥कंठग्रहायरचितौकिलदीर्घपाशौमातर्ममस्मृतिपथंनविलंघयेतां॥नान्यायतंरचितकंबुविलासचौर्यंभूषाभरेणविविधेनविराजमानं॰कंठंमनोहरगुणंगिरिराजकन्येसंचिंत्यतृप्तिमुपयामिकदापिनाहं॥अत्यायताक्षमभिजाततललाटपट्टंमंदस्मितेनदरफुल्लकपोलरेखं॥बिंबाधरंवदनमुन्नतदीर्घनासंयस्तेस्मरत्यसकृदंबसएवजातः॥आविस्कषा

६॥ सख्यास्मरस्यहरनेत्रहुताशभीरोरितिपुस्तकांतरे॥६

रकरलेखमनल्पगंधपुष्पोपरिभ्रमदलिव्रजनिर्विशेषं॥ यश्चेतसा कलयतेनवकेशपाशं नस्यस्वयं गलति देवि पुराणपाशः॥ स्तुतिसुचरितपा
कं श्रीमतां स्तोत्रमेतत्पठति य इह मर्त्यो नित्यमार्द्रांतरात्मा॥ स भवति पदमुच्चैः संपदां पादनम्रक्षितिपमुकुटलक्ष्मीलक्षणानां चिराय॥ ॥
इति भुवनेश्वरीस्तोत्रं समाप्तम्॥ ॥ ॥ अथास्याः कवचं रुद्रयामले॥ श्रीदेव्युवाच॰॥ भुवनेश्वर्याश्च देवेश या या विद्याः प्रकाशिताः॥ श्रुतास्त्वाधिग
ताः सर्वाः श्रोतुमिच्छामि सांप्रतं॥ त्रैलोक्यमंगलं नाम कवचं यत्पुरोदितं॥ कथयस्व महादेव मम प्रीतिकरं परं॥ ईश्वर उवाच॥ पार्वति शृणु व
क्ष्यामि सावधानावधारय॥ त्रैलोक्यमंगलं नाम कवचं मंत्रविग्रहं॥ सिद्धविद्यामयं देवि सर्वैश्वर्यसमन्वितम्॥ पठनाद्धारणान्मर्त्यस्त्रैलोक्यै
श्वर्यभाग्भवेत्॥ त्रैलोक्यमंगलस्यापि कवचस्य ऋषिः शिवः॥ छंदो विराट् जगच्छक्ती देवता भुवनेश्वरी॥ धर्मार्थकाममोक्षेषु विनियोगः
प्रकीर्तितः॥ ह्रीं बीजं मे शिरः पातु भुवनेशी ललाटकं॥ ऐं पातु दक्षनेत्रं मे ह्रीं पातु वामलोचनं॥ श्रीं पातु दक्षकर्णं मे त्रिवर्णात्मा महेश्वरि॥ वाम
कर्णं सदा पातु ऐं घ्राणं पातु मे सदा॥ ह्रीं पातु वदनं देवी ऐं पातु रसनां मम॥ वाक् त्रिपुरा त्रिवर्णात्मा कंठं पातु परात्मिका॥ श्रीं स्कंधौ पातु निय
तं ह्रीं भुजौ पातु सर्वदा॥ क्लीं करौ त्रिपुटा पातु त्रिपुरैश्वर्यदायिनी॥ आं पातु हृदयं ह्रीं मे मध्यदेशं सदावतु॥ क्रौं पातु नाभिदेशं मे त्र्यक्षरी भुवने
श्वरी॥ सर्वबीजं सदा पृष्ठं पातु सर्ववशंकरी॥ ह्रीं पातु गुह्यदेशं मे नमो भगवती कटिं॥ माहेश्वरी सदा पातु शंखिनी जानुयुग्मकं॥ अन्नपूर्णे सदा
पातु स्वाहा पातु पदद्वयं॥ सप्तदशाक्षरी पायादन्नपूर्णाखिलं वपुः॥ तारं माया रमा कामः षोडशार्णा ततः परं॥ शिरःस्था सर्वदा पातु विंशत्य
र्णात्मिका परा॥ तारं दुर्गे युगं रक्षिणि स्वाहेति दशाक्षरी॥ जयदुर्गा घनश्यामा पातु मां सर्वतो मुदा॥ मायाबीजादिका चैषा दशार्णा च ततः प
रा॥ उत्तप्तकांचनाभासा जयदुर्गानलेवतु॥ तारं ह्रीं दुं च दुर्गायै नमोष्टार्णात्मिका परा॥ शंखचक्रधनुर्बाणधरा मां दक्षिणेवतु॥ महिषम

४ सकूथिनीति पुस्तकांतरे॥४

ह्रीं निस्वाहा वसुवर्णात्मिका परा ॥ नैर्ऋत्यां सर्वदा पातु महिषासुरनाशिनी ॥ मायापद्मावती स्वाहा सप्तार्णा परिकीर्तिता ॥ पद्मावती पद्मसंस्था पश्चि
मे मां सदावतु ॥ पाशांकुशपुटा मायेहि परमेश्वरि स्वाहा ॥ त्रयोदशार्णा नाराद्या साम्भारूढानिले वतु ॥ सरस्वती पंचशरे नित्यक्लिन्ने मदद्रवे ॥ स्वा
हा वस्वक्षरी विद्या मामुत्तरे सदावतु ॥ नारं माया च कवचं खे च स्त्रे सप्तनो वधू ॥ हूं सें ह्रीं फट् महाविद्या द्वादशार्णाखिलप्रदा ॥ त्वरिताष्टादिभिः
पायाच्छिवकोणे सदा च मां ॥ ऐं क्लीं सौः सततं बाला मामूर्द्धदेशेनतोवतु ॥ विंद्वंता भैरवी बाला भूमौ मां सर्वदावतु ॥ इति ते कथितं पुण्यं त्रैलो
क्यमंगलं परं ॥ सारात् सारतरं पुण्यं महाविद्यौघविग्रहं ॥ अस्यापि पठनात्सद्यः कुबेरोपि धनेश्वरः ॥ इन्द्राद्याः सकला देवा धारणात्पठनाद्यतः
॥ सर्वसिद्धीश्वराः संतः सर्वैश्वर्यमवाप्नुयुः ॥ पुष्पांजल्यष्टकं दद्यान्मूलेनैव पृथक् पृथक् ॥ संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् ॥
प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे ॥ वाणी च निवसेद्वक्त्रे सत्यं सत्यं न संशयः ॥ यो धारयति पुण्यात्मा त्रैलोक्यमंगलाभिधं ॥ कव
चं परमं पुण्यं सोपि पुण्यवतां वरः ॥ सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यविजयी भवेत् ॥ पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा ॥ बहुपुत्रवती भू
त्वा वंध्यापि लभते सुतं ॥ ब्रह्मास्त्रादीनि शस्त्राणि नैव कृंतंति तं जनं ॥ एतत्कवचमज्ञात्वा यो भजेद्भुवनेश्वरी ॥ दारिद्र्यं परमं प्राप्य सोचिरा
न्मृत्युमाप्नुयात् ॥ ॥ इति श्रीरुद्रयामले देवीश्वरसंवादे त्रैलोक्यमंगलं नाम भुवनेश्वरीकवचं समाप्तम् ॥ ॥ अथान्नपूर्णास्तोत्रम् ॥ ॥ ॐ
नमः कल्याणदे देवि नमः शंकरवल्लभे ॥ नमो भुक्तिप्रदे देवि अन्नपूर्णे नमोस्तु ते ॥१॥ नमो मायागृहीतांगि नमः शंकरवल्लभे ॥ माहेश्वरी नम
स्तुभ्यमन्नपूर्णे नमोस्तु ते ॥२॥ अन्नपूर्णे हैव्यवाहपत्नीरूपे हरप्रिये ॥ कलाकाष्ठास्वरूपे चअैन्नपूर्णे० ३ उद्यद्भानुसहस्राभे नयनत्रयभूषिते

१॥ महामाये शिवधर्मपत्नीरूपे हरप्रिये ॥ वांछादातृसुरेशानि इति पुस्तकांतरे ॥१

चन्द्रचूडेमहादेवि अन्नपूर्णेन०४ विचित्रवसनेदेवि अन्नदानरतेनघे॥ शिवनृत्यकृतामोदे अन्न०॥५॥ षट्कोणपद्ममध्यस्थे षडंगयुवतीम
ये॥ ब्रह्माण्यादिस्वरूपेच अन्नपूर्णे०॥६॥ देविचन्द्रकृतापीठेसर्वसाम्राज्यदायिनि॥ सर्वानंदकरेदेवि अन्न०॥७॥ साधकाभीष्टदेदेवि
भवदुःखविनाशिनि॥ कुचभारनतेदेवि अन्न०॥८॥ इन्द्राद्यर्चितपादाब्जेरुद्रादिरूपधारिणि॥ सर्वसंपत्प्रदेदेवि अन्न०॥९॥ पूजाका
लेपठेद्यस्तुस्तोत्रमेतत्समाहितः॥ तस्यगेहेस्थिरालक्ष्मीर्जायतेनात्रसंशयः॥१०॥ प्रातःकालेपठेद्यस्तुमंत्रजापपुरःसरं॥ तस्यैवान्न
समृद्धिःस्याद्वर्द्धमानादिनेदिने॥११॥ यस्मैकस्मैनदातव्यंनप्रकाश्यंकदाचन॥ प्रकाशात्सिद्धिहानिःस्यात्तस्माद्यत्नेनगोपयेत्॥१२
॥इत्यन्नपूर्णास्तोत्रं॥ अथास्याःकवचं॥ श्रीदेव्युवाच॰ कथिताश्चान्नपूर्णायायायाविद्याःसुदुर्लभाः॥ कृपयाकथिताःसर्वाःश्रुताश्चा
धिगतामया॥ सांप्रतंश्रोतुमिच्छामिकवचंयत्पुरोदितं॥ त्रैलोक्यरक्षणंनामकवचंमंत्रविग्रहम्॥ ईश्वरउवाच॰ शृणुपार्वतिवक्ष्या
मिसावधानावधारय॥ ब्रह्मविद्यास्वरूपंचमहदैश्वर्यदायकं॥ पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत्॥ त्रैलोक्यरक्षणस्यास्यक
वचस्यऋषिःशिवः॥ छंदोविराड्देवताचअन्नपूर्णासमृद्धिदा॥ धर्मार्थकाममोक्षेषुविनियोगःप्रकीर्तितः॥ ह्रींनमोभगवत्यंते
माहेश्वरिपदंततः॥ अन्नपूर्णेततःस्वाहाचैषासप्तदशाक्षरी॥ पातुमामन्नपूर्णासायाख्याताभुवनत्रये॥ विमायाप्रणवाद्येषातथा
सप्तदशाक्षरी॥ पात्वन्नपूर्णासर्वांगंरत्नकुंभान्नपात्रदा॥ श्रीबीजाद्यातथैवैषाद्विरंध्रार्णातथामुखं॥ प्रणवाद्याभ्रुवौपातुकंठंवाग्बीजपू
र्विका॥ कामबीजादिकाचैषाहृदयंतुमहेश्वरी॥ ऐंश्रींह्रींचनमोंतेचभगवतिपदंततः॥ माहेश्वरिपदंचान्नपूर्णेस्वाहेतिपातुमे॥ नाभिमे
कोनविंशार्णापायान्माहेश्वरीसदा॥ तारंमायारमाकामःषोडशार्णाततःपरं॥ शिरःस्थासर्वदापातुविंशत्यर्णात्मिकापरा॥ अन्नपूर्णामहाविद्या

५॥ब्रह्मेतिप्रत्यंतरे॥५॥

६ सर्वतपोमय इति प्रत्यंतरे ॥

५ गुलिकामिति प्रत्यंतरे

ह्रीं पातु भुवनेश्वरी ॥ शिरः श्रीं ह्रीं तथा क्लीं च त्रिपुटा पातु मे गुदं ॥ षट्दीर्घभाजा बीजेन षडंगानि पुनंतु मां ॥ इंद्रो मां पातु पूर्वे च वह्निकोणे नलोवतु ॥ यमो मां दक्षिणे पातु नैर्ऋत्यां निर्ऋतिश्च मां ॥ पश्चिमे वरुणः पातु वायव्यां पवनोवतु ॥ कुबेरश्चोत्तरे पातु ऐशान्यां शंकरोवतु ॥ ऊर्ध्वाधः पातु सततं ब्रह्मानंतो यथाक्रमात् ॥ वज्राद्याश्चायुधाः पांतु दशदिक्षु यथाक्रमात् ॥ इति ते कथितं पुण्यं त्रैलोक्यरक्षणं परं ॥ यद्धृत्वा पठनाद्देवाः सर्वैश्वर्यमवाप्नुयुः ॥ ब्रह्माविष्णुश्च रुद्रश्च धारणात्पठनाद्यतः ॥ सृजंत्यवंति हंत्येव कल्पे कल्पे पृथक् पृथक् ॥ पुष्पांजल्यष्टकं देव्यै मूलेनैव पठेत्ततः ॥ सुरासुरकृतायास्तु पूजायाः फलमाप्नुयात् ॥ वाणी वक्त्रे वसेत्तस्य सत्यं सत्यं न संशयः ॥ अष्टोत्तरशतं चास्य पुरश्चर्याविधिः स्मृतः ॥ भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि ॥ कंठे वा दक्षिणे बाहौ सोपि पुण्यवतां वरः ॥ ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रे प्राप्य पार्वति ॥ माल्यानि कुसुमान्येव सुखदानि भवंति हि ॥ ॥ इति भैरवतंत्रेऽन्नपूर्णाकवचं समाप्तम् ॥ ॥

अथ त्रिपुटास्तोत्रं ॥ ॥ वराभीतिहस्तं द्विबाहुं प्रसन्नं शिवं सुप्रसन्नं स्वशक्त्योपविष्टं ॥ प्रसन्नास्यबिंबप्रकाशस्वरूपं शिरःपद्ममध्ये गुरुं पूजयामि ॥ १ ॥ बकं वह्निसंस्थं त्रिशक्त्या प्रयुक्तं शशांकेन युक्तं भवादौ स्वबीजं ॥ सुवर्णप्रभं ये जपंति त्रिशक्तिं श्रियं सौभगत्वं लभंते नरास्ते ॥ नभो वायुमित्रं ततो वामनेत्रं सुधाधामनित्यं नियोज्यैकरक्तं ॥ त्वदीयं स्वबीजं सुरश्रेणिवंद्यं द्वितीयं विभाव्य श्रियं प्राप्नुवंति ॥ विरिंचिं क्षितिस्थं ततो वामनेत्रं सदा बिंदुनादान्वितं ते तृतीयं ॥ विभाव्यैव संमोहयंति त्रिलोकीं जपादीश्वरत्वं लभंते नरेंद्राः ॥ त्रयं संनियोज्य स्मरारिप्रिये ये त्रिसंध्यं जपंति त्वदंगं विभाव्य ॥ न तेषां रिपुर्वा कृप्रयोगं करोति स्मरास्तेंगनानां गृहे श्रीस्तु तेषां ॥ मुखे भारती गद्यपद्यप्रवद्या न हिंसंति हिंस्राः सुरास्तान्नमंति ॥ तदंघ्रिद्वयं भूषणं मूर्ध्नि राज्ञां करे सिद्धयो दुर्ग्रहास्तास्सजंति ॥ वने पारिजातद्रुमाणां पृथिव्यां सुवर्णप्रभाभां मणिव्यूहगेहे ॥ स्मरेद्वेदिकायां लसद्रत्नसिंहासने पद्ममष्टारकं संविचिंत्य ॥

७ ॥ त्रिनेत्रमिति पुस्तकांतरे ॥

२ स्तोकपुत्रीमितिपुस्तकांतरे
१ वज्रेतिपुस्तकांतरे

स्फुरत्कर्णिकायां परं योनियुग्मं नदंतं गतां मुख्यहेमप्रभायां ॥ लसत्कुण्डलां सिंदुवक्त्रां त्रिनेत्रां स्फुरत्कंबुकंठां सुवक्षोजनम्रां ॥ महारत्नयंत्रोद्भ
सद्बाहुद्वंद्वैः सुपद्मद्वयं पाशकं कार्मुकं च ॥ सुवर्णांकुशं पुष्पबाणान्दधानां रहद्रत्नभूषां सुमध्यां सुकांची ॥ तुलाकोटिरत्नस्फुरत्पादपद्मां किरी
टाद्यलंकारयुक्तां प्रसन्नां ॥ सिते चामरे दर्पणं तत्करण्डं समुद्रं सुकर्पूरचूर्णं धृताभिः ॥ १० ॥ त्रिलोकीविधात्रीं जगत्तापहंत्रीं जगत्क्षोभकर्त्रीं जगन्मो
दयित्रीं ॥ सदानंदरूपां हकारार्द्धवर्णां त्रिबिंदुस्वरूपां त्रिशक्तिं भजामि ॥ चिरं चिंतयित्वा त्वदेतत्स्वरूपं पुरो यंत्रमध्ये समावाह्य भक्त्या ॥ स्वयंभू
सुपुष्पैः समाराध्य भक्त्या चतुर्वर्गसिद्धिं लभेत्यामरोऽपि ॥ श्रियं श्रीपतिं पार्वतीमीश्वरं वै रतिं कामदेवं षडंगेन सार्द्धं ॥ स्वयोनौ तथा मंत्रयुक्तो भ
वानीं क्रमात्पूजयित्वा नरेंद्रो भवेत्सः ॥ निधी द्वौ च पार्श्वद्वये संविभाव्य प्रपूज्ये महिष्यस्ततो लोकपालाः ॥ नरस्त्राणि ततद्दलाग्रे प्रपूज्य भ
वस्याष्टसिद्धिं लभेन्मानवोऽपि ॥ क्षितिस्त्वं विधाता जगत्सृष्टिकर्त्री त्वमापोऽपि विष्णुर्जगत्पालिका च ॥ त्वमग्निस्सुरुद्रो जगत्क्षोभकर्त्री त्वमै
श्वर्ययुक्ता जगद्व्यापुरूपा ॥ त्वमाद्या शिवे शंसुकांते शरण्ये जगद्धर्त्तारं ध्रे सदा त्वं भ्रमीषि ॥ निराधारगम्या भवस्यैकपुण्या त्वमाकाशक
स्वा भवानि प्रसीद ॥ भवांभोधिमध्ये निपात्यैव सर्वं मुनीनां च गर्वं सुखर्वं करोषि ॥ अतस्त्वां न जाने चिदानंदरूपे प्रकाशस्वरूपे भवानि
प्रसीद ॥ जपित्वा भवत्या जनो मंदचेता जपित्वैकलक्षं कवित्वं करोति ॥ विचिंत्य स्वरूपं त्वदीयं त्रिलोक्यां लभे दुर्लभं त्वं भवानि प्रसीद ॥
त्वमाधारशक्तिस्त्वमाधेयरूपा जगद्व्यापिका त्वं जगद्व्याप्यरूपा ॥ अभावस्त्वमेका गुणातीतरूपा त्वमेवासि भावो भवानि प्रसीद ॥ अणुस्त्वं
विभुस्त्वं त्वमेवासि विश्वं स्तुतिः का भवत्या जगन्या विभासि ॥ तथापि त्वदीया गुणामादिशं तिस्कतिं कर्तुमेवं भवानि प्रसीद ॥ इदं स्तोत्रमत्यंतगु
ह्यं नरा ये पठंति त्रिसंध्यं कुलांते जपित्वा ॥ न तेषामसाध्यं त्रिलोक्यां जनानां लभंते स्वरूपं भवानि प्रसीद ॥ २१ ॥ इति त्रिपुटास्तोत्रम् ॥ अथास्याः

कवचं ॥ श्रीदेव्युवाच० ॥ ॥ भगवन्सर्वधर्मज्ञ सर्वशास्त्रार्थपारग ॥ त्रिशक्तिरूपलक्ष्म्याश्च कवचं यत्प्रकाशितं ॥ सर्वार्थसाधनं नाम कथय
स्व मयि प्रभो ॥ ईश्वर उवाच० ॥ शृणु देवि प्रवक्ष्यामि कवचं परमाद्भुतं ॥ सर्वार्थसाधनं नाम त्रैलोक्ये चातिदुर्ल्लभं ॥ सर्वसिद्धिमयं देवि सर्वै
श्वर्यप्रदायकं ॥ पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत् ॥ सर्वार्थसाधनस्यास्य कवचस्य ऋषिः शिवः ॥ छन्दो विराट् त्रिशक्ती रूपा
जगद्धात्री च देवता ॥ धर्मोर्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥ श्रीं बीजं मे शिरः पातु लक्ष्मीरूपा ललाटकं ॥ ह्रीं पातु दक्षिणं नेत्रं वाम
नेत्रं सुरेश्वरी ॥ क्लीं पातु दक्षकर्णं मे वामं कामेश्वरी तथा ॥ लक्ष्मी घ्राणं सदा पातु वदनं पातु केशवः ॥ गौरी तु रसनां पातु कंठं पातु महेश्वरः
॥ स्कंदेशं रतिः पातु भुजौ तु मकरध्वजः ॥ शंखनिधिः करौ पातु वक्षः पद्मनिधिः सदा ॥ ब्राह्मी मध्यं सदा पातु नाभिं पातु महेश्वरी ॥ कुमारी पृष्ठ
देशं मे गुह्यं रक्षतु वैष्णवी ॥ वाराही सक्थिनी पातु ऐं ह्रीं पातु पदद्वयं ॥ भार्यां रक्षतु चामुंडा लक्ष्मी रक्षतु पुत्रकान् ॥ इंद्रः पूर्वे सदा पातु आग्नेय्याम
ग्निदेवता ॥ याम्ये यमः सदा पातु नैर्ऋत्ये निर्ऋतिश्च मां ॥ पश्चिमे वरुणः पातु वायव्यां वायुदेवता ॥ सौम्ये सोमः सदा पातु ऐशान्यामीश्वरोवतु
॥ ऊर्द्ध्वं प्रजापतिः पातु अधश्चानंतदेवता ॥ राजद्वारे श्मशाने च अरण्ये प्रांतरे तथा ॥ जले स्थले चांतरिक्षे शत्रूणां विग्रहे तथा ॥ एताभिः सहिता
देवी त्रिबीजात्मा महेश्वरी ॥ त्रिशक्तिश्च महालक्ष्मीः सर्वत्र मां सदावतु ॥ इति ते कथितं देवि सारात्सारतरं परं ॥ सर्वार्थसाधनं नाम कवचं प
रमाद्भुतं ॥ अस्यापि पठनात्सद्यः कुबेरोपि धनेश्वरः ॥ इंद्राद्याः सकला देवा धारणात्पठनाद्यतः ॥ सर्वार्थसिद्धीश्वराः संतः सर्वैश्वर्यमवाप्नुयुः
॥ पुष्पांजल्यष्टकं दत्वा मूलेनैव पठेत्सकृत् ॥ संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् ॥ प्रीतिरन्योन्यतः कृत्वा कमला निश्चला गृहे ॥ वाणी
च निवसेद्वक्त्रे सत्यं सत्यं न संशयः ॥ यो धारयति पुण्यात्मा सर्वार्थसाधनाभिधं ॥ कवचं परमं पुण्यं सोपि पुण्यवतां वरः ॥ सर्वैश्वर्ययुतो भू

त्वात्रैलोक्यविजयीभवेत्॥पुरुषोदक्षिणेबाह्रौनारीवामभुजेतथा॥बहुपुत्रवतीभूत्वावंध्यापिलभतेसुतं॥ब्रह्मास्त्रादीनिशस्त्राणिनैवकृंतं
तितंजनम्॰॥एतत्कवचमज्ञात्वायोजपेत्परमेश्वरीं॥दारिद्र्यंपरमंप्राप्यसोचिरान्मृत्युमाप्नुयात्॥इतिरुद्रयामलेत्रिशक्त्याःसर्वार्थनाम
कवचंसमाप्तं॥ ॥अथदुर्गायाःशतनामात्मकंस्तोत्रं॥ईश्वरउवाच॰॥ ॥शतनामप्रवक्ष्यामिशृणुष्वकमलानने॥यस्यप्रसादमात्रेणदुर्गा
प्रीतासदाभवेत्॥१॥ॐसतीसाध्वीभवप्रीताभवानीभवमोचनी॥आर्य्यादुर्गाजयाआद्यात्रिनेत्राशूलधारिणी॥पिनाकधारिणीचित्राचंद्रघंटा
महातपा॥मनोबुद्धिरहंकाराचित्तरूपाचिताचितिः॥सर्वमंत्रमयीसत्त्वासत्यानंदस्वरूपिणी॥अनंताभाविनीभाव्याभवाभव्यासदागतिः॥
शंभुपत्नीदेवमाताचिंतारत्नप्रियासदा॥सर्वविद्यादक्षकन्यादक्षयज्ञविनाशिनी॥अपर्णाचैवपर्णाचपाटलापटलावती॥पट्टांबरपरीधानाक
लमंजीररंजिनी॥अमेयाविक्रमाक्रूरासुंदरीकुलसुंदरी॥वनदुर्गाचमातंगीमतंगमुनिपूजिता॥ब्राह्मीमाहेश्वरीचैन्द्रीकौमारीवैष्णवीत
था॥चामुंडाचैववाराहीलक्ष्मीश्चपुरुषाकृतिः॥विमलोत्कर्षिणीज्ञानाक्रियासत्याचवाक्प्रदा॥बहुलाबहुलप्रेमासर्ववाहनवाहना॥निशुं
भशुंभहननीमहिषासुरमर्दिनी॥मधुकैटभहंत्रीचचण्डमुण्डविनाशिनी॥सर्वाऽसुरविनाशाचसर्वदानवघातिनी॥सर्वशास्त्रमयीविद्या
सर्वास्त्रधारिणीतथा॥अनेकशस्त्रहस्ताचअनेकास्त्रविधारिणी॥कुमारीचैवकन्याचकौमारीयुवतीयतिः॥अप्रौढाचैवप्रौढाचवृद्धमाता
बलप्रदा[२]॥यइदंचपठेत्स्तोत्रंदुर्गानामशताष्टकं॥नासाध्यंविद्यतेदेवित्रिषुलोकेषुपार्वति॥धनंधान्यंसुतंजायांहयंहस्तिनमेवच॥चतुर्वर्गंतथा
चांतेलभेन्मुक्तिंचशाश्वतीं॥कुमारींपूजयित्वाचध्यात्वादेवींसुरेश्वरीं॥पूजयेत्परयाभक्त्यापठेन्नामशताष्टकं॥तस्यसिद्धिर्भवेद्देविसर्वैःसुर
वरैरपि॥राजानोदासतांयांतिराज्यश्रियमवाप्नुयात्॥गोरोचनालक्तककुंकुमेनसिंदूरकर्पूरमधुत्रयेण॥विलिख्ययंत्रंविधिनाविधि– ज्ञो

२वरप्रदेतिप्रत्यंतरे॥२

द्वारेनिप्रत्यंतरे॥१ २कामदमितिपुस्तकांतरे॥ धारयित्वा॥२

भवेत्सदाधारयतेपुरारिः॥भौमावास्यांनिशाभागेचंद्रेशतभिषांगते॥विलिख्यप्रपठेत्स्तोत्रंसभवेत्संपदांपदम्॥इतिश्रीविश्वसारतंत्रोक्तदुर्गानाम
शतकंसमाप्तम्॥अथास्याःकवचम्॥॥ईश्वरउवाच॥शृणुदेविप्रवक्ष्यामिकवचंसर्वसिद्धिदं॥पठित्वापाठयित्वाचनरोमुच्यतसंकटात्॥अज्ञात्वा
कवचंदेविदुर्गामंत्रंचयोजपेत्॥सनाप्नोतिफलंतस्यपरंचनरकंव्रजेत्॥इदंगुह्यतमंदेविकचंतवकथ्यते॥गोपनीयंप्रयत्नेनसावधानोवधार
य॥उमादेवीशिरःपातुललाटंशूलधारिणी॥चक्षुषीखेचरीपातुकर्णौचत्वरवासिनी॥सुगंधानासिकांपातुवदनंसर्वधारिणी॥जिह्वांचचण्डिका
देवीग्रीवांसौभद्रिकातथा॥अशोकवासिनीचेतोद्वौबाहूवज्रधारिणी॥ कंठंपातुमहावाणीजगन्माता स्तनद्वयं॥हृदयंललितादेवीउदरंसिंहवा
हिनी॥कटिंभगवतीदेवीद्वावूरूविंध्यवासिनी॥महाबलाचजंघेद्वेपादौभूतलवासिनी॥एवंस्थितासिदेवित्वंत्रैलोक्यरक्षणात्मिके॥रक्षमां
सर्वगात्रेषुदुर्गेदेविनमोऽस्तुते॥इत्येतत्कवचंदेविमहाविद्याफलप्रदं॥यःपठेत्प्रातरुत्थायसर्वतीर्थफलंलभेत्॥योन्यसेत्कवचंदेहेतस्यवि
घ्नंनकुत्रचित्॥भूतप्रेतपिशाचेभ्योभयंतस्यनविद्यते॥रणेराजकुलेवादेसर्वत्रविजयीभवेत्॥सर्वत्रपूजामाप्नोतिदेवीपुत्रइवसितौ॥ ॥इ
तिकुब्जिकातंत्रेदुर्गाकवचंसम्पूर्णम्॥ ॥अथमहिषमर्दिन्याःकवचम्॥ ॥अथवक्ष्येमहादेवि – कवचंसर्वकामदं॥यस्यप्रसादमासा
द्यभवेत्साक्षात्सदाशिवः॥ॐकारंपूर्वमुच्चार्यमंत्रीमंत्रस्यसिद्धये॥प्रपठेत्कवचंनित्यंमंत्रवर्णस्यसिद्धये॥ॐमहिषमर्दिन्याःकवचस्यभग
वान्महाकालऋषिः अनुष्टुप्छंदः आद्याशक्तिःमहिषमर्दिनीदेवताचतुर्वर्गफलप्राप्तयेजपेविनियोगः॥ह्रौंपातुमस्तकेदेवीकामिनी
कामदायिनी॥मकारःपातुमांदेविचसुषुम्नेमहेश्वरी॥हिकारःपातुवदनंहिंगुलासुरनायिका॥षकारःपातुमांश्वेताजिह्वायांचापराजिता॥म
कारःपातुमांदेवीमर्दिनीसुरनायिका॥दिकारःपातुमांदेवीसावित्रीकलिनाशिनी॥निकारःपातुमांनित्याहृदयेवामपार्श्वयोः॥नाभौलिंगेगु

ह्रेकं वे कर्णयोः पार्श्वयोस्तथा॥ शिखायां कवचे पादे मुखे जंघायुगे तथा॥ सर्वांगे पातु मां स्वाहा सर्वशक्तिसमन्विता॥ कामाद्या पातु मां स्वाहा
सर्वांगे मर्दिनी शिवा॥ दशाक्षरी महाविद्या सर्वांगे पातु मर्दिनी॥ मर्दिनी पातु सततं मर्दिनी रक्षयेत्सदा॥ राजस्थाने तथा दुर्गे सिंहव्याघ्रभ
यादिषु॥ श्मशाने प्रांतरे दुर्गे नौकायां वह्निमध्यतः॥ मर्दिनी पातु सततं मर्दिनी रक्षयेत्सदा॥ दुर्गा पातु सदा देवी आर्या पातु सदा शिवा॥ प्रभा
पातु महेशानी गगने पातु सर्वदा॥ कृत्तिका पातु सततमभया सर्वदावतु॥ प्रभा पातु महामाया माया पातु सदा मम॥ नंदिनी पातु सततं सुप्रभा
सर्वदावतु॥ विजया पातु सर्वत्र देव्यंगे नवशक्तयः॥ शक्तयः पातु सततं मुद्राः पांतु सदा मम॥ जया पातु सदा सूक्ष्मा विशुद्धा पातु सर्वदा॥ योगि
न्यः पातु सततं खेचर्यः पांतु सर्वदा॥ डाकिन्यः पांतु सततं सिद्धाः पांतु सदा मम॥ सर्वत्र सर्वदा पातु देवी महिषमर्दिनी॥ इति ते कथितं दिव्यं कवचं स
र्वकामदं॥ यत्र तत्र न वक्तव्यं गोपितव्यं प्रयत्नतः॥ गोपितं सर्वतंत्रेषु विश्वसारे प्रकाशितं॥ सर्वत्र सुलभा विद्या कवचं दुर्लभं महत्॥ शठाय भ
क्तिहीनाय निंदकाय महेश्वरि॥ न्यूनांगे अतिरिक्तांगे क्रूरे मिथ्यातिभाविणि॥ नस्तवं दर्शये दिव्यं कवचं सुरदुर्लभं॥ यत्र तत्र न वक्तव्यं शंकरे
ण च भाषितं॥ दत्त्वा तेभ्यो महेशानि नश्यंति सिद्धयः क्रमात्॥ मंत्राः पराङ्मुखा यांति शापं दत्त्वा सुदारुणं॥ अशुभं च भवेत्तस्य तस्माद्यत्नेन गो
पयेत्॥ गोरोचनाकुंकुमेन भूर्जपत्रे महेश्वरि॥ लिखित्वा शुभयोगे नक्षत्रेंद्रे वैधृतौ तथा॥ आयुष्मान्सिद्धयोगे वा बवे वा कौलवे पि वा॥
वणिजे श्रवणायां च रेवत्यां वा पुनर्वसौ॥ उत्तरात्रययोगेषु तथा पूर्वात्रयेषु च॥ अश्विन्यां वाऽथ रोहिण्यां तृतीयानवमीतिथौ॥ सप्तम्यां वा च
तुर्दश्यां षष्ठ्यां वा पंचमीतिथौ॥ कुह्वां वा पूर्णिमायां वा निशायां प्रांतरे तथा॥ एकलिंगे श्मशाने च शून्यागारे शिवालये॥ गुरुणा वा स्वयं वा
पि स्वयंभुकुसुमैस्तथा॥ शुक्रैर्वा रक्तकुसुमैश्चंदनेन रक्तसंयुतैः॥ शवांगारचिताभस्मैर्लिखित्वा धारयेत्पुनः॥ तस्य सर्वार्थसिद्धिः

स्याच्छंकरेणचभाषितं॥कुमारींपूजयित्वाचदेवीसूक्तंनिवेद्यच॥पठित्वापूजयेद्विप्रान्धनवान्वेदपारगान्॥आखेटकसुपाख्यानंकुमा
र्यैवदिनत्रयं॰नराधरेन्महारक्षांकवचंसर्वकामदं॥नाधयोव्याधयस्तस्यदुःखशोकभयंक्वचित्॥वादीमूकोभवेद्दृष्ट्वाराजाचसेवकायते
॥मासमेकंपठेद्यस्तुप्रत्यहंनियतःशुचिः॥दिवाभवेद्धविष्याशीरात्रौशक्तिपरायणः॥षट्सहस्रप्रमाणेनप्रत्यहंप्रजपेत्सदा॥षण्मासे
र्वीत्रिभिर्मासैःखेचरोभवतिध्रुवं॥अपुत्रोलभतेपुत्रमधनोधनवान्भवेत्॥अरोगीबलवांश्चैवराजाचदासतामियात्॥रजस्वलाभगोनित्यंजपे।
द्विद्यांसमाहितः॥एवंयःकुरुतेधीमान्सएवश्रीसदाशिवः॥ ॥इतिविश्वसारतंत्रेमहिषमर्दिन्याःकवचंसमाप्तम्॥ ॥अथास्याः स्तोत्रम्॥
मच्चित्तेवरचंडिचूर्णितदुराचारप्रचंडासुरेस्वैरंदारयभूरिदुर्द्धरदरद्रोहोर्मिमर्म्मापदः॥तेनायंनिरुपद्रुतोनिरुपमश्रीपादपद्माटवीप्रान्तानंदरस
पविमग्नोहंसश्चिरंनंदतुहित्वाचंडिहिरण्यदारणपटुप्रोद्दाममहस्तांगुलिस्फायत्कम्रसुमेरुसोदरसटाटोपंनृसिंहंसुराः॥मातस्त्वत्पसु
पाशपेषणपटुःश्रीपादसंसेविनंसेवंतेकरिवैरिणंकिमरिभिर्भीतिर्भवेत्सेविनः॥चंडित्वद्विषयांतरस्मरमयंश्रोत्रांतरंचेद्गतंतनत्वंपुरुषप्रकृ
त्यनुगतंब्रह्मादिभिर्गीयते॥तस्माद्देवि समस्तदैवतसुधासारैकधामस्फुरत्श्रीमत्पादपयोजचुंबनपरंमामद्यसंभावय॥मन्निद्रापरिवा
स्तनतुकुलपथाचाराद्दहंमास्तुवाकीर्तिःकेशवकौशिकार्चनचवीनेवास्तुयत्सन्निधिः॥मातर्ब्रह्महरिस्मरारिहुतभुग्दैत्यारिसेवास्पदश्री
मत्पादपयोजचुंबनविधौचित्तंसदैवास्तुनः॥निर्दिष्टोस्मियदित्वदीयपदयुक्पूर्वापरीभावनेनिर्दिष्टस्तदाममास्त्वविरलंकिंवास्तुसिद्धा
स्पदं॥तस्माद्देविकृपाभरांचितमरंश्रीपादपद्मद्वयंमच्चित्तेऽस्तुतसंपदप्रविशदक्षेमंकरीसम्पन्नो॥स्वात्मानंपरिरब्धभूतपतिरप्युन्मी
दमाह्लादितःस्फारंजीवनरक्षणेसचकृतीनैवाभविष्यत्प्रभुः॥देवाद्रिच्युतचंद्रचंदनवनप्रागल्भ्यगर्भस्तवन्माध्वीपूर्णभवत्पदैककमल

२॰चंडांशुरितिपुस्तकांतरे॥२

मोदेननास्वादितः॥ हाहामातरनादिमोहजलधिव्याहारखुद्याखिलब्रह्मानंदरसाभिषेकविलसत्स्वांतोदूरेमादृशि॥ अस्माकंसुरवृंदनिर्मे
रमनस्तापाभिभूतस्समश्रीमद्भक्तिरसातिदुर्दिनपरीवाहःसदासर्पतु॥ त्वत्पादस्फुरदंशुजालसुरुचाचंद्रांशुकोटिस्फुरद्ध्वांतसांतर्निसारिनि
र्मलचिदानंदस्त्रयंदेवतं॥ संसर्गान्सृजतेस्थितिंवितनुतेसृष्टिंपुनर्लुंपतेप्रोद्दिन्नांजनपुंजनीरदमहश्चित्तेसदैवास्तुनः॥ पाशाग्रवन्म
हिषकुलस्फुटमिलद्गर्जेहिधावत्सवलदृक्रांतःप्रसरत्तमस्समशिरोदेहंसमालंबते॥ सादुर्गाभवदुर्गदुर्गतिहरादुष्टांतरत्रासिनीहृष्य
द्देवनवैरिदारणपटुर्जीयाजयाह्लादिनी॥ नृत्यत्खेटकचामरांचलचणच्चक्राग्रखर्वीरवस्फायत्सैन्यशिलीमुखोच्छलदनल्पाजिस्थि
तास्त्रांबुधौ॥ झंझावातविसर्पिनर्तितशिरःसाटोप दृष्टासुरत्वक्स्यन्नखंडविखंडिनाखिलग्राकुंतस्फुरत्पिपासोज्ज्वले॥ चंचत्कल्पविरामका
लकलिताग्रौस्फालसंपारकोन्मोद्यन्माहिषेतिर्य्यग्गानतशिरःशृंगांतरालेस्थले॥ वस्वर्णैर्वसुपत्रमध्यकलितेवह्न्यास्त्रनीमातृभिःसेव्योचारु
रणांगणेरणमुद्राघूर्णायमानांस्मरेत्॥ ऊर्द्ध्वाधःक्रमसव्यवामकरयोश्चक्रंदरंकर्तृकांखेटंबाणधनुस्त्रिशूलभयकृन्मुद्रांदधानांशिवां॥ श्यामां
नीलघनोच्चकुंतलचयप्रोन्नद्धजूटांसवलद्दोरास्फालनसत्करालवदनांघोराट्टहासोद्भटां॥ एवंयेनतवदेविमूर्तिमनघांध्यायंतिदुर्गादिभि
श्शक्त्याद्यैरभिपूजितांपरपुरक्षोभादिकंकुर्वते॥ राज्यंशत्रुजयःसदर्थधिषणाकाव्यामृतादर्शनस्तंभोच्चाटनमारणादिकृतिनांतेषांस्वयंजायते॥
स्तोत्रंतेचरणारविंदयुगलध्यानावधानान्मयामंत्रोद्धारकुलोपचारचरितंगूढोपदिष्टंयदि॥ येशृण्वंतिपठंतिदेविनरसाश्रीमोक्षकामास्त्व
त्तेषांहस्तगताभवंतिजगतांमातर्नमस्तेजयः॥ १५ स्तोत्रस्मरणसंतुष्टाप्रीतास्मितवभैरव॥ पश्यमूर्त्तितवध्यानयोग्यांममसुखावहां॥ एषाते
मूर्तिःप्रधानंकालीमूर्तिस्तथैवच॥ त्रिपुरायास्तथामूर्तिराद्यासापरिकीर्तिता॥ इतिविश्वसारतंत्रेमहिषमर्द्दिन्यास्तोत्रं॥ ॥ अथलक्ष्मीस्तोत्रं॥

७॥नीलाब्धिसंपारकोन्माद्यन्माहिषेतिप्रत्यंतरे॥

ईश्वरीति ग्रन्थांतरे

॥त्रैलोक्यपूजिते देवि कमले विष्णुवल्लभे॥ यथा त्वमचला कृष्णे तथा भव मयि स्थिरा॥ कमला चंचला लक्ष्मीश्चला भूतिर्हरिप्रिया॥ पद्मा प
द्मालया संपदुच्चैः श्रीः पद्मधारिणी॥ द्वादशैतानि नामानि लक्ष्मीं संपूज्य यः पठेत्॥ स्थिरा लक्ष्मीर्भवेत्तस्य पुत्रदारादिभिः सह॥ ॥इति लक्ष्मीस्तोत्रं
समाप्तं॥ ॥अस्याः कवचम्॥ ॥अथ वक्ष्ये महेशानि कवचं सर्वकामदं॥ यस्य विज्ञानमात्रेण भवेत्साक्षात्सदाशिवः॥ नार्चनं तस्य देवेशि मंत्र
मात्रं जपेन्नरः॥ स भवेत्पार्वतीपुत्रः सर्वशास्त्रपुरस्कृतः॥ विद्यार्थिना सदा सेव्या विशेषे विष्णुवल्लभा॥ अस्याश्चतुरक्षरीविष्णुवनिता
याः कवचस्य श्रीभगवान् शिव ऋषिरनुष्टुप्छंदः वाग्भवा देवता वाग्भवं बीजं लज्जा शक्ती रमा कीलकं कामबीजात्मकं कवचं मम सुकवित्व
पांडित्य सर्वसमृद्धिसिद्ध्यर्थे विनियोगः॥ ऐंकारो मस्तके पातु वाग्भवा सर्वसिद्धिदा॥ ह्रीं पातु चक्षुषोर्मध्ये चक्षुर्युग्मे च शांकरी॥ जि
ह्वायां मुखवृत्ते च कर्णयोर्नेत्रयोर्नसि॥ ओष्ठाधरे दंतपंक्तौ तालुमूले हनौ पुनः॥ पातु मां विष्णुवनिता लक्ष्मीः श्रीवर्णरूपिणी॥ कर्णयु
ग्मे भुजद्वंद्वे स्तनद्वंद्वे च पार्वती॥ हृदये मणिबंधे च ग्रीवायां पार्श्वयोर्द्वयोः॥ पृष्ठदेशे तथा गुह्ये वामे च दक्षिणे तथा॥ उपस्थे च नितंबे च नाभौ जंघा
द्वये पुनः॥ जानुचक्रे पदद्वंद्वे घुटिकेंगुलिमूलके॥ स्वधा तु प्राणशक्त्यां वा सीमन्यां मस्तके तथा॥ सर्वांगे पातु कामेशी महादेवी समुन्न
तिः॥ पुष्टिः पातु महामाया उत्कृष्टिः सर्वदावतु॥ ऋद्धिः पातु सदा देवी सर्वत्र शंभुवल्लभा॥ वाग्भवी सर्वदा पातु पातु मां हरगेहिनी॥ रमा
पातु महादेवी पातु माया स्वराट् स्वयं॥ सर्वांगे पातु मां लक्ष्मीर्विष्णुमाया सुरेश्वरी॥ विजया पातु भवने जया पातु सदा मम॥ शिवदूती सदा
पातु सुंदरी पातु सर्वदा॥ भैरवी पातु सर्वत्र भेरुंडा सर्वदावतु॥ त्वरिता मां पातु नित्यमुग्रतारा सदावतु॥ पातु मां कालिका नित्यं कालरात्रिः
सदावतु॥ नवदुर्गाः सदा पातु कामाख्या सर्वदावतु॥ योगिन्यः सर्वदा पांतु मुद्राः पांतु सदा मम॥ मात्राः पांतु सदा देव्यश्चक्रस्था योगिनीग

३ सदेति पुस्तकांतरे॥३
४ तुष्टिरिति पुस्तकांतरे॥४

अंसयुग्मेति पाठोऽशुद्ध इति प्रतिभाति॥ ७

४तंत्रेतिपुस्तकांतरे

णाः॥सर्वत्रसर्वकार्येषुसर्वकर्मसुसर्वदा॥पातुमांदेवदेवीचलक्ष्मीःसर्वसमृद्धिदा॥इतितेकथितंदिव्यंकवचंसर्वसिद्धये॥यत्रतत्रनवक्तव्यंयदीच्छेदात्मनोहितं॥शठायभक्तिहीनायनिंदकायमहेश्वरी॥न्यूनांगेअतिरिक्तांगेदर्शयेन्नकदाचन॥नस्तवंदर्शयेद्दिव्यंसंदर्श्यशिवहाभवेत्॥कुलीनायमहेच्छायदुर्गाभक्तिपरायच॥वैष्णवायविशुद्धायदद्यात्कवचमुत्तमं॥॥निजशिष्यायशांतायधनिनेकुत्सिनेनतथा॥दद्यात्कवचमित्युक्तंसर्वतंत्रसमन्वितं॥शनौमंगलवारेचरक्तचंदनकैस्तथा॥यावकेनलिखेन्मंत्रंसर्वचंद्रैसमन्वितं॥विलिखेत्कवचंदिव्यंस्वयंभुकुसुमैःशुभैः॥स्वशुक्रैःपरशुक्रैश्चनानागंधसमन्वितैः॥गोरोचनाकुंकुमेनरक्तचंदनकेनवा॥सुतिथौशुभयोगेवाश्रवणायांरवेर्दिने॥अश्विन्यांकृत्तिकायांवाफाल्गुन्यांवामघासुच॥पूर्वाभाद्रपदायोगेस्वात्यांमंगलवासरे॥विलिखेत्प्रपठेत्स्तोत्रंशुभयोगेसुरालये॥आयुष्मत्प्रीतियोगेचब्रह्मयोगेविशेषतः॥इन्द्रयोगेशुभेयोगेशुक्लयोगेतथैवच॥कौलवेबालवेचैववणिजेचैवसत्तमः॥शून्यागारेश्मशानेवाविजनेचविशेषतः॥कुमारींपूजयित्वाचयजेद्देवींसनातनीं॥मत्स्यैर्मांसैःशाकमूलैःपूजयेत्परदेवतां॥घृताद्यैःसोपकरणैःपुष्पधूपैर्विशेषतः॥ब्राह्मणान्भोजयित्वाचपूजयेत्परमेश्वरीं॥आखेटकसुपाख्यानंतत्रकुर्याद्दिनत्रयं॥तदाधरेन्महारक्षांशंकरेणप्रभाषितं॥मारणद्वेषणादीनिलभतेनात्रसंशयः॥सभवेत्पार्वतीपुत्रःसर्वशास्त्रपुरस्कृतः॥गुरुर्देवोहरःसाक्षात्पत्नीतस्यहरप्रिया॥अभेदेनयजेद्यस्तुतस्यसिद्धिरदूरतः॥पठतियइहमर्त्योनित्यमार्द्रांतरात्माजयफलमनुमेयंलप्स्यतेयद्विशेषं॥सभवतिपदमुच्चैःसंपदांपादनम्रक्षितिपमुकुटलक्ष्मीलक्षणानांचिराय॥ ॥इतिविश्वसारतंत्रेलक्ष्मीकवचंसमाप्तम्॥ ॥अथसरस्वतीस्तोत्रं॥ ॥ॐअस्यश्रीवाग्वादिनीशारदामंत्रस्यमार्कंडेयआश्वलायनऋषिःस्रग्धराऽनुष्टुप्छंदांसिश्रीसरस्वतीदेवताश्रीसरस्वतीप्रसादसिध्यर्थेजपेविनियोगः॥अथध्यानं॥शुक्लांब्रह्मविचार

सारपरमांआद्यांजगद्व्यापिनींवीणापुस्तकधारिणीमभयदांजाड्यांधकारापहां॥हस्तेस्फाटिकमालिकांविदधतींपद्मासनेसंस्थितांवंदेतांपरमेश्वरींभगवतींबुद्धिप्रदांशारदां॥१॥ब्रह्मोवाच॥ह्रीं२हृद्यैकविद्येशशिरुचिकमलाकल्पविस्पष्टशोभेभव्येभव्यानुकूलेकुमतिवनदहेविश्ववंद्यांघ्रिपद्मे॥पद्मेपद्मोपविष्टेप्रणतजनमनोमोदसंपादयित्रीप्रोल्लुष्टाज्ञानकूटेहरिनिजदयितेदेविसंसारसारे॥२॥ऐं३इष्टमंत्रेकमलभवमुखांभोजभूतिस्वरूपेरूपारूपप्रकाशेसकलगुणमयेनिर्गुणेनिर्विकारे॥नस्थूलेनैवसूक्ष्मेप्यविदितविषयेनापिविज्ञानतत्त्वेविश्वेविश्वान्तरालेसुरवरनमितेनिष्कलेनित्यशुद्धे॥२॥ह्रीं३जापतुष्टेहिमरुचिमुकुटेवल्लकीव्यग्रहस्तेमातर्मातर्नमस्तेदहदहजडतांदेहिबुद्धिंप्रशस्तां॥विद्येवेदांतगीतेश्रुतिपरिपठितेमोक्षदेमुक्तिमार्गेमार्गातीतप्रभावेभवममवरदाशारदेशुभ्रहारे॥३॥धीं३धारणाख्येधृतिमतिनुतिभिर्नामभिःकीर्तनीयेनित्येनित्येनिमित्तेमुनिगणनमितेनूतनेवैपुराणे॥पुण्येपुण्यप्रभावेहरिहरनमितेवर्णशुद्धेसुवर्णेमात्रेमात्रार्थतत्त्वेमतिमतिमतिदेमाधवप्रीतिनादे॥४॥ह्रींक्ष्रींधींह्रींस्वरूपेदहदहदुरितंपुस्तकव्यग्रहस्तेसंतुष्टाकारचित्तेस्मितमुखिसुभगेजृंभिणिस्तंभविद्ये॥मोहेमुग्धप्रबोधेममकुरुकुमतिध्वांतविध्वंसिनित्येगीर्वाग्गौर्भारतीत्वंकविवृषरसनासिद्धिदासिद्धिसाध्या॥५॥सौंसौंसौंशक्तिबीजेकमलभवसुखांभोजभूतस्वरूपेरूपारूपप्रकाशेसकलगुणमयेनिर्गुणेनिर्विकारे॥नस्थूलेनैवसूक्ष्मेप्यविदितविभवेजाप्यविज्ञानतत्त्वेविश्वेविश्वांतरालेसुरगणनमितेनिष्कलेनित्यशुद्धे॥६॥स्तौमित्वांत्वांचवंदेभजममरसनांमाकदाचित्त्यजेथामामेबुद्धिर्विरुद्धाभवतुनचमनोदेविमेयातुपापं॥मामेदुःखंकदाचिद्विपदिचसमयेप्यस्तुमेनाकुलत्वंशास्त्रेवादेकवित्वेप्रसरतुममधीर्मास्तुकुंठाकदाचित्॥७॥इत्येतैःश्लोकमुख्यैःप्रतिदिनमुषसिस्तौतियोभक्तिनम्रोवाणीवाचस्पतेरप्यभिमतविभवोवाक्प

४अयंश्लोकःप्रत्यंतरेनास्ति॥४

पातु मामिति प्रत्यंतरे॥१

दुर्नष्टपंकः॥तस्यादिष्टार्थलाभो सुतमिवसततं पाति तं सा च देवी सौभाग्यं तस्य लोके प्रसरति कविता विघ्नमस्तं प्रयाति॥८॥ब्रह्मचारी व्रती मौ
नी त्रयोदश्यां निरामिषः॥सारस्वतो नरः पाठात्स्यादिष्टार्थलाभवान्॥पक्षद्वयेपि यो भक्त्या त्रयोदश्येकविंशतिं॥अविच्छेदं पठेद्धीमा
न्ध्यात्वा देवीं सरस्वतीं॥९॥शुक्लांबरधरां देवीं शुक्लाभरणभूषितां॥वांछितं फलमाप्नोति स लोके नात्र संशयः॥इति ब्रह्मा स्वयं प्राह सर
स्वत्याः स्तवं शुभं॥प्रयत्नेन पठेन्नित्यं सोमृतत्वं प्रयच्छति॥१०॥इति ब्रह्मपुराणे ब्रह्मणा कृतं सरस्वत्याः स्तोत्रं सम्पूर्णम्॥अथ गणेशकव
चम्॥ ॥मौलिं महेशपुत्रोव्याद्भालं पातु विनायकः॥त्रिनेत्रः पातु मे नेत्रे सूर्पकर्णौवतु श्रुती॥हेरंबो रक्षतु घ्राणं मुखं पातु गजाननः॥जि
ह्वां पातु गणश्रो मे कंठे श्रीकंठवल्लभः॥स्कंधौ महाबलः पातु विघ्नहा पातु मे भुजौ॥करौ परशुभृत्पातु हृदयं स्कंदपूर्वजः॥मध्यं लंबोदरः पातु
नाभिं सिंदूरभूषितः॥जघनं पार्वतीपुत्रः सक्थिनी पातु पाशभृत्॥जानुनी जगतां नाथो जंघे मूषकवाहनः॥पादौ पद्मासनः पातु पादाधो दैत्य
दर्पहा॥एकदंतोग्रतः पातु पृष्ठे पातु गणाधिपः॥पार्श्वयोर्मोदकाहारो दिग्विदिक्षु च सिद्धिदः॥व्रजतस्तिष्ठतो वापि जाग्रतः स्वपतोश्नतः॥
चतुर्थीवल्लभो देवः पातु मे भुक्तिमुक्तिदः॥इदं पवित्रं स्तोत्रं च चतुर्थ्यां नियतः पठेत्॥सिंदूररक्तकुसुमैर्दूर्वया पूज्य विघ्नपं॥राजा राजसुतो राज
पत्नी मंत्री कुलं बलं॥तस्यावश्यं भवेद्वश्यं विघ्नराजप्रसादतः॥समंत्रयंत्रं यः स्तोत्रं करे संलिख्य धारयेत्॥धनधान्यसमृद्धिः स्यात्तस्य नास्त्यत्र
संशयः॥वाग्भवं कामराजं वा मायां वा दो विधाय च॥हुं मंते वक्रतुंडाय मध्ये न्यस्य जपेन्मनुं॥रसलक्षं सदैकाग्रः षडंगन्यासपूर्वकं॥हुत्वा तदंते विधिव
दष्टद्रव्यं पयो घृतं॥यं यं काममभिध्यायन् कुरुते कर्म किंचन॥तं तं सर्वमवाप्नोति वक्रतुंडप्रसादतः॥भृगुप्रणीतं यः स्तोत्रं पठते भुवि मानवः॥भ
वेदव्याहतैश्वर्यः सगणेशप्रसादतः॥१४॥इति गणेशरक्षाकरं स्तोत्रं॥ ॥अथ गणेशस्तवराजः॥ ॥ॐ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि।

३॥ऐं क्लीं ह्रीं हुं वक्रतुंडाय॥३

४अंबुकरेण॥४ २मालामिति युक्तः पाठः

तुन्नोदंतीप्रचोदयात्॥ॐकारमाद्यंप्रवदंतिसंतोवाचःश्रुतीनामपियंगृणंति॥गजाननंदेवगणानतांघ्रिंभजेहमर्द्धेंदुकृतावतंसं॥पादारविंद
द्वंनतत्पराणांसंसारदावानलभंगदक्षं॥निरंतरंनिर्गतदाननतोयैस्तंनौमिविघ्नेश्वरमंबुदाभं॥कृतांगरागंनवकुंकुमेनमत्तालिजालंमदपंक
मग्नं॥निवारयंतंनिजकर्णतालैःकोविस्मरेत्पुत्रमनंगशत्रोः॥शंभोर्जटाजूटनिवासिगंगाजलंसमानीयकरांबुजेन॥लीलाभिराराच्छिवमर्चयं
तंगजाननंभक्तियुताभजंति॥कुमारमुक्तौपुनरात्महेतोःपयोधरौपर्वतराजपुत्र्याः४प्रक्षालयंतंकरसीकरेणमौग्ध्येनतंनागमुखंभजामि
॥तयासमुद्धृत्यगजस्यहस्तंयेशीकराःपुष्कररंध्रमुक्ताः॥व्योमांगणेतेविचरंतितारा:कलात्मनामौक्तिकतुल्यभासः॥क्रीडारतेवारिनिधौगजा
स्येवेलामतिक्रामतिवारिपूरे॥कल्पावसानेपरिचिंत्यदेवाःकैलासनाथंश्रुतिभिःस्तुवंति॥नागानननेनाग कृतोत्तरीयेक्रीडारतेदेवकुमार
संघैः॥त्वयिक्षणंकालगतिंविहायतौप्रापतुःकंदुकतामिनेंदू॥मदोल्लसत्पंचमुखैरजस्रमध्यापयंतंसकलागमार्थं॥देवानृषीन्भक्तजनै
कमित्रंहेरंबमर्कारुणमाश्रयामि॥पादांबुजाभ्यामतिवामनाभ्यांकृतार्थयंतंकृपयाधरित्रीं॥अकारणंकारणमाप्तवाचांतन्नागवक्त्रंन
जहातिचेतः॥येनार्पितंसत्यवतीसुतायपुराणमालिख्यविषाणकोट्या॥तंचंद्रमौलेस्तनयंतपोभिराराध्यमानंदघनंभजामि॥पदंश्रु
तीनामपदंस्तुतीनांलीलावतारंपरमात्ममूर्तेः॥नागात्मकंवापुरुषात्मकंवात्ऽभेद्यमाद्यंभजविघ्नराजं॥पाशांकुशौभग्नरदंत्वभीष्टंकरैर्द
धानंकररंध्रमुक्तैः॥मुक्ताफलाभैःपृथुशीकरौघैःसिंचंतमंगंशिवयोर्भजामि॥अनेकमेकंगजमेकदंतंचैतन्यरूपंजगदादिबीजं॥ब्रह्मेति
यंवेदविदोवदंतितंशंभुसूनुंसततंभजामि॥स्वांकस्थितायानिजवल्लभायामुखांबुजालोकनलोलनेत्रं॥स्मेराननाब्जंमदवैभवेनरुद्धं
भजेविश्वविमोहनंतं॥येपूर्वमाराध्यगजाननंत्वांसर्वाणिशास्त्राणिपठंतितेषां॥त्वत्तोनचान्यत्प्रतिपाद्यमेतैस्तदस्तिचेत्सर्वमसत्यकल्पं

३ प्रतोषयंतमिति प्रत्यंतरे॥३॥

हिरण्यवर्णं जगदीशितारं कविं पुराणं रविमंडलस्थं॥ गजाननं यं प्रविशंति संतस्तत्कालयोगैस्तमहं प्रपद्ये॥ वेदांतगीतं पुरुषं भजेऽहमात्मानमानंदघनं हृदिस्थं॥ गजाननं यन्महसा जनानां विघ्नांधकारो विलयं प्रयाति॥ शंभोः समालोक्य जटाकलापे शशांकखंडं निजपुष्करेण॥ सुभग्नदंतं प्रविचिंत्य मौग्ध्यादाक्रष्टुकामः श्रियमातनोतु॥ विघ्नाकुलानां विनिपातनार्थं यं नारिकेलैः कदलीफलाद्यैः॥ प्रसारयंते मदवारणास्तमग्रं सदाभीष्टमहं भजामि॥ यज्ञैरनेकैर्बहुभिस्तपोभिराराध्यमाद्यं गजराजवक्त्रं॥ स्तुत्यानया ये विधिवत्स्तुवंति ते सर्वलक्ष्मीनिलया भवंति॥ ॥इति गणेशस्तवराजः समाप्तः॥ ॥अथ हरिद्रागणेशकवचं॥ ॥ईश्वर उवाच॰॥ ॥शृणु वक्ष्यामि कवचं सर्वसिद्धिकरं प्रिये॥ पठित्वा पाठयित्वा च मुच्यते सर्वसंकटात्॥ अज्ञात्वा कवचं देवि गणेशस्य मनुं जपेत्॥ सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि॥ ॐ आमोदश्च शिरः पातु प्रमोदश्च शिखोपरि॥ संमोदो भ्रूयुगे पातु भ्रूमध्ये च गणाधिपः॥ गणक्रीडश्चक्षुयुगं नासायां गणनायकः॥ गणक्रीडान्वितः पातु वदने सर्वसिद्धये॥ जिह्वायां सुमुखः पातु ग्रीवायां दुर्मुखः सदा॥ विघ्नेशो हृदये पातु विघ्ननाशश्च वक्षसि॥ गणानां नायकः पातु बाहुयुग्मे सदा मम॥ विघ्नकर्ता च उदरे विघ्नहर्ता च लिंगके॥ गजवक्त्रः कटीदेशे एकदंतो नितंबके॥ लंबोदरः सदा पातु गुह्यदेशे ममारुणः॥ व्यालयज्ञोपवीती मां पातु पादयुगे सदा॥ जापकः सर्वदा पातु जानुजंघे गणाधिपः॥ हारिद्रः सर्वदा पातु सर्वांगे गणनायकः॥ य इदं प्रपठेन्नित्यं गणेशस्य महेश्वरि॥ कवचं सर्वसिद्धाख्यं सर्वविघ्नविनाशनं॥ सर्वसिद्धिकरं साक्षात्सर्वपापविमोचनं॥ सर्वसंपत्प्रदं साक्षात्सर्वपापविमोक्षणं॥ ग्रहपीडाज्वरा रोगा ये चान्ये गुह्यकादयः॥ पठनाद्धारणादेव नाशमायांति तत्क्षणात्॥ धनधान्यकरं देवि कवचं सुरपूजितं॥ समो नास्ति महेशानि त्रैलोक्ये कवचस्य च॥ हारिद्रस्य महेशानि कवचस्य च भूतले॥ किमन्यैरसदालापैर्य

२ शत्रुक्षयंकरमिति प्रत्यंतरे॥

न्नायुर्व्वर्यसतामियात्॥ ॥इति विश्वसारतंत्रे हरिद्रागणेशकवचं समाप्तं॥ ॥अथ सूर्यस्तोत्रम्॥ ॥वसिष्ठ उवाच॰॥ ॥स्तुवंस्तत्र ततः शांबः कृशो धमनिसंततः॥ राजन्नामसहस्रेण सहस्रांशुं दिवाकरं॥ विद्यमानं तु तं दृष्ट्वा सूर्यः कृष्णात्मजं तदा॥ स्वप्ने तु दर्शनं दत्त्वा पुनर्वचनमब्रवीत्॥ श्रीसूर्य उवाच॰ शांब शांब महाबाहो शृणु जांबवतीसुत॥ अलं नामसहस्रेण पठ त्विमं स्तवं शुभं॥ यानि नामानि गुह्यानि पवित्राणि शुभानि च॥ तानि ते कीर्तयिष्यामि श्रुत्वा वत्सावधारय॥ कवचस्य ऋषिर्ब्रह्मा छंदोनुष्टुबुदाहृतं॥ श्रीसूर्यो देवता चात्र सर्वदेवनमस्कृतः॥ आरोग्यप्रदो यशोमोक्षे विनियोगः प्रकीर्तितः॥ विकर्तनो विवस्वांश्च मार्तंडो भास्करो रविः॥ लोकप्रकाशकः श्रीमांल्लोकचक्षुर्ग्रहेश्वरः॥ ॥लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा॥ तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः॥ गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः॥ एकविंशतिरित्येष स्तव इष्टः सदा मम॥ श्रीरारोग्यकरश्चैव धनवृद्धियशस्करः॥ स्तवराज इति ख्यातस्त्रिषु लोकेषु विश्रुतः॥ य एतेन महाबाहो द्वे संध्ये स्तवनोदये॰ स्तौति मां प्रणतो भूत्वा सर्वपापैः प्रमुच्यते॥ कायिकं वाचिकं चैव मानसं यच्च दुष्कृतं॥ एकजाप्येन तत्सर्वं प्रणश्यति न संशयः॥ एष जप्यश्च होमश्च संध्योपासनमेव च॥ बलिमंत्रोर्घ्यमंत्रश्च धूपमंत्रस्तथैव च॥ अन्नप्रदाने स्नाने च प्रणिपाते प्रदक्षिणे॥ पूजितोयं महामंत्रः सर्वपापहरः शुभः॥ एवमुक्त्वा तु भगवान्भास्करो जगदीश्वरः॥ आमंत्र्य कृष्णतनयं तत्रैवांतरधीयत॥ शांबोपि स्तवराजेन स्तुत्वा सप्ताश्ववाहनं॥ पूतात्मा नीरुजः श्रीमांस्तस्माद्रोगाद्विमुक्तवान्॥ ॥इति शांबपुराणे सूर्यस्तवः॥ ॥अथ सूर्यकवचं॥ ॥श्रीसूर्य उवाच॰॥ शांब शांब महाबाहो शृणु मे कवचं शुभं॥ त्रैलोक्यमंगलं नाम कवचं परमाद्भुतं॥ यज्ज्ञात्वा मंत्रवित्सम्यक् फलमाप्नोति निश्चितं॥ यद्धृत्वा च महादेवो गणनामधिपोभवत्॥ पठनाद्धारणाद्विष्णुः सर्वेषां पालकः सदा॥ एवमिंद्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः॥ कवचस्य ऋषिर्ब्रह्मा छंदोनुष्टुबुदाहृ

तं॰सा॰
१८७

तं॥ ॥श्रीसूर्यो देवता चात्र सर्वदेवनमस्कृतः॥आरोग्ययशमोक्षेषु विनियोगः प्रकीर्तितः॥प्रणवो मे शिरः पातु घृणिर्मे पातु भालकं॥सूर्योव्यान्नय
नद्वंद्वमादित्यः कर्णयुग्मकं॥अष्टाक्षरो महामंत्रः सर्वाभीष्टफलप्रदः॥ह्रींबीजं मे मुखं पातु हृदयं भुवनेश्वरी॥चंद्रबीजं विसर्गाढ्यं पातु मे
गुह्यदेशकं॥त्र्यक्षरो सौ महामंत्रः सर्वतंत्रेषु गोपितः॥शिवो वन्हिसमायुक्तो वामाक्षिबिंदुभूषितः॥एकाक्षरो महामंत्रः श्रीसूर्यस्य प्रकीर्ति
तः॥गुह्याद्गुह्यतरो मंत्रो वांछाचिंतामणिः स्मृतः॥शीर्षादिपादपर्यंतं सदा पातु मनूत्तमः॥इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभं॥श्रीप्रदं
कांतिदं नित्यं धनारोग्यविवर्धनं॥कुष्ठादिरोगशमनं महाव्याधिविनाशनं॥त्रिसंध्यं यः पठेन्नित्यमरोगी बलवान्भवेत्॥बहुना किमिहो
क्तेन यद्यन्मनसि वर्तते॥तत्तत्सर्वं भवत्येव कवचस्य च धारणात्॥भूतप्रेतपिशाचाश्च यक्षगंधर्वराक्षसाः॥ब्रह्मराक्षसवेतालानैव द्रष्टुमपि
क्षमाः॥दूरादेव पलायंते तस्य संकीर्तनादपि॥भूर्जपत्रे समालिख्य रोचनागुरुकुंकुमैः॥रविवारे च संक्रांत्यां सप्तम्यां च विशेषतः॥धारयेत्साध
कश्रेष्ठस्त्रैलोक्यविजयी भवेत्॥त्रिलोहमध्यगं कृत्वा धारयेद्दक्षिणे भुजे॥शिखायामथवा कंठे सोपि सूर्यो न संशयः॥इति ते कथितं सांब त्रैलो
क्यमंगलाभिधं॥कवचं दुर्लभं लोके नैव स्नेहात्प्रकाशितं॥अज्ञात्वा कवचं दिव्यं यो जपेत्सूर्यमुत्तमं॥सिद्धिर्न जायते तस्य कल्पकोटिश
तैरपि॥१८॥इति ब्रह्मयामले त्रैलोक्यमंगलं नाम श्रीसूर्यकवचम्॥ ॥अथ विष्णुस्तोत्रं॥आदाय वेदान्सकलान्समुद्रान्निहत्य चोन्म॰
थ्य मधुं हुदुर्गं॥दत्तः पुरा येन पितामहाय विष्णुं तमाद्यं भज मत्स्यरूपम्॥११॥दिव्यामृतार्थं मथिते महाब्धौ देवासुरैर्वासुकिमंदराभ्यां॥
॥भूमेर्महावेगविघूर्णितायाः स्नं कूर्ममाधारगतं नमामि॥२॥ससमुद्रकांचीसरिदुत्तरीया वसुंधरा मेरुकिरीटभारा॥दंष्ट्राग्रतो येन समुद्धृता भूस्तमा
दिकोलं शरणं प्रपद्ये॥३॥भक्तार्तिभंगक्षमया धिया यस्तंभांतरालादुदितो नृसिंहः॥रिपुं सुराणां निशितैर्नखाग्रैर्विदारयंतं नच विस्मरा॰

३॥शंखं रिपुमसुदग्रमिति पुस्तकांतरे॥३

राम
१८७

मि॥४॥चतुःसमुद्राभरणाधरित्रीन्यासायनालंचरणस्ययस्य॥एकस्यनान्यस्यपदंसुराणांत्रिविक्रमंसर्वगतंनमामि॥५॥त्रिःसप्तकृत्वोनृप
तीन्निहत्ययस्तर्पणंरक्तमयंपितृभ्यः॥चकारदोर्दण्डबलेनसम्यक्तमादिशूरंप्रणमामिरामं॥६॥कुलेरघूणांसमवाप्यजन्मविधायसेतुंज
लधेर्जलांतः॥लंकेश्वरंयःशमयांचकारसीतापतिंतंप्रणमामिभक्त्या॥७॥हलेनसर्वानसुरान्विकृष्यचकारचूर्णंमुशलप्रहारैः॥यःकृष्ण
मासाद्यबलंबलीयान्भक्त्याभजेतंबलभद्ररामं॥८॥पुरासुराणामसुरान्विजेतुंसंभावयन्चीवरचिह्नवेशं॥चकारयःशास्त्रममोघकल्पंतंमूल
भूतंप्रणतोस्मिबुद्धं॥९॥कल्पावसानेनिखिलैःखुरैःस्वैःसंघट्टयामासनिमेषमात्रात्॥यस्तेजसानिर्दहनातिभीमोविष्वानम्कंतंतुरगंभजा
मः॥१०॥शंखंसुचक्रंसुगदांसरोजंदोर्भिर्दधानंगरुडाधिरूढं॥श्रीवत्सचिह्नंजगदादिमूलंतमालनीलंहृदिविष्णुमीडे॥११॥क्षीरांबुधौशे
षविशेषतल्पेशयानमंतःस्मितशोभिवक्त्रं॥उत्फुल्लनेत्रांबुजमंबुदाभमाद्यंश्रुतीनामसकृत्स्मरामि॥१२॥प्रीणयेदनयास्तुत्याजगन्नाथंज
गन्मयं॥धर्मार्थकाममोक्षाणामाप्तयेपुरुषोत्तमं॥१३॥ ॥इतिश्रीविष्णुस्तोत्रंसमाप्तम्॥ ॥अथश्रीरामकृद्धनुमत्स्तोत्रम्॥ ॥हनुमानु
वाच०॥ ॥तिरश्चामपिराजेतिसमवायंसमायुषां॥यथासुग्रीवमुख्यानांयस्तमुख्यंनमाम्यहम्॥१॥सकृदेवप्रपन्नायविशिष्टायैव
यस्त्रियं॥विभीषणायग्रवाद्यस्तंवीरप्रणमाम्यहं॥योमहापुरुषोव्यापीमहाब्धेःकरुणामृते॥स्तुतोयेनजटायुश्चमहाविष्णुनमाम्य
हं॥तेजसाप्यजितायस्यज्वलतिज्वलनादयः॥प्रकाशंतेस्वतंत्रायत्रंज्वलंतंनमाम्यहं॥सर्वतोमुखतोयेनलीलयादर्शितारणे॥राक्ष
सेश्वरयोधानांतंवंदेसर्वतोमुखं॥नृभावस्तुप्रपन्नानांहिनस्तिचयथानृषु॥सिंहसत्वोपिरोहृष्टस्तंनृसिंहंनमाम्यहं॥यस्माद्वि
भ्यंतिवातार्कज्वलनेंद्राःसमृत्यवः॥भयंसुनोतिपापानांभीषणंतंनमाम्यहं॥परस्ययोग्यतापेक्षाहरितोनिजमंगलं॥दद्या

त्येवं निजो दास्यो यस्तं भद्रं न मास्म्यहम्॥ योमृत्युं निजदासानां मारयत्यतिचेष्टदः॥ तत्रापि निजदासार्थं मृत्युं मृत्युं न मास्म्यहम्॥ य
स्यारूपध्यप्रणतो भवत्सुतम पुरुषः॥ नमीशं सर्वदेवानां नमनीयं नमाम्यहं॥ अहंभावं समुत्सिप्य दासो चैव रघूत्तमं॥ भजेहं सततं रामं ससी
तं सहलक्ष्मणम्॥ नित्यश्रीरामभक्तस्य किंकरा यम किंकराः॥ शिवमत्यो दिशालेस्य सिद्धयस्तस्य दासिकाः॥ इदं हनुमतः प्रोक्तं मंत्रराजात्म
कं स्तवम्॥ पठेद्नुदिनं यस्तु स रामे भक्तिमान्भवेत्॰॥ ॥इति हनुमत्कृते मंत्रराजात्मक स्तवराजः समाप्तः॥ ॥अथ रामाऽष्टोत्तरशतनाम॥
॥वेदव्यास उवाच॰॥ ॥शृणु गांगेय वक्ष्यामि रामस्याद्भुतकर्मणः॥ नामाष्टशतकं पुण्यं त्रिषु लोकेषु विश्रुतं॥ नातःपरतरं गुह्यं त्रिषु लोकेषु विद्य
ते॥ कैलासशिखरे रम्ये नानारत्नविभूषिते॥ एकाग्रे प्रणतो भूत्वा विष्णुमाराध्य भक्तितः॥ उपविष्टस्ततो भोक्तुं पार्वतीशंकरोब्रवीत्॥ पार्वत्यै।
हिमया सार्द्धं भोक्तुं प्रत्यवंदितै॥ प्राह पार्वती देवी जप्त्वा नामसहस्रकं॥ ततो भोक्ष्याम्यहं देव भुज्यतां भवता प्रभो॥ ततस्तां पार्वतीं प्राह प्रहसन्परमे
श्वरः॥ धन्यासि कृतपुण्यासि विष्णुभक्तासि पार्वति॥ दुर्लभा वैष्णवी भक्तिर्भागधेयासि पार्वति॥ एकादीनि नामानि शृण्वतो मम पार्वति॥ मनः
प्रसन्नता मेति रामनामेति शंकया॥ रमंते योगिनस्तेन सत्यानंदे चिदात्मनि॥ इति रामपदेनासौ परंब्रह्माभिधीयते॥ राम रामेति रामेति रमे
रामे मनोरमे॥ सहस्रनामभिस्तुल्यं रामनाम वरानने॥ रामेत्युक्त्वा महादेवि भुंक्ष्व सार्द्धं मयाधुना॥ ततो रामेति नामोक्त्वा सहभुंजीत पार्व
ति॥ ततो भुक्त्वा महादेवी पतिना सह संस्थिता॥ पप्रच्छ श्रीमहादेवं प्रीतिप्रणवमानसा॥ सहस्रनामभिस्तुल्यं रामनाम त्वयोदितं॥ त
स्य पुण्यानि नामानि संति चेद्वावणाहिषः॥ कथ्यतां मम देवेश तत्र मे प्रीतिरुत्तमा॥ श्रीशंकर उवाच॥ शृणु नामानि वक्ष्यामि रामचंद्रस्य पा
र्वति॥ लौकिका वैदिकाः शब्दाः यत्किंचित्संति पार्वति॥ नामानि राममंत्रस्य सहस्रं तेषु चाधिकं॥ तेषु चात्यंतमुख्यं हि नाम्नामष्टोत्तरशतं॥

जपतः सर्ववेदांश्च सर्वमंत्रांश्च पार्वति ॥ तस्मात्कोटिगुणं पुण्यं रामनाम्नैव लभ्यते ॥ अस्य श्रीरामचंद्रस्याष्टोत्तरशतनामस्य रामचंद्रो देवता महादेव ऋषिः अनुष्टुप्छंदः रामचंद्रप्रीत्यर्थे जपे विनियोगः ॥ ॐ श्रीरामो रामचंद्रश्च रामभद्रश्च शाश्वतः ॥ राजीवलोचनः श्रीमान्राजेंद्रो रघुपुंगवः ॥ जानकीवल्लभो जेत्रो जितामित्रो जनार्दनः ॥ विश्वामित्रप्रियो दान्तः शरणत्राणतत्परः ॥ वालिप्रमथनो वाङ्मी सत्यवाक् सत्यविक्रमः ॥ सत्यव्रतो व्रतफलः सदा हनुमदाश्रयः ॥ कौशलेयः खरध्वंसी विराधवधपंडितः ॥ विभीषणपरित्राता दशग्रीवशिरोहरः ॥ सप्ततालप्रभेत्ता च हरकोदंडखण्डनः ॥ जामदग्न्यमहादर्प्पदलनस्ताटकांतकः ॥ वेदांतसारोप्रमेयात्मा भववैद्यश्च भेषजः ॥ दूषणत्रिशिरारिश्च त्रिमूर्तिस्त्रिगुणस्त्रयी ॥ त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्र्यकीर्तनः ॥ त्रिलोकीरक्षको धन्वी दंडकारण्यपुण्यकृत् ॥ अहिल्यापावनश्चैव पितृभक्तो वरप्रदः ॥ जितेंद्रियो जितक्रोधो जितलोभो जगद्गुरुः ॥ ऋक्षवानरसंघाती चित्रकूटपदाश्रयः ॥ जयंतत्राणवरदः सुमित्रापुत्रसेवितः ॥ सर्वदेवाधिदेवश्च मृतवानरजीवनः ॥ मायामारीचहंता च महाभागो महाभुजः ॥ सर्ववेदस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः ॥ महायोगी महोदारः सुग्रीवेप्सितराज्यदः ॥ सर्वपुण्याधिकफलस्तीर्थः सर्वाघनाशनः ॥ आदिपुरुषो महापुरुषः परमः पुरुषस्तथा ॥ पुण्योदयो दयासारः पुराणः पुरुषोत्तमः ॥ स्मितवक्त्रो मितभाषी पूर्वभाषी च राघवः ॥ अनंतगुणगंभीरो वीरो दांतगुणोत्तरः ॥ मायामानुषचारित्र्यो महादेवाभिपूजितः ॥ सेतुकृज्जितवारीशः सर्वतीर्थमयो हरिः ॥ श्यामांगः सुंदरः शूरः पीतवासा धनुर्धरः ॥ सर्वयज्ञाधिपो यज्ञो जरामरणवर्जितः ॥ शिवलिंगप्रतिष्ठाता सर्वाद्योगुणवर्जितः ॥ परमात्मा परंब्रह्म सच्चिदानंदविग्रहः ॥ परंज्योतिः परंधाम पराकाष्ठा परात्परः ॥ परेशः पारगः पारः सर्वदेवात्मकः शिवः ॥ ओं तत्सद्रामभद्रस्य नाम्नामष्टोत्तरं शतं ॥

गुह्याद्गुह्यतमं देवी तव प्रीत्या प्रकीर्तितं ॥ यः पठेत् शृणुयाद्वापि भक्तियुक्तेन चेतसा ॥ स सर्वैर्मुच्यते पापैः कल्पकोटिसमुद्भवैः ॥ जलानि स्थलतां यांति शत्रवो यांति मित्रतां ॥ राजानो दासतां यांति वह्नयो यांति शीततां ॥ आनुकूल्यं च भूतानि स्थैर्यं यांति चलाः श्रियः ॥ अनुग्रहं ग्रहा यांति शांतिमायांत्युपद्रवाः ॥ पठतो भक्तिभावेन जनस्य गिरिसंभवे ॥ [illegible] यतो भूत्वा तस्य वश्यं जगत्त्रयं ॥ यद्यत्कामयते कामं तत्तदाप्नोति कीर्तनात् ॥ यः पठेद्रामभद्रस्य नाम्नामष्टोत्तरं शतं ॥ ज्ञानेनापि च कुर्वाणो न स पापेन लिप्यते ॥ सर्ववेदेषु तीर्थेषु दानेषु च तपःसु च ॥ तत्फलं कोटिगुणितं स्तवेनानेन लभ्यते ॥ अन्यकालेषु सर्वेषु पठनात्तत्समश्नुते ॥ कल्पकोटिसहस्राणि कल्पकोटिशतैरपि ॥ वैकुंठे वासमाप्नोति दशपूर्वैर्दशापरैः ॥ रामं दूर्वादलश्यामं पद्माक्षं पीतवाससं ॥ स्तुवंति नामभिर्दिव्यैर्न ते संसारिणो नराः ॥ रामाय रामभद्राय रामचंद्राय वेधसे ॥ रघुनाथाय नाथाय सीतायाः पतये नमः ॥ इमं मंत्रं महेशानि जपन्नेवं दिवानिशं ॥ सर्वपापैर्विनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥ इत्येतद्रामचंद्रस्य माहात्म्यं वेदसंमतं ॥ कथितं तव गांगेय यतस्त्वं वैष्णवोत्तमः ॥ वंदामहे महेशानं हरकोदंडखंडनं ॥ जानकीहृदयानंदचंदनं रघुनंदनं ॥ इति पद्मपुराणे पार्वतीश्वरसंवादे श्रीरामचंद्रस्याऽष्टोत्तरशतनामाख्यस्तवराजः समाप्तः ॥

॥ अथ कवचं ॥ ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनं ॥ जानकीलक्ष्मणोपेतं जटामुकुटमंडितं ॥ सासितूणधनुर्बाणपाणिं नक्तंचरांतकं ॥ स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुं ॥ रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदां ॥ श्रीरामकवचस्य बुधकौशिकऋषिरनुष्टुप्छंदः श्रीरामचंद्रो देवता श्रीरामचंद्रप्रीत्यर्थे जपे विनियोगः ॥ ॐ शिरो मे राघवः पातु भालं दशरथात्मजः ॥ कौशल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती ॥ घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ॥ जिह्वां विद्यानिधिः पातु कंठं भरतवंदितः ॥ स्कंधौ दिव्यायुधः पातु

२जितेंद्रियइतिपुस्तकांतरे ॥२ ४चारिणइतिप्रत्यंतरे ॥

भुजौभग्नेशकार्मुकः ॥ करौसीतापतिः पातुहृदयंजामदग्निजित् ॥ वक्षः पातुकबंधारिः स्तनौगीर्वाणवंदितः ॥ पार्श्वौकुलपतिः पातुकुक्षिमि
क्ष्वाकुनंदनः ॥ मध्यंपातुखरध्वंसीनाभिंजांबवदाश्रयः ॥ गुह्यंविद्यानिधिः पातुपृष्ठंपातुरघूद्वहः ॥ सुग्रीवेशः कटिपातुसक्थिनीहनुम
त्प्रभुः ॥ ऊरूरघूत्तमः पातुरक्षःकुलविनाशकृत् ॥ जानुनीसेतुकृत्पातुजंघेदशमुखांतकः ॥ पादौविभीषणश्रीदः पातुरामोऽखिलंवपुः ॥
एतांरामबलोपेतांरक्षांयःसुकृतीपठेत् ॥ सचिरायुःसुखीपुत्रीविजयीविनयीभवेत् ॥ पातालभूतलव्योमचारिणश्छद्मचारिणः ॥ नद्रष्टुम
पिशक्तास्तेरक्षितंरामनामभिः ॥ रामेतिरामचंद्रेतिरामभद्रेतिवास्मरन् ॥ नरोनलिप्यतेपापैर्भुक्तिंमुक्तिंचविंदति ॥ जगज्जैत्रैकमंत्रेणरामना
म्नाभिरक्षितं ॥ यःकरेधारयेत्तस्यकरस्थाःसर्वसिद्धयः ॥ भूर्जपत्रेत्विमांविद्यांगंधकुंकुमचर्चितां ॥ कृत्वावैधारयेद्यस्तुसोभीष्टंफलमाप्नुया
त् ॥ काकवंध्याचयानारीमृतवत्साचयाभवेत् ॥ बहुपत्याजीववत्सासातुस्यान्नात्रसंशयः ॥ वज्रपंजरनामेदंयोरामकवचंपठेत् ॥ अव्याहता
ज्ञः सर्वत्रलभतेजयमंगलं ॥ आदिष्टवान्यथास्वप्नेरामरक्षामिमांहरः ॥ तथालिखितवान्प्रातःप्रबुद्धोबुधकौशिकः ॥ धन्विनौबद्धनिस्त्रिंशौकाकप
क्षधरौशुभौ ॥ वीरौमांपथिरक्षेतांतावुभौरामलक्ष्मणौ ॥ तरुणौरूपसंपन्नौसुकुमारौमहाबलौ ॥ पुंडरीकविशालाक्षौचीरकृष्णाजिनांबरौ ॥
फलमूलाशिनौदांतौतापसौब्रह्मचारिणौ ॥ पुत्रौदशरथस्यैतौभ्रातरौरामलक्ष्मणौ ॥ शरण्यौसर्वसत्वानांश्रेष्ठौसर्वधनुष्मतां ॥ रक्षःकुलनिहंतारौ
त्रायेतांनोरघूत्तमौ ॥ आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषंगसंगिनौ ॥ रक्षणायममरामलक्ष्मणावग्रतःपथिसदैवगच्छतां ॥ सन्नद्धःकवची
खड्गीचापबाणधरोयुवा ॥ गच्छन्मनोरथश्चास्मान्रामःपातुसलक्ष्मणः ॥ अग्रतोस्तुनृसिंहोमेपृष्ठतोगरुडध्वजः ॥ पार्श्वयोस्तुधनुष्मंतौसशरौरामलक्ष्म
णौ ॥ रामोदाशरथिःशूरोलक्ष्मणानुचरोबली ॥ काकुत्स्थःपुरुषःपूर्णःकौशल्येयोरघूत्तमः ॥ वेदांतवेद्योयज्ञेशःपुराणपुरुषोत्तमः ॥ जानकीवल्लभःश्रीमा
नप्रमेयपराक्रमः ॥ रामायरामभद्रायरामचंद्रायवेधसे ॥ रघुनाथायनाथायसीतायाःपतयेनमः ॥ आपदामपहर्तारंदातारंसर्वसंपदां ॥ गुणाभिरामंश्रीरामंभूयोभूयोन

१लोकाभिराममितिसर्वपुस्तकपाठः ॥१

माप्पप्पहृ॥दह्मिणेलक्ष्मणेध

न्वीवामेचजानकीशुभा॥पुरतोमारुतिर्यस्यतंनमामिरघूत्तमं॥इत्येतानिचनामानिमद्भक्तःसततंपठेत्॥अश्वमेधायुतंपुण्यंसप्राप्नोति
नसंशयः॥इतिपद्मपुराणेवज्रपंजरनामेदंरामकवचंसमाप्तं॥ ॥अथब्रह्मयामलोक्तरामकवचं॥ ॥श्रीपार्वत्युवाच॰॥भगवन्स
र्वदेवेशसर्वदेवनमस्कृत॥सर्वमेकथितंदेवराममंत्रविशेषतः॥त्रैलोक्यमोहनंनामकवचंपूर्वसूचितं॥कथयस्वमहादेवयद्यहंतवव
ल्लभा॥ईश्वरउवाच॰॥शृणुवक्ष्यामिदेवेशिकवचंपरमाद्भुतं॥अत्यंतगोपनंगुह्यंमंत्रमंत्रौघविग्रहं॥श्रीरामकवचस्यब्रह्माऋषिर्गायत्री
छंदः श्रीरामचंद्रोदेवताममधर्मार्थकाममोक्षार्थेजपेविनियोगः॥प्रणवोमेशिरःपातुतारकोब्रह्मरूपकः॥अनंतोस्यासनःसेंदुर्नासांमे
कासरोवतु॥रांरामायनमइतिषड्वर्णोभुक्तिमुक्तिफलप्रदः॥भालेपायान्नेत्रयुग्मंरामोद्व्यक्षरसंज्ञकः॥क्लींपायाच्चश्रोत्रयुग्मंचैकाक्षरश्चमो
हनः॥क्लींरामायनमःइतिमुखंमेपरिरक्षतु॥ॐरामचंद्रायस्वाहाइतिनाभिमष्टाक्षरोवतु॥श्रीरामायनमइतिस्कंधौपातुस्वरान्तकः॥
श्रीरामचंद्रायरक्षोघ्नायनमइतिद्वादशाक्षरः॥हृदयंमेसदापातुरघुवंशसमुद्भवः॥ह्रींरामचंद्रायनमइतिपातूरुयुगलंमम॥क्लींरामभद्राय
सीतापतयेहिठंतकः॥सक्थिनीसततंपातुराक्षसानेविमर्दकः॥प्रणवंरामचंद्रायहृदंतोष्टाक्षरोमनुः॥जानुनीचसदापातुरक्षःकुलवि
नाशकः॥प्रणवंरामभद्रायहिठंतोष्टाक्षरोमनुः॥पादयुग्मंसदापातुवानरेंद्रप्रियप्रदः॥ह्रींसीतापतयेनमःप्राच्यांमांसर्वदावतु॥हूंजा
नकीवल्लभायस्वाहायाम्यांसदावतु॥ह्रौंजानकीनाथायेतिप्रतीच्यांमांसदावतु॥श्रीरघुनाथायनमःकौबेर्यांपरिरक्षतु॥नमोभगवते
भूयाच्चतुर्थ्यारघुनंदनः॥रक्षोघ्नविषयांतेचमधुरादिसमीरयेत्॥प्रसन्नवदनायेतिपश्चादमिततेजसे॥बलायपश्चाद्रामायविष्णवेत
दनंतरं॥प्रणवादिनमोंतोयंमालामंत्रमुदीरितः॥राजस्थानेसदापातुरघुवंशसमुद्भवः॥इतितेकथितंदेविसर्वमंत्रौघविग्रहं॥त्रैलो

क्यमोहनंनामकवचंब्रह्मविग्रहं॥ प्रातःकालेपठेद्यस्तुसोभीष्टंफलमाप्नुयात्॥ पूजाकालेपठेद्यस्तुकवचंसाधकोत्तमः॥ कीर्तिश्रीकां
तिमेधायुर्वृंहितोभवतिध्रुवं॥ रामचंद्रमयंब्रह्मकवचंमन्मुखोदितं॥ गुरुमभ्यर्च्यकवचंसाधकोहिपठेत्ततः॥ त्रिःसकृद्वायथाज्ञानं
सोपिपुण्यवतांवरः॥ देवमभ्यर्च्यविधिवत्पुरश्चर्यांसमाचरेत्॥ अष्टोत्तरशतंजप्त्वादशांशंहवनादिकं॥ ततस्तुसिद्धकवचःसर्वका
र्माणिसाधयेत्॥ मंत्रसिद्धिर्भवेत्तस्यपुरश्चर्यांविनाततः॥ गद्यपद्यमयीवाणीतस्यवक्त्रात्प्रवर्त्तते॥ वक्त्रेतस्यवसेद्वाणीकमलानिश्च
लागृहे॥ पुष्पांजल्यष्टकंदत्वामूलेनैवपठेत्सकृत्॥ अपिवर्षसहस्राणांपूजायाःफलमाप्नुयात्॥ विलिख्यभूर्जपत्रेचत्रैलोक्यविजयी
भवेत्॥ तद्गात्रंप्राप्यशस्त्राणिब्रह्मास्त्रादीनियानिच॥ माल्यानिकुसुमान्येवसुखदानिभवंतिहि॥ स्पर्द्धामुद्धूयभवनेलक्ष्मीर्वाणीमुखे
वसेत्॥ इदंकवचमज्ञात्वायोजपेद्राममंत्रकं॥ शतलक्षप्रजप्तोपिनमंत्रःसिद्धिदायकः॥ सशस्त्राघातमाप्नोतिसोचिरान्मृत्युमाप्नुयात्॥
॥ ॥ इतिब्रह्मयामलेरामत्रैलोक्यमोहनकवचम्॥ अथश्रीकृष्णस्तोत्रम्॥ प्रसीदभगवन्मह्यमज्ञानात्कुंठितात्मने॥ तवांघ्रिपंकजरजो
रागिणींभक्तिमुत्तमां॥ अजप्रसीदभगवन्नमितद्युतिपंजर॥ अप्रमेयप्रसीदास्मिन्दुःखहन्पुरुषोत्तम॥ स्वसंवेद्यप्रसीदात्मानंदात्मन्ननाम
य॥ अचिंत्यसारविश्वात्मन्प्रसीदपरमेश्वर॥ प्रसीदतुंगतुंगानांप्रसीदशिवशोभन॥ प्रसीदसुहृगंभीरगंभीराणांमहाद्युते॥ प्रसीदव्यक्ति
विस्तीर्णविस्तीर्णानामगोचर॥ प्रसीदार्द्रार्द्रजातीनांप्रसीदानंतपापिनां॥ गुरोर्गरीयसांसर्वेशप्रसीदानंतदेहिनां॥ जयमाधवमायात्मञ्जय
शाश्वतचक्रभृत्॥ जयशंखधरश्रीमान्जयनंदकनंदन॥ जयचक्रगदापाणेजयदेवजनार्द्दन॥ जयरत्नवरारब्धकिरीटाक्रांतमस्त
क॥ जयपक्षिपतिच्छायानिरुद्धार्ककरारुण॥ नमस्तेनरकारातेनमस्तेमधुसूदन॥ नमस्तेललितापांगनमस्तेनरकांतक॥ नमःपा

२स्रग्भृदितिप्रत्यंतरे॥२

४पूजनंहवनंचेष्टाध्यानंपश्चान्नमस्क्रियाइतिप्रत्यंतरे॥ ३वर्तिनेइतिप्रत्यंतरे॥३ ५हृष्णोइतिप्रत्यन्तरे॥ २चक्राभिन्नारिचक्रायचक्रिणेशत्रुबंधनइतिप्रत्यंतरे॥२

पहरेशाननमः सर्वभयापह॥ नमःसंभृतसर्वात्मन्नमःसंभृतकौस्तुभ॥ नमस्तेनयनातीतनमस्तेभयहारक॥ नमोविभिन्नदेहायनमः स्तुतिपथातिग॥ नमस्त्रिमूर्तिभेदेनसर्गस्थित्यंतहेतवे॥ विष्णवेत्रिदशारातिजिष्णवेपरमात्मने॥ चक्रच्छिन्नारिकंठायचक्रिणेशक्रबंधवे॥ विश्वायविश्ववंद्यायविश्वभूतात्ममूर्तये॥ नमोऽस्तुयोगिध्येयात्मन्नमस्तेऽध्यात्मरूपिणे॥ भुक्तिप्रदायभक्तानांनमस्तेमुक्तिदायिने॥ स्तवनंहवनंचेष्टाध्यानपूजनसत्क्रिया॥ देवेशाकर्मसर्वंमेभवेदाराधनंतव॥ इतिहवनजपार्चाभेदतोविष्णुपूजानियमहृदयकर्मा यस्तमंत्रीचिराय॥ सखलुसकलकामाप्राप्यहृष्टांतरात्माजननमृतिविमुक्तामुत्तमांभक्तिमेति॥ गोगोपगोपिकावीतंगोपालंगोषुगोप्रदं॥ गोपैरीड्यंगोसहस्रैर्नौमिगोकुलनायकं॥ प्रीणयेदनयास्तुत्याजगन्नाथंजगन्मयं॥ धर्मार्थकाममोक्षाणामाप्तयेपुरुषोत्तमं॥ इतिश्रीकृष्णस्तोत्रम्॥ ॥अथगोपालस्तोत्रम्॥ नवनीरदलश्यामंनीलेंदीवरलोचनं॥ वल्लवीनंदनंवंदेकृष्णंगोपालरूपिणं॥ स्फुरद्बर्हदलोद्बद्धनीलकुंचितमूर्धजं॥ कदंबकुसुमोद्बद्धवनमालाविभूषितं॥ गंडमंडलसंसर्गिचलत्कांचनकुंडलं॥ स्थूलमुक्ताफलोदारहारोद्योतितवक्षसं॥ हेमांगदतुलाकोटिकिरीटोज्ज्वलविग्रहं॥ मंदमारुतसंक्षोभवलितांबरसंचयं ॥रुचिरौष्ठपुटन्यस्तवंशीमधुरनि[illegible]॥ लसद्गोपालिकाचेतोमोहयंतंमुहुर्मुहुः॥ वल्लवीवदनांभोजमधुपानमधुव्रतं॥ क्षोभयंतंमनस्तासांसस्मेरापांगवीक्षणैः॥ यौवनो[illegible]देहाभिः संसक्ताभिःपरस्परं॥ विचित्रांबरभूषाभिर्गोपनारीभिरावृतं॥ प्रभिन्नांजनकालिंदीजलकेलिकलोत्सुकं॥ योधयंतंक्वचिद्गोपान्व्याह[illegible]वांगणं॥ कालिंदीजलसंसर्गिशीतलानिलकंपिते॥ कदंबपादपच्छायेस्थितंवृंदावनेक्वचित्॥ रत्नभूधरसंलग्नरत्नासनपरिग्रहम् कल्पपादपमध्यस्थहेममंडपिकांगतं॥ वसंतकुसुमामोदसुरभीकृतदिङ्मुखे॥ गोवर्द्धनगिरौरम्येस्थितंरासरसोत्सुकं॥ सव्यहस्ततलेन्यस्तगि

पिवर्यीतपत्रकं ॥ खंडिताखंडलोन्मुक्तमुक्तासारं घनाघनं ॥ वेणुवाद्यमहोल्लासकृतहुंकारनिःस्वनैः ॥ सवत्सैरुन्मुखैः शश्वद्गोकुलैरभिवीक्षितम् ॥ कृष्णमेवानुगायद्भिस्तच्चेष्टारसवर्त्तिभिः ॥ दंडपाशोद्यतकरैर्गोपालैरुपशोभितं ॥ नारदाद्यैर्मुनिश्रेष्ठैर्वेदवेदांगपार[illegible]ः ॥ प्रीतिसुस्निग्धया वाचा स्तूयमानं परात्परं ॥ य एवं चिंतयेद्देवं भक्त्या संस्तौति मानवः ॥ त्रिसंध्यं तस्य तुष्टोसौ ददाति वरमीप्सितं ॥ राजवल्लभतामेति [illegible]भवेत्सर्वजनप्रियः ॥ अचलां श्रियमाप्नोति स वाग्मी जायते ध्रुवम् ॥ ॥ इति गौतमीतंत्रे गोपालस्तवराजः ॥ ॥ अथ श्रीकृष्णकवचं ॥ ॥ श्रीना[illegible] उवाच ॥ श्रीकृष्णकवचं वक्ष्ये श्रीकीर्तिविजयप्रदं ॥ कांतारे पथि दुर्गे च सर्वरक्षाकरं नृणां ॥ ध्यात्वा नीलोत्पलश्यामं नीलकुंचितकुंतलं ॥ वर्हि[illegible]होल्लसन्मौलिं शरच्चंद्रनिभाननं ॥ राजीवलोचनं राजद्वेणुनादविभूषितं ॥ दीर्घपीनमहाबाहुं श्रीवत्सांकितवक्षसं ॥ पीतांबरधरं देवं गोपीगोकुलसेवितं ॥ रुक्मिणीसत्यभामाभ्यां संश्रितोभयपार्श्वकं ॥ भूभारहरणोद्युक्तं कृष्णं गीर्वाणवंदितं ॥ जपन्नित्यं मनुं भक्त्या मंत्रं सर्वार्थसिद्धये ॥ ॐ श्रीकृष्णकवचस्य विश्वामित्रऋषिरनुष्टुप् छंदः श्रीकृष्णो देवता मम सर्वार्थसिद्धये जपे विनियोगः ॥ हृदये वसुदः पातु मूर्द्धानं मम सर्वदा ॥ ललाटे देवकीसूनुर्भ्रुवौ नंदसुनंदनः ॥ नयने पूतनाहंता नासां शकटभंजनः ॥ यमलार्जुनहृत्कर्णौ कपोलौ नागमर्दनः ॥ दंतान्गोपालकः पातु जिह्वां हेयंगवीनभुक् ॥ ओष्ठं धेनुकजित्पायादधरं कौशिकात्मजः ॥ चिबुकं पातु गोविंदो बलदेवानुजो मुखं ॥ अक्रूरसहितः कंठं कुसोदन्तिमदान्तकः ॥ भुजौ चाणूरवैरी मे करौ कंसनिषूदनः ॥ हृदयं पातु मे कृष्ण उत्तंकायवरप्रदः ॥ उदरं मथुरानाथो नाभिं द्वारवतीपतिः ॥ रुक्मिणीवल्लभः पृष्ठं जघनं शिशुपालहा ॥ ऊरू पाण्डवदूतो मे जानुनी पार्थसारथिः ॥ विश्वरूपधरो जंघे प्रपदे भूमिपालकः ॥ चरणौ यादवः पातु पातु कृष्णोखिलं वपुः ॥ दिवा पातुँगन्नाथो रात्रौ नारायणः स्वयं ॥ एतत्कृष्णबलोपेतं यः कृष्णकवचं पठेत् ॥ स सर्वतो भयान्मुक्तः कृष्णे भक्तिमवाप्नुयात् ॥ इति वाराह

ज

पुराणेश्रीकृष्णकवचंसमाप्तं॥अथगोपालकवचं॥पुलस्त्यउवाच॥भगवन्सर्वधर्मज्ञकवचंयत्प्रकाशितं॥त्रैलोक्यमंगलंनामकृपयाकथय
प्रभो॥सनत्कुमारउवा॰॥शृणुवक्ष्यामिविप्रेंद्रकवचंपरमाद्भुतम्॥ ॥नारायणेनकथितंकृपयाब्रह्मणापुरा॥ब्रह्मणाकथितंमह्यंपरंस्नेहा
द्ददामिते॥अतिगुह्यतरंतत्त्वंब्रह्ममंत्रौघविग्रहं॥यद्धृत्वापठनाद्ब्रह्मासृष्टिंवितनुतेध्रुवं॥यद्धृत्वापठनात्पातिमहालक्ष्मीर्जगत्त्रयं॥प
ठनाद्धारणाच्छंभुःसंहर्त्तासर्वतत्त्ववित्॥त्रैलोक्यजननीदुर्गामहिषादिमहासुरान्॥वरदृप्तान्जघानैवपठनाद्धारणाद्यतः॥एवमिन्द्रादयः
सर्वेसर्वैश्वर्यमवाप्नुयुः॥शिष्यायविष्णुभक्तायसाधकायप्रकाशयेत्॥शठायपरशिष्यायदत्वामृत्युमवाप्नुयात्॥त्रैलोक्यमंगलस्यास्यकवचस्य
प्रजापतिः॥ऋषिश्छंदस्तुगायत्रीदेवोनारायणःस्वयं॥धर्मार्थकाममोक्षेषुविनियोगःप्रकीर्तितः॥प्रणवोमेशिरःपातुनमोनारायणाय
च॥भालंपायान्नेत्रयुग्ममष्टार्णोभुक्तिमुक्तिदः॥क्लींपायाच्छ्रोत्रयुग्मंमेचैकार्णःसर्वमोहनः॥क्लींकृष्णायसदाघ्राणंगोविंदायेतिजिह्विकां
॥गोपीजनपदंवल्लभायस्वाहाननंमम॥अष्टादशाक्षरोमंत्रःकंठंपातुदशाक्षरः॥गोपीजनपदंवल्लभायस्वाहाभुजद्वयं॥क्लींग्लौंक्लींश्यामलां
गायनमःस्कंधौदशाक्षरः॥क्लींकृष्णक्लींकरौपायात्क्लींकृष्णायांगजोवतु॥हृदयंभुवनेशानीक्लींकृष्णायक्लींस्तनौमम॥गोपालायाग्नि
जायांतंकुक्षियुग्मंसदावतु॥क्लींकृष्णायसदापातुपार्श्वयुग्मंसदावतु॥कृष्णगोविंदकौपातुस्मारायोङेयुतोमनुः॥अष्टाक्षरःपातुनाभिं
कृष्णेतिद्व्यक्षरोवतु॥पृष्ठंक्लींकृष्णकंकालंक्लींकृष्णायद्विठांतकः॥सक्थिनीसततंपातुश्रींह्रींक्लींकृष्णठद्वयं॥ऊरूसप्ताक्षरःपायात्त्रयो
दशाक्षरोवतु॥श्रींह्रींक्लींपदतोगोपीजनवल्लभपदंततः॥भायस्वाहेतिपायुंवैक्लींह्रींश्रींसदशाक्षरः॥जानुनीचसदापातुह्रींश्रींक्लींचद
[illegible]क्षरः॥त्रयोदशाक्षरःपातुजंघेचक्राद्युदायुधः॥अष्टादशाक्षरोह्रींश्रींपूर्वकोविंशदर्णकः॥सर्वांगेमेसदापातुद्वारकानायकोबली॥नमोभग

वन्हेपश्चाद्दासुदेवायनन्परं॥ ताराद्यो द्वादशार्णोयं प्राच्यां मां सर्वदावतु॥ श्रीं ह्रीं क्लीं दशवर्णस्क क्लीं श्रीं ह्रीं षोडशाक्षरः॥ सदा ह्युद्दायुधो विष्णुर्मामग्ने दिशि रक्षतु॥ श्रीं ह्रीं दशाक्षरो मंत्रो दक्षिणे मां सदावतु॥ तारो नमो भगवते रुक्मिणीवल्लभाय च॥ स्वाहेति षोडशार्णोयं नैर्ऋत्यां दिशि रक्षतु॥ क्लीं हृषीकेशाय नमो मां वारुणे वतु॥ अष्टादशार्णः कामांतो वायव्ये मां सदावतु॥ श्रीं मायाकामकृष्णाय गोविंदाय द्विठो मनुः॥ द्वादशार्णात्मको विष्णुरुत्तरे मां सदावतु॥ वाग्भवं कामकृष्णाय श्रीं गोविंदाय ततःपरं॥ ह्रीं गोपिजनवल्लभाय स्वाहा च सो [illegible]॥ द्वाविंशत्यक्षरो मंत्रो मामैशाने सदावतु॥ कालीयस्य फणामध्ये दिव्यं नृत्यं करोति तं॥ नमामि देवकीपुत्रं नृत्यराजानमच्युतं॥ द्वात्रिंशदक्षरो मंत्रोप्यधो मां सर्वदावतु॥ कामदेवाय विद्महे पुष्पबाणाय धीमहि॥ तन्नोनंगः प्रचोदयात्॥ ॥ एषा मां पातु चोर्द्ध्वतः॥ इति ते कथितं देवि ब्रह्ममंत्रौघविग्रहं॥ त्रैलोक्यमंगलं नाम कवचं ब्रह्मरूपिणं॥ ब्रह्मेशप्रमुखा धीशनारायणमुखाच्छ्रुतं॥ तव स्नेहान्मयाख्यातं प्रवक्तव्यं न कस्यचित्॥ गुरुं प्रणम्य विधिवत्कवचं प्रपठेत्ततः॥ सकृद्द्विस्त्रिर्यथाज्ञानं सोपि सर्वतपोमयः॥ मंत्रेषु सकलेष्वेव देशिको नात्र संशयः॥ शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः॥ हवनादीन्दशांशेन कृत्वा तद्धारयेद्ध्रुवं॥ यदि स्यात्सिद्धकवचो विष्णुरेव न संशयः॥ मंत्रसिद्धिर्भवेत्तस्य पुरश्चर्याविधानतः॥ स्पर्द्धामुद्धूय सततं लक्ष्मीर्वाणीवसेत्ततः॥ पुष्पांजल्यष्टकं दत्वा मूलेनैव पठेत्सकृत्॥ दशवर्षसहस्राणां पूजायाः फलमाप्नुयात्॥ भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि॥ कंठे वा दक्षिणे वाहौ सोपि विष्णुर्न संशयः॥ अश्वमेधसहस्राणि वाजपेयशतानि च॥ महादानानि यान्येव प्रादक्षिण्यं भुवस्तथा॥ कलां नार्हंति तान्येव सकृदुच्चारणात्ततः॥ कवचस्य प्रसादेन जीवन्मुक्तश्च साधकः॥ त्रैलोक्यं क्षोभयत्येव त्रैलोक्यविजयी भवेत्॥ इदं कवचमज्ञात्वा भजेद्यः पुरुषोत्तमं॥ शतलक्षप्रजप्तोपि न मंत्रः सिद्धिदायकः॥ ॥ इति सनत्कुमारीयतंत्रे त्रैलोक्यविजयं ना

मगोपालकवचंसमाप्तम्॥ ॥अथनृसिंहकवचं॥ नारदउवाच०॥ ॥इन्द्रादिदेववृंदेशईड्येश्वरजगत्पते॥ महाविष्णोर्नृसिंहस्यकवचंब्रू
हिमेप्रभो॥१॥यस्यप्रपठनाद्विद्वांस्त्रैलोक्यविजयीभवेत्॥ब्रह्मोवाच॥शृणुनारदवक्ष्यामिपुत्रश्रेष्ठतपोधन॥कवचंनरसिंहस्यत्रैलोक्यवि
जयीभवेत्॥स्रष्टाहंजगतांवत्सपठनाद्धारणाद्यतः॥लक्ष्मीर्जगत्त्रयंपातिसंहर्त्ताचमहेश्वरः॥पठनाद्धारणाद्देवाबहवश्चदिगीश्वराः॥ब्रह्म
मंत्रमयंवक्ष्येभूतादिविनिवारकं॥यस्यप्रसादाद्दुर्वासास्त्रैलोक्यविजयीभवत्॥पठनाद्धारणाद्यस्यशास्ताचक्रोधभैरवः॥त्रैलोक्यविजयस्या
पिकवचस्यप्रजापतिः॥ऋषिश्छंदश्चगायत्रीनृसिंहोदेवताविभुः॥क्ष्रौंबीजंमेशिरःपातुचंद्रवर्णोमहामनुः॥ॐउग्रंवीरंमहाविष्णुंज्वलंतंस
र्वतोमुखं॥नृसिंहंभीषणंभद्रंमृत्युमृत्युंनमाम्यहं॥द्वात्रिंशदक्षरोमंत्रोमंत्रराजःसुरद्रुमः॥कंठंपातुध्रुवंक्ष्रौंहृद्भगवतेचक्षुषीमम॥नरसिं
हायचज्वालामालिनेपातुकर्णकं॥दीप्तदंष्ट्रायचतथाअग्निनेत्रायनासिकां॥सर्वरक्षोघ्नायचतथासर्वभूतहितायच॥सर्वज्वरविनाशायद
हदहपदद्वयं॥रक्षरक्षवर्ममंत्रस्वाहापातुमुखंमम॥तरादिरामचंद्रायनमःपातुहृदंमम॥क्लींपायात्पार्श्वयुग्मंचतारोनमःपदंततः॥
नारायणायनाभिंच आंह्रींक्रौंक्ष्रौंचहुंफट्॥षडक्षरःकटिंपातुॐनमोभगवतेपदं॥वासुदेवायचपृष्ठंक्लींकृष्णायक्लींऊरुद्वयं॥क्लींकृ
ष्णायसदापातुजानुनीचमनूत्तमः॥क्लींग्लौंक्लींश्यामलांगायनमःपायात्पदद्वयं॥क्ष्रौंनृसिंहायक्ष्रौंचसर्वांगेमेसदावतु॥इतितेकथितं
वत्ससर्वमंत्रौघविग्रहं॥तवस्नेहान्मयाख्यातंप्रवक्तव्यंनकस्यचित्॥गुरुपूजांविधायाथगृह्णीयात्कवचंततः॥सर्वपुण्ययुतोभूत्वास
र्वसिद्धियुतोभवेत्॥शतमष्टोत्तरंचास्यपुरश्चर्याविधिःस्मृतः॥हवनादीन्दशांशेनकृत्वातत्साधकोत्तमः॥ततस्तुसिद्धकवचोरूपेणमद
नोपमः॥स्पर्द्धामुद्धूयभवनेलक्ष्मीर्वाणीवसेन्मुखे॥पुष्पांजल्यष्टकंदत्वामूलेनैवपठेत्सकृत्॥अपिवर्षसहस्राणांपूजानांफलमाप्नुया

त्॥ भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि॥ कंठे वा दक्षिणे बाहौ नरसिंहो भवेत्स्वयं॥ योषिद्वामभुजे चैव पुरुषो दक्षिणे करे॥ विभृयात्कव
चं पुण्यं सर्वसिद्धियुतो भवेत्॥ काकवंध्या च या नारी मृतवत्सा च या भवेत्॥ जन्मवंध्या नष्टपुत्रा बहुपुत्रवती भवेत्॥ कवचस्य प्रसादेन जीवन्मुक्तो भ
वेन्नरः॥ त्रैलोक्यं क्षोभयत्येव त्रैलोक्यविजयी भवेत्॥ भूतप्रेतपिशाचाश्च राक्षसा दानवाश्च ये॥ तं दृष्ट्वा प्रपलायंते देशाद्देशांतरं (दे)
ध्रुव॥ यस्मिन्गृहे च कवचं ग्रामे वा यदि तिष्ठति॥ तं देशं तु परित्यज्य प्रयांति अतिदूरतः॥ ॥इति ब्रह्मसंहितायां त्रैलोक्यमोहनं नाम नृसि
हकवचं समाप्तम्॥ ॥अथ शिवस्तोत्रम्॥ ॥धरापोग्निर्मरुद्व्योममखेशेंदर्कमूर्तये॥ सर्वभूतान्तरस्थाय शंकराय नमोनमः॥ [illegible]यत्तभूतवास
यस्तुतयेस्तुतजन्मने॥ अतींद्रियाय मंहसेशाश्वताय नमोनमः॥ स्थूलसूक्ष्मविभागाभ्यामनिर्देश्याय शंभवे॥ भवाय भवभूताय[illegible]ःस्वहंत्रे नमो
स्कृते॥ तर्कमार्गाभिभूताय तपसां फलदायिने॥ चतुर्वर्गवदान्याय सर्वज्ञाय नमोनमः॥ आदिमध्यांतशून्याय निरस्ताशेषभीतये॥ योगिध्येयाय
महते निर्गुणाय नमोनमः॥ विश्वात्मने विचिंत्याय विलसच्चंद्रमौलये॥ कंदर्पदर्पनाशाय कालहंत्रे नमोनमः॥ विषाशनाय विषधृक्वृष
स्कधमुपेयुषे॥ सरिद्वामसदाबद्धकंदर्पाय नमोनमः॥ शुद्धाय शुद्धभावाय शुद्धानामंतरात्मने॥ पुरांतकाय पूर्णाय पुण्यनाम्ने नमोनमः॥ तु
ष्टाय निजभक्तानां भुक्तिमुक्तिप्रदायिने॥ विवासिने निवासाय विश्वशास्त्रे नमोनमः॥ त्रिमूर्तिमूलभूताय त्रिनेत्रायादिशंभवे॥ त्रिधाम्नां धामरू
पाय जन्मघ्नाय नमोनमः॥ देवासुरशिरोरत्नकिरणारुणितांघ्रये॥ कांताय निजकांतायै दत्तार्धाय नमोनमः॥ स्तोत्रेणानेन पूजायां प्रीण
येज्जगतः पतिं॥ भुक्तिमुक्तिप्रदं साक्षात्सर्वज्ञं परमेश्वरम्॥ ॥इति शिवस्तोत्रं भैरवीकल्पोक्तम्॥ ॥अथास्य कवचं॥ ॥श्रीदेव्युवाच०॥ ॥भगव
न्देवदेवेश सर्वाम्नायप्रपूजित॥ सर्वं मे कथितं देव कवचं न प्रकाशितं॥ प्रासादाख्यस्य मंत्रस्य कवचं मे प्रकाशय॥ सर्वरक्षाकरं देव यदि स्नेहो
स्ति मां प्रति॥ श्रीभगवानुवाच०॥ प्रासादमंत्रकवचस्य वामदेवऋषिः पंक्तिश्छंदः सदाशिवो देवता साधकाभीष्टसिद्धये जपे विनियोगः॥ शि

४ जंभघ्नेति प्रत्यंतरे॥४

रोमेसर्वदापातुप्रासादाख्यःसदाशिवः॥षडक्षरस्वरूपोमेवदनंतुमहेश्वरः॥पंचाक्षरात्माभगवान्भुजौमेपरिरक्षतु॥मृत्युंजयस्त्रिबीजात्माआ
युरक्षतुमेसदा॥वटमूलसमासीनोदक्षिणामूर्तिरव्ययः॥सदामांसर्वतःपातुषट्त्रिंशार्णस्वरूपधृक्॥द्वाविंशार्णात्मकोरुद्रोदक्षिणेपरिरक्ष
तु॥त्रिवर्णात्मानीलकंठःकंठंरक्षतुसर्वदा॥चिंतामणिर्बीजरूपोअर्द्धनारीश्वरोहरः॥सदारक्षतुमेगुह्यंसर्वसपत्प्रदायकः॥एकाक्षरस्वरूपा
त्माकूटव्यापीमहेश्वरः॥मार्तंडभैरवोनित्यंपादौमेपरिरक्षतु॥तुंबुराख्योमहाबीजस्वरूपस्त्रिपुरांतकः॥सदामांरणभूमौचरक्षतुत्रिदशाधिपः
॥ऊर्द्धमूर्द्धानमीशानोममरक्षतुसर्वदा॥दक्षिणास्यंतत्पुरुषोऽव्यान्मेगिरिनायकः॥अघोराख्योमहादेवःपूर्वास्यंपरिरक्षतु॥वामदेवःपश्चिमा
स्यंसदामेपरिरक्षतु॥उत्तरास्यंसदापातुसद्योजातस्वरूपधृक्॥इत्थंरक्षाकरंदेविकवचंदेवदुर्लभं॥प्रातःकालेपठेद्यस्तुसोऽभीष्टफल
माप्नुयात्॥पूजाकालेपठेद्यस्तुकवचंसाधकोत्तमः॥कीर्तिश्रीकांतिमेधायुःसहितोभवतिध्रुवं॥कंठेयोधारयेदेतत्कवचंमत्स्वरूपकं॥
॥युद्धेचजयमाप्नोतिद्यूतेवादेचसाधकः॥कवचंधारयेद्यस्तुसाधकोदक्षिणेभुजे॥देवामनुष्यगंधर्वावश्यास्तस्यनसंशयः॥कवचंशिरसा
यस्तुधारयेद्यतमानसः॥करस्थास्तस्यदेवेशिअणिमाद्यष्टसिद्धयः॥भूर्जपत्रेत्विमांविद्यांशुक्लपट्टेनवेष्टितां॥रजतोदरसंविष्टांकृत्वा
वाधारयेत्सुधीः॥संप्राप्यमहतीलक्ष्मीमंते मद्देहरूपभाक्॥यस्मैकस्मैनदातव्यंनप्रकाश्यंकदाचन॥शिष्यायभक्तियुक्तायसाधकायप्र
काशयेत्॥अन्यथासिद्धिहानिःस्यात्सत्यमेतन्मनोरमे॥तवस्नेहान्महादेविकथितंकवचंशुभं॥नदेयंकस्यचिद्भद्रेयदीच्छेदात्मनोहितं॥योऽर्चे
येद्गंधपुष्पाद्यैःकवचंमन्मुखोदितं॥तेनार्चितामहादेविसर्वेदेवानसंशयः॥इतिभैरवतंत्रेसदाशिवकवचंसमाप्तम्॥ ॥अथवटुकस्तो
त्रम्॥ ॥सूतउवाच०॥ मेरुपृष्ठेसुखासीनंदेवदेवंत्रिलोचनं॥शंकरंपरिपप्रच्छपार्वतीपरमेश्वरं॥श्रीपार्वत्युवाच० भगवन्सर्वधर्म

ज्ञ सर्वशास्त्रागमादिषु॥ आपदुद्धारणं मंत्रं सर्वसिद्धिप्रदं नृणां॥ सर्वेषामेव भूतानां हितार्थं वांछितं मया॥ विशेषतस्तु राज्ञां वै शांतिपुष्टिप्रसाध
नं॥ अंगन्यासकरन्यासदेहन्याससमन्वितं॥ वक्तुमर्हसिरे वेश मम हर्षविवर्द्धनं॥ ईश्वर उवाच॰ शृणु देवि महामंत्रमापदुद्धारहेतुकं
॥ सर्वदुःखप्रशमनं सर्वशत्रुविनाशनं॥ अपस्मारादिरोगाणां ज्वरादीनां विनाशनं॥ सर्वेषां स्मृतिमात्रेण मंत्रराजमिमं प्रिये॥ ग्रहराजभ
यानां च नाशनं सुखवर्द्धनं॥ स्नेहाद्वक्ष्यामि ते मंत्रं सर्वसारमिमं प्रिये॥ मंत्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्लभं॥ सर्वकामार्थदं मंत्रं राज्यभो
गप्रदं नृणां आपदुद्धारणं मंत्रं प्रवक्ष्यामि विशेषतः॥ प्रणवं पूर्वमुद्धृत्य देवीप्रणवमुद्धरेत्॥ बटुकायेति वै पश्चादापदुद्धारणाय च॥ कुरुद्वय
ततः पश्चाद्बटुकाय पुनर्वदेत्॥ देवीप्रणवमुद्धृत्य मंत्रोद्धारमिमं प्रिये॥ मंत्रोद्धारमिमं देवि त्रैलोक्ये चातिदुर्लभं॥ अप्रकाश्यमिमं मंत्रं सर्व
शक्तिसमन्वितं॥ स्मरणादेव मंत्रस्य भूतप्रेतपिशाचकाः॥ विद्रवंत्यति भीता वै कालरुद्रादिव प्रजाः॥ पठेद्वा पाठयेद्वापि पूजयेद्वापि पु
स्तकं॥ नाग्निचौरभयं तत्र ग्रहराजभयं न हि॥ न च मारीभयं किंचित्सर्वत्र सुखवान्भवेत्॥ आयुरारोग्यमैश्वर्यं पुत्रपौत्रादिसंपदः॥ भवं
ति सततं तस्य पुस्तकस्यापि पूजनात्॥ श्रीपार्वत्युवाच॰ य एष भैरवो नाम आपदुद्धारको मतः॥ त्वया च कथितो देव भैरवः कल्प उत्तमः॥ तस्य ना
मसहस्राणि प्रयुतान्यर्बुदान्यपि॥ सारमुद्धृत्य तेषां वै नामाष्टशतकं वद॥ यानि संकीर्तयन्मर्त्यः सर्वदुःखविवर्जितः॥ सर्वान्कामानवाप्नो
ति साधकः सिद्धिमेव च॥ ईश्वर उवाच॰ शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः॥ आपदुद्धारकस्येह नामाष्टशतमुत्तमं॥ सर्वपापहरं पुण्यं
सर्वापद्विनिवारणं॥ सर्वकामार्थदं देवि साधकानां सुखावहं॥ देहांगन्यासकं चैव पूर्वं कुर्याद्विचक्षणः॥ नामाष्टशतकस्यास्य छंदोनुष्टुप्प्र
कीर्तितं॥ बृहदारण्यको नाम ऋषिर्देवोथ भैरवः॥ सर्वकामार्थसिध्यर्थे विनियोगः प्रकीर्तितः॥ भैरवं मूर्ध्नि विन्यस्य ललाटे भीमदर्शनं॥ नेत्र

योर्भूतहननं सारमेयानुगं भ्रुवोः ॥ कर्णयोर्भूतनाथं च प्रेतनाथं कपोलयोः ॥ नासापुटोष्ठयोश्चैव भस्मांगं सर्वभूषणं ॥ अनादिभूतम्मांसे च
शक्तिहस्तं गले न्यसेत् ॥ स्कंधयोर्दैत्यशमनं बाह्वोरतुलतेजसं ॥ पाण्योः कपालिनं न्यस्य हृदये मुंडमालिनं ॥ शांतं वक्षस्थले न्यस्य स्तनयोः का
मचारिणं ॥ उदरे च सदातुष्टं क्षेत्रेशं पार्श्वयोस्तथा ॥ क्षेत्रपालं पृष्ठदेशे चवक्तृं नाभिदेशके ॥ पापौघनाशनं कट्यां वटुकं लिंगदेशके ॥ गुदे रक्षा
करं न्यसेत्तथोर्वो रक्तलोचनं ॥ जानुनोर्घुर्घुरारावं जंघयो रक्तपाणिनं ॥ गुल्फयोः पादुकासिद्धिं पादपृष्ठे सुरेश्वरं ॥ आपादमस्तकं चैव आपदुद्धा
रकं तथा ॥ पूर्वे डमरुहस्तं च दक्षिणे दंडधारिणं ॥ खड्गहस्तं पश्चिमायां घंटावादिनमुत्तरे ॥ आग्नेय्यामग्निवर्णं च नैर्ऋत्यां च दिगंबरं ॥ वायव्ये
सर्वभूतस्थमीशान्ये चाष्टसिद्धिदं ॥ ऊर्ध्वे खेचारिणं न्यस्य पाताले रौद्ररूपिणं ॥ एवं विन्यस्य देहे स्वे षडंगेषु ततो न्यसेत् ॥ हृदये भूतनाथाय आदि
नाथाय मूर्द्धनि ॥ आनंदपदपूर्वाय नाथाय शिखासु च ॥ सिद्धशाबरनाथाय कवचे विन्यसेत्तथा ॥ सहजानंदनाथाय विन्यसेन्नेत्रयोस्त
था ॥ निःसीमानंदनाथाय अस्त्रे चैव प्रयोजयेत् ॥ एवं न्यासविधिं कृत्वा यथावत्तदनंतरम् ॥ ध्यानं तस्य प्रवक्ष्यामि यथा ध्यात्वा पठेन्नरः ॥ शुद्ध
स्फटिकसंकाशं सहस्रादित्यवर्चसं ॥ नीलजीमूतसंकाशं नीलांजनसमप्रभं ॥ अष्टबाहुं त्रिनयनं चतुर्बाहुं त्रिलोचनं ॥ दंष्ट्राकरालव
दनं नूपुरारावसंकुलं ॥ भुजंगमेखलं देवमग्निवर्णशिरोरुहं ॥ दिगंबरं कुमारेशं बटुकाख्यं महाबलम् ॥ खट्वांगमसिपाशं च शूलं दक्षिण
भागतः ॥ डमरुं च कपालं च वरदं भुजगं तथा ॥ अग्निवर्णसमोपेतं सारमेयसमन्वितं ॥ ध्यात्वा जपेत्सुसंहृष्टः सर्वान्कामानवाप्नुयात् ॥ करक
लितकपालः कुंडली दंडपाणिस्तरुणतिमिरनीलव्यालयज्ञोपवीती ॥ क्रतुसमयसपर्याविघ्नविच्छेदहेतुर्जयति बटुकनाथः सिद्धिदः साध
कानां ॥ १ ॥ अस्य श्रीआपदुद्धारबटुकभैरवस्तोत्रस्य बृहदारण्यको नाम ऋषिः श्रीभैरवो देवता अनुष्टुप् छंदः ह्रीं बीजं बटुकायेति शक्तिः

६ धनपः प्रतिभाववानिति पुस्तकांतरे॥ ५ कपालीति प्रत्यंतरे॥ ४ करालेति प्रत्यंतरे॥

प्रणवः कीलकं श्रीभीष्टसिध्यर्थे जपे विनियोगः॥ ॐ ह्रां बां अंगुष्ठाभ्यां नमः॥ ॐ ह्रीं बीं तर्जनीभ्यां नमः॥ ॐ ह्रूं बूं मध्यमाभ्यां नमः॥ ॐ ह्रैं बैं अनामिकाभ्यां नमः॥ ॐ ह्रौं बौं कनिष्ठिकाभ्यां नमः॥ ॐ ह्रः बः करतलकरपृष्ठाभ्यां नमः॥ ॐ ह्रां बां हृदयाय नमः॥ ॐ ह्रीं बीं शिरसे स्वाहा॥ ॐ ह्रूं बूं शिखायै वषट्॥ ॐ ह्रैं बैं कवचाय हुं॥ ॐ ह्रौं बौं नेत्रत्रयाय वौषट्॥ ॐ ह्रः बः अस्त्राय फट्॥ ॥ ॐ भैरवो भूतनाथश्च भूतात्मा भूतभावनः॥ क्षेत्रज्ञः क्षेत्रपालश्च क्षेत्रदः क्षत्रियो विराट्॥ १॥ श्मशानवासी मांसाशी खर्पराशी स्मरांतकः॥ रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः॥ २॥ कंकालः कालशमनः कलाकाष्ठातनुः कविः॥ त्रिनेत्रो बहुनेत्रश्च तथा पिंगललोचनः॥ ३॥ शूलपाणिः खड्गपाणिः कंकाली धूम्रलोचनः॥ अभीरुर्भैरवीनाथो भूतपो योगिनीपतिः॥ ४॥ धनदो धनहारी च धनवान् प्रतिभानवान्॥ नागहारो नागपाशो व्योमकेशः कपालभृत्॥ कालः कपालमाली च कमनीयः कलानिधिः॥ त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपः॥ ६॥ त्रिनेत्रतनयो डिंभः शांतः शांतजनप्रियः॥ बटुको बटुकेशश्च खट्वांगवरधारकः॥ ७॥ भूताध्यक्षः पशुपतिर्घुर्घूकपरिचारितः॥ धूर्तो दिगंबरः शौरिर्हरिणः पांडुलोचनः॥ प्रशांतः शांतिदः शुद्धः शंकरप्रियबांधवः॥ अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः॥ ८॥ अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः॥ भूधरो भूधराधीशो भूपतिर्भूधरात्मजः॥ १०॥ कंकालधारी मुंडी च आंत्रयज्ञोपवीतवान्॥ जृंभणो मोहनः स्तंभी मारणः क्षोभणस्तथा॥ शुद्धो नीलांजनप्रख्यो दैत्यहा मुंडभूषितः॥ बलिभुग्बलिभुङ्नाथो बालो बालपराक्रमः॥ सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः॥ कामी कलानिधिः कांतः कामिनीवशकृद्वशी॥ सर्वसिद्धिप्रदो वैद्यः प्रभुर्विष्णुरितीव हि॥ ॥ अष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः॥ मया ते कथितं देवि रहस्यं सर्वकामदं॥ य इदं पठति स्तोत्रं नामाष्टशतमुत्तमं॥ न तस्य दुरितं किंचिद्रोगाणां च भयं तथा॥ न शत्रुभ्यो भयं किंचित्प्राप्नुयान्मानवः क्वचित्॥ पातकानां भयं किंचित् यः पठेत्स्तोत्रमुत्तमं॥ मारीभये राजभये त

६ भिक्षुकः परिचारकः॥ ६ शौरिरिति प्रत्यंतरे॥ ४ शुद्धनीलांजनेति प्रत्यंतरे॥ ३ प्रभविष्णुः प्रभाववानिति प्रत्यंतरे॥ वह्निरिति प्रत्यंतरे॥

था चौराग्निजे भये॥ औत्पातिके महाघोरे तथा दुःस्वप्नजे भये॥ बंधने च तथा घोरे पठेत्स्तोत्रमनुत्तमं॥ सर्वं प्रशमनं याति भयं भैरवकीर्तनात्॥ ए
कादशसहस्रं तु पुरश्चरणमुच्यते॥ यस्त्रिसंध्यं पठेद्देवि संवत्सरमतंद्रितः॥ स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानवः॥ षण्मासाद्भूमिकामस्तु ज
पित्वा प्राप्नुयान्महीं॥ राजशत्रुविनाशार्थं जपेन्मासाष्टकं यदि॥ रात्रौ वारत्रयं देवि नाशयत्येव शात्रवान्॥ जपेन्मासत्रयं मर्त्यो राजानं वशमानयेत्
॥ धनार्थी वा सुतार्थी वा दारार्थी यस्तु मानवः॥ जपेन्मासत्रयं देवि वारमेकं तथा निशि॥ धनं पुत्रांस्तथा दारान्प्राप्नुयान्नात्र संशयः॥ रोगी रोगात्प्रमुच्ये
त बद्धो मुच्येत बंधनात्॥ भीतो भयात्प्रमुच्येत देवि सत्यं न संशयः॥ निगडैश्चापि बद्धो यः कारागृहनिपातितः॥ शृंखलाबंधनं प्राप्तः पठेच्चै
व दिवा निशि॥ यान्यान्समीहते नित्यं तांस्तान्प्राप्नोत्यसंशयं॥ अप्रकाश्यं परं गुह्यं न देयं यस्य कस्यचित्॥ सत्कुलीनाय ऋजवे दंभमोहविव
र्जिते॥ दद्यात्स्तोत्रमिदं पुण्यं सर्वकामफलप्रदं॥ भैरवोपि प्रसन्नोभूत्स्वयं च महेश्वरः॥ एवं श्रुत्वा ततो देवी नामाष्टशतमुत्तमं॥ संतोषं परमं प्रा
प्य भैरवस्य महात्मनः॥ जजाप परया प्रीत्या सदा सर्वेश्वरेश्वरी॥ अश्वत्थमूलेर्कवारे स्थित्वा पठति यः पुमान्॥ अचलां श्रियमाप्नोति सं
ग्रामे विजयी भवेत्॥ ॥ इति श्रीविश्वसारोद्धारे रुद्रयामले उमामहेश्वरसंवादे आपदुद्धारक बटुकभैरवस्तवराजः समाप्तः॥ अथ भैरवीस्त
वराजः॥ स्तुत्मान यो त्वां त्रिपुरे स्तोष्येभीष्टफलाप्तये। यथा व्रजंति तां लक्ष्मीं मनुजाः सुरपूजितां॥ ब्रह्मादयः स्तुतिशतैरपि सूक्ष्मरूपां जानंति
नैव जगदादिमनादिमूर्तिं॥ तस्माद्वयं कुचनतां नवकुंकुमाभां स्थूलां स्तुमः सकलवाङ्मयमातृभूतां॥ १॥ सद्यः समुद्यतसहस्रदिवाकराभां
विद्याक्षसूत्रवरदाभयचिह्नहस्तां॥ नेत्रोत्पलैस्त्रिभिरलंकृतवक्त्रपद्मां त्वां तारहाररुचिरां त्रिपुरे भजामः॥ २॥ सिंदूरपूररुचिरां कुचभारनम्रां
जन्मांतरेषु कृतपुण्यफलैकगम्यां। अन्योन्यभेदकलहाकुलमानसास्ते जानंति किं जडधियस्तव रूपमंब॥ ३॥ स्थूलां वदंति मुनयः श्रुतयो गृ

१॥ पुंजेति प्रत्यंतरे॥

२ मसिरागधरासी.नेपुस्तकांतरे२विद्यामितिप्रत्यंतरे॥२

णंति सूक्ष्मां वदंति वचसामधिवासमन्ये ॥ त्वां मूलमाहुरपरे जगतां भवानि मन्यामहे वयमपारकृपांबुराशिं ॥४॥ चंद्रावतंसकलितां शरदिंदुशुभ्रां पंचाशदक्षरमयीं हृदि भावयंती ॥ त्वां पुस्तकं जपवटीममृताढ्यकुंभं व्याख्यां च हस्तकमलैर्दधतीं त्रिनेत्रां ॥५॥ शंभुस्त्वमद्रितनयाकलितार्द्धभागो विष्णुस्त्वमंब कमलापरिरब्धदेहः ॥ पद्मोद्भवस्त्वमपि वागधिवासभूमिस्तेषां क्रियाश्च जगति त्रिपुरे त्वमेव ॥६॥ आश्रित्य वाग्भवभवांश्चतुरः परादीन् भावान्पदेषु विहितान्समुदीरयंतं ॥ कंठादिभिश्च करणैः परदेवतां तां संविन्मयीं हृदि कदापि न विस्मरामि ॥७॥ आकुंच्य वायुमवजित्य च वैरिषट्कमालोक्य निश्चलधिया निजनासिकाग्रं ॥ ध्यायंति मूर्ध्नि कलितेंदुकलावतंसं त्वद्रूपमंब कृतिनस्तरुणार्कमित्रम् ॥ त्वां प्राप्य मन्मथरिपोर्वपुरर्द्धभागं सृष्टिं करोति जगतामिति वेदवादः ॥ सत्यं तदद्रितनये जगदेकमातर्नो चेदशेषजगतः ८ स्थितिरेव न स्यात् ॥९॥ पूजां विधाय कुसुमैः सुरपादपानां पीठे तवांब कनकाचलगह्वरेषु ॥ गायंति सिद्धवनिताः सह किंनरीभिरास्वादितासवरसारुणनेत्रपद्माः ॥१०॥ विद्युद्विलासवपुषः श्रियमुद्वहंती यांती स्ववासभवनाच्छिवराजधानीं ॥ सौषुम्नवर्त्मकमलानि विकाशयंती देवीं भजे हृदि परामृतसिक्तगात्रीं ॥११॥ आनंदजन्मभवनं भवनं श्रुतीनां चैतन्यमात्रतनुमंब तवाश्रयामि ॥ ब्रह्मेशविष्णुभिरुपासितपादपद्मां सौभाग्यजन्मवसतिं त्रिपुरे यथावत् ॥१२॥ शब्दार्थभाविभवनं सृजतींदुरूपा या तद्बिभर्ति पुनरर्कतनुः स्वशक्त्या ॥ ब्रह्मात्मिका हरति तत्सकलं युगांते तां शारदां मनसि जातु न विस्मरामि ॥१३॥ नारायणीति नरकार्णवतारिणीति गौरीति खेदशमनीति सरस्वतीति ॥ ज्ञानप्रदेति नयनत्रयभूषितेति त्वामद्रिराजतनये बहुधा वदंति ॥१४॥ ये स्तुवंति जगन्मातः श्लोकैर्द्वादशभिः क्रमात् ॥ त्वामनुप्राप्य वाक्सिद्धिं प्राप्नुयुस्ते नराः श्रियम् ॥१५॥ ॥ इति भैरवीस्तोत्रं समाप्तं ॥ अस्याः कवचं ॥ श्रीदेव्युवा० ॥ भैरव्याः सकला विद्याः श्रुताश्चाधिगता मया ॥ सांप्रतं श्रो

२भजंतीतिप्रत्यंतरे॥२

४[illegible]भर्ति पुनरर्धतनुः स्वशक्त्या ॥ ब्रह्मात्मिकेति प्रत्यंतरे ॥४

तुमिच्छामि कवचं यत्पुरोदितं ॥ त्रैलोक्यविजयं नाम शस्त्रास्त्रविनिवारणं ॥ त्वत्तः परतरो नाथ कः कृपां कर्तुमर्हति ॥ ईश्वर उवाच ॥ शृणु पार्वति वक्ष्यामि सुंदरि प्राणवल्लभे ॥ त्रैलोक्यविजयं नाम कवचं मंत्रविग्रहं ॥ पठित्वा धारयित्वेदं त्रैलोक्यविजयी भवेत् ॥ जघान सकलान्दैत्यान्यद्धृत्वा मधुसूदनः ॥ ब्रह्मा सृष्टिं वितनुते यद्धृत्वाभीष्टदायकः ॥ धनाधिपः कुबेरोपि वासवस्त्रिदशेश्वरः ॥ यस्य प्रसादादीशोहं त्रैलोक्यविजयी विभुः ॥ न देयं परशिष्येभ्योऽसाधकेभ्यः कदाचन ॥ पुत्रेभ्यः किमथान्येभ्यो दद्याच्च मृत्युमाप्नुयात् ॥ भैरव्याः कवचस्यापि दक्षिणामूर्तिरेव च ॥ विराट्छंदो जगद्धात्री देवता बालभैरवी ॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥ अधरो बिंदुमानाद्यः कामः शक्तीशश्रीयुतः ॥ भृगुर्मनुः स्वरयुतः सर्गी बीजत्रयात्मिका ॥ बालेशा मे शिरः पातु बिंदुनादयुतापि सा ॥ भालं पातु कुमारी सा सर्गहीना कुमारिका ॥ दृशौ पातु च वाग्बीजं कर्णयुग्मं सदावतु ॥ कामबीजं सदा पातु घ्राणयुग्मं परावतु ॥ सरस्वतीप्रदा बाला जिह्वां पातु शुचिप्रभा ॥ हस्रैं कंठं हसकलरीं स्कंधौ पातु हस्रौर्भुजौ ॥ पंचमी भैरवी पातु करौ हस्रैं सदावतु ॥ हृदयं हसकलरीं वक्षः पातु हसौः स्तनौ मम ॥ पातु सा भैरवी देवी चैतन्यरूपिणी मम ॥ हस्रैं पातु सदा पार्श्वयुग्मं हसकल रीं सदा ॥ कुक्षिं पातु हसौं मध्ये भैरवी भुवि दुर्लभा ॥ ऐं ईं ओं मे मध्यदेशं बीजविद्या सदावतु ॥ हस्रैं पृष्ठं सदा पातु नाभिं हसकलह्रीं सदा ॥ पातु हसौः करौ पातु षट्कूटा भैरवी मम ॥ संहस्रैं सक्थिनी पातु सहकलरीं सदावतु ॥ गुह्यदेशं हसौः पातु जानुनी भैरवी मम ॥ संपत्प्रदा सदा पातु हैं जंघे हसक्लीं पदं ॥ पातु हंसौः सर्वदेहं भैरवी सर्वदावतु ॥ हसैं मामवतु प्राच्यां हसक्लौं पावकेऽवतु ॥ हसैं मे दक्षिणे पातु भैरवी चक्रसंस्थिता ॥ ह्रीं क्लीं ब्लें मां सदा पातु नैर्ऋत्यां चक्रभैरवी ॥ हसैंकल ह्रीं हसरौः पश्चिमे पातु भैरवी ॥ क्रौं क्रौं क्रौं पातु वायव्ये हूं हूं पातु सदोत्तरे ॥ ह्रीं ह्रीं पातु सदैशान्ये दक्षिणे कालिकेऽवतु ॥ ऊर्ध्वं प्रागुक्तबीजानि रक्षंतु मामधःस्थले ॥ दिग्विदि

[illegible]पातुकालिकाखड्गधारिणी॥ॐह्रींस्त्रींहूंफट्सातारासर्वत्रमांसदावतु॥संग्रामेकाननेदुर्गेतोयेतरंगदुस्तरे॥खड्गकर्तृधरासोग्रा[illegible]मांपरिरक्षतु॥इतितेकथितंदेविसारात्सारतरंमहत्॥त्रैलोक्यविजयंनामकवचंपरमाद्भुतम्॥यःपठेत्प्रयतोभूत्वापूजायाःफलमाप्नुयात्॥स्पर्द्धामुद्धूयभवनेलक्ष्मीर्वाणीवसेत्ततः॥यःशत्रुभीतोरणकातरोवाभीतोवनेवासलिलालयेवा॥वादेसभायांप्रतिवादिनोवारक्षःप्रकोपाद्ग्रहसंकुलाद्वा॥प्रचंडदंडाक्षमनाच्चभीतोगुरोःप्रकोपादपिकृच्छ्रसाध्यात्॥अभ्यर्च्यदेवींप्रपठेत्त्रिसंध्यंसस्यान्महेशप्रतिमोजयीच॥त्रैलोक्यविजयंनामकवचंमन्मुखोदितं॥विलिख्यभूर्जेगुटिकांस्वर्णस्थांधारयेद्यदि॥कंठेवादक्षिणेबाहौत्रैलोक्यविजयीभवेत्॥तद्गात्रंप्राप्यशस्त्राणिभवंतिकुसुमानिच॥लक्ष्मीःसरस्वतीतस्यनिवसेद्भवनेमुखे॥एतत्कवचमज्ञात्वायोजपेद्भैरवींपरां॥बालांवाप्रजपेद्विद्वान्दरिद्रोमृत्युमाप्नुयात्॥ ॥इतिरुद्रयामलेदेवीश्वरसंवादेत्रैलोक्यविजयंनामभैरवीकवचंसमाप्तम्॥

॥अथश्रीविद्यास्तोत्रम्॥

॥कल्याणवृष्टिभिरिवामृतपूरिताभिर्लक्ष्मीःस्वयंवरणमंगलदीपिकाभिः॥सेवाभिरंबतवपादसरोजमूलेनाकारिकिंमनसिभक्तिमतांजनानां॥१॥एतावदेवजननिस्पृहणीयमास्तेत्वद्वंदनेषुसलिलस्थसरोजनेत्रे॥सान्निध्यमुद्यदरुणांबुजसोदरस्यत्वद्विग्रहस्यसुधयापरयाप्लुतस्य॥२॥ईषत्स्वभावकलुषाःकतिनामसंतिब्रह्मादयःप्रतिदिनंप्रलयाभिभूताः॥एकःसएवजननिस्थिरसिद्धिरास्तेयःपादयोस्तवसकृत्प्रणतिंकरोति॥३॥लब्ध्वासकृत्त्रिपुरसुंदरितावकीनंकारुण्यकंदलितकांतिभरंकटाक्षं॥कंदर्पभावसुभगास्त्वयिभक्तिभाजःसंमोहयंतितरुणीर्भुवनत्रयेपि॥४॥ह्रींकारमेवतवनामगृणंतिदेवामातस्त्रिकोणनिलयेत्रिपुरेत्रिनेत्रे॥त्वत्संस्मृतौयमभटाभिभवंविहायदीव्यंतिनंदनवनेसहलोकपालैः॥५॥हंतुःपुरामधिगलंपरिपूर्णमाणःक्रूरःकथंनभवितागरलस्यवेगः॥नाश्वासनाययदिमातरिदंतवार्द्धंदेहस्य

भवस्मितिप्रस[illegible]रे॥३

१ नान्यमिति प्रत्यंतरे॥

शश्वदमृताप्लुतशीतलस्य॥ ६॥ सर्वज्ञतां सदसि वाक्पटुतां प्रसूते देवि त्वदंघ्रिसरसीरुहयोः प्रणामः॥ किंच स्फुरन्मुकुटमुज्ज्वलमातप
त्रं द्वे चामरे च महतीं वसुधां ददाति॥ ७॥ कल्पद्रुमैरभिमतःप्रतिपादनेषु कारुण्यवारिधिभिरंब भवत्कटाक्षैः॥ आलोकय त्रिपुरसुंदरि मा
मनाथं त्वय्येव भक्तिभरितं त्वयि बद्धतृष्णं॥ ८॥ हंतेतरेष्वपि निधाय मनांसि चान्ये भक्तिं वहंति किल पामरदैवतेषु॥ त्वामेव वंदे विमनसाहमपि
स्मरामि त्वामेव वंदे विशरणं जननि त्वमेव॥ ९॥ लक्ष्येषु सन्त्वपि तवाक्षिविलोकितानामालोकय त्रिपुरसुंदरि मां कथंचित्॥ नूनं मयापि सदृशं
करुणैकपात्रं जातो जनिष्यति जनो न च जायते वा॥ १०॥ ह्रीं ह्रीमिति प्रतिदिनं जपतां तवाख्यां किं नाम दुर्लभमिह त्रिपुराधिवासे॥ मालाकि
रीटमदवारणमाननीयांस्तान् सेवते मधुमती स्वयमेव लक्ष्मीः॥ ११॥ संपत्कराणि सकलेंद्रियनंदनानि साम्राज्यदानकुशलानि सरोरुहा
क्षि॥ त्वद्वंदनानि दुरिताहरणोद्यतानि मामेव मातरनिशं कलयंतु तौ नि॥ १२॥ कल्पोपसंहरणकल्पिततांडवस्य देवस्य खंडपरशोः परभै
रवस्य॥ पाशांकुशैक्षवशरासनपुष्पबाणा सा साक्षिणी विजयते जगदेकमूर्तिः॥ १३॥ लग्नं सदा भवतु मातरिदं तवदीयं तेजः परं बहुलकुंकु
मपंकशोणं॥ भास्वत्किरीटममृतांशुकलावतंसं त्वद्रूपमं बहति नस्तरुणार्कमित्रं॥ १४॥ ह्रीकारमेव तव धाम तदेव रूपं त्वन्नाम सुंदरि
सरोजनिवासशीले॥ त्वत्तेजसा परिणतं वियदादिभूतं संगतनोतु सरसीरुहशंभवाद्यं॥ १५॥ ह्रीकारत्रयसंपुटेन महता मंत्रेण
संदीपितं स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मंत्रवित्॥ तस्य क्षोणिभुजो भवंति वशगा लक्ष्मीश्चिरस्थायिनी वाणी निर्मलसूक्तिभा
विभैरे तु जागर्ति विश्वं यशः॥ १६॥ ॥ इति ब्रह्माविरचितं कल्याणीस्तोत्रम्॥ ॥ अथ किंकिणीस्तवः॥ अथ स्तवं प्रवक्ष्यामि त्रिपुरार्णवसं॥ एम
[illegible]॥ किं दुःखं सकलजननि क्षीयते न स्मृता या का का कीर्तिः कुलकमलिनि प्राप्यते नार्चिता या॥ किं किं सौख्यं सुरवरनुते प्राप्यते ना १९८

२ दीर्घमिति प्रत्यंतरे॥ रूपं त्रिकोणमुदितं परमामृतार्द्रं इति प्रत्यंतरे॥ ३ सूक्तिरिति प्रत्यंतरे॥

निःसीमायै कंकं योगं त्वयि वितन्वते चित्तमालंबिनायै॥ सर्गसंसर्गसंरंभस्फारितामोघविक्रमे॥ चिच्चंद्रमंडलांतस्थे नमस्ते हरवल्लभे॥ जगदाह्लादिनी योगभोगविन्यासयोगिनि॥ स्थितिभावस्थिते देवि नमः स्थाणुप्रियेंबिके॥ भावाभावपृथग्भावस्वभावोदयकर्मणि॥ चैतन्यपंचके देवि नमस्तुभ्यं हरांगने॥ स्मृता भवभयध्वंसि पूजितासि शुभंकरि॥ स्तुता त्वं वांछितं देवि ददासि करुणाकरे॥ परमानंदबोधाब्धिरूपे तेजःस्वरूपिणि॥ देववृंदशिरोरत्ननिघृष्टचरणांबुजे॥ ऋद्धिसिद्धिमहासत्तामात्रे मात्रे नमोस्तु ते॥ सृष्टिस्थित्युपसंहारहेतुभूते सनातनि॥ गुणत्रयात्मिकासि त्वं जगतः करणेच्छया॥ अनुग्रहाय भक्तानां गृहीतदिव्यविग्रहे॥ भक्तस्य मे नित्यपूजाशक्तस्य परमेश्वरि॥ ऐहिकामुष्मिकां सिद्धिं देहि विदशवंदिते॥ तापत्रयपरिम्लानभजनं त्राहि मां शिवे॥ यथाशक्ति जपं पूजां गृहाण मदनुग्रहात्॥ नान्यं वदामि न शृणोमि न चिंतयामि नान्यं स्मरामि न भजामि न चाश्रयामि॥ त्यक्त्वा त्वदीयचरणांबुजमादरेण मां त्राहि देवि कृपया मयि देहि सिद्धिं॥ अज्ञानाद्वा प्रमादाद्वा वैकल्यात्साधकस्य च॥ यन्न्यूनमतिरिक्तं च तत्सर्वं क्षंतुमर्हसि॥ द्रव्यहीनं क्रियाहीनं श्रद्धामंत्रविवर्जितं॥ तत्सर्वं कृपया देवि क्षमस्व त्वं दयानिधे॥ यन्मया क्रियते कर्म तन्महत्स्वल्पमेव वा॥ तत्सर्वं च जगद्धात्रि क्षंतव्यमयमंजलिः॥ ॥ ❁ ॥ ॥इति किंकिणीस्तोत्रम्॥

॥अथ श्रीविद्याकवचम्॥ ॥देव्युवाच॥ ॥देवदेव महादेव भक्तानां प्रीतिवर्द्धनं॥ सूचितं यन्महादेव्याः कवचं कथयस्व मे॥ महादेव उवाच॥ शृणु देवि प्रवक्ष्यामि कवचं देवदुर्लभं॥ न प्रकाश्यं परं गुह्यं साधकाभीष्टसिद्धिदं॥ कवचस्यास्य ऋषिर्देवि दक्षिणामूर्तिरव्ययः॥ छंदः पंक्तिः समुद्दिष्टं देवी त्रिपुरसुंदरी॥ धर्मार्थकाममोक्षाणां विनियोगस्तु साधने॥ वाग्भवः कामराजश्च शक्तिबीजं सुरेश्वरि॥ ऐं वाग्भवः पातु शीर्षे मां क्लीं कामराजस्तथा हृदि॥ सौः शक्तिबीजं सदा पातु नाभौ गुह्ये च पादयोः॥ ऐं क्लीं सौः वदने पातु बाला मां सर्वसिद्धये॥ हसैं हसकलरीं हसौः पातु भैरवी कंठदेशतः

तं॰सा॰
१९९

॥सुंदरीनाभिदेशेव्यात् शीर्षेकामकलासदा॥भ्रूनासयोरंतरालेमहात्रिपुरसुंदरी॥ललाटेसुभगापातुभगामांकंठदेशतः॥भगोदयातुहृदये
उदरेभगसर्पिणी॥भगमालानाभिदेशेलिंगेपातुमनोभवा॥गुह्यंपातुमहादेवीराजराजेश्वरीपरा॥चेतनरूपिणीपातुपादयोजगदंबिका॥नारा
यणीसर्वगात्रेसर्वकार्येशुभंकरी॥ब्रह्माणीपातुमांपूर्वेदक्षिणेवैष्णवीतथा॥पश्चिमेपातुवाराहीउत्तरेतुमहेश्वरी॥आग्नेयांपातुकौमारीमहाल
क्ष्मीस्तुनैरृते॥वायव्यांपातुचामुंडाइंद्राणीपातुईशके॥जलेपातुमहामायापृथिव्यांसर्वमंगला॥आकाशेपातुवरदासर्वत्रभुवनेश्वरी॥इदंतुक
वचंदेव्यादेवानामपिदुर्लभं॥पठेत्प्रातःसमुत्थायशुचिःप्रयतमानसः॥नाधयोव्याधयस्तस्यनभयंचक्वचिद्भवेत्॰ नचमारीभयंतस्यपात
कानांभयंतथा॥नदारिद्र्यवशंगच्छेत्तिष्ठेन्मृत्युवशेनच॥गच्छेच्छिवपुरंदेविसत्यंसत्यंवदाम्यहं॥इदंकवचमज्ञात्वाश्रीविद्यांयोजपे
त्सदा॥सनाप्नोतिफलंतस्यप्राप्नुयाच्छस्त्रघातनं॥ ॥इतिसिद्धयामलेश्रीविद्याकवचं॥ ॥अथमहात्रिपुरसुंदरीकवचम्॥ ॥देव्युवाच
॥भगवन्देवदेवेशलोकानुग्रहकारक॥त्वत्प्रसादान्महादेवश्रुतामंत्रास्त्वनेकधा॥साधनंविविधंदेवकीलकोद्धारणंतथा॥शापादिदूषणो
द्धारःश्रुतस्त्वत्तोमयाप्रभो॥राजराजेश्वरीदेव्याःकवचंसूचितंमयि॥श्रोतुमिच्छामितत्तत्त्वंकथयस्वमयिप्रभो॥ईश्वरउवाच॰ लक्षवा
रसहस्राणिवारितासिपुनःपुनः॥स्त्रीस्वभावात्तुदेविपृच्छसित्वंमयिप्रिये॥अत्यंतकुलजंगुह्यंसर्वकामफलप्रदं॥प्रीतयेतववदेवेशिक
[illegible]मिशृणुयत्नत॥अस्यराजराजेश्वरीश्रीमन्महात्रिपुरसुंदरीषोडशीकवचस्यमहादेवऋषिःप्रस्तारपंक्तिश्छंदोराजराजेश्वरीमहा
त्रिपुरासुंदरीदेवताधर्मार्थकाममोक्षसाधनेविनियोगः॥पूर्वेमांभैरवीपातुबालामांपातुदक्षिणे॥मालिनीपश्चिमेपातुवासिनीतूत्तरेव
तु॥ऊर्ध्वंपातुमहादेवीमहात्रिपुरसुंदरी॥अधस्तात्पातुदेवेशीपातालतलवासिनी॥आधारेवाग्भवःपातुकामराजस्तथाहृदि॥डामरः

राम
१९९

पातु मां नित्यं मस्तके सर्वकामदः ॥ ब्रह्मरंध्रे सर्वगात्रे छिद्रस्थाने च सर्वदा ॥ महाविद्या भगवती पातु मां परमेश्वरी ॥ ऐं ह्रीं ललाटे मां पातु ।
ह्रीं क्लूं स्वश्च नेत्रयोः ॥ मेनासापाकर्णयोश्चक्ष्वी ह्रैं द्रां द्रीं चिबुके तथा ॥ सौः पातु गले हृदये मः ह्रीं नाभिदेशके ॥ कल ह्रीं क्लीं स्त्रीं गुह्यदेशे सः ह्रीं
पादयोस्तथा ॥ सः ह्रीं मां सर्वतः पातु सकलो पातु संधिषु ॥ जले स्थले तथाकाशे दिक्षु राजगृहे तथा ॥ ह्रूं से मां त्वरिता पातु सः ह्रीं सः क्लीं मनोभवा ॥ हं
सःपायन्महादेवि परं निष्कलदेवता ॥ विजया मंगला दूती कल्याणी भगमालिनी ॥ ज्वाला च मालिनी नित्या सर्वदा पातु मां शिवा ॥ इत्येवं कव
चं देवि देवानामपि दुर्लभं ॥ तव प्रीत्या मयाख्यातं गोपनीयं प्रयत्नतः ॥ इदं रहस्यं परमं गुह्याद्गुह्यतरं प्रिये ॥ धनं यशस्यमायुष्यं भोगमोक्षप्रदं शिवं
। दुःस्वप्ननाशनं पुण्यं नरनारीवशंकरं ॥ आकर्षणकरं देवि स्तंभोच्चाटनकं शिवे ॥ इदं कवचमज्ञात्वा राजराजेश्वरीं परां ॥ योर्चयेद्योगि
नीवृंदैः स भक्ष्यो नात्र संशयः ॥ न तस्य मंत्रसिद्धिः स्यात्कदाचिदपि शांकरि ॥ इह लोके च दारिद्र्यं रोगदुःखाशुभानि च ॥ परत्र नरकं गत्वाप
शुयोनिमवाप्नुयात् ॥ तस्मादेतत्सदाभ्यसेदधिकारी भवेत्ततः ॥ मद्वक्त्रनिर्गतमिदं कवचं सुपुण्यं पूजाविधेश्च पुरतो विधिना पठेद्यः ॥ सौभा
ग्यभाग्यललितानि शुभानि भुक्ता देव्याः पदं भजति तत्सुनरंतकाले ॥ ॥ इति कुलानंदसंहितायां षोडशी कवचं समाप्तम् ॥ ॥ ॐ नमस्तस्यै ॥
श्रीदेव्युवाच ० ॥ ॥ श्रीमत्त्रिपुरसुंदर्य्या याया विद्यासुदुर्लभाः ॥ कृपया कथिताः सर्वाः श्रुताश्चाधिगता मया ॥ प्राणनाथाधुना ब्रूहि कवचं म
त्रविग्रहं ॥ त्रैलोक्यमोहनं चेति नामतः कथितं पुरा ॥ इदानीं श्रोतुमिच्छामि सर्वार्थं कवचस्य च ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि सुंदरि
प्राणवल्लभे ॥ त्रैलोक्यमोहनं नाम महाविद्यौघविग्रहं ॥ पठित्वा दानवान्विष्णुर्निजघान मुहुर्मुहुः ॥ सृष्टिं वितनुते ब्रह्मा पठित्वा पठ
नाद्यतः ॥ संहर्ता हरयतो देवि देवेशो वासवो यतः ॥ धनाधिपः कुबेरोपि यतः सर्वे दिगीश्वराः ॥ न देयं परशिष्येभ्यो देयं शिष्येभ्य एव च

॥अभक्तेभ्योपिपुत्रेभ्योदत्वामृत्युमवाप्नुयात्॥ श्रीमत्रिपुरसुंदर्याःकवचस्यऋषिःशिवः॥ छंदोविराट्देवताचदेवीत्रिपुरसुंदरी॥ध
र्मार्थकाममोक्षेषुविनियोगःप्रकीर्तितः॥ शिरोमेवाग्भवःपातुकएईलह्रींस्वरूपकं॥ हसकलह्रींललाटंचपातुकामेश्वरीमम॥ सकल
ह्रींदृशौपातुकामराजस्यमध्यमः॥ कहएलह्रींश्रुतीपातुमहासौभाग्यदायकः॥ सकलह्रींशक्तिबीजंतुपातुजिह्वांचपंचमी॥ वदनंसक
लंपातुपंचकूटस्तुसर्वदा॥ कएईलह्रींघ्राणयुग्मंपातुकामेश्वरीमम॥ हसकहलह्रींकंठंपातुस्वप्नावतीमम॥ सकलह्रींशक्तिबीजंस्कंधौ
पातुपरांबिका॥ कामेनोपासितादेवीकक्षदेशंसदावतु॥ कामादिषोडशीपातुभुजौत्रिपुरसुंदरी॥ नारदिषोडशीपातुकरौरमादिषोडशी
॥मायादिकाहृदंपातुस्तनौवाग्गादिषोडशी॥ पार्श्वौपरादिकापातुघंटांश्रीसुंदरीमम॥ हसकलह्रींपातुएष्ठंसकलह्रींसदामम॥ कुक्षिंपातु
कामराजःसकलह्रींसदावतु॥ लोपापंचदशीदेवीमध्यदेशंचरक्षतु॥ कहकएईलह्रींनाभिंपातुहकलएईलह्रीं॥ कट्यांपातुसक्थिनी
चसकएईलह्रींसदा॥ पातुसामनुनाराध्यासुंदरीमांसदावतु॥ सहकएईलह्रींतद्वदूरुयुग्मंसदावतु॥ सहकहएईलह्रींगुह्यंपायात्सहक
एईलह्रीं॥ जानुनीसुंदरीपातुचंद्रेणाराधिताचमां॥ हसकएईलह्रींतद्वजंघायुग्मंसदावतु॥ हकसहएलह्रींगुल्फयुग्मंसदावतु॥ सहकएई
लह्रींपादौपायात्त्रिपुरसुंदरी॥ कुबेराराधिताविद्यासर्वांगेमेसदावतु॥ कएईलह्रींप्राच्यांसदामांपरिरक्षतु॥ हसकलह्रींकामोमामग्निदि
श्यवतु॥ सहसकलह्रींयाम्येसदासापातुसुंदरी॥ अगस्त्योपासिताविद्याचक्रस्थामांसदावतु॥ सएईलह्रींनित्यानैर्ऋत्यांमांसदावतु॥
सहकहलह्रींपातुप्रतीच्यांसकलह्रींसा॥ पातुमांत्रिपुरादेवीनंदिकेश्वरपूजिता॥ हसकलह्रींवायव्येहकलह्रींतथोत्तरे॥ सहकसकल
ह्रींमामैशानेसुंदरीपातुमांसदा॥ सूर्येणपूजितासामांश्रीमत्रिपुरसुंदरी॥ कएईलह्रींहसकहलह्रींसकलह्रींसा॥ इंद्रपूज्यासुंदरीमेस

वांगं परिरक्षतु॥ कएईलह्रीं हसकलह्रीं हसकलह्रीं सा॥ पायाद्ब्रह्मणि मां देवी श्रीमत्त्रिपुरसुंदरी॥ कएईल हसकहल सहसकलह्रीं पाताले पातु मूर्द्धां शंकरी सा सदा मां परिरक्षतु॥ कएईलह्रीं माधारं हसकहलह्रीं शिवं॥ सकलह्रीं पातु नाभिं सएईलह्रीं मनाहतं॥ सहकहलह्रीं कंठं सकलह्रीं मनोभवं॥ षट्कूटा वै स्त्रवी सा च पातु मां सुदरी परा॥ कएईलह्रीं सहकलह्रीं सकलह्रीं सा॥ दुर्वासः पूजिता सा च पातु मां दिक्षु सुदरी॥ कहएईलह्रीं हलएईलह्रीं सकएईलह्रीं॥ क्रोधेन पूजिता देवी दिक्षु मां सदावतु॥ हसकहलह्रीं सकलह्रीं सकलह्रीं॥ महाज्ञानमयी पातु मां महाषोडशी परा॥ श्रीमायामदनो वाणी परा तारं शिवप्रिया॥ हरिप्रियात्रिकूटा सा परा वाणी मनोभवः॥ मायालक्ष्मी महाविद्या सा बीजं षोडशी परा॥ सर्वांगे सा सदा पातु श्रीमत्त्रिपुरसुंदरी॥ कामो माया रमा बाला त्रिकूटा स्त्री भगांकुशौ॥ काली कामकलाकूर्चः सर्वादौ प्रणवः प्रिये॥ श्रीबीजं षोडशी विद्याया ख्याताःभुवनत्रये॥ ज्ञानेन मृत्युहा या मां शिरःस्या सर्वदावतु॥ श्रीमहाषोडशी पूर्णा श्रिया देव्या प्रपूजिता॥ यस्या विज्ञानमात्रेण मृत्योर्मृत्युर्भवेद्ध्रुवं॥ अष्टत्रिंशाक्षरी ब्रह्म सापि मामभितोवतु॥ इति ते कथितं देवि ब्रह्मविद्याकलेवरं॥ त्रैलोक्यमोहनं नाम कवचं ब्रह्मरूपिणं॥ सप्तलक्षमहाविद्यास्तंत्रादौ कथिताः प्रिये॥ सारात्सारतरा या च महाविद्याः सुगोपिताः॥ बहुना किमिहोक्तेन श्रीमहाषोडशी परा॥ प्रकाशिता महादेवी पापघ्ना ते पुनः पुनः॥ महाविद्यामयं ब्रह्मकवचं मन्मुखोदितं॥ गुरुमभ्यर्च्य विधिवत्कवचं प्रपठेत्तु यः॥ किं सकृद्वा यथाज्ञानं सोपि पुण्यवतां वरः॥ देशिकः सर्वविद्यास्वप्यधिकारी जपादिषु॥ देवीमभ्यर्च्य विधिवत्पुरश्चर्यां समा— चरेत्॥ अष्टोत्तरशतं जप्त्वा दशांशं हवनादिकं॥ ततस्तु सिद्धकवचं पुण्यात्मा मदनोपमः॥ मंत्रसिद्धिर्भवेत्तस्य पुरश्चर्यां विना ततः॥ गद्यपद्यमयी वाणी तस्य वक्त्रात्प्रजायते॥ वक्त्रे तस्य वसेद्वाणी कमला निश्चला गृहे॥ पुष्पांजल्यष्टकं देव्यै मूलेनैव पठेत्सकृत्॥ अपि वर्षसहस्राणां पूजायाः फलमाप्नुयात्॥ आत्मानं तन्मयं कृ

तं·सा: त्वायःपठेत्कवचंपरं॥ यंयंपश्यतिशीघ्रंतंससदासोभवेद्ध्रुवं॥ विलिख्यभूर्जेगुटिकांस्वर्णस्थांधारयेद्यदि॥ कंठेवादक्षिणेबाहौसकुर्याद्दासव
२०१ जगत्॥ त्रैलोक्यंक्षोभयत्येवंत्रैलोक्यविजयीभवेत्॥ तद्गात्रंप्राप्यशस्त्राणिब्रह्मास्त्रादीनिपार्वति॥ माल्यानिकुसुमान्येवसुखदानिभवंतिहि
॥ स्पर्द्धामुद्धूयभवनेलक्ष्मीर्वाणीवसेन्मुखे॥ इदंकवचमज्ञात्वायोजपेत्सुंदरींपरां॥ नवलक्षंप्रजप्त्वापितस्यविद्यानसिद्ध्यति॥ सशस्त्रघातमा
प्नोतिसोचिरान्मृत्युमाप्नुयात्॥ ॥इतिरुद्रयामलेसुंदरीकवचंसमाप्तम्॥ ॥अथप्रचंडचंडिकास्तोत्रं॥ ॥आनंदयित्रिपरमेश्वरिवेदगर्भेमा
तःपुरंदरपुरांतरलब्धनेत्रे॥ लक्ष्मीमशेषजगतांपरिभावयन्तःसन्तोभजंतिभवतीन्धनदेशमाप्त्यै॥१॥ लज्जानुगांविमलविद्रुमकान्तिका
न्तांकान्तानुरागरसिकाःपरमेश्वरित्वाम्॥ येभावयन्तिमनसामनुजास्तएतेसीमन्तिनीभिरनिशंपरिभाव्यमानाः॥२॥ मायामयींनिखिलपा
तककोटिकूटविद्राविणींभृशमसंशयिनोभजन्ति॥ त्वांपद्मसुंदरतनुंतरुणारुणाभांपाशांकुशाभयवराद्यकरांवरास्त्रैः॥३॥ तेतर्ककर्कशधियः
श्रुतिशास्त्रशिल्पैश्छंदोभिशोभितमुखाःसकलागमज्ञाः॥ सर्वज्ञलब्धविभवाःकुमुदेन्दुवर्णायेवाग्भवेचभवतींपरिभावयन्ति॥४॥ वज्रप्रणुन्नहृ
दयासमयपद्महस्तेवैरोचनेमंदनमंदिरगास्समानः॥ मायाद्वयानुगतविग्रहभूषितासिदिव्यास्त्रवह्निवनितानुगतासिधन्ये॥५॥ त्वंमत्रयाष्टदल
वह्निपुरातनस्थामेष्टमंडलगतांपरिभावयन्ति॥ येवह्निकूटसदृशींमणिपूरकान्तस्तेकालकंटकविडंबनचंचवःस्युः॥६॥ कालागुरुभ्रम
रचंदनकुंडगोलखंडैरनंगमदनोद्भवमादनीभिः॥ सिंदूरकुंकुमपटीरहिमैर्विधायसन्मंडलंतदुपरीहयजेन्मृडानीं॥७॥ चंचत्तडिन्मि
हिरकोटिकरांविचेलामुद्यत्कबंधरुधिरांद्विभुजांत्रिनेत्रां॥ वामेविकीर्णकचशीर्षकरेपरेतामीडेसदापरमकर्तृकयासमेताम्॥८॥ कामेश्वरां राम
गनिलयांकलयासुधांशोर्विभ्राजमानहृदयमपरेस्मरन्ति॥ सुप्ताहिराजसदृशींपरमेश्वरस्थांत्वामद्रिराजतनयेवरमन मामः॥९॥ लि २००१

रतस्योपरिगतामपिवह्निचक्रपीठानुगांसरसिजासनसन्निविष्टाम्॥सुप्तांम्प्रबोध्यभवतीम्मनुजोगुरूक्तहूंकारवायुवशिभिर्म्मनसाभजन्ति॥
१०॥शुभ्रांसिशान्तिककथासुतथैवपीतास्तम्भोरिपोरथचशुभ्रतरासिमातः॥उच्चाटनेप्यसितकर्म्मसुकर्म्मणित्वंसंसेव्यसेस्फटिककान्तिरन
न्तचारे॥११॥त्वामुत्पलैर्म्मधुयुतैर्मधुनोपनीतैर्गव्यैःपयोविलुलितैःशतमेवकुंडे॥साज्यैश्चतोषयतियःपुरुषस्त्रिसंध्यंषण्मासतोभवतिश
क्रसमस्तभूमौ॥१२॥जाग्रत्स्वपन्नपिशिवेतवमंत्रराजंएवंविचिन्तयतियोमनसाविधिज्ञः॥संसारसागरसमुद्धरणेवहित्रंविचित्रंनभूतजननेपिजरा
स्तुपुंसः॥१३॥इयंविद्यावंद्याहरिहरविरंचिप्रभृतिभिःपुरारातेरन्तःपुरमिदमगम्यंपशुजनैः॥सुधामंदानंदैःपशुपतिसमानव्यसनिभिःसु
धासेव्यैःसद्भिःगुरुचरणसंस्मारचतुरैः॥१४॥कुंडेवामंडलेवाशुचिरथमनुनाभावयन्त्येवमंत्रीसंस्थाप्योच्चैर्जुहोतिप्रसवफलदलैःपद्मपाला
शकानां॥हैमंक्षीरैस्तिलैर्वासमधुककुसुमैर्मालतीबंधुजातीश्वेतैरश्वंसकानामपिवरसमिधासंपदेसर्वसिद्धौ॥१५॥अंधःसाज्यंसमांसंद
धियुतमथवायोन्वहंयामिनीनांमध्येदेव्यैददातिप्रभवतिगृहगाश्रीरमुष्यावखंडा॥आज्यंमांसं सरक्तंतिलयुतमथवातंडुलंपायसं
वाहुत्वामांसंत्रिसंध्यंसभवतिमनुजोभूतिभिर्भूतनाथः॥१६॥इदंदेव्याःस्तोत्रंपठतिमनुजोयस्त्रिसमयंशुचिर्भूत्वाविश्वेभवतिधनदोवा
सवसमः॥वशाभूपाःकान्तानिखिलरिपुहन्तुःसुरगणाभवंत्युच्चैर्वाचोयदिहननुमासैस्त्रिभिरपि॥१७॥इतिश्रीशंकराचार्यविरचितःप्रचं
डचण्डिकास्तवराजःसमाप्तः॥ ॥नाभौशुभ्रसरोजवक्त्रविलसद्बंधूकपुष्पारुणभास्वद्भास्करमंडलंतदुदरेतद्योनिचक्रंमहत्॥तन्मध्ये
विपरीतमैथुनरतःप्रद्युम्नतत्कामिनीपृष्ठस्थांतरुणार्ककोटिविलसत्तेजःस्वरूपांशिवां॥१॥वामेछिन्नशिरोधरांतदितरेपाणौमहत्कर्त्रि
कांप्रत्यालीढपदांदिगंतवसनामुन्मुक्तकेशव्रजां॥छिन्नात्मीयशिरःसमुच्छलदसृग्धारांपिबंतींपरां बालादित्यसमप्रकाशविलसन्ने

शुद्धेतिप्रत्यंतरे॥३

२॥नयनामितिपुस्तकांतरे॥२ १योगनिद्रामितिपुस्तकांतरे॥२ ३भीममूर्तिमितिपुस्तकांतरे॥३

तं·सा· त्रत्रयोद्भासिनी॥वामादन्यत्रनालंबहुवहुलगलद्रक्तधाराभिरुच्चैः पायंतीमस्थिभूषाकरकमललसत्कर्तृकामुग्ररूपां॥ रक्तामारक्तकेशीमपगत
२० २ वसनांवर्णिनीमात्मशक्तिं प्रत्यालीढोरुपादामरुणिततनयनांयोगिनींयोगमुद्रां॥ दिग्वस्त्रांमुक्तकेशींप्रलयघनघटाघोररूपांप्रचंडां दंष्ट्रा
दुष्प्रेक्ष्यवक्त्रोदरविवरल सल्लोलजिह्वाग्रभासां॥ विद्युल्लोलाक्षियुग्मांहृदयतटलसद्भोगिनीमात्ममूर्तिं सद्यश्छिन्नात्मकंठप्रगलितरुधिरैर्डा
किनींवर्द्धयंती॥ब्रह्मेशानाच्युताद्यैःशिरसिविनिहितामंदपादारविंदैरात्मज्ञैर्योगिमुख्यैः प्रतिपदमनिशंचिंतितांचिन्त्यरूपां॥संसारेसारभूतांत्रि
भुवनजननीछिन्नमस्तांप्रशस्तामिष्टांतामिष्टदात्रींकलिकलुषहरांचेतसाचिंतयामि॥ उत्पत्तिस्थितिसंहृतीर्घटयितुंधत्तेत्रिरूपांतनुं त्रैगु
ण्याज्जगतोयदीयविकृतिर्ब्रह्माच्युतःशूलभृत्॥ तामाद्यांप्रकृतिंस्मरामिमनसासर्वार्थसंसिद्धये यस्याःस्मेरपदारविंदयुगलेलाभंभजंतेऽम
राः॥अलिपिसितपुरंध्रीयोगपूजापरोहंबहुविधजनभाषारंभसंभावितोहं॥पशुजनविमुखोहंभैरवीसंस्कतकेह गुरुचरणपरोहंभैभजंतेऽम
॥ऐंलिपिसितपुरंध्रीयोगपूजापरोहंबहुविधजनभाषारंभसंभावितोहं॥पशुजनविमुखोहंभैरवीसंस्कृतोहं गुरुचरणपरोहंभैरवोहंशिवोहं
॥इदंस्तोत्रंमहापुण्यंब्रह्मणाभाषितंपुरा॥सर्वसिद्धिप्रदंसाक्षान्महापातकनाशनं ॥यःपठेत्प्रातरुत्थायदेव्याःसन्निहितोभवेत्॥ तस्यसि
द्धिर्भवेद्देविवांछितार्थप्रदायिनी॥धनंधान्यंसुतान्जायांहयंहस्तिनमेवच॥वसुंधरांमहाविद्यामष्टसिद्धिर्भवेद्ध्रुवं॥वैयाघ्राजिनरंजितस्स
जघनेरम्येप्रलंबोदरेखर्वानिर्वचनीयसर्वसुभगेमुंडावलीमंडिते॥ कर्त्रींकुंदरुचिंविचित्रविलसितांज्ञानंदधानेपरेमातर्भक्तजनानुकंपिनिमहामा राम·
[illegible]तुभ्यंनमः॥ ॥इतिश्रीब्रह्मविरचितप्रचंडचंडिकास्तोत्रंसमाप्तं॥ ॥अथास्याःकवचं॥ ॥देव्युवाच०॥ ॥कथिताश्छिन्नमस्तायायाया २००२
[illegible]ः सुगोपिताः॥ त्वयानान्येनजीवेशस्तुताश्चाधिगतामया॥ इदानींश्रोतुमिच्छामिकवचंपूर्वसूचितं॥त्रैलोक्यविजयंनामकृपयाकथ्य

अपिनिषिनेतिपुस्तकांतरे ६

४ नलप्रभेति पुस्तकांतरे ॥   ५ प्राणमिति पुस्तकांतरे ॥

तं प्रभो ॥ भैरव उवाच० ॥ शृणु वक्ष्यामि देवेशि सर्वदेवनमस्कृते ॥ त्रैलोक्यविजयं नाम कवचं सर्वमोहनं ॥ सर्वविद्यामयं साक्षात्सुरासुरजयप्रदं ॥ धारणात्पठनादीशस्त्रैलोक्यविजयी विभुः ॥ ब्रह्मा नारायणो रुद्रो धारणात्पठनाद्यतः ॥ कर्त्ता पाता च संहर्त्ता भुवनानां सुरेश्वरि ॥ नेदेयं परशिष्येभ्यो नाभक्तेभ्यो विशेषतः ॥ देयं शिष्याय भक्ताय प्राणेभ्योप्यधिकाय च ॥ देव्याश्च छिन्नमस्तायाः कवचस्य च भैरवः ॥ ऋषिर्विराट् छंदस्तु देवता छिन्नमस्तका ॥ त्रैलोक्यविजये मुक्तौ विनियोगः प्रकीर्तितः ॥ हूंकारो मे शिरः पातु छिन्नमस्ता बलप्रदा ॥ ह्रीं ह्रूं ऐं त्र्यक्षरी पातु भालं वक्त्रं दिगंबरी ॥ श्रीं ह्रीं ह्रूं ऐं दृशौ पातु मुंडकर्तृधरापि सा ॥ सा विद्या प्रणवाद्यंता श्रुतियुग्मं सदावतु ॥ वज्रवैरोचनीये हुं फट् स्वाहा च ध्रुवादिका ॥ घ्राणं पातु छिन्नमस्ता सा मुंडकर्तृधारिणी ॥ श्रीमायाकूर्चवाग्बीजैर्वज्रवैरोचनीये हूं ॥ हूं फट् स्वाहा महाविद्या षोडशी ब्रह्मरूपिणी ॥ स्वपार्श्वे वर्णिनीभ्यां पाययंती मस्तृजं मुदा ॥ वदनं सर्वतः पातु छिन्नमस्ता सशक्तिका ॥ मुंडकर्तृधरा रक्ता साधकाभीष्टदायिनी ॥ वर्णिनी डाकिनीयुक्ता सापि मामभितोवतु ॥ रमाद्या पातु जिह्वां च लज्जाद्या पातु कंठकं ॥ कूर्चाद्या हृदयं पातु वागाद्या स्तनयुग्मकं ॥ रमया पुटिता विद्या पार्श्वौ पातु सुरेश्वरी ॥ मायया पुटिता पातु नाभिदेशं दिगंबरी ॥ कूर्चेन पुटिता देवी पृष्ठदेशं सदावतु ॥ वाग्बीजपुटिता चैषा मध्यं पातु सशक्तिका ॥ ईश्वरी कूर्चवाग्बीजैर्वज्रवैरोचनीये हूं ॥ हूं फट् स्वाहा महाविद्या कोटिसूर्यसमप्रभा ॥ छिन्नमस्ता सदा पायादूरुयुग्मं सशक्तिका ॥ ह्रीं हूं वर्णिनी जानुं श्रीं ह्रीं हूं च डाकिनी पदं ॥ सर्वविद्यास्थिता नित्या सर्वांगं मे सदावतु ॥ प्राच्यां पायादेकलिंगा योगिनी पावकेवतु ॥ डाकिनी दक्षिणे पातु श्रीमहाभैरवी च मां ॥ नैर्ऋत्यां सततं पातु भैरवी पश्चिमेवतु ॥ इंद्राक्षी पातु वायव्ये सितांगी पातु चोत्तरे ॥ संहारिणी सदा पातु शिवकोणे सकर्तृका ॥ इत्यष्टशक्तयः पांतु दिग्विदिक्षु सकर्तृकाः ॥ क्रीं क्रीं क्रीं पातु सा पूर्वं ह्रीं ह्रीं मां पातु पावके ॥ ह्रूं ह्रूं मां दक्षिणे पातु दक्षिणे कालिकेवतु ॥ क्रीं ३ चैव नैर्ऋत्यां ह्रीं २ च पश्चिमेवतु ॥ हूं हूं पा

८ ॥ स्वपार्श्वे वालिकाचासृग्धारां पाययतीमुदेति पुस्तकांतरे ॥ ८

तुमरुत्कोणे स्वाहा पातु सदा नरं ॥ महाकाली खड्गहस्ता रक्षःकोणे सदावतु ॥ तारो माया वधूः कूर्चं फट्कारोयं महामनुः ॥ खड्गकर्तृधरा तारा चोर्द्ध्वदेशं सदावतु ॥ ह्रीं स्त्रीं हूं फट् पाताले पातु नीलसरस्वती ॥ इति ते कथितं देव्याः कवचं मंत्रविग्रहं ॥ यद्धृत्वा पठनाद्भीमः क्रोधाख्यो भैरवः स्मृतः ॥ सुरासुरमुनीन्द्राणां कर्ता हर्ता भवेत्स्वयं ॥ यस्याज्ञया वसुमनो यान्ति सा साधकांतिकं ॥ भूतिन्याद्याश्च डाकिन्यो यक्षिण्याद्याश्च खेचराः ॥ आज्ञां गृह्णन्ति तास्तस्य कवचस्य प्रसादतः ॥ एतद्देव परं ब्रह्म कवचं मन्मुखोदितं ॥ देवीमभ्यर्च्य गंधाद्यैर्मूलेनैव पठेत्सकृत् ॥ संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् ॥ भूर्जे विलिखितं चैतद्गुटिकां कांचनस्थितां ॥ धारयेद्दक्षिणे बाहौ कंठे वा यदि वाग्यतः ॥ सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यं वशमानयेत् ॥ तस्य गेहे वसेल्लक्ष्मीर्वाणी च वदनाम्बुजे ॥ ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रे यान्ति सौम्यतां ॥ इदं कवचमज्ञात्वा यो भजेत्छिन्नमस्तकां ॥ सोपि शस्त्रप्रहारेण मृत्युमाप्नोति सत्वरम् ॥ इति भैरवतंत्रे भैरवभैरवीसंवादे त्रैलोक्यविजयं नाम छिन्नमस्ताकवचं समाप्तम् ॥ ॥ अथ श्यामाकवचम् ॥ ॥ भैरव्युवाच ॥ कालीपूजा श्रुता नाथ भावाश्च विविधाः प्रभो ॥ इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितं ॥ त्वमेव स्रष्टा पाता च संहर्ता च त्वमेव हि ॥ त्वमेव शरणं नाथ पाहि मां दुःखसंकटात् ॥ भैरव उवाच ॥ रहस्यं शृणु वक्ष्यामि भैरवि प्राणवल्लभे ॥ श्रीजगन्मंगलं नाम कवचं मंत्रविग्रहं ॥ पठित्वा धारयित्वा वा त्रैलोक्यं मोहयेत्क्षणात् ॥ नारायणोपि यद्धृत्वा नारी भूत्वा महेश्वरं ॥ योगेशं क्षोभमनय यद्धृत्वा च रघूद्वहः ॥ वरदृप्तान् जघानैव रावणादिनिशाचरान् ॥ यस्य प्रसादादीशोपि त्रैलोक्यविजयी विभुः ॥ धनाधिपः कुबेरोपि सुरेशोभूच्छचीपतिः ॥ एवं हि सकला देवाः सर्वसिद्धीश्वराः प्रिये ॥ श्रीजगन्मंगलस्यापि कवचस्य ऋषिः शिवः ॥ छन्दोनुष्टुब्देवता च कालिका दक्षिणेरिता ॥ जगतां मोहने दुष्टविजये भुक्तिमुक्तिषु ॥ योषिदाकर्षणे चैव विनियोगः प्रकीर्तितः ॥ शिरो मे कालिका पातु क्रीं

५ हूं क्रीमिति प्रत्यंतरे॥ ५ ह्रीमिति प्रत्यंतरे॥

कारैकाक्षरी परा॥ क्रीं क्रीं क्रीं मे ललाटं च कालिका खड्गधारिणी॥ हूं हूं पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुती मम॥ दक्षिणे कालिके पातु घ्राणयुग्मं महेश्वरी॥ क्रीं क्रीं क्रीं रसनां पातु हूं हूं पातु कपोलकं॥ वदनं सकलं पातु ह्रीं ह्रीं स्वाहास्वरूपिणी॥ द्वाविंशत्यक्षरी स्कंधौ महाविद्यासुखप्रदा॥ खड्गमुंडधरा काली सर्वांगमभितोवतु॥ क्रीं हूं ह्रीं त्र्यक्षरी पातु चामुंडा हृदयं मम॥ ऐं हूं ॐ ऐं स्तनद्वंद्वं ह्रीं फट् स्वाहा ककुत्स्थलम्॥ अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका॥ क्रीं क्रीं हूं हूं ह्रीं ह्रीं करौ पातु षडक्षरी मम॥ क्रीं नाभिं मध्यदेशं च दक्षिणे कालिकेवतु॥ क्रीं स्वाहा पातु पृष्ठं च कालिका सा दशाक्षरी॥ ह्रीं ह्रीं दक्षिणे कालिके हूं हूं पातु कटिद्वयं॥ काली दशाक्षरी विद्या स्वाहा मम मोरुयुग्मकं॥ ॐ ह्रीं क्रीं मे स्वाहा पातु कालिका जानुनी सदा॥ कालीहृदयविद्येयं चतुर्वर्गफलप्रदा॥ क्रीं हूं ह्रीं पातु सा गुल्फं दक्षिणे कालिकेवतु॥ क्रीं हूं ह्रीं स्वाहा पदं पातु चतुर्दशाक्षरी मम॥ खड्गमुंडधरा काली वरदाभयहारिणी॥ विद्याभिः सकलाभिः सा सर्वांगमभितोवतु॥ काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी॥ विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता घनत्विषः॥ नीला घना बलाका च मात्रा मुद्रा मिता च मां॥ एताः सर्वाः खड्गधरा मुंडमालाविभूषणाः॥ रक्षंतु दिग्विदिक्षु मां ब्राह्मी नारायणी तथा॥ माहेश्वरी च चामुंडा कौमारी चापराजिता॥ वाराही नारसिंही च सर्वाश्चामितभूषणाः॥ रक्षंतु स्वायुधैर्दिक्षु विदिक्षु मां यथा तथा॥ इति ते कथितं दिव्यं कवचं परमाद्भुतं॥ श्रीजगन्मंगलं नाम महाविद्यौघविग्रहं॥ त्रैलोक्याकर्षणं ब्रह्मकवचं मन्मुखोदितं॥ गुरुपूजां विधायाथ विधिवत्प्रपठेत्ततः॥ कवचं त्रिःसकृद्वापि यावज्जीवं च वा पुनः॥ एतच्छतार्द्धमावर्त्य त्रैलोक्यविजयी भवेत्॥ त्रैलोक्यं क्षोभयत्येव कवचस्य प्रसादतः॥ महाकविर्भवेन्मासात्सर्वसिद्धीश्वरो भवेत्॥ पुष्पांजलिं कालिकायै मूलेनैव पठेत्सकृत्॥ शतवर्षसहस्राणां पूजायाः फलमाप्नुयात्॥ भूर्जे विलिखितं चैतत्स्वर्णस्थं धारयेद्यदि॥ शिखायां दक्षिणे बाहौ कंठे वा धारयेद्यदि॥ त्रैलोक्यं मोहयेत्क्रोधात्त्रैलोक्यं चूर्णयेत्क्षणात्॥ पुत्रवान्धनवा

विद्येति पुस्तकांतरे॥४ ५ रामेति प्रत्यंतरे॥

श्रीमान्नानाविद्यानिधिर्भवेत्॥ ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रस्पर्शनात्ततः॥ नाशमायांति या नारी वंध्या च मृतपुत्रिणी॥ कंठे वा वामबाहौ वा कवचस्य च धारणात्॰॥ बहुपत्या जीववत्सा भवत्येव न संशयः॥ न देयं परशिष्येभ्यो अभक्तेभ्यो विशेषतः॥ शिष्येभ्यो भक्तियुक्तेभ्यश्चान्यथा मृत्युमाप्नुयात्॥ स्पर्द्धामुद्धूय कमला वाग्देवी मंदिरे मुखे॥ पौत्रांतं स्थैर्यमास्थाय निवसत्येव निश्चितं॥ इदं कवचमज्ञात्वा यो जपेत्कालिदक्षिणां॥ शतलक्षं प्रजप्त्वापि तस्य मंत्रो न सिद्ध्यति॥ स शस्त्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात्॥ ॥इति भैरवतंत्रे भैरवभैरवीसंवादे श्यामाकवचं समाप्तम्॥

॥अस्याः स्तोत्रम्॥ कर्पूरं मध्यमांत्यस्वरपररहितं सेंदुवामाक्षियुक्तं बीजं ते मातरेतत्त्रिपुरहरवधु त्रिःकृतं ये जपंति॥ तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसंत्येव वाचः स्वच्छंदं ध्वांतधाराधररुचिरुचिरे सर्वसिद्धिं गतानां॥ १॥ ईशानः सेंदुवामश्रवणपरिगतो बीजमन्यन्महेशि द्वंद्वं ते मंदचेता यदि जपति जनो वारमेकं कथंचित्॥ जित्वा वाचामधीशं धनदमपि चिरं मोहयन्नंबुजाक्षीवृंदं चंद्रार्द्धचूडे प्रभवति स महाघोरशावावसंते॥ २॥ ईशो वैश्वानरस्थः शशिधरविलसद्वामनेत्रेण युक्तो बीजं ते द्वंद्वमन्यद्विगलितचिकुरे कालिके ये जपंति॥ द्वेष्टारं ते निहंति त्रिभुवनमपि ते वश्यभावं नयंति सृक्कद्वंद्वास्रधाराद्वयधरवदने दक्षिणे कालिके च॥ ३॥ ऊर्द्धं वामे कृपाणं कररकमलतले छिन्नमुंडं तथाधः सव्ये भीतिं वरं च त्रिजगदघहरे दक्षिणे कालिकेति॥ जप्त्वैतन्नामयेवा तव मनुविभवं धारयंत्येवमंब तेषामष्टौ करस्थाः प्रकटितवदने सिद्धयस्त्र्यंबकस्य॥ ४॥ वर्गाद्यं वह्निसंस्थं विधुरतिवलितं तत्त्रयं कूर्चयुग्मं लज्जाद्वंद्वं च पश्चात्स्मितमुखि तदधष्ठद्वयं योजयित्वा॥ मातर्ये ये जपंति स्मरहरमहिले भावयंतः स्वरूपं ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवंति॥ ५॥ प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यंतगुह्यं त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयंतो जपंति॥ तेषां नेत्रारविंदे विहरति कमला वक्त्रशुभ्रांशुबिंबे

४॥ दधानेति पुस्तकांतरे

६ सुस्थीभूतामितिप्रत्यंतरे॥

वाग्देवीदेविसुराडस्वगतिशयलसत्त्वंगपीनस्तनाढ्ये॥ ६॥ गतासूनांबाहुप्रकरकृतकांचीपरिलसन्नितंबांदिग्वस्त्रांत्रिभुवनविधात्रींत्रिनयनां॥ श्मशानस्थेतल्पेशवहृदिमहाकालसुरतप्रसक्तांत्वांध्यायञ्जननि जडचेता अपिकविः॥ ७॥ शिवाभिर्घोराभिःशवनिवहमुंडास्थिनिकरैः परंसंकीर्णायांप्रकटितचितायांहरवधूं॥ प्रविष्टांसंतुष्टामुपरिसुरतेनातियुवतींसदात्वांध्यायंतिक्वचिदपिनतेषांपरिभवः॥ वदामस्तेकिंवाजननिवयमुच्चैर्जडधियोनधातानापीशोहरिरपिनतेवेत्तिपरमं॥ तथापित्वद्भक्तिर्मुखरयतिचास्माकममितेतदेतत्क्षंतव्यंनखलुपशुरोषःसमुचितः॥ ९॥ समंतादापीनस्तनजघनधृग्यौवनवतीं रतासक्तोनक्तंयदिजपतिभक्त स्तवमनुं॥ विवासास्त्वांध्यायन्गलितचिकुरस्तस्यवशगाःसमस्ताःसिद्धौघाभुविचिरतरंजीवतिकविः॥ १०॥ समाःस्वस्थीभूतोजपतिविपरीतोयदिसदाविचिंत्यत्वांध्यायन्नतिशयमहाकालसुरतां॥ तदातस्यक्षोणीतलविहरमाणस्यविदुषः करांभोजेवश्याःस्मरहरवधूसिद्धिनिवहाः॥ ११॥ प्रसूतेसंसारंजननिजगतीपालयतिचसमस्तंक्षित्यादिप्रलयसमयेसंहरतिच॥ अतस्त्वांधातापित्रिभुवनपतिःश्रीपतिरपिमहेशोपिप्रायःसकलमपिकिंस्तौमिभवतीं॥ १२॥ अनेकेसेवंतेहरगृहिणिगीर्वाणनिवहान्विमूढास्तेमातःकिमपिनहिजानंतिपरमं॥ समाराध्यामाद्यांहरिहरविरिंच्यादिविविबुधैः प्रपन्नोस्मिस्वैरंरतिरसमहानंदनिरतां॥ १३॥ धरित्रीकीलालंशुचिरपिसमीरोपिगगनं त्वमेकाकल्याणीगिरिशरमणीकालिसकलं॥ स्तुतिःकातेमातस्तवकरुणयामामगतिकं प्रसन्नात्वंभूयाभवमनुनभूयान्ममजनुः॥ १४॥ श्मशानस्थःस्वस्थोगलितचिकुरोदिक्पटधरःसहस्रंत्वर्काणांनिजगलितवीर्येणकुसुमं॥ जपंस्त्वत्प्रत्येकंमनुमपितवध्याननिरतोमहाकालिस्वैरंसभवतिधरित्रीपरिवृढः॥ १५॥ गृहेसंमार्जन्यापरिगलितवीर्येणचिकुरंसमूलंमध्याह्नेवितरतिचितायांकुजदिने॥ समुच्चार्यप्रेम्णामनुमपिसकृत्कालिसततंगजारूढोयातिक्षितिपरि

वीजंहीतिपुस्तकांतरे॥ ५

कमलेति प्रत्यंतरे ५

हृद्धः सलकविवरः॥ १६॥ सुपुष्पैराकीर्णं कुसुमधनुषो मंदिरमहो पुरोध्यायन् ध्यायन्यदि जपति भक्तस्तव मनुं॥ स गंधर्वश्रेणीपतिरिव कवित्वामृतनदीनदीनः पर्यंते परमपदलीनः प्रभवति॥ १७॥ त्रिपंचारे पीठे शवशिवहृदि स्मेरवदना महाकालेनोच्चैर्मदनरसलावण्यनिरतां॥ समासक्तो नक्तं स्वयमपि रतानंदनिरतो जनो यो ध्यायेत्त्वामपि जननि स स्यात्स्मरहरः॥ १८॥ सलोमास्थि स्वैरं पललमपि मार्जारमसिते परं चोष्ट्रं मेषं नरमहिषयोश्छागमपि वा॥ बलिं ते पूजायामपि वितरतां मर्त्यवसतां सतां सिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति॥ १९॥ वशी लक्षं मंत्रं प्रजपति हविष्याशनरतो दिवा मातर्युष्मच्चरणयुगलध्याननिपुणः॥ परं नक्तं नग्नो निधुवनविनोदेन च मनुं जपेल्लक्षं सम्यक्स्मरहरसमानः क्षितितले॥ २०॥ इदं स्तोत्रं मातस्तव मनुसमुद्धारणजनुः स्वरूपाख्यं पादांबुजयुगलपूजाविधियुतं॥ निशार्द्धं वा पूजासमयमथवा यस्तु पठति प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः॥ २१॥ कुरंगाक्षीवृंदं तमनुसरति प्रेमतरलं वशस्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः॥ रिपुः कारागारं कलयति च तं केलिकलया चिरं जीवन्मुक्तः स भवति सुभक्तः प्रतिजनुः॥ २२॥ ॥ इति श्रीश्यामास्तोत्रं समाप्तम्॥ ॥ अथ तारास्तोत्रम्॥

॥ श्रीः॥ मातर्नीलसरस्वति प्रणमतां सौभाग्यसंपत्प्रदे प्रत्यालीढपदस्थिते शवहृदि स्मेराननांभोरुहे॥ फुल्लेंदीवरलोचने त्रिनयने कर्त्रीकपालोत्पले खड्गं चादधती त्वमेव शरणं त्वामीश्वरीमाश्रये॥ १॥ वाचामीश्वरि भक्तकल्पलतिके सर्वार्थसिद्धीश्वरि गद्यप्राकृतपद्यजातरचनासर्वज्ञसिद्धिप्रदे॥ नीलेंदीवरलोचनत्रययुते कारुण्यवारांनिधे सौभाग्यामृतवर्षणेन कृपया सिंच त्वमस्मादृशं॥ २॥ खर्वे गर्वसमूहपूरिततनोः सर्पादिवेषोज्वले व्याघ्रत्वक्परिवीतसुंदरकटिव्याधूतघंटांकिते॥ सद्यः कृत्तगलद्रजः परिमिलन्मुंडद्वयीमूर्द्धजग्रंथिश्रेणिनृमुंडदामललिते भीमे भयं नाशय॥ ३॥ मायानंगविकाररूपललनाबिंद्वर्द्धचंद्रात्मिके हूंफट्कारमयी त्वमेव शरणं मंत्रात्मिके मादृशः॥ मूर्तिस्ते जननि त्रिधाम

२ सर्वार्थेति प्रत्यंतरे २

२ धीतेति प्रत्यंतरे २

रणांगेणेतियुक्तमितिप्रतिभाति ६ ३॥असुरेति प्रत्यंतरे॥ ५ पन्नगेति प्रत्यंतरे॥

घटिता स्थूलातिसूक्ष्मापरा वेदानां नहि गोचरा कथमपि प्राज्ञैर्नुतामाश्रये॥४॥त्वत्पादांबुजसेवया सुकृतिनो गच्छंति सायुज्यतां तस्य श्रीपरमेश्वरस्त्रिनयनब्रह्मादिसाम्यात्मनः॥संसारांबुधिमज्जने पटुतनून्देवेंद्रमुख्यान्सुरान् मातस्त्वत्पदसेवने हि विमुखान्किं मंदधीः सेवते॥५॥मातस्त्वत्पदपंकजद्वयरजोमुद्रांककोटीरिणस्ते देवा जयसंगरे विजयिनो निःशंकमंके गताः॥देवोहं भुवने न मे सम इति स्पर्द्धां वहंतः परेस्तत्तुल्यां नियतं यथास्तृश्चिरधीनोशं व्रजंति स्वयं॥६॥त्वन्नामस्मरणात्पलायनपरान्द्रष्टुं च शक्ता न ते भूतप्रेतपिशाचराक्षसगणा यक्षाश्च नागाधिपाः॥दैत्या दानवपुंगवाश्च खचरा व्याघ्रादिका जंतवो डाकिन्यः कुपितांतकाश्च मनुजान्मातः क्षणं भूतले॥७॥लक्ष्मीः सिद्धिगणाश्च पादुकैसुखाः सिद्धास्तथा वैरिणां स्तंभश्चापि वैरांगने गजघटास्तंभस्तथा मोहने॥मातस्त्वत्पदसेवया खलु नृणां सिद्ध्यंति ते ते गुणाः कांतिः कांतमनोभवस्य भवति मूकोपि वाचस्पतिः॥८॥ताराष्टकमिदं पुण्यं भक्तिमान्यः पठेन्नरः॥प्रातर्मध्याह्नकाले च सायाह्ने नियतः शुचिः॥लभते कवितां विद्यां सर्वशास्त्रार्थविद्भवेत्॥लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगान्यथेप्सितान्॥कीर्तिं कांतिं च नैरुज्यं सर्वेषां प्रियतां व्रजेत्॥विख्यातिं चापि लोकेषु प्राप्यांते मोक्षमाप्नुयात्॥११॥इति नीलतंत्रे तारास्तोत्रं समाप्तम्॥॥अथास्याः कवचम्॥ईश्वर उवाच॥ ॥कोटितंत्रेषु गोप्या हि विद्यातिभयमोचनी॥दिव्यं हि कवचं तस्याः शृणुष्व सर्वकामदं॥१॥ताराकवचस्याऽक्षोभ्य ऋषिस्त्रिष्टुप्छंदो भगवती तारा देवता सर्वमंत्रसिद्धिसमृद्धये जपे विनियोगः॥प्रणवो मे शिरः पातु ब्रह्मरूपा महेश्वरी॥ह्रींकारः पातु ललाटे बीजरूपा महेश्वरी॥स्त्रींकारः पातु वदने लज्जारूपा महेश्वरी॥हूंकारः पातु हृदये भवानीरूपशक्तिधृक्॥फट्कारः पातु सर्वांगे सर्वसिद्धिफलप्रदा॥खर्वा मां पातु देवेशी गंडयुग्मे भयापहा॥निम्नोदरी सदा स्कंधयुग्मे पातु महेश्वरी॥व्याघ्रचर्मावृता कटीं पातु देवी शिवप्रिया॥पीनोन्नतस्तनी पातु

पार्श्वयुग्मे महेश्वरी॥रक्तवर्तुलनेत्रा च कटिदेशे सदावतु॥ललज्जिह्वा सदा पातु नाभौ मां भुवनेश्वरी॥करालास्या सदा पातु लिंगे देवी हरप्रिया॥पिंगोग्रैकजटा पातु जंघायां विघ्ननाशिनी॥प्रेतखर्परधरा देवी जानुचक्रे महेश्वरी॥नीलवर्णा सदा पातु जानुनी सर्वदा मम॥नागकुंडलधरा देवि पातु पादयुगे ततः॥नागहारधरा देवी सर्वांगं पातु सर्वदा॥नागकंकणधरा देवी पातु प्रांतरदेशतः॥चतुर्भुजा सदा पातु गमने शत्रुनाशिनी॥खड्गहस्ता महादेवी श्रवणे पातु सर्वदा॥नीलांबरधरा देवी पातु मां विघ्ननाशिनी॥कर्त्रीहस्ता सदा पातु विवादे शत्रुमध्यतः॥ब्रह्मरूपधरा देवी संग्रामे पातु सर्वदा॥नागनूपुरधरा देवी भोजने पातु सर्वदा॥शवकर्णा महादेवी शयने पातु सर्वदा॥वीरासनधरा देवी निद्रायां पातु सर्वदा॥धनुर्वाणधरा देवी पातु मां विघ्नसंकुले॥नागांचिता कटी पातु देवी मां सर्वकर्मसु॥छिन्नमुण्डधरा देवी कानने पातु सर्वदा॥चितामध्यस्थिता देवी मारणे पातु सर्वदा॥द्वीपिचर्मधरा देवी पुत्रदारधनादिषु॥अलंकारान्विता देवी पातु मां हरवल्लभा॥रक्ष रक्ष नदीकुंजे हूं हूं फट् सुसमन्विता॥बीजरूपा महादेवी पर्वते पातु सर्वदा॥मणिधरिणी वज्रिणी देवी महाप्रतिसरे तथा॥रक्ष रक्ष सदा हूं हूं ॐ ह्रीं स्वाहा महेश्वरी॥पुष्पकेतुरजार्हेति कानने पातु सर्वदा॰ॐ ह्रीं वज्रपुष्पं हुं ॐ फट् प्रांतरे सर्वकामदा॥ॐ पुष्पे पुष्पे महापुष्पे पातु पुत्रान्महेश्वरी॥हूं स्वाहा शक्तिसंयुक्ता दारान्रक्षतु सर्वदा॥ॐ आं हूं फट् स्वाहा महेशानी पातु द्यूते हरप्रिया॥ॐ ह्रीं सर्वविघ्नोत्सारिणी देवी विघ्नान्मां सदावतु॰ॐ पवित्रवज्रभूमे हूं फट् स्वाहा समन्विता॥पूरिका पातु मां देवी सर्वविघ्नविनाशिनी॥ॐ आः सुरेखे वज्ररेखे हुं फट् स्वाहा समन्विता॥पाताले पातु सा देवी लाकिनी नामसंज्ञिका॥ह्रींकारी पातु मां पूर्वे शक्तिरूपा महेश्वरी॥स्त्रींकारी पातु देवेशी वधूरूपा महेश्वरी॥हूं स्वरूपा महादेवी पातु मां क्रोधरूपिणी॥फः स्वरूपा महामाया उत्तरे पातु सर्वदा॥पश्चिमे पातु मां देवी फट्स्वरूपा हरप्रिया॥मध्ये मां पातु देवेशी हूं स्वरूपा नगात्मजा ॥

त्वरितेतिप्रत्यंतरे॥२

नीलवर्णा सदा पातु सर्वत्र वाग्भवं सदा ॥ भवानी पातु भवने सर्वैश्वर्यप्रदायिनी ॥ विद्यादा सर्वदा पातु वक्त्रे नीलसरस्वती ॥ शास्त्रे वादे च संग्रामे जले च विषमे गिरौ ॥ भीमरूपा सदा पातु श्मशाने भयनाशिनी ॥ भूतप्रेतालये घोरे दुर्गमा श्रीघनावतु ॥ पातु नित्यं महेशानी सर्वत्र शिवदूतिका ॥ कवचस्य च माहात्म्यं नाहं वर्षशतैरपि ॥ शक्नोमि कथितुं देवि भवेत्तस्य फलं च यत् ॥ पुत्रदारेषु बंधूनां सर्वदेशे च सर्वदा ॥ न विद्यते भयं तस्य नृपपूज्यो भवेच्च सः ॥ शुचिर्भूत्वा शुचिर्वापि कवचं सर्वकामदं ॥ प्रपठन् वा स्मरन्मर्त्यो दुःखशोकविवर्जितः ॥ सर्वशास्त्रे महेशानि कविराड् भवति ध्रुवं ॥ सर्ववागीश्वरो मर्त्यो लोकवश्यो धनेश्वरः ॥ रणे द्यूते विवादे च जयस्तत्र भवेद्ध्रुवं ॥ पुत्रपौत्रान्वितो मर्त्यो विलासी सर्वयोषितां ॥ शत्रवो दासतां यांति सर्वेषां वल्लभः सदा ॥ गर्वी खर्वी भवत्येव वादी स्खलति दर्शनात् ॥ मृत्युश्च वश्यतां याति दासास्तस्यावनीभुजः ॥ प्रसंगात्कथितं सर्वं कवचं सर्वकामदं ॥ प्रपठन्वा स्मरन्मर्त्यः शापानुग्रहणे क्षमः ॥ आनंदवृंदसिंधूनामधिपः कविराड् भवेत् ॥ सर्ववागीश्वरो मर्त्यो लोकवश्यः सदा सुखी ॥ गुरोः प्रसादमासाद्य विद्यां प्राप्य सुगोपितां ॥ तत्रापि कवचं देवि दुर्लभं भुवनत्रये ॥ गुरुर्देवो हरः साक्षात्पत्नी तु हरप्रिया ॥ अभेदेन भजेद्यस्तु तस्य सिद्धिरदूरतः ॥ मंत्राचारा महेशानि कथिताः पूर्ववत्प्रिये ॥ नाभौ ज्योतिस्तथा रक्तं हृदयोपरि चिंतयेत् ॥ ऐश्वर्यं सुकवित्वं च महावागीश्वरो नृपः ॥ नित्यं तस्य महेशानि महिलासंगमं चरेत् ॥ पंचाचाररतो मर्त्यः सिद्धो भवति नान्यथा ॥ शक्तियुक्तो भवेन्मर्त्यः सिद्धो भवति नान्यथा ॥ ब्रह्मा विष्णुश्च रुद्रश्च ये देवासुरमानुषाः ॥ तं दृष्ट्वा साधकं देवि लज्जायुक्ता भवंति ते ॥ स्वर्गे मर्त्ये च पाताले ये देवाः सिद्धिदायकाः ॥ प्रशंसंति सदा देवि तं दृष्ट्वा साधकोत्तमं ॥ विघ्नात्मकाश्च ये देवाः स्वर्गे मर्त्ये रसातले ॥ प्रशंसंति सदा सर्वे तं दृष्ट्वा साधकोत्तमं ॥ इति ते कथितं देवि मया सम्यक्प्रकीर्तितं ॥ भुक्तिमुक्तिकरं साक्षात्कल्पवृक्षस्वरूपकम् ० ॥ आसाद्यादिगुरुं प्रसाद्य य इमं कल्पद्रुमालंबनं मोहेनापि मदेन चापि रहितो जाड्येन वा युज्यते ॥ सिद्धोऽसौ भुवि सर्वदुःखविपदां पारं

२ भीषणेति पुस्तकांतरे ॥

३ सत्तमा इति युक्तः पाठः ॥३

प्रयात्यंतको मित्रं तस्य नृपाश्चरे वि विपदो नश्यंति तस्याशु च॥ लिखित्वा धारयेद्यस्तु कंठे वा मस्तके भुजे॥ तस्य सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्तते॥ गोरोचनाकुंकुमेन रक्तचंदनकेन वा॥ यावकैर्वा महेशानि लिखेन्मंत्रं समाहितः॥ अष्टम्यां मंगलदिने चतुर्दश्यामथापि वा॥ संध्यायां देवदेवेशि लिखेद्यंत्रं समाहितः॥ मघायां श्रवणायां वा रेवत्यां वा विशेषतः॥ सिंहराशौ गते चंद्रे कर्कटस्थे दिवाकरे॥ मीनराशौ गुरौ याते वृश्चिकस्थे शनैश्चरे॥ लिखित्वा धारयेद्यस्तु उत्तराभिमुखो भवन्॥ श्मशाने प्रांतरे वापि शून्यागारे विशेषतः॥ निशायां वा लिखेन्मंत्रं तस्य सिद्धिरचंचला॥ भूर्जपत्रे लिखेन्मंत्रं गुरुणा च महेश्वरि॥ ध्यानधारणयोगेन धारयेद्यस्तु भक्तितः॥ अचिरात्तस्य सिद्धिः स्यान्नात्र कार्या विचारणा॥ इति रुद्रयामले उग्रताराकवचं समाप्तम्॥ अथ त्रैलोक्यमोहनं नाम ताराकवचं॥ श्रीदेव्युवाच०॥ ॥ तारापूजाश्रुता नाथ विद्याश्च सकलास्ततः॥ सांप्रतं श्रोतुमिच्छामि कवचं मंत्रविग्रहं॥ त्रैलोक्यमोहनं नाम सर्वापद्विनिवारणं॥ पुरैव सूचितं नाथ कृपया मे प्रकाशय॥ भैरव उवाच० देवदानवगंधर्वपूजिते प्राणवल्लभे॥ त्रैलोक्यमोहनं नाम कवचं श्रूयतां परं॥ सर्वविद्यामयं देवि सर्वमंत्रमयं ध्रुवं॥ सर्वरक्षाकरं सर्वसिद्धिविद्याप्रदायकं॥ वेदव्यासोपि यद्धृत्वा सर्वज्ञः पठनाद्यतः॥ यद्धृत्वा पवनादीशस्त्रैलोक्यविजयी विभुः॥ धनाधिपः कुबेरोपि देवाधीशः शचीपतिः॥ पठनाद्धारणात्तस्य यतः सर्वे दिगीश्वराः॥ सर्वैश्वर्ययुताः संतः सर्वसिद्धिमवाप्नुयुः॥ यस्य प्रसादादीशोहं भैरवाणां सुरेश्वरि॥ क्रोधाधिपो महाभीमो देवेषु प्रथितः प्रभुः॥ न दद्यात्परशिष्येभ्यो दद्याच्छिष्येभ्य एव च॥ अभक्तेभ्योऽपि पुत्रेभ्यो दत्वा मृत्युमवाप्नुयात्॥ त्रैलोक्यमोहनस्यापि कवचस्य ऋषिः शिवः॥ छंदो विराट् देवता च सोग्रतारा प्रकीर्तिता॥ चतुर्वेदेषु विद्यानां विजये परिकीर्तितः॥ ॐ ह्रीं स्त्रीं मे शिरः पातु हूं फट् पातु ललाटकं॥ सार्द्धं पंचाक्षरी तारा पायान्नेत्रयुगं मम॥ ॐ ह्रीं स्त्रीं हूं श्रुती पायान्नमः पातु च नासिकां॥ तारा

३ मंत्रमिति म·यंतरे॥

६॥ विद्याधृगिति पुस्तकांतरे॥६

षडक्षरी पायाद्वदनं मुंडभूषणा॥ ह्रीं स्त्रीं हूं च फट् वदनं जिह्वां पायान्महेश्वरी॥ ह्रीं स्त्रीं हूं च गलं पातु सापि नीलसरस्वती॥ स्त्रीं स्कंधौ पातु
नियतं तारैकाक्षररूपिणी॥ हूं घाटां सा सदा पातु बीजैकाक्षररूपिणी॥ ऐं ह्रीं स्त्रीं हूं च फट् पायाच्छ्रीतारा मे भुजद्वयं॥ श्रीं ह्रीं स्त्रीं हूं च फट् पा
तु श्रीतारा मे स्तनद्वयं॥ श्रीं ह्रीं स्त्रीं हूं च फट् पायात् श्रीतारा हृदयं मम॥ हूं ह्रीं स्त्रीं हूं च फट् बीजतारा पृष्ठं सदावतु॥ क्लीं ह्रीं स्त्रीं हूं च फट् पायात्स
र्वयोः कामरूपिणी॥ ॐ ह्रीं श्रीं हूं नमः पायात्कुक्षी महाषडक्षरी॥ ऐं सौः ॐ ऐं क्लीं फट् स्वाहा कटिदेशं सदावतु॥ लिखेन्नवकूर्चं संयुक्तं रौद्रं त्रैगु
ण्यमेव च॥ विधिविष्णुमहेशानां स्वस्वशक्तीरनुक्रमात्॥ एषा तारा महाविद्या सर्वसिद्धिप्रदायिनी॥ त्र्यक्षरी महाविद्या साक्षाद्ब्रह्मस्वरूपिणी॥
रिं हूं ह्रौं ॐ ऐं श्रीं ह्रीं सा गुह्यदेशं सदावतु॥ सप्ताक्षरी चोग्रतारा मूलविद्यास्वरूपिणी॥ ॐ ह्रीं ह्रीं हूं नमस्तारायै सकलपदं ततः॥ दुस्तरं ता
रय पदं तारय प्रणवद्वयं॥ स्वाहेति च महाविद्या जानुनी सर्वदावतु॥ ऐं सौः ॐ ऐं क्लीं फट् स्वाहा जंघे पातु परात्मिका॥ ॐ ह्रीं स्त्रीं हूं च फट् स्वा
हा जंघे पातु परात्मिका॥ ॐ ह्रीं स्त्रीं हूं च फट् तारा हंसाद्यंता नवाक्षरी॥ महोग्रतारा पादौ च नित्यं पातु महेश्वरी॥ ऐं ह्रीं श्रीं हसौः सहौं वद
वद वाग्वादिनीति च॥ कामबीजत्रयं नीलसरस्वती स्वरूपधृक्॥ ऐं ऐं ऐं काहि काहि काहि कलरीं स्वाहेति च॥ चतुस्त्रिंशल्लिपिमयी पातु तारा
खिलं वपुः॥ इंद्रो वामाक्षियुक्पृथ्वी सरस्वत्यनलप्रिया॥ कूर्चाद्यंता पातु चोर्ध्वं मूलविद्या दशाक्षरी॥ तारो माया वधूः कूर्चं कालिका कमला
ततः॥ उग्रतारे भगं कामः परा लक्ष्मीः शिवांकुशौ॥ सा महाषोडशी प्रोक्ता तारादेव्या मयाधुना॥ विधिवद्ग्रहणादस्या मृत्युं मृत्युपथं नयेत्॥
एषा विद्या महागुप्ता तंत्रादियामलेषु च॥ सांप्रतं कथितं दिव्यं कवचांगतया प्रिये॥ इति ते कथितं देवि गुह्याद्गुह्यतरं प्रिये॥ त्रैलोक्यमोहनं ना
म कवचं मंत्रविग्रहं॥ ब्रह्मविद्यामयं भद्रे केवलं ब्रह्मरूपिणं॥ मंत्रविद्यामयं चैव कवचं मन्मुखोदितं॥ गुरुमभ्यर्च्य विधिवत्कवचं प्रपठे

यदि॥ त्रिःसकृद्वा यथाज्ञानं भैरवस्तत्क्षणाद्भवेत्॥ सर्वपापविनिर्मुक्तः कुलकोटिं समुद्धरेत्॥ गुरुः स्यात् सर्वविद्यासु ह्यधिकारी जपादिषु॥
शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः॥ शतमष्टोत्तरं जप्त्वा भवेद्भुवि पुरंदरः॥ त्रैलोक्ये विचरेद्वीरो गणनाथोऽथवा गुरुः॥ गद्यपद्यमयी वा-
णी भवेद्गंगाप्रवाहवत्॥ पुष्पांजल्यष्टकं दत्त्वा मूलेनैव पठेत्सकृत्॥ पंचवर्षसहस्राणां पूजायाः फलमाप्नुयात्॥ भूर्जे विलिख्य गुटिकां स्वर्ण-
स्थां धारयेद्यदि॥ पुरुषो दक्षिणे बाहो योषिद्वामभुजे तथा॥ बहुपुत्रवती नारी पुरुषो धनपुत्रकः॥ सर्वसिद्धीश्वरो भूत्वा विचरेद्भैरवो यथा॥
तद्गात्रं प्राप्य शस्त्राणि ब्रह्मास्त्रादीनि भैरवि॥ माल्यानि कुसुमान्येव भवंति सुखदानि च॥ तस्य गेहे चिरं लक्ष्मीर्वाणी वक्त्रे वसेद्ध्रुवं॥ इदं कवच-
मज्ञात्वा तारां यो भजतेऽधमः॥ स्वल्पायुर्निर्धनो मूर्खो भवत्येव न संशयः॥ ॥इति भैरवीतंत्रे ताराकल्पे त्रैलोक्यमोहनं नाम कवचं समाप्तम्॥ ॥ अ-
थ गुह्यषोढा॥ ॥शृणु देवि प्रवक्ष्यामि गुह्यषोढामिमां प्रिये॥ न प्रकाश्यमिदं क्वापि तारायाः कायरक्षणे॥ तारं तु मातृकावर्णपुटितं मातृकास्थ-
ले॥ तेनैव पुटितं वर्णं न्यसेत्तत्रैव पार्वति॥ शक्तिबीजं तथा देवि विन्यस्तव्यं प्रयत्नतः॥ वधूबीजं तथा देवि विन्यस्तव्यं समाहितैः॥ वर्मबीजं
महेशानि न्यसनीयमनंतरं॥ अस्त्रबीजं तथा न्यस्य सकलं तदनंतरं॥ गुह्यषोढा त्वियं देवि न प्रकाश्या कदाचन॥ इत्थं च सिद्धिदा लोके त-
था देवासुरेषु च॥ अवश्यं प्रत्यहं कार्यं न पूजा न जपस्तथा॥ इति ते कथितं किंचिद्रहस्यं सुरसुंदरि॥ न प्रकाश्यं तथा केन देवेषु च तथा त्वयि
॥ ॥इति रुद्रयामले गुह्यषोढा समाप्ता॥ ॥अथ बगलामुखी स्तोत्रम्॥ ॥चलत्कनककुंडलोल्लसितचारुगंडस्थलीं लसत्कनकचंपकद्यु-
तिमदिंदुबिंबानना॥ गदाहतविपक्षकां कलितलोलजिह्वांचलां स्मरामि बगलामुखीं विमुखवाङ्मनस्तंभनीं॥१॥ पीयूषोदधिमध्यचारुविलस-
द्रक्तोत्पले मंडले यत्सिंहासनमौलिपातितरिपुप्रेतासनाध्यासिनीं॥ स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदां विभ्रमां इत्थं ध्यायति यांति तस्य सह-

---

२ गुह इति प्रत्यंतरे॥

सासत्योथसर्वापदः॥२॥देवित्वच्चरणांबुजार्चनकृतेयत्पीतपुष्पांजलिं भक्त्यावामकरेविधायचमनुंमंत्रीमनोज्ञाक्षरं॥पीनध्यानपरोथकुंभ
कवशाद्बीजंस्मरेत्पार्थिवंतस्यामित्रमुखस्यवाचिहृदयेजाड्यंभवेत्तत्क्षणात्॥३॥वादीमूकतिरंकतिक्षितिपतिर्वैश्वानरःशीतति क्रोधीशा
म्यतिदुर्जनःसुजनतिक्षिप्रानुगःखंजति ॥गर्वीखर्वतिसर्वविच्चजडतित्वन्मंत्रिणायंत्रितः श्रीनित्येबगलामुखिप्रतिदिनंकल्याणितुभ्यंनमः॥
४॥मंत्रस्तावदलंविपक्षदलनेस्तोत्रंपवित्रंचते यंत्रंवादिनियंत्रणंत्रिजगतांजैत्रंचचित्रंनते॥मातःश्रीबगलेतिनामललितंयस्यास्तिजंतोर्मु
खेत्वन्नामग्रहणेनसंसदिमुखस्तंभोभवेद्वादिनां॥५॥दुष्टस्तंभनमुग्रविघ्नशमनंदारिद्र्यविद्रावणं भूभृत्संदमनंचलन्मृगदृशांचेतःसमाक
र्षणम्॥सौभाग्यैकनिकेतनंममदृशःकारुण्यपूर्णेक्षणं मृत्योर्मारणमाविरस्तुपुरतोमातस्त्वदीयंवपुः॥६॥मातर्भंजयमद्विपक्षवदनं।
जिह्वांचलांकीलय ब्राह्मींमुद्रयदैत्यदेवधिषणामुग्रांगतिंस्तंभय॥शत्रूंश्चूर्णयदेवितीक्ष्णगदयागौरांगिपीतांबरे विघ्नौघंबगलेहरप्रणम
तांकारुण्यपूर्णेक्षणे॥ ७॥मातर्भैरविभद्रकालिविजयेवाराहिविश्वाश्रये श्रीविद्येसमयेमहेशिबगलेकामेशिवामेरमे॥मातंगित्रिपुरेप
रात्परतरेस्वर्गापवर्गप्रदे दासोहंशरणागतःकरुणयाविश्वेश्वरित्राहिमां॥ ८॥संरंभेचौरसंघेप्रहरणसमयेबंधनेव्याधिमध्ये विद्यावादे
विवादेप्रजपतिनृपतौदिव्यकालेनिशायां॥वश्येवास्तंभनेवारिपुवधसमयेनिर्जनेवाजनेवा गच्छंस्तिष्ठंस्त्रिकालंयदिपठतिशिवंप्रा
प्नुयादाशुधीरः॥ ९॥त्वविद्यापरमात्रिलोकजननीविघ्नौघसंछेदिनी योषित्कर्षणकारिणीजनमनःसम्मोहसंदायिनी॥स्तंभोन्मारणका
रिणीपशुमनःसंमोहसंदायिनी जिह्वाकीलनभैरवीविजयतेब्रह्मादिमंत्रोयथा॥१०॥विद्यांलक्ष्मीर्नित्यसौभाग्यमायुःपुत्रैःपौत्रैःसर्व
साम्राज्यसिद्धिं॥मानंभोगोवश्यमारोग्यसौख्यंप्राप्तंतत्तद्भूतलेस्मिन्नरेण॥११॥त्वत्कृतेजपसन्नाहंगदितंपरमेश्वरि॥दुष्टानांनिग्रहार्थायतं

---

२ सर्वेतिप्रत्यंतरे

गृह्वाणनमोस्तुते॥१२॥इतिरुद्रयामलेबगलामुखीस्तोत्रंसमाप्तम्॥ अथमातंगीस्तुतिः॥ ॥आराध्यमातश्चरणाम्बुजंतेब्रह्मादयोपिस्तुत-
कीर्तिमापुः॥अन्येपरंवाविभवंमुनीन्द्राःपरांश्रियंभक्तिभरेणचान्ये॥१॥नमामिदेवींनवचंद्रमौलिंमातंगिनींचंद्रकलावतंसां॥आम्नायवा-
ग्भिःप्रतिपादितार्थंप्रबोधयंतींशुकमादरेण॥२॥विनम्रदेवासुरमौलिरत्नैर्नीराजितंतेचरणारविंदं॥भजंतियेदेवमहीपतीनांव्रजंतितेसंपदमा-
दरेण॥३॥मातंगलीलागमनेभवत्याःसिंजानमंजीरमिषाद्भजंति ॥मातस्त्वदीयंचरणारविंदमकृत्रिमाणांवचसांनिगुंफाः॥४॥पदात्पदंसिं-
जितनूपुराभ्यांकृतार्थयंतींपदवींपदाभ्यां॥आस्फालयंतींकरवल्लकींतांमातंगिनींमद्धृदयंधिनोति॥५॥नीलांशुकाबद्धनितंबबिंबांतालीदले-
नार्पितकर्णभूषां॥माध्वीमदाघूर्णितनेत्रपद्मांघनस्तनींशंभुवधूंनमामि॥६॥तडिल्लतांकांतिविलक्ष्यभूषांचिरेणलक्ष्यनवरोमराजिं॥स्म-
रामिभक्त्याजगतामधीशेवलित्रयांकंतवमध्यबिंबं॥७॥नीलोत्पलानांश्रियमाहरंतींकांत्याकटाक्षैःकमलाकराणां॥कदम्बमालांकित-
केशपाशांमतंगकन्यांहृदिभावयामि॥८॥ध्यायेजपारक्तकपोलकांतंबिम्बाधरंन्यस्तललामरम्यं॥आलोलनीलालकमायताक्षंमंद-
स्मितंतेवदनंमहेशि॥९॥स्तुत्यानयाशंकरधर्मपत्नींमातंगिनींवागधिदेवतांतां॥स्तुवंतियेभक्तियुतामनुष्याःपरांश्रियंनित्यमुपाश्रयंति॥
१०॥उद्यद्भानुमरीचिकांतिविलसद्वासोवसानांपरांगौरींसंगनिपानकर्परकरामानन्दकन्दोद्भवां॥गुंजाहारचलद्विहारहृदयामापी-
नतुंगस्तनींमत्तःस्मेरमुखींनमामिसुमुखींशावासनासेदुषीं॥११॥स्तुतिःइति॥ ॥अथकवचम्॥ ॥देवदेवमहादेवसृष्टिसंहारकार-
क॥मातंग्याःकवचंब्रूहियदिस्नेहोस्तिमांप्रति॥१॥शिवउवाच०॥अत्यंतगोपनंगुह्यंकवचंसर्वकामदं॥तवप्रीत्यामयाख्यातंनान्येषु
कथ्यतेशुभे॥२॥शपथंकुरुमेदेवियदिकिंचित्प्रकाशसि॥अनयासदृशीविद्यानभूतानभविष्यति॥३॥उच्छिष्टंरक्षतुशिरःशिखांचण्डा-

लिंनोर्मतः॥सुमुखीकवचंरक्षेदेवीरक्षतुचक्षुषी॥महापिशाचिनीपायान्नासिकांह्रींसदावतु॥ठःपातुकंठदेशंमेढःपातुहृदयंतथा॥ठोभुजौ
बाहुमूलेचसदारक्षतुचंडिका॥ऐंरक्षतुचपादौमेसौःकक्षंसर्वतःशिवा॥ऐंह्रींकटिप्रदेशंचआंह्रींसंधिषुसर्वदा॥ज्येष्ठमातंगिअंगुलीर्मेअंगु
ल्यग्रेनमामिच॥उच्छिष्टचाण्डालिमांपातुत्रैलोक्यस्यवशंकरी॥शिवेस्वाहाशरीरंमेसर्वसौभाग्यदायिनी॥उच्छिष्टचाण्डालिमातंगिसर्ववशंकरिनमः
॥स्वाहास्तनद्वयंपातुसर्वशत्रुविनाशिनी॥शवासनांरक्तवसनांयुवतींसर्वसिद्धिदां॥एवंध्यात्वामहादेवींपठेत्कवचमुत्तमं॥अत्यंतगोपनंदेविदेवै
रपिसुदुर्लभं॥भ्रष्टेभ्यःसाधकेभ्योपिद्रष्टव्यंनकदाचन॥दत्तेनसिद्धिहानिःस्यात्सर्वथानप्रकाशितं॥उच्छिष्टेनबलिंदत्वाशनौवामं
गलेतिथि॥रजस्वलाभगंस्पृष्ट्वाजपेन्मंत्रंचसाधकः॥रजस्वलायावस्त्रेणहोमंकुर्यात्सदासुधीः॥सिद्धविद्याइतोनास्तिनियमोनास्ति
किंचन॥अष्टसहस्रंजपेन्मंत्रंदशांशंहवनादिकं॥भूर्जपत्रेलिखित्वाचरक्तसूत्रेणवेष्टयेत्॥प्राणप्रतिष्ठामंत्रेणजीवन्यासंसमाचरेत्॥
स्वर्णमध्येतुसंस्थाप्यधारयेद्दक्षिणेकरे॥सर्वसिद्धिर्भवेत्तस्यअचिरात्पुत्रवान्भवेत्॥स्त्रीणांवामकरेधार्यंबहुपुत्रीभवेत्तदा॥वंध्यावाकाक
वंध्यावामृतवत्साचसांगना॥जीवद्वत्साभवेत्सापिसमृद्धिर्भवतिध्रुवं॥शक्तिपूजांसदाकुर्याच्छिवाबलिंप्रदापयेत्॥इदंकवचमज्ञात्वामा
तंगींयोजपेत्सदा॥तस्यसिद्धिर्नभवतिपुरश्चरणलक्षतः॥ ॥इतिरुद्रयामलीयंकवचम्॥ ॥अन्यत्कवचं॥ ॥देव्युवाच०॥ ॥देवदेवजगन्नाथसृ
ष्टिमेत्वंजगद्गुरो॥मातंगीकवचंयत्नाद्वदस्वसुतमदं॥शिवउवाच०॥शृणुष्वदेविकवचंसारभूतंसमाहितं॥कथयाम्यद्यतेस्नेहादप्रकाश्यमपि
प्रिये॥ॐअस्यमातंगीकवचस्यकौलऋषिर्विराट्छंदोमातंगीदेवतापुरुषार्थचतुष्टयेविनियोगः॥मातंगिनीशिरःपातुललाटंविंध्यवासिनी
॥श्रोत्रनासापुटेचैवचक्षुषीचापिखेचरी॥भ्रुवोर्मध्येदंतपंक्तीःपार्वतीपातुनःसदा॥उच्छिष्टपूर्विकापायाद्दोष्ठाधरपुटेमम॥कपोलेकामिका

पायाच्चिबुकं कंठकूपकं॥ स्कंधौ स्कंदमाता पायाद्बाहू मे वज्रधारिणी॥ वक्षः पायादुमा नित्यं मातंगी रंगभूमिषु॥ उदरं पातु नूनं मे दयावत्यनुरागिणी॥ जानुनी सर्वतः पायात्सर्वते वरकन्यका॥ जंघा कटीर पादौ च गुल्फे द्वे चरयासुना॥ सर्वतः सर्वदा पातु सुमुखी सर्वकालिनी॥ इत्येकं कवचं देविकथितं यत्ननस्त्वयि॥ ज्ञात्वैतत्सर्वमाप्नोति साधको नात्र संशयः॥ ॥इति रुद्रयामलीयं मातंगीकवचं समाप्तम्॥ ॥इति स्तवकवचप्रकरणं समाप्तम्॥ ॥अथ प्रसंगाच्चतुःषष्ट्युपचारादयो निरूप्यंते॥ ॥यथा सर्वोपचारमंत्रास्त्रितारीपूर्वाः कल्पयामि नमः इत्यंताः कार्याः॥ यथा रुद्रयामले॥ त्रितारीं च मुखे कृत्वा देवस्य भुवनेश्वरि॥ कल्पयामि नमः पश्चादुपचारेष्वयं विधिः॥ ऐं ह्रीं श्रीं पाद्यं कल्पयामि नमः एवमर्घ्यादिक्रमेणासनारोपणं सुगंधितैलाभ्यंगं मज्जनशालाप्रवेशनं मज्जनमंडपमणिपीठोपवेशनं दिव्यस्नानीयमुद्वर्तनमुष्णोदकस्नानं कनककलशच्युतसकलतीर्थाभिषेकं धौतवस्त्रपरीधानम् अरुणदुकूलपरिधानं अरुणदुकूलोत्तरीयं आलेपमंडपप्रवेशनं आलेपंचमणिपीठोपवेशनं चंदनागुरुकर्पूरकुंकुममृगमदकर्पूरकस्तूरीगोरोचनादिदिव्यसुगंधसर्वांगानुविलेपनं केशभारस्य कालागुरुधूपमल्लिकामालतीजातीचंपकअशोकशतपत्रपुन्नागपूगकह्लारपुन्नागकह्लारयुगमसर्वर्तुकुसुममाला भूषणमंडपप्रवेशनं भूषणमणिपीठोपवेशनं नवमणिमुकुटं चंद्रशकलं सीमंतसिंदूरं तिलकरत्नं कालांजनं पानीययुगलं नासाभरणं अधरयावकं ग्रथनभूषणं कनकचित्रपदकं महापदकं मुक्तावलिं एकावलिं देवच्छंदकं केयूरयुगलचतुष्टयं वलयावलिं उर्मिकावलिं कांचीदाम कटिसूत्रं शोभाख्याभरणपादकटकं रत्ननूपुरं पादांगुलीयकं एककरे पाशं अन्यकरे अंकुशं इतरकरे पुंड्रचापम् अपरकरे पुष्पबाणान् श्रीमणिमाणिक्यपादुकांस्वसमानवेशवस्त्राभरणदेवताभिः सह सिंहासनाधिरोहणं कामेश्वरपर्यंकोपवेशनं अमृतासवचषकं आचमनीयकं कर्पूरवटिकां आनंदोल्लासवि राम
लासहासं मंगलारात्तिकं श्वेतच्छत्रं चामरयुगलं दर्पणं तालवृंतं गंधं पुष्पं धूपं दीपं नैवेद्यं तांबूलं कल्पयेत्॥ ६॥ ६॥ ६॥ ६॥

सौभाग्येतिप्रत्यंतरे॥४

॥तेषामुपचाराणामभावे एते मंत्राः जप्याः॥नवरत्नेश्वरे॥चतुःषष्ठ्युपचाराणामभावेतन्मनुंजपेत्॥ततद्दैवफलंविद्यात्साधकःस्थिरमान
सः॥अष्टादशोपचाराः॥आसनंस्वागतंपाद्यंचार्घ्यमाचमनंततः॥स्नानंवासोपवीतंचभूषणानिचसर्वशः॥गंधंपुष्पंतथाधूपंदीपमन्नं
चदर्प्पणं॥माल्यानुलेपनंचैवनमस्कारविसर्जने॥अष्टादशोपचारैस्तुमंत्रीपूजासमाचरेत्॥अथषोडशोपचाराः॥पाद्यार्घ्यौचमनी
यकंस्नानंवसनभूषणे॥गंधपुष्पधूपदीपनैवेद्याचमनंतथा॥तांबूलमर्चनास्तोत्रंतर्प्पणंचनमस्क्रिया॥प्रयोजयेत्प्रपूजायामुपचारांस्तु
षोडश॥अथदशोपचाराः॥पाद्यमर्घ्यंतथाचामंमधुपर्कांचमनंततः॥गंधादयोनैवेद्यांताउपचारादशक्रमात्॥अथपंचोपचाराः॥गंध
पुष्पंतथाधूपदीपनैवेद्यमेवच॥अखंडफलमासाद्यकैवल्यंलभतेध्रुवं॥अथषोडशोपचारमंत्राः॥तथा॥उद्यच्चंदनकुंकुमारुणपयो-
धाराभिराप्लावितांनानावर्णमणिप्रवालघटितांदत्तांगृहाणांबिके॥आमृष्टांसुरसुंदरीभिरभितोहस्तांबुजैर्भक्तितोमातःसुंदरिभक्तकल्प
लतिकेश्रीपादुकामादरात्॥१॥देवेंद्रादिभिरर्चितंसुरगणैरादायसिंहासनंचंचत्कांचनसंचयाभिरचितंचारुप्रभाभासुरं॥एतच्चंपकके
तकीपरिमलंतैलंमयानिर्मितं गंधोद्वर्तनमादरेणतरुणीदत्तंगृहाणांबिके॥२॥पश्चादेविगृहाणशंभुगृहिणिश्रीसुंदरिप्रायशोगंधद्र
व्यसमूहनिर्भरभरंधात्रीफलंनिर्म्मलं॥तत्केशान्परिशोध्यकंकतिकयामंदाकिनीस्रोतसि स्नात्वाप्रोज्ज्वलगंधिकंभवतुनश्रीसुंदरित्वन्मुदे
॥३॥सुराधिपतिकामिनीकरसरोजनालीधृतां सचंदनसुकुंकुमागुरुभरेणविभ्राजितां॥महापरिमलोज्ज्वलांसरसशुद्धकस्तूरिकां गृहा
णवरदायिनित्रिपुरसुंदरिश्रीपदे॥४॥गंधर्वामरकिन्नरप्रियतमासंतानहस्ताम्बुजे विस्तारैर्ध्रियमानमुत्तमतरंकाश्मीरजापिंजरं॥मात
र्भास्करभानुमंडलसत्कान्तिप्रभानोज्ज्वलं चैलंनिर्मलमातनोतुवसनंश्रीसुंदरित्वन्मुदे॥५॥स्वर्णाकल्पितकुंडलेश्रुतियुगेहस्ताम्बु-

महानिर्मलमिति पुस्तकांतरे॥५

रसइतिप्रमंतरे ६

जेमुद्रिका मध्येसारसनानितम्बफलके मञ्जीरमंघ्रिद्वये॥ हारोवक्षसिकंकणौक्कणरणत्कारौकरद्वंद्वके विन्यस्तंमकुटंशिरस्यनुदिनंदत्तोन्मु
दस्तूयते॥ ६॥ग्रीवायांधृतकांतिकांतपटलंग्रैवेयकंसुंदरं सिंदूरंविलसल्ललाटफलके सौंदर्यमुद्राधरं॥ राजत्कज्जलमुज्ज्वलोत्पलदलश्रीमोच
नेलोचने नद्दिव्यौषधिनिर्म्मितंरचयतुश्रीशांभविश्रीप्रदे॥ ७॥ अमंदतरमंदरोन्मथितदुग्धसिंधूद्भवंनिशाकरकरोपमंत्रिपुरसुंदरिश्रीप्रदे॥
गृहाणमुखमीक्षितुंमुकुरबिंबमाविद्रुमे विनिर्म्मितमघच्छिदे रतिकरांबुजस्थापितं ८ कस्तूरीद्रवचंदनागुरुसुधाधाराभिराप्लावितं चंचच्च
पकपारलादिसुरभिद्रव्यैःसुगंधीकृतं॥ देवस्त्रीगणमस्तकस्थितमहारत्नादिकुंभव्रजैरंभःशांभविसंभ्रमेणविमलंदत्तंगृहाणांबिके॥
॥ ॥९॥ कह्लारोत्पलनागकेसरसरोजाख्यावलीमालतीमल्लीकैरवकेतकादिकुसुमैरक्ताश्वमारादिभिः॥ पुष्पैर्माल्यभरेणवैसुरभिना
नानारसैःस्त्रोतसा ताम्राभोजनिवासिनीभगवतीश्रीसुंदरीपूजये॥१०॥ मांसीगुग्गुलुचंदनागुरुरजःकर्पूरशैलेयजैर्माध्वीकैःसहकुंकु
मैःसुरभितैःसर्प्पिर्भिरामिश्रितैः॥ सौरभ्यस्थितिमंदिरेमणिमयेपात्रेभवत्प्रीतये धूपोयंसुरमानिनीविरचितःश्री
सुंदरित्वन्मुदे॥ ११॥ घृतद्रवपरिस्फु रद्रुचिररत्नयष्ट्यान्वितोमहातिमिरनाशनःसुरनितंबिनीनिर्म्मितः॥ सुवर्णचषकस्थितःसघ
नसारवर्त्यान्वितस्तवत्रिपुरसुंदरिस्फुरतुदेविदीपोमुदे॥१२॥ जातीसौरभनिर्भरंरुचिकरंशाल्योदनंनिर्म्मलंयुक्तंहिंगुमरीचजी
रसुरभिद्रव्यान्वितैर्व्यंजनैः॥ पक्वान्नेनसपायसेनमधुनादध्याज्यसंमिश्रितंनैवेद्यंसुरकामिनीविरचितंश्रीसुंदरित्वन्मुदे॥ १३॥ लवंग
कलिकोज्ज्वलंबहुलनागवल्लीदलंसजातिफलकोमलंसघनसारपूगीफलं॥ सुधामधुरिमाकुलंरुचिररत्नपात्रेस्थितं गृहाणमुखपंकजे
स्फुरितमंबतांबूलकम्॥ १४॥ शरत्प्रभवचंद्रमःस्फुरितचंद्रिकासुंदरंदलत्सुरतरंगिणीललितमौक्तिकाडंबरं॥ गृहाणनवकांचनप्रभवदंड
खंडोज्ज्वलं महात्रिपुरसुंदरिप्रकटमातपत्रंमहत्॥ १५॥ मातस्तसुचिरंतनोतुसुभगस्त्रीभिःसमांदोलितंशुभ्रंचामरमिंदुकुंदसदृशंप्रस्वेददुः

ईत्वहमिति प्रत्यंतरे ॥

कुरुतामिति प्रत्यंतरे १

रंकमहं ॥ सद्योगस्त्यवसिष्ठनारदशुकव्यासादिवाल्मीकिभिः स्वेचितैः क्रियमाण एवक्रियमाणं शर्म्मोणिवेदध्वनिः ॥ स्वर्गांगणे वेणुमृदंगशंखभेरीनिनादैरुपगीयमाना ॥ कोलाहलैराकुलितानवास्त्रविद्याधरीनृत्यकलासुखाय ॥ देवि भक्तिरसभावितवृत्ते प्रीयतां यदि कुतोऽपि लभ्यते ॥ तत्र लौल्यमपि सफलमेकं जन्मकोटिभिरपीह न लभ्यम् ॥ १६ ॥ एतैः षोडशभिः पद्यैरुपचारोपकल्पितैः ॥ यः परां देवतां स्तौति स तेषां फलमाप्नुयात् ॥ १७ ॥ ॥ इति ॥ अथ मणिरत्नमुक्तानां निर्माल्यकालकथनम् ॥ योगिनीतन्त्रे॰ मणिमुक्तासुवर्णानि देवेदत्तानि यानि वै ॥ तन्निर्म्माल्यं द्वादशाब्दं ताम्रपात्रं तथैव च ॥ पट्टशाटीच षण्मासं नैवेद्यं दत्तमात्रतः ॥ मोदकं कृसरं चैव यामार्द्धे न महेश्वरि ॥ पट्टसूत्रं त्रिमासं स्याच्च यज्ञसूत्रं अहः स्मृतम् ॥ यावदन्नं भवेद्दुग्धं परमान्नं तथैव च ॥ मस्तकं रुधिरं चैव ह्यहोरात्रेण पार्वति ॥ मुहूर्त्तं दधि दुग्धं च त्वाज्यं यामेन सुंदरि ॥ करवीरमहोरात्रे बिल्वपत्रं तथैव च ॥ जंबारकं च माघ्यं च निर्म्माल्यं सार्धया मके ॥ माल्यं वै करवीरस्य पद्मस्य बिल्वकस्य च ॥ यामांते नैं महेशानि तांबूलं दत्तमात्रतः ॥ न निर्म्माल्यं च दाडिम्बं तथा बिल्वफलं प्रिये ॥ सौगंधिकं च कदलीप्रयत्नेन नियोजयेत् ॥ कदलीम्बीजपूरं च दुग्धपकं निवेदयेत् ॥ इदं तु स्थिरदेवताविषयं ॥ अन्यथा पुराणे विरोधः स्यात् ॥ तथा च ॥ अर्वाक् विसर्जनाद्द्रव्यं सर्वं नैवेद्यमुच्यते ॥ विसर्जिते जगन्नाथे निर्माल्यं भवति क्षणात् ॥ जगन्नाथ इत्युपलक्षणं ॥ अथ रुद्राक्षमाहात्म्यम्॰ शिखायां हस्तयोः कंठे कर्णयोश्चापि यो नरः ॥ रुद्राक्षं धारयेद्भक्त्या शैवलोकमवाप्नुयात् ॥ नववक्त्रं तु रुद्राक्षं धारयेद्वामबाहुना ॥ चतुर्दशमुखं चैव शिखायां धारयेद्बुधः ॥ एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति ॥ अवध्यत्वं प्रति सोमो वह्निस्तंभं करोति च ॥ द्विवक्त्रो हरगौरी स्याद्गोवधाद्यघनाशकृत् ॥ त्रिवक्त्रोऽग्निस्त्रिजन्मोत्थपापराशिं प्रणाशयेत् ॥ चतुर्वक्त्रः स्वयं ब्रह्मा ब्रह्महत्यां व्यपोहति ॥ पंचवक्त्रस्तु कालाग्निरगम्याभक्ष्यपापनुत् ॥ षड्वक्त्रस्तु गुहः प्रोक्तो गर्भहत्यां व्यपोहति ॥ सप्तवक्त्रस्त्वनंतः

७ जवाकुसुममाल्यं चेति प्रत्यंतरे ७ ॥

अर्द्धे नेति प्रत्यंतरे ७

सा स्वर्णस्तेयाघहृत्स्मृता॥ विनायकोऽष्टवक्त्रः स्यात्सर्वानृतविनाशकृत्॥ भैरवो नववक्त्रस्तु शिवसायुज्यकारकः॥ दशवक्त्रः स्मृतो विष्णुर्भूतप्रेतपिशाचहा॥ एकादशमुखो रुद्रो नानायज्ञफलप्रदः॥ द्वादशास्यो भवेदर्कः सर्वक्रतुफलप्रदः॥ त्रयोदशमुखः कामः सर्वकामफलप्रदः॥ चतुर्दशास्यः श्रीकंठो वंशोद्धारकरः परः॥ निश्छिद्राश्च सुपक्वाश्च रुद्राक्षाः साधारणे स्मृताः॥ पंचामृतं पंचगव्यं स्नानकाले प्रयोजयेत्॥ रुद्राक्षस्य प्रतिष्ठायां मंत्रं पंचाक्षरे यथा ॐ त्र्यंबकादि मंत्रं च यथा तत्र प्रयोजयेत्॥ ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्॥ ॐ ह्रौं अघोरे घोरे हुं घोरतरे हुं ॐ ह्रीं श्रीं सर्वतः सर्वांगेन नमस्ते रुद्ररूपिणे हुं हुं॥ अनेनापि च मंत्रेण रुद्राक्षस्याहूंजोत नमः॥ प्रतिष्ठां विधिवत्कुर्यात्ततोधिकफलं लभेत्॥ ततो यथास्वमंत्रेण धारयेद्भक्तिसंयुतः॥ तत्र क्रमेण मंत्राः॥ ॐ ॐ हशं नमः १ ॐ ॐ नमः २ ॐ ॐ नमः ३ ॐ ह्रीं नमः ४ ॐ हूं नमः ५ ॐ हूं नमः ६ ॐ हुं नमः ७ ॐ सः हूं नमः ८ ॐ ह नमः ९ ॐ ह्रीं नमः १० ॐ श्रीं नमः ११ ॐ हूं ह्रीं नमः १२ ॐ क्षां क्षौं नमः १३ ॐ नमो नमः १४॥ रुद्राक्षे देहसंस्थे तु कुक्कुरो म्रियते यदि॥ सोपि रुद्रपदं याति किं पुनर्मानवा गुह॥ सप्तविंशतिरुद्राक्षमालया देहसंस्थया॥ यत्करोति नरः पुण्यं सर्वं कोटिगुणं भवेत्॥ यो ददाति द्विजातिभ्यो रुद्राक्षंसुविषण्मुख॥ तस्य प्रीतो भवेद्रुद्रः प्रयच्छति निजं पदम्॥ इति पद्मपुराणे रुद्राक्षमाहात्म्यम्॥ ॥स्कन्दपुराणे० ब्रह्मोत्तरखंडे॥ ॥रुद्राक्षान्कंठदेशे दशनपरिमितान्मस्तके त्रिंशति द्वे षट्षट्कर्णप्रदेशे करयुगलगतान्द्वादश द्वादशैव॥ बाह्वोरिन्दोः कलाभिः प्रतिकरनखरे चैकमेकं शिखायां वक्षस्यष्टाधिको यः शतमपि कलयन्सस्वयं नीलकंठः॥१॥ स्कंदपुराणे प्रकारान्तरम्॥ कार्तिकेय उवाच०॥ एकद्वित्रिचतुःपंचषट्सप्तवसवो नव॥ दशैकादश द्वादश त्रयोदश चतुर्दश॥ एतेषां तु मुखानां तु देवताः कात्र शंकर॥ गुणं च कीदृशं तेषां कथयस्व यथार्थतः॥ शंकर उवाच०॥ शृणु षण्मुख त

लो[illegible]क्रे वक्रे यथाक्रमं॥ एकवक्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति॥ द्विवक्रो देवदेव्यौ च गोवधं नाशयेद्ध्रुवं॥ त्रिवक्रो दहनः साक्षाद्भ्रूणह
त्यां व्यपोहति॥ चतुर्वक्रः स्वयं ब्रह्मा ब्रह्महत्यां व्यपोहति॥ पंचवक्रः स्वयं रुद्रः कालाग्निर्नाम नामतः॥ षड्वक्रः कार्तिकेयस्तु धारयेद्दक्षिणे
भुजे॥ ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः॥ सप्तवक्रो महासेन अनंतो नाम नागराट्॥ गुरुतल्पादिभिः पापैर्मुच्यते नात्र संशयः॥ अष्टवक्रो
महासेनः साक्षाद्देवो विनायकः॥ एष्टोदरकरेणापि संस्पृशेद्गुरुस्त्रियं॥ एवमादीनि पापानि अतिपापानि सर्वशः॥ विघ्नास्तस्य च नश्यंति मु
क्तो याति परां गतिं॥ गुणा ह्येतेषु सर्वेषु अष्टवक्रेषु धारणात्॥ नववक्रो भैरवः साक्षाद्धारयेद्वामके भुजे॥ कपिलं मुक्तिदं प्रोक्तं मम तुल्यबलो भवेत्
॥ लक्षकोटिसहस्राणि ब्रह्महत्याः करोति यः॥ तत्सर्वं दहते शीघ्रं नववक्रस्य धारणात्॥ दशवक्रो महासेनः साक्षाद्देवो जनार्दनः॥ ग्रहाश्चै
व पिशाचाश्च वेताला ब्रह्मराक्षसाः॥ पन्नगाश्च विनश्यंति दशवक्रस्य धारणात्॥ वक्रैकादशरुद्राक्षो रुद्र एकादशः स्मृतः॥ शिखायां धारयेन्नि
त्यं तस्य पुण्यफलं शृणु॥ अश्वमेधसहस्रस्य वाजपेयशतस्य च॥ हेमशृंग्याश्च लक्षस्य सम्यग्दत्तस्य यत्फलं॥ तत्फलं समवाप्नोति रुद्रैकादश
धारणात्॥ रुद्राक्षैर्द्वादशैर्वक्रैः कंठदेशे च धारणात्॥ आदित्यस्तुष्यते नित्यं द्वादशाक्षो व्यवस्थितः॥ त्रयोदशमुखः कामः सर्वकामफलप्रदः॥
चतुर्दशास्यः श्रीकंठो वंशोद्धारकरः परः॥ तत्तत्क्रमेण मंत्राः॥ ॐ ऐं १ ॐ श्रीं २ ॐ ॐ धुं धं ३ ॐ ह्रीं ह्रः ४ ॐ श्रीं ५ ॐ ह्रीं ६ ॐ ह्रीं ७ ॐ कं वं ८ ॐ ह्रीं
९ ॐ ह्रीं १० ॐ श्रीं ११ ॐ ह्रां ह्रीं १२ ॐ क्षौं स्तौं १३ ॐ उं मां १४॥ इति रुद्राक्षसंस्कारः॥ ॥अथ नैमित्तिकादिभंगे प्रायश्चित्तमाह॥ ॥गौतमीये॥ ॥य
द्यत्कर्मणि वैगुण्यं नित्ये नैमित्तिके तथा॥ सहस्रं प्रजपेन्मंत्रं मूलं चायुतमेव वा॥ नित्ये सहस्रं प्रजपेन्नैमित्तिके तथायुतं॥ इति तु विष्णुविषयं॥ अन्य
त्र तंत्रराजे॥ नित्यादिक्रमदोषाणां शांत्यै विद्यां शतं जपेत्॥ नैमित्तिकादिक्रमणे सहस्रं प्रजपेन्मनुं॥ पापसंकरे तु॥ सर्वेषामेव पापानां संकरे समु
४ ॐ ऐं ॐ श्रीं ॐ छुं ॐ जीं ह्रः ॐ ह्रीं ॐ ह्रीं ॐ ह्रीं ॐ कं रं ॐ ह्रीं ॐ श्रीं ॐ हां ह्रां ॐ क्षौं स्लौं ॐ उमामिति प्रत्यंतरे॥ ४

पस्थिते॥ प्रायश्चित्तं तु तंत्रोक्तमयुतं मंत्रजापतः॥ अथ परिभाषा गौतमीये॰ परिभाषामथो वक्ष्ये उपचारविधौ हरेः॥ द्रव्याणां यावती संख्या पात्राणां द्रव्यसंहतिः॥ हाटकं राजतं ताम्रमारकूटं मृदादिना॥ उपचारविधावेन द्रव्यमाहुर्मनीषिणः॥ आसने पंच पुष्पाणि स्वागते षट् चतुः फलं॥ जलं श्यामाकदूर्वाब्जविष्णुक्रांतानि पंचशः॥ पाद्ये चार्घ्ये जलं तावद्गंधपुष्पाक्षतं जवा॥ दूर्वातिलाश्च चत्वारः कुशाग्रं श्वेतसर्षपाः॥ जातीफलं लवंगं च कंकोलं तोयं च षट्पलं॥ प्रोक्तमाचमनं कांस्ये मधुपर्कं घृतं मधु॥ दध्ना सह पले कं तु शुद्धं वारि तथाचमे॥ परिमाणं तु पंचाशत्पलं स्नानार्थमंभसः॥ निर्मलेनोदकेनाथ सर्वत्र परिपूर्णता॥ मलिनं गर्हितं सर्वं सजेत्पूजाविधौ हरेः॥ वितस्तिमात्रादधिकं वाससो युग्मं तु नूतनं॥ स्वर्णाद्याभरणान्येवरत्नेन संयुतानि च॥ चंदनागुरुकर्पूरपंकगंधं पलावधि॥ नानाविधानि पुष्पाणि पंचाशदधिकानि च॥ कांस्यादिनिर्मिते पात्रे धूपो गुग्गुलकर्षभाक्॥ सप्तवर्त्या च संयुक्तो दीपस्याच्चतुरंगुलः॥ यावद्दृश्यं भवेत्पुंसस्तावद्द्याज्जनार्दने॥ नैवेद्यं विविधं वस्तुभक्ष्यादिकचतुर्विधं॥ कर्पूरादियुता वर्त्तिनवका र्प्यासनिर्म्मिता॥ शालिपिष्टावंदनायां सप्तधावर्त्तयेन्नरः॥ कार्य्याताम्रादिपात्रेन प्रीतये हरिमेधसः॥ दूर्वाक्षतप्रमाणं तु वित्ते यत्तु शताधिकं॥ उत्तमोयं विधिः प्रोक्तो विभवे सति सर्वदा॥ एषामभावे सर्वेषां यथाशक्त्या तु पूजयेत्॥ अनुकल्पं विवर्जेत द्रव्याणां विभवे सति॥ अनेन विधिना यस्तु पूजयेदुपचारतः॥ सर्वभोगान्वितो भूत्वा व्रजेदन्ते हरेः पुरं॥ अथ विष्णोराराधनमंत्राः॥ तत्र गौतमीये॰ यस्य दर्शनमिच्छंति देवाश्च स्त्वहृदयः॥ कृपया देवदेवेश मदग्रे सन्निधीभव॥ तस्मै ते परमेशान स्वागतं स्वागतं प्रभो॥ कृतार्थोऽनुगृहीतोस्मि सफलं जीवनं मम॥ यदागतोसि देवेश चिदानंदमयाव्यय॥ अज्ञानाद्वा प्रमादाद्वा वैकल्यात्साधकस्य च॥ यदपूर्णं भवेत्कृत्यं तथाप्यभिमुखो भव॥ इत्यावाहनमंत्राः॥ मद्भक्तिलेशसंपक्तोत्परमानंदसंभवैः॥ तस्मै ते परमेशान पाद्यं शुद्धाय कल्पये॥ इति पाद्यं॥ देवानामपि देवाय देवानां देवताय च॥ आचामं कल्पयामी

संस्रवइतिप्रत्यंतरे॥१

१ शुनीतिप्रत्यंतरे॥ ५ सदेतिप्रत्यंतरे ५ ४ मायाचित्रपटाच्छन्ननिजगुह्योरुतेजसे इति प्रत्यंतरे॥ ४

शंस्वधायाः शुद्धिहेतवे॥इत्याचमनं॥तापत्रयहरंदिव्यंपरमानंदलक्षणं॥तापत्रयविनिर्मोक्षायतवार्घ्यंकल्पयाम्यहं॥इत्यर्घ्यं॥सर्वकालुष्यहीनाय
परिपूर्णसुधात्मकम्॥मधुपर्कमिमंदेवकल्पयामिप्रसीदमे॥इतिमधुपर्कं॥उच्छिष्टोप्यशुचिर्वापियस्यस्मरणमात्रतः॥शुद्धिमाप्नोतितस्मैतेपुनरा
चमनंत्विदं॥इतिपुनराचमनीयं॥गंधतैलंगृहीत्वापठेत्॥स्नेहंगृहाणस्नेहेनलोकनाथमहाशय॥सर्वलोकेषुशुद्धात्मन्ददामिस्नेहमुत्तमं॥इत्य
भ्यगम्॥परमानंदबोधाब्धिनिमग्ननिजमूर्तये॥सांगोपांगमिदंस्नानंकल्पयाम्यहमीशते॥इतिस्नानं॥मायांविनानतेजन्मनिजगूह्योरुतेजसे॥
॥निरावरणविज्ञायवासस्तेकल्पयाम्यहमितिवासः॥यमाश्रित्यमहामायाजगत्संमोहिनीतुसा॥तस्मैतेपरमेशायकल्पयाम्युत्तरीयकं॥यस्यश-
क्तित्रयेनेदंसंप्रोतमखिलंजगत्॥यज्ञसूत्रायतस्मैतेयज्ञसूत्रंप्रकल्पयेत्॥ इतियज्ञसूत्रं॥स्वभावसुंदरांगायसत्यसत्याश्रयायते॥भूषणानि
विचित्राणिकल्पयामिसुरार्चित॥इतिभूषणं॥समस्तदेवदेवेशसर्वतृप्तिकरंपरं॥अखंडानंदसंपूर्णगृहाणजलमुत्तमं॥इतिजलं॥परमानंद
सौरभ्यपरिपूर्णदिगंतरं॥गृहाणपर मंगंधंकृपयापरमेश्वर॥इतिगंधं॥तुरीयगुणसंपन्नंनानागुणमनोहरं॥आनंदसौरभंपुष्पंगृह्यता
मिदमुत्तमं॥इतिपुष्पं॥वनस्पतिरसोत्पन्नोगंधाढ्योगंधउत्तमः॥आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां॥इतिधूपः॥सुप्रकाशोमहादीपः
सर्वतस्तिमिरापहः॥सबाह्याभ्यंतरंज्योतिर्दीपोयंप्रतिगृह्यतां॥इतिदीपः॥सत्पात्रसिद्धसुहविर्विविधानेकभक्षणं॥ निवेदयामिदेवेशसानु
गायगृहाणतत्॥इतिनैवेद्यं॥समस्तदेवदेवेशसर्वतृप्तिकरंपरं॥अखंडानंदसंपूर्णगृहाणजलमुत्तमं॥इतिजलमाचमनार्थं॥ताम्बूलंचवरंदि
व्यंकर्पूरादिसुवासितं॥मयानिवेदितंभक्त्यागृहाणपरमेश्वर॥इतिताम्बूलं॥ततस्ततद्देवतानमस्कारमंत्रैर्वन्दनं॥उपचारद्रव्याधारदानेतुसा
धारणत्वेनोल्लेखः पृथग्वातद्दानेउपचारद्रव्याभावेकेवलजलेनापि॥तथाचगौतमीये॰ पूजाचपंचधाप्रोक्तातासांभेदान्शृणुष्वमे॥अभिगमनंउ

२स्वात्मत्वेनैवेतिप्रत्यंतरे ६ निरीक्षणमितिप्रत्यंतरे॥

पलेपनमुपादानं योगः स्वाध्याय एव च॥ इज्या पंचप्रकारार्चा क्रमेण कथयामि ते॥ अत्राभिगमनं नाम देवतास्थानमार्जनं॥ उपलेपनं निर्माल्यदूरीकरणमेव च॥ उपादानं नाम गंधपुष्पादिचयनं तथा॥ योगो नाम स्वदेवस्याभेदत्वेनैव भावना॥ स्वाध्यायो नाम मंत्रार्थसंधानपूर्वको जपः॥ सूक्तस्तोत्रादिपाठश्च हरेः संकीर्तनं तथा॥ तत्त्वादिशास्त्राभ्यासश्च स्वाध्यायः परिकीर्तितः॥ इज्या नाम स्वदेवस्य पूजनं च यथार्थतः॥ इति पंचप्रकारार्चा कथिता तव सुव्रते॥ सार्ष्टिसामीप्यसालोक्यसारूप्यसायुज्यदा क्रमात्॥ अथ द्वादशशुद्धिस्तवेष्णवानामिहोच्यते॥ गृहोपसर्पणं चैव तथानुगमनं हरेः॥ भक्त्या प्रदक्षिणं चैव पादयोः शोधनं पुनः॥ पूजार्थं पत्रपुष्पाणां भक्त्यैवोत्तोलनं हरेः॥ करयोः सर्वशुद्धीनामियं शुद्धिर्विशिष्यते॥ तन्नामकीर्तनं चैव गुणानामथ कीर्तनं॥ भक्त्या श्रीकृष्णदेवस्य वचसः शुद्धिरिष्यते॥ तत्कथाश्रवणं चैव तत्सोत्सवनिरूपणं॥ श्रोत्रयोर्नेत्रयोश्चैव शुद्धिः सम्यगिहोच्यते॥ पादोदकं च निर्माल्यं मालानामपि धारणं॥ उच्यते शिरसः शुद्धिः पुंसस्तस्य हरेः पुनः॥ आघ्राणं गंधपुष्पादेर्निर्माल्यस्य तपोधन॥ विशुद्धिः स्यादनंतस्य घ्राणस्यापि विधीयते॥ पत्रपुष्पादिकं यच्च कृष्णपादयुगार्पितं॥ तदेकं पावनं लोके तद्धि सर्वं विशोधयेत्॥ ललाटे च गदा कार्या मूर्ध्नि चापं शरांस्तथा॥ नंदकं चैव हृन्मध्ये शंखं चक्रं भुजद्वये॥ शंखचक्रान्वितो विप्रः श्मशाने म्रियते यदि॥ प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य गौतम॥ अथ द्वात्रिंशदपराधाः॥ तंत्रांतरे॥ यानैर्वा पादुकाभिर्वा यानं भगवतो गृहे॥ देवोत्सवेष्वसेवा च अप्रणामस्तदग्रतः॥ उच्छिष्टे च तथाशौचे भगवद्वंदनादिकं॥ एकहस्तप्रणामश्च पुरस्तात्तत्प्रदक्षिणं॥ पादप्रसारणं चाग्रे तथा पर्यंकबंधनं॥ शयनं भक्षणं चापि मिथ्याभाषणमेव च॥ उच्चैर्हासो मिथो जल्पो रोदनानि च विग्रहः॥ निग्रहानुग्रहौ चैव स्त्रीषु च क्रूरभाषणं॥ कंबलावरणं चैव परनिंदा परस्तुतिः॥ अश्लीलभाषणं चैव अधोवायुविमोक्षणं॥ शक्तौ गौणोपचारश्च अनिवेदितभक्षणं॥ तत्तत्कालोद्भवानां च फलादीनामनर्पणं॥ विनियुक्तावशिष्टस्य

२आषइतिप्रत्यंतरे

तथा उष्णीषधारणमिति पुस्तकांतरे २

प्रदानं व्यंजनस्य च ॥ स्पष्टीकृत्याशनं चैव परनिंदापरस्तुतिः ॥ गुरोर्मौनं निजस्तोत्रं देवतानिंदनं तथा ॥ अपराधास्तथा विष्णोर्द्वात्रिंशत्परिकीर्तिताः ॥ गौतमीये
॥:॥ शालग्रामशिलातोयमपीत्वा यस्तु मस्तके ॥ प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते ॥ विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनं ॥ तदेवाष्ट
गुणं पापं भूमौ बिंदुनिपातनात् ॥ धारणं मंत्रस्तु ॥ अकालमृत्युहरणं सर्वव्याधिविनाशनं ॥ विष्णोः पादोदकं पुण्यं शिरसा धारयाम्यहं ॥ अग ‸
स्त्ये० हत्यां हंति पदंघ्रिजापितुलसीस्तेयं च तोयं पदे नैवेद्यं बहुमद्यपानजनितं गुर्वंगनासंगतं ॥ श्रीशाधीनमतिस्थितिर्हरिजनेस्तत्संगजं किल्बि
षं शालग्रामशिलानृसिंहमहिमा कोप्येष लोकोत्तरः ॥ वासिष्ठे ॥ केशवाग्रे नृत्यगीतं न करोति हरेर्दिने ॥ वह्निना किं न दग्धोसौ गतः किन्न रसातलं ॥ ना
रदीये० स्मरणं कीर्तनं विष्णोः कलौ मंत्रजपादिकं ॥ दानं तु श्रीनयेन स्यान्नान्यथा गतिरिष्यते ॥ विष्णुरित्युपलक्षणं ॥ अथ सुप्तप्रबोधकालोथ मंत्राणाम
भिधीयते ॥ मंत्रविद्याविभागे तु द्विविधा मंत्रजातयः ॥ मंत्राः पुंदेवताः प्रोक्ता विद्याः स्त्रीदेवताः स्मृताः ॥ पुंमंत्रा हुंफडंताः स्युर्द्विठांताः स्युः स्त्रियो मताः
॥ नपुंसका नमोंताः स्युरित्युक्ता मनवस्त्रिधा ॥ एतच्छ्रुत्या भवेद्विद्या महाशब्देन गीयते ॥ एवं मंत्रेपि० अग्नीषोमात्मिका विद्या विज्ञेयाः क्रूरसौम्य
योः ॥ कर्मणोर्वह्नितारान्यवियत्प्रायाः समीरिताः ॥ आग्नेया मनवः सौम्या भूयिष्ठेंदुमृताक्षराः ॥ आग्नेयाः संप्रबुध्यंते प्राणे चरति दक्षिणे ॥ भागो
न्यस्मिन्स्थिते प्राणे सौम्या बोधं प्रयांति ते ॥ नाडीद्वयगते प्राणे सर्वे बोधं प्रयांति ते ॥ प्रयच्छंति फलं सर्वे प्रबुद्धा मंत्रिणां सदा ॥ यद्वा ॥ प्राणापान
समायोगाच्छिवशक्त्योस्तु मेलनं ॥ प्रबोधकालो विज्ञेयः स्वापकालस्ततः परं ॥ अथ रहस्यं ॥ शांतिकादौ यदा वायोर्वैपरीत्यं भवेद्यदा ॥ तदा मं
त्रे हंसदीर्घयोगः कर्तव्य ईरितः ॥ तथा ॥ वामबाहौ यदा वायुर्हंसानां योजनं तदा ॥ दक्षिणस्था यदा वायुस्तदा दीर्घाणि योजिताः ॥ उभय ‸
स्थो यदा वायुस्तदा स्यादुभयात्मकः ॥ संपुटीकृत्य मंत्रेण अक्षलाद्यान्सबिंदुकान् ॥ पुनश्च सविसर्गांस्तान्सकारं केवलं जपेत् ॥ एवं जप्तो

अन्येति मत्यंतरे ॥ ६

मंत्रा इति प्रत्यंतरे ॥ ६

यदि सुप्तः प्रबुद्धः शीघ्रसिद्धिदः॥ ॥इति सुप्तप्रबोधकालः॥ ॥अथ योगासनानि॥ ॥पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनं तथा॥ वीरासनमिति प्रोक्तं क्रमादासनपंचकं॥ ऊर्वोरुपरि विन्यस्य सम्यक् पादतले उभे॥ अंगुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः॥ पद्मासनमिति प्रोक्तं योगिनां हृदयंगमं॥ जानूर्वोरन्तरे सम्यक् कृत्वा पादतले उभे॥ ऋजुकायो विशेद्योगी स्वस्तिकं तत्प्रचक्षते॥ सीमन्यां पार्श्वयोर्न्यस्येद्गुल्फयुग्मं सुनिश्चलं॥ वृषणाधः पार्श्वपादौ पाणिभ्यां परिबंधयेत्॥ भद्रासनं समुद्दिष्टं योगिभिः परिकल्पितं॥ उर्वोः पादौ क्रमान्न्यस्य जान्वोः प्रत्यङ्मुखांगुलीः॥ करौ निदध्यादाख्यातं वज्रासनमनुत्तमं॥ एकं पादमधः कृत्वा विन्यस्योरौ तथेतरं॥ ऋजुकायो विशेद्योगी वीरासनमितीरितं॥ ५॥ अथ मुद्राप्रकारः॥ अथ मुद्राः प्रवक्ष्यामि सर्वतंत्रेषु गोपिताः॥ याभिर्विरचिताभिस्तु मोदंते मंत्रदेवताः॥ अर्चने जपकाले च ध्याने काम्ये च कर्मणि॥ स्नाने चावाहने शंखप्रतिष्ठायां च रक्षणे॥ नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशिते॥ स्थाने मुद्राः प्रदष्टव्याः स्वस्वलक्षणलक्षिताः॥ आवाहनादिका मुद्रा नव साधारणा मताः॥ तथा षडंगमुद्राश्च सर्वमंत्रेषु योजयेत्॥ एकोनविंशतिर्मुद्रा विष्णोरुक्ता मनीषिभिः॥ शंखचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः॥ वनमाला तथा ज्ञानमुद्रा बिल्वाह्वया तथा॥ गरुडाख्या परा विष्णोर्मुद्रा संतोषवर्द्धिनी॥ नारसिंही च वाराही हयग्रीवी धनुस्तथा॥ बाणमुद्रा ततः पश्चाज्जगन्मोहनिका च सा॥ काममुद्रा पराख्याता शिवस्य दशमुद्रिकाः॥ लिंगयोनित्रिशूलाख्या मालेष्टाभी मृगाह्विका॥ खट्वांगं च कपालाख्या डमरुः शिवतोषदा॥ सूर्यस्यैकैव पद्माख्या सप्त मुद्रा गणेशितुः॥ दंतपाशांकुशाविघ्नपरशुलड्डुकसंज्ञकाः॥ बीजपूराह्वया मुद्रा विज्ञेया विघ्नपूजने॥ पाशांकुशवराभीतिखड्गचर्मधनुःशराः॥ मौशली मुद्रिका दौर्गी मुद्रा शक्तेः प्रियंकरी ॥लक्ष्मीमुद्रार्चने लक्ष्म्या वाग्वादिन्यास्तु पूजने॥ अक्षमाला तथा वीणा व्याख्या पुस्तकमुद्रिका॥ सप्तजिह्वाह्वया मुद्रा विज्ञेया वह्निपूजने॥ मत्स्यमुद्रा च कूर्माख्या लेलिहा मुंडसंज्ञका:

॥ महायोनिरितिख्याता सर्वसिद्धि समृद्धिदा॥ शक्त्यर्चने महायोनिः श्यामासोमुंदमुद्रिका॥ मत्स्यकूर्मलेलिहाख्या सर्वसाधारणी मता तारार्चने विशेषास्तु कथ्यन्ते पंचमुद्रिकाः॥ योनिश्च भूतिनी चैव बीजाख्या दैत्यधूमिनी॥ लेलिहा नेति संप्रोक्ताः पंचमुद्रा विलोकिताः॥ दशमुद्राश्च विज्ञेया त्रिपुरायाः प्रपूजने॥ संक्षोभद्रावणाकर्ष वश्योन्माद महांकुशाः॥ खेचरी बीजयोन्याख्या त्रिखंडा परिकीर्तिताः॥ कुंभमुद्राभिषेके स्यात्पद्ममुद्रासने तथा॥ कालकर्णी प्रयोक्तव्या विघ्नप्रशमकर्म्मणि॥ गालिनी च प्रयोक्तव्या जलशोधनकर्म्मणि॥ श्रीगोपालार्चने वेणुर्नृहरेर्नारसिंहिका॥ वराहस्य च पूजायां वराहाख्यां प्रदर्शयेत्॥ हयग्रीवार्चने चैव हायग्रीवीं प्रदर्शयेत्॥ रामार्चने धनुर्बाणमुद्रे पर्शुस्तथार्चने॥ परशुरामस्य विज्ञेया तथा परशुमुद्रिका॥ वासुदेवाह्वयाध्याने कुंभमुद्रानुरक्षणे॥ सर्वत्र प्रार्थने चैव प्रार्थनाख्यां नियोजयेत्॥ मोदनात्सर्वदेवानां द्रावणात्पापसंततेः॥ तस्मान्मुद्रा समाख्याता सर्वकामार्थसाधिनी॥ अथैतासां लक्षणान्याह॥ उद्देशानुक्रमादासामुच्यते लक्षणान्यथ॥ हस्ताभ्यामंजलिं बध्वानामिकामूलपर्वणोः॥ अंगुष्ठौ निःक्षिपेत्सेयं मुद्रा त्वावाहनी मता॥ अधोमुखी त्वियं चेत्स्यात्स्थापनी मुद्रिका स्मृता॥ उच्छ्रितांगुष्ठमुष्ट्योस्तु — संयोगात्सन्निधापनी॥ अंतःप्रवेशितांगुष्ठा सैव संरोधनी मता॥ उत्तानमुष्टियुगला सम्मुखीकरणी मता॥ देवतांगे षडंगानां न्यासः स्यात्सकलीकृतिः॥ सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी॥ अवगुंठनमुद्रेयमभितो भ्रामिता मता॥ अन्योन्याभिमुखाश्लिष्टा कनिष्ठानामिका पुनः॥ तथैव तर्जनी मध्या धेनुमुद्रा समीरिता॥ अमृतीकरणं कुर्यात्तया साधकसत्तमः॥ आन्योन्यग्रथितांगुष्ठा प्रसारितकरांगुली॥ महामुद्रेयमुदिता परमीकरणे बुधैः॥ प्रयोजयेदिमा मुद्रा देवताह्वानकर्म्मणि॥ अंगन्यासस्यपामुद्रास्तासां लक्षणमुच्यते॥ ऋजवो हस्तशाखाश्च हृदये च शिरस्यथ॥ तर्जनीमध्यमेंगुष्ठमधोमुष्टिः शिखास्तथा॥ करद्वंद्वांगुलीः सर्वाः कवचे स्युः प्रमोदिकाः

३ संलग्नाविति प्रत्यंतरे॥

नाराचमुद्रिका मध्येतर्जनी ध्वनिरीरिता॥ विष्वक्सेनेस्मृता मुद्रा नेत्रयोर्मध्यतर्जनी॥ नेत्रत्रयं यत्र भवेदनामा मध्यतर्जनीः॥१३॥ इति षडंगमुद्राः॥ वैष्णवानां तु मुद्राणां कथ्यंते लक्षणान्यथ॥ वामांगुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना॥ कृत्वोत्तानं ततो मुष्टिमंगुष्ठं तु प्रसारयेत्॥ वामांगुल्यस्तथाश्लिष्टाः संयुक्ताः सुप्रसारिताः॥ दक्षिणांगुष्ठसंस्पृष्टा मुद्रैषा शंखमुद्रिका॥ हस्तौ च संमुखौ कृत्वा सुभुग्नौ सुप्रसारितौ॥ कनिष्ठांगुष्ठकौ लग्नौ मुद्रैषा चक्रसंज्ञिका॥ अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथितांगुलीः॥ अंगुष्ठमध्यमे भूयः संलग्ने सुप्रसारिते॥ गदामुद्रेयमुदिता विष्णोः संतोषवर्द्धिनी॥ हस्तौ तु संमुखौ कृत्वा संहतप्रोन्नतांगुलीः॥ तलांतर्मिलितांगुष्ठौ कृत्वैषा पद्ममुद्रिका॥ ओष्ठे वामकरांगुष्ठो लग्नस्तस्य कनिष्ठिका॥ दक्षिणांगुष्ठसंसगोत्तत्कनिष्ठा प्रसारिता॥ तर्जनीमध्यमानामाः किंचित्संकोच्य चालिताः॥ वेणुमुद्रा भवेदेषा सुगुप्ता प्रेयसी हरेः॥ अन्योन्यस्पृष्टकरयोर्मध्यमानामिकांगुलीः॥ अंगुष्ठेन तु बध्नीयात्कनिष्ठामूलसंस्थिते॥ तर्जन्यौ कारयेदेषा मुद्रा श्रीवत्ससंज्ञिका॥ अनामापृष्ठसंलग्ना दक्षिणस्य कनिष्ठिका॥ कनिष्ठयान्यया बध्वा तर्जन्या दक्षया तथा॥ वामानामां च बध्नीयाद्दक्षिणांगुष्ठमूलके॥ अंगुष्ठमध्यमे वामे संयोज्य सरलाः पराः॥ चतस्रोप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञका॥ स्पृशेत्कंठादिपादांतं तर्जन्यांगुष्ठया तथा॥ करद्वयेन मालावन्मुद्रेयं वनमालिका॥ तर्जन्यंगुष्ठकौ सक्तावग्रतो हृदि विन्यसेत्॥ वामहस्तांबुजं वामजानुमूर्द्धनि विन्यसेत्॥ ज्ञानमुद्रा भवेदेषा रामचंद्रस्य प्रेयसी॥ अंगुष्ठं वाममुद्दंडितमितरकरांगुष्ठकेनाथ बद्ध्वा तस्याग्रं पीडयित्वांगुलिभिरपि च ता वामहस्तांगुलीभिः॥ बद्ध्वा गाढं हृदि स्थापयतु विमलधीर्व्याहरन्मारबीजं बिल्वाख्या मुद्रिकेषा स्फुटमिह कथिता गोपनीया विधिज्ञैः॥१॥ हस्तौ तु विमुखौ कृत्वा ग्रथयित्वा कनिष्ठिके॥ मिथस्तर्जनिके श्लिष्टे श्लिष्टावंगुष्ठकौ तथा॥ मध्यमानामिके द्वे तु द्वौ पक्षाविव चालयेत्॥ एषा गरुडमुद्राख्या विष्णोः संतोषवर्द्धिनी॥ जानुमध्ये करौ कृत्वा चिबुकोष्ठौ समावृतौ॥ हस्तौ च भूमिसंलग्नौ कंपमानः पुनः पुनः

॥मुखंविवृतकंकुर्य्याल्लेलिहानांधजिह्विकां॥नारसिंहीभवेदेषामुद्रातत्प्रीतिवर्द्धिनी॥अंगुष्ठाभ्यांतुकरयोरथाक्रम्यकनिष्ठके॥अधोमुखीभिःसर्वाभिर्मुद्रेयंतुहरेर्मता॥दक्षं[illegible]परिकरंवामंकृत्वोत्तानमधःसुधीः॥संरोध्यमध्यमांतासामुन्नम्याधोविकुंचयेत्॥नामयेदितिसंप्रोक्तामुद्रावाराहसंज्ञिका॥दक्षहस्तंचोर्द्ध्वमुखंवामहस्तमधोमुखं॥अंगुल्यग्रंतुसंयुक्तंमुद्रावाराहसंज्ञिका॥वामहस्ततलेदक्षांगुलीस्ताअधोमुखीः॥संरोध्यमध्यमांतासामुन्नम्याधोविकुंचयेत्॥हयग्रीवप्रियामुद्रातन्मूर्तेरवकारिणी॥वाम स्यमध्यमाग्रंतुतर्ज्जन्याग्रेणयोजयेत्॥अनामिकाकनिष्ठांचतस्यांगुष्ठेनपीडयेत्॥दर्शयेद्वामकेस्कंधेधनुर्मुद्रेयमीरिता॥दक्षमुष्टेस्तुतर्ज्जन्यादीर्घेयाबाणमुद्रिका॥७॥यद्वातन्त्रार्णवे॥यथाहस्तगतंचापंतथाहस्तंकुरुप्रिये॥चापमुद्रेयमाख्यातावामहस्तेव्यवस्थिता॥कल्पद्रुमेधनुर्मुद्रायशःकीर्तिविवर्द्धिनी॥यथाहस्तगताबाणास्तथाहस्तंकुरुप्रिये॥बाणमुद्रेयमाख्यातारिपुवर्गनिकृंतनी॥तलेतलंतुकरयोस्तिर्य्यक्संयोज्यचांगुलीः॥संहताःप्रसृताःकुर्यान्मुद्रापरशुसंज्ञिका॥मूर्द्धस्थांगुष्ठमुष्टीद्वेमुद्रात्रैलोक्यमोहनी॥हस्तौतुसंपुटौकृत्वाप्रसृतांगुलिकौतथा॥तर्ज्जन्यौमध्यमापृष्ठेअंगुष्ठौमध्यमाश्रितौ॥काममुद्रेयमुदितासर्वदेवप्रियंकरी॥महादेवप्रियाणांचकथ्यन्तेलक्षणान्यथ॥उच्छ्रितंदक्षिणांगुष्ठंवामांगुष्ठेनबंधयेत्॥वामांगुलीर्दक्षिणाभिरंगुलीभिश्चबंधयेत्॥लिंगमुद्रेयमाख्याताशिवसान्निध्यकारिणी॥मिथःकनिष्ठिकेबद्ध्वातर्ज्जनीभ्यामनामिके॥अनामिकोर्द्ध्वसंश्लिष्टदीर्घमध्यमयोरधः॥अंगुष्ठाग्रद्वयंन्यस्येद्योनिमुद्रेयमीरिता॥अंगुष्ठेनकनिष्ठांतुबद्ध्वाश्लिष्टांगुलित्रयं॥प्रसारयेत्त्रिशूलाख्यामुद्रैषापरिकीर्त्तिता॥अंगुष्ठतर्ज्जन्यग्रेतुग्रथयित्वांगुलित्रयं॥प्रसारयेदक्षमालामुद्रेयंपरिकीर्त्तिता॥अधःस्थितोदक्षहस्तःप्रसृतोवरमुद्रिका॥ऊर्द्ध्वीकृतोवामहस्तःप्रसृतोभयमुद्रिका॥मिलितानामिकांगुष्ठमध्यमाग्रेनियोजयेत्॥शिष्टांगुल्युच्छ्रितेकुर्यान्मृगमुद्रेयमीरिता॥पंचांगुल्योदक्षिणास्तुमिलिता

२ उच्छ्रिते इति प्रत्यंतरे॥२

त्यूर्द्ध्वमुन्नताः॥खट्वांगमुद्राविख्याता शिवस्यातिप्रियामता॥पात्रवद्वामहस्तंचकृत्वांकेवामकेतथा॥निधायोच्छ्रितवत्कुर्यान्मुद्राकापा-
लिकीमता॥मुष्टिंचशिथिलांबद्ध्वाईषत्कुंचितमध्यमां॥दक्षिणांतूर्द्ध्वमुन्नम्यकर्णदेशेप्रचालयेत्॥एषामुद्राडमरुकासर्वविघ्नविनाशिनी॥९॥हृदये
सैकैवपद्माख्यासाचविष्णुप्रकरणेगदिता॥ततोगणेशमुद्राणांसुच्यंतेलक्षणानितु॥उत्तानोर्द्ध्वमुखीमध्यासरलाबद्धमुष्टिका॥दंतमुद्रासमाख्या-
तासर्वांगमविशारदैः॥वाममुष्टेस्तुतर्जन्यादक्षमुष्टेस्तुतर्जनीं॥संयोज्यांगुष्ठकाग्राभ्यांतर्जन्यग्रेसमुत्क्षिपेत्॥एषापाशाह्वयामुद्रा-
विद्वद्भिःपरिकीर्तिता॥ऋज्वींचमध्यमांकृत्वातर्जनींमध्यपर्वणि॥संयोज्याकुंचयेत्किंचिन्मुद्रैषांकुशसंज्ञका॥तर्जनीमध्यमानामाकनिष्ठांगु-
ष्ठमुच्छ्रिता॥अधोमुखीदीर्घरूपामध्यमाविघ्नमुद्रिका॥परस्तुमुद्रानिगदिताप्रसिद्धालड्डुमुद्रिका॥बीजपूराह्वयामुद्राप्रसिद्धत्वादुपेक्षिता॥
ई॥शाक्तेयीनांचमुद्राणांकथ्यंतेलक्षणानितु॥पाशांकुशवराभीतिधनुर्बाणाःसमीरिताः॥कनिष्ठानामिकेबध्वास्वांगुष्ठेनैवदक्षतः॥श्लिष्टांगु-
लौचप्रसृतेसंश्लिष्टेखड्गमुद्रिका॥१॥वामहस्तंतथातिर्यक्कृत्वाचैवप्रसार्यच॥अकुंचितांगुलीःकुर्याच्चर्ममुद्रेयमीरिता॥२॥मुष्टिं
कृत्वातुहस्ताभ्यांवामस्योपरिदक्षिणं॥कुर्यान्मुशलमुद्रेयंसर्वविघ्नविनाशिनी॥मुष्टिंकृत्वाकराभ्यांचवामस्योपरिदक्षिणं॥कृत्वाशिरसि
संयोज्यदुर्गामुद्रेयमीरिता॥चक्रमुद्रांतथाबध्वामध्यमेद्वेप्रसार्यच ॥कनिष्ठिकेतथानीयतदग्रेंगुष्ठकौक्षिपेत्॥लक्ष्मीमुद्रापराह्येषा
सर्वसंपत्प्रदायिनी॥वीणावादनवद्धस्तौकृत्वासंचालयेच्छिरः॥वीणामुद्रेयमाख्यातासरस्वत्याःप्रियंकरी॥१॥वाममुष्टिंस्वाभिमुखींकृत्वा
पुस्तकंमुद्रिका॥२॥दक्षिणांगुष्ठ[2]तर्जन्याग्रलग्नेपराङ्मुखौ॰प्रसार्यसंहतोत्तानाएषाव्याख्यानमुद्रिका॥श्रीरामस्यसरस्वत्याअत्यंतप्रेय-
सीमता॥मणिबंधस्थितौकृत्वाप्रसृतांगुलिकौकरौ॥कनिष्ठांगुष्ठयुगलेमिलित्वातःप्रसारयेत्॥सप्तजिह्वाख्यमुद्रेयंवैश्वानरप्रियंकरी॥१॥क

२ अंगुली इति प्रत्यंतरे २

निष्ठांगुष्ठकौ शक्तौ करयोरितरेतरम्॥ ॥*॥ तर्ज्जनीमध्यमानामाः संहताभुग्नवर्ज्जिता॥ मुद्रैषा गालिनी प्रोक्ता शंखस्योपरि चालि
ता॥ दक्षांगुष्ठं परांगुष्ठे क्षिप्त्वा हस्तद्वयेन तु॥ सावकाशामेकमुष्टिं कुर्यात्सा कुंभमुद्रिका॥ मुष्ट्योरूर्द्ध्वकृतांगुष्ठौ तर्जन्यग्रे तु विन्यसेत्॥
सर्वरक्षाकरी ह्येषा कुंभमुद्रेयमीरिता॥ प्रसृतांगुलिकौ हस्तौ मिथः श्लिष्टौ च संमुखौ॥ कुर्यात्स्वहृदये सेयं मुद्रा प्रार्थनसंज्ञिका॥ अंजल्यं
जलिमुद्रा स्याद्वासुदेवाभिधा च सा॥ अंगुष्ठावुन्नतौ कृत्वा मुष्ट्योः संलग्नयोर्द्वयोः॥ तावेवाभिमुखौ कुर्यान्मुद्रैषा कालकर्णिका॥ दक्षिणा
निबिडा मुष्टिर्नासिकार्प्पिततर्ज्जनी॥ मुद्रा विस्मयसंज्ञा स्याद्धि स्मयावेशकारिणी॥ मष्टिरूर्द्ध्वकृतांगुष्ठा दक्षिणा नादमुद्रिका॥ तर्जन्यंगुष्ठ
संयोगादग्रतो बिंदुमुद्रिका॥ १॥ अधोमुखे वामहस्ते उर्द्ध्वास्यं दक्षहस्तकं॥ क्षिप्त्वांगुलीरंगुलीभिः संग्रथ्य परिवर्तयेत्॥ एषा संहारमुद्रा स्याद्वि स
र्जनविधौ स्मृता॥ दक्षपाणिपृष्ठदेशे वामपाणितलं न्यसेत्॥ अंगुष्ठौ चालयेत्सम्यक् मुद्रेयं मत्स्यरूपिणी॥ वामहस्तस्य तर्जन्या दक्षिणस्य
कनिष्ठया॥ तथा दक्षिणतर्जन्या वामांगुष्ठेन योजयेत्॥ उन्नतं दक्षिणांगुष्ठं वामस्य मध्यदेशकाः॥ अंगुलीर्योजयेत्पृष्ठे दक्षिणस्य करस्य च
॥ वामस्य पितृतीर्थेन मध्यमानामिके तथा॥ अधोमुखे शनैः कुर्याद्दक्षिणस्य करस्य च॥ कूर्मपृष्ठसमं कुर्याद्दक्षपाणिं च सर्वतः॥ कूर्ममु
द्रेयमाख्याता देवताध्यानकर्मणि॥ पृष्ठेक्रोडे॥ अन्तरांगुष्ठमुष्टिं तु कृत्वा वामकरस्य च॥ मध्यमाग्रे तु दक्षस्य तथा लंबय प्रयत्नतः॥ मध्यमेनाथ तर्ज्जे
न्यामंगुष्ठाग्रे तु योजयेत्॥ दक्षिणं योजयेत्पाणिं वाममुष्टौ तु साधकः॥ दर्शयेद्दक्षिणे भागे मुण्डमुद्रेयमुच्यते॥ तर्जनीमध्यमानामाः
समं कुर्यादधोमुखं॥ अनामायां क्षिपेद्वृद्धामूर्द्ध्वं कृत्वा कनिष्ठिकां॥ लेलिहानाममुद्रेयं जीवन्यासे प्रकीर्तिता॥ तर्जन्यनामिकामध्ये क
निष्ठाक्रमयोगतः॥ करयोर्योजयेत्पवकनिष्ठामूलदेशतः॥ अंगुष्ठाग्रे तु निःक्षिप्य महायोनिः प्रकीर्तिता॥ वामकेश्वरतंत्रोक्ताः प्रकास्य

२ ऋज्वीमिति प्रत्यंतरे॥ २

नेत्रमुद्रिकाः ॥ शृणु देवि प्रवक्ष्यामि मुद्राः सर्वार्थसिद्धिदाः ॥ याभिर्विरचिताभिस्तु सान्निध्यं त्रैपुरं भवेत् ॥ परिहृत्न करौ स्पृष्टावंगुष्ठौ कारयेत्समौ ॥ अनामान्तर्गते कृत्वा तर्जन्यौ कुटिलाकृती ॥ कनिष्ठिके नियुंजीत निजस्थाने महेश्वरि ॥ त्रिखंडेयं समाख्याता त्रिपुराध्यानकर्म्मणि ॥ मध्यमा मध्यगे कृत्वा कनिष्ठंगुष्ठरोधिते ॥ तर्जन्यौ दंडवत्कुर्यान्मध्यमोपर्यनामिके ॥ एषा च प्रथमा मुद्रा सर्वसंक्षोभकारिणी ॥ एतस्या एव मुद्राया मध्यमे सरले तथा ॥ क्रियेते परमेशानि सर्वविद्रावणी परा ॥ मध्यमा तर्जनीभ्यां च कनिष्ठानामिके समे ॥ अंकुशाकाररूपाभ्यां मध्यमे परमेश्वरि ॥ अंगुष्ठं तु नियुंजीत कनिष्ठानामिकोपरि ॥ इयमाकर्षिणी मुद्रा त्रैलोक्याकर्षिणी मता ॥ पुटाकारौ करौ कृत्वा तर्जन्यावंकुशाकृती ॥ परिवर्त्तक्रमेणैव मध्यमे तदधोगते ॥ क्रमेण देवि तेनैव कनिष्ठानामिकादयः ॥ संयोज्य निबिडाः सर्वा अंगुष्ठावग्रदेशतः ॥ मुद्रेयं परमेशानि सर्ववश्यकरी मता ॥ ५ ॥ सम्मुखौ तु करौ कृत्वा मध्यमामध्यगेंत्यजे ॥ अनामिके तु सरले तद्बहिस्तर्जनीद्वयं ॥ दंडाकारौ ततोंगुष्ठौ मध्यमानखदेशकौ ॥ मुद्रैवोन्मादिनी नाम्ना क्लेदिनी सर्वयोषितां ॥ अस्यास्त्वनामिकायुग्ममधः कृत्वांकुशाकृती ॥ तर्जन्यावपि तेनेव क्रमेण विनियोजयेत् ॥ इयं महांकुशा मुद्रा सर्वकामार्थसाधिनी ॥ सव्यं दक्षिणदेशे तु सव्यदेशे तु दक्षिणं ॥ बाहुं कृत्वा महादेवि हस्तौ संपरिवर्त्तयेत् ॥ कनिष्ठानामिके देवि मुक्ता तेन क्रमेण च ॥ तर्जनीभ्यां समाक्रांते सर्वोर्द्ध्वमपि मध्यमे ॥ अंगुष्ठौ च महादेवि सरलावपि कारयेत् ॥ इयं सा खेचरी मुद्रा पार्थिवस्थानयोजिता ॥ ८ ॥ परिहृत्य करौ स्पृष्टावर्द्धचंद्राकृती प्रिये ॥ तर्जन्यंगुष्ठयुगलं युगपत्कारयेत्ततः ॥ अधः कनिष्ठावष्टब्धे मध्यमे विनियोजयेत् ॥ तथैव कुटिले योज्ये सर्वाधः स्यादनामिके ॥ बीजमुद्रेयमचिरात्सर्वसिद्धिप्रदायिनी ॥ ९ ॥ मध्यमे कुटिले कृत्वा तर्जन्युपरि संस्थिते ॥ अनामिकामध्यगते तथैव हि कनिष्ठिके ॥ सर्वा एकत्र संयोज्य अंगुष्ठपरिपीडिताः ॥ एषा तु प्रथमा मुद्रा योनि

मुद्रेतिसंज्ञिता॥ १०॥ एतामुद्रामहेशानित्रिपुरायामयोदिताः॥ पूजाकालेप्रयोक्तव्यायथानुक्रमयोगतः॥ वामहस्तेनमुष्टिंतुबद्धाकर्णप्रदेश
के॥ तर्ज्जनीसरलांकृत्यभ्रामयेन्मनुनाधनमः॥ सौभाग्यदंडिनीमुद्रान्यासकालेपिसूचिता॥ अंतरंगुष्ठमस्यास्तुनिरुध्यतर्ज्जनीमिमां॥ रिपुजिह्वाग्र
हामुद्रान्यासकालेतुसूचिता॥ तह्नातुयोनिमुद्रांवैमध्यमेकुटिलेकुरु॥ अंगुष्ठेननतदग्रेतुमुद्रेयंभूतिनीमता॥ वाममुष्टिंविधायाथतर्ज्जनी
मध्यमेततः॥ प्रसार्यतर्ज्जनीमुद्रानिर्दिष्टावज्रपाणिना॥ ॥ इतिमुद्राप्रकरणम्॥ ॥ अथधारणयंत्राणि॥ ॥ तथाचदक्षिणामूर्त्तिसंहितायां॥ ॥
सम्यक्सूत्रेणरचयेत्सुवृत्तंवृत्तमुत्तमम्॥ ततोभूबिंबयुगलंसंपुटीकृत्ययोजयेत्॥ १॥ अष्टकोणंतथादेविजायतेतिमनोहरम्॥ अष्ट
दिक्षुतदग्राभ्यांरेखामाकृष्यमंत्रवित्॥ २॥ रेखाभ्यामर्गलांदेविजायतेतीवसुंदरम्॥ एकैकेनैकेनमानेनरचयेदर्गलाष्टकं॥ ३॥ वृत्ततदग्रे
चंद्रस्यबिंबवद्वर्तयेत्ततः॥ पुनर्रेखाः॥ संपुटीकृत्यमापूर्यपूर्ववद्वृत्तमुत्तमं॥ ४॥ विलिख्यसाधकेन्द्रस्तवसुकोष्ठयुगंक्रमात्॥ वक्ष्येयथा
भवेद्देविकेसराणांवसुद्वयं॥ अर्गलानिचरम्याणियथासम्यक्भवंतिहि॥ तथाकार्यंमहेशानित्रैलोक्याकर्षणंभवेत्॥ ५॥ भुवनेश्वर्यायं
त्रं॥ शारदायां॥ आलिख्याष्टदिगर्गलान्सुदरगंपाशादिकंत्र्यक्षरं कोष्ठेष्वंगमनून्स्वरेषुविलिखेद्दक्षार्णमंत्रद्वयं॥ अचपूर्वापरषट्कयुक्
लयवरान्व्योमासनानर्गलेष्वालिखेद्दृजलाधिपादिगुणशः पंक्तिद्वयंतत्परं॥ कोष्ठेष्वष्टयुगार्णमात्मसहितांसुगमस्वरांतर्गतां मायांकेसर
गांदलेषुविलिखेन्मूलंत्रिपंक्तिक्रमात्॥ त्रिःपाशांकुशवेष्टितंचलिपिभिर्वीतंक्रमाद्व्युत्क्रमात् पद्मस्थेनघटेनपंकजमुखेनावेष्टि
तंतद्बहिः॥ २॥ घटार्गलमिदंयंत्रंमंत्रिणांप्राभृतंमतम्॥ अस्यार्थः स्वरस्यपूर्वषट्कं आदिवंतं अपरषट्कं एऐओऔअंअः एतैर्द्वादशभिर्यु
क्तेनहकारस्तद्धकारलयवरयुक्तस्तद्द्वादशप्रकाराभवंति तानर्गलेषुत्रीणिकृत्वापूर्ववरुणादिक्रमेणलिखेत् एतेनह्लंह्लांह्लिंह्लींहुंह्लूं।

ह्रेह्रैह्रोह्रौह्रंह्रः एवं यकारयुक्तेन १२ एवं वकारयुक्तेन १२ एवं रकारयुक्तेन १२ इत्यादि द्वादशप्रकाराणां मध्ये षट्कोणमध्ये पूर्वस्यां दिशि अस्वरत्रितयक्रमेण पंक्तिद्वयं लिखेत्॥ अथ षड स्वराणि॥ ॥तथैव वरुणे लिखेत्॥ एवं ह्यमित्यादिना आग्नेय्यां लिखेत् ह्रोयं इत्यादिना वायव्यां लिखेत् लिखनस्य क्रममेतत् ततोष्टकोष्ठेषु चतुर्वर्णमनुस्वारसहितं लिखेत्॥ स्वरंयुग्मपुटितं मायाबीजं केसरेषु लिखेत्॥ अष्टदलेषु त्रिपंक्तिक्रमेण मूलमंत्रं ह्रीं लिखेत्॥ ॥आंत्रयेण वेष्टयेत् क्रोंत्रयेण वेष्टयेत्॥ मातृकावर्णेनानुलोमविलोमेन वेष्टयेत् तद्बहिर्घटाकारेण वेष्टयेत्॥ ११॥ पाशः श्रीः शक्तिकंदर्पकामशक्रौ दिरांकुशाः॥ प्रथमोऽष्टाक्षरो मंत्रस्ततः कामिनि रंजिनि॥ स्वाहांतोऽष्टाक्षरः सद्भिरपरः कीर्तितो मनुः॥ ह्रीं गौरि रुद्रदयिते योगेश्वरि सवर्म फट्॥ हृद्गतः षोडशार्णोयं मंत्रः सद्भिरुदीरितः॥ ॥इति घंटार्गलभुवनेश्वरीयंत्रमिदम्॥ ॥अथ त्वरितायंत्रं॥ ॥तारे हूं विलिखेत्सरोजकुहरे साध्याभिधानान्वितं मंत्रार्णान्वसुसंख्यकान् वसुदलेष्वालिख्य तद्बाह्यतः॥ शक्त्या त्रिः परिवेष्टितं घटगतं पद्मस्थमब्जाननम् यंत्रं वश्यकरं ग्रहादिभयहृल्लक्ष्मीप्रदं कीर्तिदं॥ १ ॥इदं त्वरितायंत्रम्॥ अथ नवदुर्गायंत्रं॥ पद्मं भानुदलान्वितं प्रविलिखेत्तत्कर्णिकायां पुनस्तारं शक्तिसबीजसाध्यसहितं तत्केसरेषु क्रमात्॥ मर्दिन्या मनुसंभवान् युगलशो वर्णान्पुनः पत्रगान् मंत्रार्णान् गुणशो विधाय विलिखेदंत्यंतदंत्ये दले॥ १ ॥ मातृकावर्णसंवीतं भूपुरद्वयमध्यगम्॥ यंत्रं विंध्यनिवासिन्याः प्रोक्तं सर्वसमृद्धिदम्॥ २ ॥ मंत्रस्त्वेतस्याः॥ ॐ तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं॥ यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा॥ रक्षाकरं विशेषेण क्षुद्रभूतारिनाशने॥ राज्यदं भ्रष्टराज्यानां वश्यदं वश्यमिच्छतां॥ सुतार्थिनीनां सुतदं रोगिणां रोगशांतिदं॥ बहुनाकिमिहोक्तेन यंत्रं तत्कामदो मणिः॥ अथ लक्ष्मीयंत्रम्॥ वेदादिस्थितसाध्यनामयुगशः

३उत्तिष्ठेति मंत्रः॥३

४ क्लींत्रिपुरदेवि विद्महे कामेश्वरि धीमहि तन्नः क्लिन्ने प्रचोदयात् ॥ ४

श्रीशक्तिमारान्वितं किंजल्केषु दिनेशपत्रविलसन्मंत्राक्षरं तद्बहिः ॥ पद्मं व्यंजनकेसरं स्वरलसत्पत्राष्टयुग्मं धराबिंबाभ्यां वषडंतयात्वरिताया यंत्रं लिखेद्वेष्टितं ॥ भूपुरद्वयकोणेषु ह्सौ लेख्यो पुनःपुनः ॥ महालक्ष्मीयंत्रमिदं सर्वैश्वर्यफलप्रदं ॥ सर्वदुःखप्रशमनं सर्वापद्विनिवारणं ॥ बहुना किमिहोक्तेन परमस्मान्न विद्यते ॥ अथ भैरवीयंत्रम् ॥ मध्याऽऽद्यं नवयोनिषु प्रविलिखेद्ध्रीजानिवर्णांस्त्रिशो गायत्र्याः पुनरष्टपत्रविवरेष्वालिख्य लिप्याष्टकं ॥ भूबिंबद्वितयेन मन्मथयुजा कोणेषु संवेष्टितं यंत्रं त्रैपुरमीरितं त्रिभुवनं प्रक्षोभणं श्रीप्रदं ॥ गायत्री तु० मन्मथं त्रिपुरादेविविद्महे पदमुच्चरेत् ॥ उक्त्वा कामेश्वरिपदं प्रवदेत्तद्धीमहि ॥ अंते च प्रवदेद्भूयस्तन्नः क्लिन्ने प्रचोदयात् ॥ गायत्र्येषा समाख्याता त्रैपुरी सर्वसिद्धिदा ॥ अथ त्रिपुरायंत्रम् ॥ वह्नेर्गेहयुगांतरस्मरदने मायां लिखेद्वाग्भवं षट्कोणेष्वथ संधिषु प्रविलिखेद्धुंकारमावेष्टयेत् ॥ स्त्रीबीजेन समीरितं त्रिभुवनप्रक्षोभणं त्रैपुरं यंत्रं पंचमनोभवात्मकमिदं सर्वार्थसिद्धिप्रदं ॥ १ ॥ अथ गणेशयंत्रम् ॥ बीजं षट्कोणमध्ये स्फुरदनलपुरे तारगं दिक्षु लक्ष्मीर्मायाकंदर्पभूमीस्तदनु सरपुटेष्वालिखेद्बीजषट्कं ॥ तत्संधिष्वंगमंत्रान्वसुदलकमले मूलमंत्रस्य वर्णान् शिष्टान् पत्रेषु विद्वान्विलिखतु गणशश्चान्त्यमन्त्ये पलाशे ॥ आवीतं लिपिभिः क्रमोत्क्रमवशात्पाशांकुशाभ्यामपि क्ष्मागेहद्वितयेन वेष्टितमिदं यंत्रं गणाधीशितुः ॥ लाक्षाकुंकुमरोचनामृगमदैर्भूर्जोदरे हेम्निवा संलिख्याभिवहन्लभेत सकलैः संप्रार्थनीयां श्रियं ॥ १ ॥ उक्तं महागणपतेर्विधानं सुरपूजितं ॥ सर्वसिद्धिकरं पुंसां समस्तपुरुषार्थदं ॥ अथ रामयंत्रं ॥ तारं मध्ये विलिखतु मनुं षट्सु कोणेषु संधिष्वंगं मायां स्मरमपि लिखेत्कोणगंडेषु पश्चात् ॥ किंजल्केषु स्वरगणमथो पत्रमध्येषु मालामंत्रोत्थार्णान्गुहमुखमितानष्टमे पंचवर्णान् ॥ दशास्त्रेण संवेष्ट्य कादिवर्णैश्च भूपुरे ॥ दिग्विदिक्षु लिखेद्बीजे नरसिंहवराहयोः ॥ नमो भगवते ब्रूयाच्चतुर्थ्यां रघुनंदनं ॥ रक्षोघ्नविषदायांते मधुरादि समीरयेत् ॥ प्रसन्नवरदायेति पश्चादमिततेने

ल्लुमितिप्रत्यंजरे ॥ ८ ॥

जसे ब्लाय पश्चाद्रामाय विस्रवे तदनंतरं ॥ प्रणवादिनमोंतोयं मालामनुरुदीरितः ॥ जानकीवल्लभायांते भवेन्मावकवल्लभा ॥ कुमादिरेष कथि
तो राममंत्रो दशाक्षरः ॥ जपादिसाधितं यंत्रं स्वर्णपट्टादिकल्पितं ॥ बाहुना विधृतं दद्याद्विजयश्री पराक्रमः ॥ अथ नृसिंहयंत्रं ॥ बीजं साध्यसमन्वि
तं प्रविलिखेन्मध्ये षट्पत्रेष्वथो मंत्रार्णान्स्तुतिशो विभज्य विलिखेल्लिप्या वहिर्वेष्टयेत् ॥ बाह्ये कोणगबीजबद्धवसुधागेहद्वयेनावृतं यंत्रं क्षुद्र
विषग्रहामयरिपुप्रध्वंसनं श्रीप्रदं ॥ अथ गोपालयंत्रं ॥ पिंडं मूलेन वीतं दहनपुरयुगे कोणराजन्मडर्णकृष्णान्यद्वादशार्णैः स्फुरितनरशरद्दलेका
मबीजेन वीतं ॥ पद्मं किंजल्कसंस्थस्वरविकृतिदलप्रोल्लसत्षोडशार्णं किंजल्कं व्यंजनाढ्यं विकृतियुगदलेष्वर्पितानुष्टुवर्णं ॥ पाशांकुशा
भ्यामावीतं क्षोणीपुरयुगास्रिषु ॥ त्र्यष्टाक्षरेण लसितं यंत्रं गोविंददैवतं ॥ धर्मार्थकामफलदं सर्वरक्षाकरं स्मृतं ॥ पंचांतको धरासंस्थो मनुविंदु
विभूषितः ॥ पिंडबीजमिति प्रोक्तं सर्वसिद्धिकरं परं ॥ स्मरः कृष्णाय ठद्वंद्वं षड्वर्णो मनुरीरितः ॥ गोपीजनपदस्यांते वल्लभायद्विठावधिः ॥ अयं दशा
क्षरो मंत्रो दृष्टादृष्टफलप्रदः ॥ प्रणवं हृदयं कृष्णं ङें तस्मात्तु ततः परं ॥ नादृशं देवकीपुत्रं हुं फट् स्वाहा समन्वितम् ॥ षोडशाक्षरमंत्रोयं गोविं
दस्य समीरितः ॥ पिंडं रतिपतेर्वीजं नमो भगवते ततः ॥ नंदपुत्राय बालाय द्विवपुषे श्यामलाय च ॥ गोपीजनपदस्यांते वल्लभाय द्विठावधिः ॥ अ
नुष्टुप्मंत्रमाख्यातो गोपालस्य जगत्पतेः ॥ अनंगः कृष्णगोविंदौ ङेंतावष्टाक्षरो मनुः ॥ प्राक्प्रत्यग्दक्षिणोदग्विधिवदभिलिखेत्स्पष्टरेखाच
तुष्कं कोणे घच्छूलयुक्तं वलययुगयुतं मध्यपूर्वं नदंत्यं ॥ श्लोकस्यार्णान्पुरस्ताद्वसुदलविवरेष्वष्टवर्णांल्लिखित्वा तद्बाह्ये द्वादशार्णैस्तदनुप
रिहृतं देवकीपुत्रयंत्रं ॥ तं सुकीदेवांदवेनंनं वेदेवरतोरतं ॥ तं रतो रूढतो रव्या नं तं रव्याप्तो देवकीसुतं ॥ लिखितं भूर्ज्जपत्रादौ यंत्रमेतद्यथावि
धि ॥ विधृतं बाहुना नित्यं सर्वकामफलप्रदं ॥ पलाशवृक्षफलके लिखित्वा साधुसाधितं ॥ गोस्थाने निखनेद्यंत्रं गवां वृद्धिर्भवेत्सदा ॥ इति गोपा

२ मंत्रानिति प्रत्यंतरे ॥ ६ लिखेच्चस्त्रिजगतीति प्रत्यंतरे ॥ ६

लयंत्रं ॥ अथ शिवयंत्रं ॥ तत्रादौ षट्कोणमंडलं लिखित्वा तदंतः साध्यनामयुक्तं प्रासादबीजं विलिख्य षट्कोणेषु प्रणवसहितं पंचाक्षरवर्णान्को
णेषु विलिख्य विवरेषु षडंगवर्णान् तद्बहिः पंचदलानि विरचय्य तद्दलेषु ईशानाय नमः तत्पुरुषाय नमः अघोराय नमः सद्योजाताय नमः वाम
देवाय नमः ५ इति पंच मंत्रानागादिक्रमेषु विलिखेत् ॥ तद्बहिरष्टदलानि रचयित्वा तद्दलेषु मातृकाष्टवर्गान् लिखेत् ॥ तद्बहिर्दंतत्र्यंबकेन वे
ष्टयेत् ॥ एतद्यंत्रं जपहोमादिना संपूज्य धारयेत् ॥ आयुरारोग्यमैश्वर्यादि चतुर्वर्गादिसिद्धिर्भवति ॥ इति शिवयंत्रं ॥ अथ कालीयंत्रं ॥ यामले ॥ आ
द्यं बीजं ससाध्यं प्रथमवसुगृहे तद्बहिरष्टकोणे पूर्वाद्यं चाष्टबीजं तदनु वसुगृहे हूं हूके बीजषट्कम् ॥ किंजल्केन स्वराद्यं वसुदलविवरे स्वाह
याबीजषट्कम् कूर्चाभ्यामेव बीजे क्षितिगृहयुगयोरंतरे मंत्रराजं ॥ देवीबीजत्रयं च प्रतिदिशमपरं शक्तिबीजद्वयं तत्कोणे कोणे य एवं जगति सु
रः शंकरस्यापि विघ्नोः ॥ अथ शांतिकादौ धारणयंत्रं ॥ तदुक्तं फेत्कारिणीये ॥ योनियुग्मे लिखेन्मंत्रं मंत्री हेमशलाकया ॥ क्लीवहीनान्दीर्घवर्णान्
षट्कोणे विलिखेत्ततः ॥ अष्टपत्रेष्वष्टवर्णांस्तद्बहिर्भूपुरद्वयं ॥ अष्टवज्रे भूपुरे च विलिखेत्साधकोत्तमः ॥ सुवर्णपट्टे भूर्जे वा रौप्ये वाप्यथ सुव्रते ॥
विलिखेद्हेमलेखिन्या गंधाष्टकसमन्वितम् ॥ दूर्वाकांडेन वा लिख्य कुशमूलेन वा पुनः ॥ एकवीरकल्पेपि ॥ वेष्टितं पीतवस्त्रेण जतुना प
रिवेष्टितं ॥ बध्नीयात्पीतवस्त्रेण शिशूनां कंठभूषणं ॥ स्त्रीणां वामभुजे चैव मन्येषां दक्षिणे भुजे ॥ वंध्यापि लभते पुत्रं निर्धनो धनवान्भवेत् ॥
इयं रक्षा पुरा ब्रह्मज्ञानार्थं गौतमादिभिः ॥ प्रीत्यर्थं पार्थिवैश्चान्यैः संग्रामे जयकांक्षिभिः ॥ अस्यार्थः ॥ योनियुग्मे षट्कोणे तन्मध्ये हेमशला
कया भूर्जपत्रादौ कुंकुमगोरोचनाचंदनजटामांसीभिर्विधाय पंक्तिक्रमेण मूलमंत्रं लिखित्वा तस्य हल्लेखारेफमध्ये अमुकस्य रक्षां कुरु २ अ
मुकीनां शुभं पुत्रमुत्पादय २ इति वा अस्य त्रानमिति कुरु २ इत्यादिना साध्यनामसहितं विलिख्य षट्कोणे क्लींवभिन्नान्दीर्घवर्णांल्लिखेत् ॥ तदु

६ वर्णमिति प्रत्यंतरे ॥

३ यंत्राणितानिदेशिकइतिप्रत्यंतरे॥

क्तंतंत्रांतरे॰ स्वराणांमध्यगंयत्तुतच्चतुष्कंनपुंसकं॥दीर्घवर्णाआईऊऐऔअःइत्येकेकंलिखेद्दष्टपत्रेष्वष्टवर्णान्यथा॥ऐंह्रीं ॐ ऐंह्रीं फट्स्वाहे
ति॥तदुक्तं॥वाग्भवंकुलदेवीचतारकंवाग्भवंतथा॥हृल्लेखाचास्त्रमंत्रांतेवह्निजायावधिर्म्मनुः॥अष्टाक्षरोमनुःप्रोक्तोमंत्राणांसारईरितः॥
अथयंत्रलेखनद्रव्यं॥काश्मीररोचनालाक्षामृगेभमदचंदनैः॥विलिखेद्विमलेखन्यामंत्रानेतान्यथाविधि॥भूमिस्पृष्टंशवस्पृष्टंयंत्रंनिर्म्मा
ल्यसंगतं॥विशीर्णंलंघितंमंत्री यंत्रंनैवचधारयेत्॥सौवर्णेराजतेपात्रेभूर्जेवासम्यगालिखेत्॥अथवाताम्रपट्टेवागुटिकांकृत्यधारयेत्॥
यावज्जीवंतुसौवर्णेरौप्येविंशतिवार्षिकं॥भूर्जेद्वादशवर्षाणितदर्द्धंताम्रपत्रके॥अथप्रयोगानंतरंशांत्युदकस्नानम्॥तद्यथा॥सुरास्त्वाम॰
भिषिंचंतुब्रह्मविष्णुमहेश्वराः॥वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः॥प्रद्युम्नश्चानिरुद्धश्चभवंतुविभवायच॥आखण्डलोग्निर्भग
वान्यमोव निर्ऋतिस्तथा॥वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः॥ब्रह्मणासहिताह्येतेदिक्पालाःपांतुवःसदा॥कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा
पुष्टिःश्रद्धाक्रियामतिः॥बुद्धिर्लज्जावपुःशांतिर्मायानिद्राचभावनां॥एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः॥आदित्यश्चंद्रमाभौमोबुधजीवसि
तार्कजाः॥एतेत्वामभिषिंचंतुराहुःकेतुश्चतर्पिताः॥देवदानवगंधर्वायक्षराक्षसपन्नगाः॥ऋषयोमुनयोगावोदेवमातरएवच॥देवप
त्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः॥अस्त्राणिसर्वशास्त्राणिराजानोवाहनानिच॥औषधानिचरत्नानिकालस्यावयवाश्चये॥सरितःसाग
राःशैलास्तीर्थानिजलदानदाः॥एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये॥इतिवसिष्ठसंहितोक्ताभिषेकमंत्राः॥ ॥अथसंक्षेपतःसर्वा॰
सांदेवतानांनित्यपूजाविधिर्विलिख्यते॥तदुक्तंयामले॥ ॥आदावृष्यादिविन्यासःकरशुद्धिस्ततः परंअंगुलीव्यापकौकृत्वाहृदादिन्या
सएवच॥तालत्रयंचदिग्बंधःप्राणायामस्ततःपरम्॥ध्यानंपूजाजपश्चैवसर्वतंत्रेष्वयंविधिः॥पूजाचमूलदेवतायाएवमन्यच्च॥ज

२ व्यापकन्यासाविति प्रत्यंतरे२

प

पार्थं सर्वमंत्राणां विन्यासं च लिपेर्विना ॥ कृतेन तद्धि फलं विद्यात्तस्मादादौ लिपिं न्यसेत् ॥ श्रीविद्यायास्तु संक्षेपतः ॥ तदुक्तं स्वतंत्रतंत्रे ॥ पूजाविशेषान्देवि शृणु नित्यक्रमोदितान् ॥ अशक्तानां तु विस्तारे तथा चापस्तु शस्यते ॥ अन्यथा नाधिकारी स्यात्संकोचार्चनमीश्वरि ॥ हेतिभिर्मध्यमाद्यस्याद्वितीयं नवयोनिषु ॥ चतुर्दशारवध्यन्यच्चतुर्थं प्रोक्तरूपतः ॥ पंचमं सर्वदुःखार्तिनाशनं वांछितप्रदं ॥ अयमर्थः ॥ अशक्तानां हेतिभिर्मध्यमाद्यस्याद्वेति चतुष्टयसहितदेवताचतुष्टयार्चनं कामेश्वरीवज्रेश्वरीभगमालिनीश्रीमहात्रिपुरसुंदरीरूपमेतदाद्यार्चनमित्यर्थः ॥ द्वितीयमाह ॥ नवयोनिष्विति वशिन्यादिमध्यमांतमिति द्वितीयार्चनं ॥ तृतीयार्चनमाह ॥ चतुर्दशारचक्रस्थितसर्वसंक्षोभिन्यादिमध्यमांता सपर्या तृतीया ॥ चतुर्थं प्रोक्तरूं इति तत्र प्रोक्तरूपेणेत्यर्थः ॥ षोडशदलादिमध्यमांतमिति यावत् ॥ पंचमं भूगृहादिमध्यमांतमिति यावत् ॰ इति पंचप्रकारार्चा प्रोक्ता सर्वार्थसिद्धिदा ॥ तत्रादौ भूतशुद्धिप्राणायामपुरःसरं करशुद्ध्यासनचक्रचतुष्टयांगवशिन्यादिन्यासचतुष्टयं विधाय बालयार्घ्यं हृद्यं विशोध्य षडासनविद्यया पीठपूजां विधाय बिंदौ हृल्लेखया परचितिमावाह्य यथाशक्त्युपचारैः संक्षेपार्चनेनैकतरेणाभ्यर्च्य पूर्ववत्सर्वभूतबलिं दत्त्वा जपैः स्तोत्रैः संतोषयेदिति ॥ तदुक्तं नवरत्नेश्वरे ॥ न्यासत्रयं समासाद्य चक्रपूजासनेन वै ॥ बालयार्घ्यं समासाद्य हृल्लेखावाहने शिवे ॥ चक्रमध्ये समावाह्य संक्षेपार्चनमर्चयेदिति ॥ अथवा तदुक्तं विशुद्धेश्वरतंत्रे ॥ पूजासंकोचनं चैवं कथयामि सुरेश्वरि ॥ यत्पूजाबोधमात्रेण जीवन्मुक्तः प्रजायते ॥ प्रथमागे तु त्रिपुरा द्वितीया त्रिपुरेश्वरी ॥ तृतीया चक्रराजे तु त्रिपुरादिसमन्विता ॥ देवीपूजाक्रमेणैव सुंदरी

वासिनी तु च ॥ पंचमे त्रिपुरा श्रीश्च षष्ठे त्रिपुरमालिनी ॥ सप्तमे त्रिपुरासिद्धा चाष्टमे त्रिपुराम्बिका ॥ मध्यशक्तौ महेशानि महात्रिपुरसुंदरि ॥ इति संक्षेपार्चा ॥ अथ नैमित्तिकविधिः ॥ तत्र गौतमीये ॥ नारद उवाच ॰ ॥ ॥ कर्म्मांतरमथो वक्ष्ये शृणुष्वावहितो मुने ॥ यत्कृत्वा मंदभाग्योपि लभेन्मंत्रफलानि वै ॥ प्रणवद्वयमध्यस्थं जपेदयुतसंख्यया ॥ त्रिरात्रजपमात्रेण बृहस्पतिसमो भवेत् ॥ व्याख्याता सर्वशास्त्राणां वेदानामपि जायते ॥

४ मनुनेति पुस्तकद्वयपाठः ॥ ४

४ हारकैरिति प्रत्यंतरे ॥
३ पापैर्घोरतरैरपीतियुक्तः पाठ इति प्रतिभाति ३

रविवारेश्वत्थवृक्षमालभ्य शतमष्टकं ॥ भूयो भूयो भवेच्छांतिर्जीवेदृष्टो नरं शतं ॥ तस्य शांतिर्भवेन्नूनं यमुद्दिश्य कृता क्रिया ॥ अंशुकैरर्चयेल्लक्षं
मासमात्रं तु निर्मलैः ॥ मुच्यते सकलैः कृच्छ्रैः राजा भवति निश्चितं ॥ पट्टवस्त्रैर्यजेद्भक्त्या संपत्तिमतुलां लभेत् ॥ विद्रुमैः पूजयेल्लक्षं त्रैलोक्यं वशमा
नयेत् ॥ माणिक्यैः पूजयेद्भक्त्या सार्वभौमसमो भवेत् ॥ पद्मरागैर्यजेल्लक्षं स राजा भवति निश्चितं ॥ क्षत्रियः सार्वभौमः स्यात्साधयेत्सकलां महीं ॥ गा
रुत्मतमयै रत्नैः पूजयन्ज्ञानवान्भवेत् ॥ अपि हीरकैरत्नेन पूजयन्किं न साध्यते ॥ सुवर्णपुष्पैरभ्यर्च्य मासं भक्तिपरायणः ॥ कुबेरसमसंपत्तिं
प्राप्य मोदते चिरं ॥ देहांते हरितां प्राप्य निर्वाणपदमृच्छति ॥ रविवारे सरसिजैः कह्लारैः सोमवासे मंगले रक्तपुष्पैश्च बुधे नागसंभवैः सचंपकैः
गुरुवारे च शुक्रे कुंदसमुद्भवैः ॥ शनिवारे शमीपुष्पैः पूजयेद्भक्तितो यतिः ॥ रविवारे घृतान्नं तु पयोभक्तं निवेदयेत् ॥ सोमवारे पिष्टकादि सि
तया सह योजयेत् ॥ मंगले गुडसंमिश्रमन्नं बहुगुणान्वितं ॥ बुधवारे यावकं तु गुरौ सूपसमुद्भवं ॥ सुक्तान्नं शुक्रवारे तु शनौ सघृतपायसं ॥ वै
शाखे मासि विधिवत्तर्पयेद्धिमवज्जलैः ॥ ज्येष्ठे मासि प्रयत्नेन फलैः संपूजयेद्धरिं ॥ आषाढे मासि विधिवत्पवित्रैः पूजयेद्धरिं ॥ एकैकं स्वर्णसूत्रा
णि ग्रंथियुक्तानि कारयेत् ॥ अथवा पट्टसूत्राणि पद्मसूत्राणि वा पुनः ॥ पूजांते देवराजाय महिषीभ्यो निवेदयेत् ॥ मिथुनेभ्यस्तदा दत्त्वा महान्तमु
त्सवं चरेत् ॥ तोषयेद्भक्ष्यभोज्यैश्च ब्राह्मणानपि भोजयेत् ॥ एवं संवत्सरं मंत्री कृत्वाभीष्टमवाप्नुयात् ॥ न चेद्वर्ष कृता पूजा वास्तोर्भक्त्याय कल्पते ॥
श्रावणे मासि कृष्णं तं पूजयेत्केतकोद्भवैः ॥ गंधैश्चंदनकस्तूरीकुंकुमादिसुवासितैः ॥ एलालवंगकक्कोलफलानि बहु धार्पयेत् ॥ भाद्रे मासि यजे
द्दिसुंभक्ष्यैर्बहुगुणान्वितैः ॥ इषे मासि यजेद्भक्त्या भक्ष्यैर्भोज्यैः सुविस्तरैः ॥ कार्पाससन्निर्मितैर्वस्त्रैर्नानाभरणसंयुतैः ॥ तुलास्थे भास्करे कृत्स्नं पू
जयेन्मासमात्रकं ॥ रात्रौ प्रदीपैर्होमैश्च दुग्धपिष्टादिसंयुतैः ॥ घृतदीपमविच्छिन्नं दद्यान्मासं महोज्वलं ॥ एकादश्यामुपवसेद्द्वादश्यां पार

४ भोजयेदिति प्रत्यंतरे

३ चंद्रैरिति प्रत्यंतरे ५ संशितव्रतानिति प्रत्यंतरे ॥ ५

५ स्वर्णपंकजैरिति प्रत्यंतरे ५

णादिने॰ शुक्लायां विष्णुमभ्यर्च्य वस्त्रालंकरणादिभिः॥ अस्यां तिथौ तु मतिमान् वर्षंतोत्सवमाचरेत्॥ भोज्यानि बहुभक्ष्याणि ब्राह्मणेभ्यो निवेदयेत्॥ एवं कृते देवता स्यात्तुष्टा चेष्टं प्रयच्छति॥ सत्यलोकमवाप्नोति पुनरावृत्तिवर्जितं॥ मार्गशीर्षे यजेद्देवं नवान्नैर्व्यंजनैः शुभैः॥ नारिकेरफलक्षीरमिश्रितं गुडजीरकैः॥ सुपक्वं देवदेवाय भक्त्या तस्मै निवेदयेत्॥ पौषमासि च मासं वै घृतैः धूपैः प्रपूजयेत्॥ ग्रहदोषं विजित्याशु भूयान्नृपतिसंनिभः॥ माघे मासि यजेत्कृष्णमक्षतैश्च शुभैः सितैः॥ दुग्धान्नं शर्करायुक्तं मिष्टान्नं च निवेदयेत्॥ अस्मिन्मासे शुभे दिने वस्त्रेणाच्छादयेद्विभुम्॥ फाल्गुने देवकीपुत्रं पूजयेद्रक्तचंपकैः॥ चूतसौगंधिकुसुमैर्धूपैर्दीपैः सुविस्तरैः॥ चैत्रे मासि वासुदेवं सर्वपुष्पैः समर्चयेत्॥ पौर्णमास्यां यजेद्भक्त्या दमनैश्च सगुच्छकैः॥ अस्मिन्दिने रतिकामं पूजयेद्भक्तितत्परः॥ न चेत्सांवत्सरी पूजा विफला तस्य जायते॥ भस्मीभूतं स्मरं दृष्ट्वा रुदिता सा रतिः सती॥ तां दृष्ट्वा कृपया विष्णो वरं दातुं शिवः स्वयं प्रसुवाच रतिं सेयं सुभगत्वमवाप्नुयात्॥ सुंदरः सर्वलोके पुंक्रीडार्थं व्रजसुंदरि॥ ततोऽभवत्क्रंदनजलात्पुष्पं दमनकं शुभं॥ तेन पूजनमात्रेण संवत्सरफलं लभेत्॥ होमयेल्लक्षमात्रं यः पिष्टकैर्घृतभर्जितैः॥ तावत्संख्यं जपं कृत्वा हस्ते पश्यति मंत्रवित्॥ इति ते कथितं सम्यक् पूजनं वार्षिकोद्भवं॥ कृत्वानेन विधानेन किं न साध्यति भूतले॥ ज्ञानार्णवे॰ अथ वक्ष्ये महेशानि श्रीविद्यापूजनं महत्॥ ब्रह्महत्यादिदोषाणां पुरश्चरणमुत्तमं॥ ब्रह्मपत्रैर्महेशानि पूजयेच्चक्रमुत्तमं॥ समस्तरश्मिसहितं नित्याम्नायपुरस्कृतं॥ कुलाचारक्रमाद्देवि कर्पूरक्षोदमण्डितं॥ मासत्रयेण देवेशि महापातकनाशनं॥ जन्मांतरकृतान्सर्वान्नाशयेन्नात्र संशयः॥ लक्ष्मीस्तस्य गृहे वश्या सुस्थिरा सुरवंदिते॥ जवापुष्पैर्महेशानि पूर्ववत्पूजयेच्छिवां॥ मासमात्रं क्रमेणैव तेनैव परमेश्वरी॥ ब्रह्महत्यादिपापानि पूर्वजन्मकृतानि च॥ नाशयेन्नात्र संदेहो धनवान् जायते बुधः॥ केतक्यास्तरुणैः पुष्पैः

३ कोटय इति प्रत्यंतरे॥ ३

पूर्ववत्पूजयेत्प्रिये ॥ उपपातकसंघांश्च मासमात्रेण नाशयेत् ॥ सौभाग्यमतुलं तस्य जायते नात्र संशयः ॥ शतपत्रैर्मनोरम्यैः पूजयेन्मासमात्रकं ॥ पूर्ववत्परमेशानि सर्वपापं प्रणाशयेत् ॥ चंपकैः सुमनोरम्यैः पूर्ववत्पूजयेच्छिवां ॥ मासमात्रेण हन्त्येव पातकं शतजन्मजं ॥ सौभाग्यवान्भवेन्मंत्री त्रिपुरायाः प्रसादतः ॥ श्वेतपद्मैर्महादेवि महद्भिः पूजयेच्छिवां ॥ पूर्वजं नाशयेत्पापं विंशजन्मकृतं प्रिये ॥ मासमात्रेण सकलं मोक्षस्तस्य करे स्थितः ॥ बंधूककुसुमैर्देवि मासमात्रं प्रपूजयेत् ॥ त्रैलोक्यं वशगं तस्य पूर्वपापं रहेन्नरः ॥ बिल्वपत्रैः स्थलाब्जैश्च सदैव परिपूजयेत् ॥ पूर्ववत्परमेशानि मासमात्रे प्रसन्नधीः ॥ समृद्धिमान्भवेत्सोपि सर्वपापहरः सदा ॥ मल्लिकामालतीजातीकुंदैश्च शतपत्रकैः ॥ श्वेतोत्पलसमुत्थैश्च पूजयेन्मासमात्रकं ॥ कुलाचारक्रमेणैव पातकं शतजन्मजं ॥ ब्रह्महत्यादिजनितं नाशयेन्नात्र संशयः ॥ मुक्तिस्तस्य करे देवि वाचा जीवसमो भवेत् ॥ अंगस्त्रिवाण बंधूकजवारक्तोत्पलैः प्रिये ॥ पूर्वक्रमेण संपूज्य मासमेकं प्रसन्नधीः ॥ पातकं नाशयेन्मंत्री साक्षात्कामसमो भवेत् ॥ चंपकैः पाटलैर्देवि वकुलैर्नागकेसरैः ॥ कह्लारैः सिंधुवारैश्च पूजयेत्पूर्ववत्क्रमात् ॥ सौभाग्यमतुलं तस्य मासमात्रेण जायते ॥ पापं विनाशयेद्देवि यद्द्विजन्मसहस्रजं ॥ रविवारेत्तरसिजैः कुसुमैः सोमवासरे ॥ भौमे रक्तोत्पलैः सौम्यवारे नगरसंभवैः ॥ गुरुवारे च कह्लारैः शुक्रवारे सितांबुजैः ॥ उत्पलैः शनिवारेपि पूजयेद्गंधपुष्पकैः ॥ निवेदयेत्क्रमोक्तेषु रविवारादिसप्तसु ॥ पायसं दुग्धकदलीनवनीतं सिता घृतं ॥ एवमब्दं समाराध्य देवीं गंधादिभिः क्रमात् ॥ ग्रहपीडां विजित्याशु स सुखानि समश्नुते ॥ मत्स्यसूक्ते ॥ अष्टम्यां च चतुर्दश्यां पूजयेच्च प्रयत्नतः ॥ यद्यन्नार्थयते मंत्री तत्तदाप्नोति नित्यशः ॥ लभते मंजुलां वाणीं हृष्टाष्टम्यां सदा यजेत् ॥ अत्र नित्यार्चनानंतरं नैमित्तिकं कार्यं ॥ यत्र कालनियमो न दृश्यते० मासाद्यामंडलाद्यापि नैमित्तिकानुष्ठानं समापनीयमिति ॥ तथा चोक्तं रुद्रया

४ लाजैश्चेतिप्रत्यंतरे ॥ ४

५ अरुणांभोजैः कुसुमैरितिप्रत्यंतरे ॥ ५

८ शीघ्रमिति प्रत्यंतरे॥

५ महाष्टम्यामिति प्रत्यन्यंतरे॥

मले॥ मासार्द्धमथवा मासमथवा द्विगुणं तथा॥ यावत्फलाप्तिर्वास्योगी तावद्देवसमाचरेत्॥ अन्यत्रापि० नैमित्तिके तथा काम्ये फलाप्तिर्मंडलावधिः॥ न चैतद्द्विगुणं कुर्याद्यथा स्यात्फलभाक् सुधीः॥ अष्टम्यां पूजने देव्याः सर्वकामफलप्रदं॥ रंभापुष्पं बीजपूरं सुगंधिपरिमिश्रितं॥ मिश्रीकृत्य बलिं दद्यादष्टम्यां च विशेषतः॥ स्वर्णमालां महादेव्यै दद्याद्गंधं विशेषतः॥ फलं क्षीरं तथा दद्याद्दधिकं शर्करान्वितं॥ तस्मात्सर्वप्रयत्नेन संपन्ने पूजयेच्छिवां॥ दानं चाक्षय्यसिध्यर्थं दद्याद्देव्यै प्रयत्नतः॥ तथा च नीलतंत्रे॥ अष्टम्यां च चतुर्दश्यां पूजयेच्च यथाविधि॥ आज्ञासिद्धिमवाप्नोति जवापुष्पं च वर्वरीं॥ चंदनं चार्ककुसुमं दद्यान्श्वेतापराजितां॥ यस्तु संपूजयेद्दुर्गामष्टम्यां च विशेषतः॥ त्रिजन्मार्जितं यत्पापं तत्क्षणादेव नाशयेत्॥ दुर्गानारिणीमिति प्रकरणानुकूलत्वात्॥ ॥अथ प्रयोगविधिर्लिख्यते॥ ० सर्वत्र प्रयोगेऽयुतजपः॥ तथा च शारदायां॥ अयुतं होमसंख्या सांज्ञप्रस्तावसंकीर्तितः॥ तत्रादौ भुवनेश्वर्याः प्रयोगः॥ यथा॥ मंत्री त्रिमधुरोपेतैर्हुत्वाश्वत्थसमिद्वरैः॥ ब्राह्मणान्वशयेन्मंत्री पार्थिवान्वाज्यहोमतः॥ पलाशपुष्पैस्तम्यन्तीम्मंत्रिणः कुमुदैरपि॥ पंचविंशति संजप्तैर्जलैः स्नानं दिने दिने॥ आत्मानमभिषिंचेद्यः सर्वसौभाग्यवान्भवेत्॥ पंचविंशतिसंजप्तं जलं प्रातः पिबेन्नरः॥ अवाप्य महतीं प्रज्ञां कवीनामग्रणीर्भवेत्॥ हुत्वा पलाशकुसुमैर्वाक्श्रियं लभते ध्रुवं॥ ब्राह्मीघृतं पिबेद्यस्तु मूलमंत्राभिमंत्रितं॥ कवित्वं लभते मंत्री वत्सरान्नात्र संशयः॥ सिद्धार्थान्लवणोपेतान्हुत्वा मंत्री वशं नयेत्॥ नरनारीनरपतीन्नात्र कार्या विचारणा॥ अथ त्वरितायाः॥ योनिकुंडं प्रकल्प्याथ होमं कुर्याद्यथेच्छया॥ मल्लिकाकुसुमैर्हुत्वा वशयेदखिलं जनं॥ हैस्माद्ग्रहादिशमनं पलाशकुसुमैर्हुतं॥ इक्षुदंडैः शुभैर्हुत्वा महतीमृद्धिमाप्नुयात्॥ दीर्घमायुरवाप्नोति दूर्वाहोमेन साधकः॥ धान्यैः प्रक्षालितैर्हुत्वा श्रियमिष्टमवाप्नुयात्॥ अशोकैः पुत्रमाप्नोति मधुकैरिष्टमाप्नुयात्॥ फलैर्जंबूद्भवैर्हुत्वा लभते धनमीप्सितं॥ पुष्पैर्वकुलसंभूतैः कीर्तिः

कुर्याद्गृहादीति प्रत्यंतर॥२

२उन्मत्तैःक्षोभयेद्दरी॥नितिप्रत्यंतरे॥२

स्यादनपायिनी॥दीर्घमायुर्भवेद्दामैश्चंपकैःकांचनंलभेत्॥कुर्वीतसर्षपैर्होमंशत्रुनाशकरंसुधीः॥पत्रैर्बकुलजैर्हुत्वाशीघ्रंचोत्सादयेद्दरी
न्॥शाल्मलीपत्रहोमेनसपत्नान्नाशयेद्ध्रुवं॥माषहोमेनमूकःस्यादुन्मत्तोऽसैभवेद्दरिः॥अथदुर्गायाः॥वशयेत्तिलहोमेननरान्नार पती
नपि॥सिद्धार्थैर्जुहुयान्मंत्रीरोगान्मुच्येततत्क्षणात्॥पद्मैर्हुत्वायजेल्लक्ष्म्नूनदूर्वाभिःशांतिमाप्नुयात्॥पलाशकुसुमैःपुष्टिर्धान्यैर्धान्यमक्षयंलभे
त्॥काकपक्षैःकृतोहोमोविद्वेषंतनुयान्नृणां॥मरीचहोमान्मरणंरिपुराप्नोतिसर्वथा॥अथसरस्वत्याः॥पीत्वानन्मंत्रितंतोयंसहस्रंप्रत्य
हंजपेत्॥महाकविर्भवेन्मंत्रीवत्सरेणनसंशयः॥उरोमात्रोदकेस्थित्वाध्यायन्मार्तंडमंडले॥स्थितांदेवींप्रतिदिनंत्रिःसहस्रंजपे
न्मनुं॥लभतेमंडलात्सिद्धिंवाचामप्रतिमामपि॥राजहंससमुद्भूतैःप्रसूनैर्मधुराप्लुतैः॥समिद्भिर्वानदुत्स्थाभिर्यशःप्राप्नोतिवाक्पतेः
॥पलाशकुसुमैर्हुत्वापरांवाक्सिद्धिमाप्नुयात्॥कदंबकुसुमैस्तद्वत्फलैःश्रीहससंभवैः॥अचिराच्छ्रियमाप्नोतिवाचांकंदसमुद्भवैः
नंद्यावर्तप्रसूनैर्वाहुत्वावाग्वल्लभोभवेत्॥अथलक्ष्म्याः॥यथा॥वक्षःप्रमाणेसलिलेस्थित्वामंत्रमिमंजपेत्॥त्रिलक्षंसंजपेन्मंत्रीदेवीं
ध्यात्वार्कमंडले॥सभवेत्स्वल्पकालेनरमायावसतिःस्थिरा॥आराध्योत्तरनक्षत्रेदेवींस्रक्चंदनादिभिः॥नंद्यावर्तभवैःपुष्पैःसहस्रं
जुहुयात्ततः॥पौर्णमास्यांफलैर्बिल्वैर्जुहुयान्मधुराप्लुतैः॥पंचम्यांविशदांभोजैःशुक्रवारेसुगंधिभिः॥अन्यैर्वाविशदैःपुष्पैःप्रतिमासंविशा
लधीः॥सभवेदब्दमात्रेणसर्वदासंपदांनिधिः॥शालिभिर्जुहुतोनित्यमष्टोत्तरसहस्रकं॥अचिरादेवमहतीलक्ष्मीःसंजायतेध्रुवं॥जवा
पुष्पाणिजुहुयादष्टोत्तरसहस्रकं॥गृहीत्वाप्रजपेद्रुक्मनागवल्लीरसान्वितं॥तिलकंतनुयात्तेनसर्ववश्यकरंभवेत्॥नागवल्लीप॰
र्णरसम्॥अथगणेशस्य॥तर्पयेत्सलिलैःशुद्धैर्दिनशोगणनायकं॥चतुश्चत्वारिंशदाढ्यंचतुःशतमतंद्रितः॥प्राप्नुयान्मंडलादर्वाक्

त्वभीष्टमधिकंनरः॥नारिकेलैःकृतोहोमश्चतुर्थ्यांश्रीप्रदोभवेत्॥शुक्लपक्षेप्रतिपदमारभ्यदिनशःसुधीः॥चतुर्थ्यंतंनारिकेलैःसकुलाजति
लैःक्रमात्॥चतुःशतंप्रजुहुयाद्वश्याःस्युःसर्वजंतवः॥सतिलैस्तंदुलैर्होमश्चतुर्थ्यांश्रीप्रदोभवेत्॥पद्महोमेनभूपालास्तत्पत्नीःकुद्मलैःशुभैः
॥मंत्रिणःकुसुमैःपुष्पैर्विप्रान्पिप्पलसंभवैः॥समिद्भिर्नरपतीनुदुंबरसमुद्भवैः॥प्लक्षैर्वैश्यान्वटोद्भूतैःशूद्रान्मंत्रीवशंनयेत्॥मधुनास्वर्ण
लाभःस्याद्गोदुग्धेनलभेतगाः॥आज्यहोमेनमहतींश्रियमाप्नोतिमानवः॥दध्नासर्वसमृद्धिःस्यादन्नैरन्नपतिर्भवेत्॥अथसूर्यस्य॥एवंसंपूज्य
विधिवद्भास्करंभक्तवत्सलं॥दद्यादर्घ्यंप्रतिदिनंवारेवातस्यचोदिते॥प्रभातेमंडलंकृत्वापूर्ववत्पीठमर्चयेत्॥पात्रंताम्रमयंप्रस्थतोयग्राहिम
नोहरं॥निधायतत्रमनुनापूरयेत्स्वच्छुभोदकैः॥कुंकुमंरोचनाराजीरक्तचंदनवेणवान्॥करवीरजवाशालिकुशश्यामाकतंदुलान्॥निःक्षि
पेत्सलिलेतस्मिन्नैक्यंसंभाव्यभानुना॥सांगमभ्यर्चयेत्तस्मिन्भास्करंप्रोक्तलक्षणं॥गंधपुष्पादिनैवेद्यैर्यथाविधिविधानवित्॥अपिधायज
पेन्मंत्रंसम्यगष्टोत्तरंशतं॥पुनःसंपूज्यगंधाद्यैर्जानुभ्यामवनीगतः॥आमस्तकंसुमुद्धृत्यव्योम्निसावरणेरवौ॥दृष्टिंविधायस्वैक्येनमू
लमंत्रंत्रिधाजपन्॥दद्यादर्घ्यंदिनेशायप्रसन्नेनांतरात्मना॥दत्वापुष्पांजलिंभूयोजपेदष्टोत्तरंशतं॥यावदर्घ्यामृतंभानुःसमादत्तेनि
जैःकरैः॥तेनतृप्तोदिनमणिर्दद्यात्तस्मैमनोरथान्॥अर्घ्यदानमिदंप्रोक्तमायुरारोग्यवर्धनं॥धनधान्यपशुक्षेत्रपुत्रमित्रकलत्रदं॥तेजोवीर्य
यशःकांतिविद्याविभवभास्वरं॥अथरामस्य[५]॥जातीप्रसूनैर्जुहुयादिंदिराप्राप्तयेनरः॥जातीप्रसूनैर्जुहुयाच्चंदनांभःसमुक्षितैः॥राजवश्या
यकमलैर्धनधान्यादिसंपदे॥नीलोत्पलानांहोमेनवशयेदखिलंजगत्॥बिल्वप्रसूनैर्जुहुयादिंदिरावाप्तयेपुनः॥दूर्वाहोमेनदीर्घा
युर्भवेन्मंत्रीनिरामयः॥रक्तोत्पलहुतान्मंत्रीधनमाप्नोतिवांछितं॥मेधाकामेनहोतव्यंपलाशकुसुमैर्नवैः॥तज्जप्तमंभःप्रपिबेत्कवि

५ धियेतिपुस्तकांतरे॥

र्भवतिवत्सरात्॥तन्मंत्रितान्नंभुंजीनमहदारोग्यमा प्नुयात्॥श्रीकृष्णस्य०॥अथप्रयोगान्वक्ष्यामिमंत्रयोरुभयोरपि॥ ॥यान्कृत्वासाधकव
रोलोकत्रयसुपूजितः॥वंदेतंदेवकीपुत्रंसद्योजातांबुदप्रभं॥शंखचक्रगदापद्मधारिणंवनमालिनं॥एवंध्यात्वामनुवरंलक्षंब्राह्मेमुहू
र्तके॥जप्त्वामेधांवरांप्राप्यकवीनामग्रणीर्भवेत्॥अथवा॥स्फटिकाभासंद्विभुजंलेखपुस्तकधारिणं॥तंविचिंत्यजपेल्लक्षंध्यायन्ब्राह्मे मुहू
र्तके॥जप्त्वामंत्रंत्रिकालज्ञोबृहस्पतिसमोभवेत्॥चलत्क्रोष्यरणंबालंध्यायन्ब्राह्मे मुहूर्तके॥जप्त्वामनुवरोविद्वान्सर्वशास्त्रार्थविद्भवेत्॥सर्वे
वेदार्थकुशलोज्ञानवान्भवतिध्रुवं॥नंदांगणेपर्य्यटंतंधूलीनिचयविग्रहं॥प्रदीप्तमणिगणादीप्तंयशोदालोचनोत्सवं॥एवंध्यात्वामनुवरंजपे-
न्नियममास्थितः॥लक्षैकजपनाद्वस्यकिंनसिद्ध्यतिभूतले॥प्रातःप्रातःपिबेत्तोयमष्टोत्तरशतंजपन्॥अत्यंतमूकोदुष्टात्माजडःपाषाणवत्तथा
॥अनेनजलपानेनसाक्षाद्वाक्पतिसन्निभः॥जायतेनात्रसंदेहःसत्यंसत्यंनसंशयः॥पद्भ्यांनिःक्षिप्यशकटंरुदंतंप्राकृतंयथा॥लक्षंजप्या
दितिध्यायन्आपद्भ्योमुच्यतेध्रुवं॥शत्रुतोनभयंतस्यराजतोदस्युतोपिवा॥नतस्यविद्यतेभीतिःकदाचिदपिसुव्रते॥नित्यकर्म्मकृतंकृष्णंव
न्यपुष्पैःसमर्चयेत्॥वश्याभवंतिसर्वेचब्राह्मणानात्रसंशयः॥गोपालवेषंमनसा जातिपुष्पैःसमर्चयेत्॥वश्याभवंतिराजानोनात्रकार्य्यावि
चारणा॥तमालोद्भवपुष्पैस्तुवैश्यावश्याभवंतिहि॥नीलोत्पलैश्चशूद्राश्चमासंकृष्णंसमर्चयेत्॥जुहुयाद्राजकुसुमैर्मिश्रितैस्तिलतंडुलैः॥
मंत्रेणाष्टसहस्रंतुजप्त्वातद्भस्मधारयेत्॥ललाटेविधृतेनस्यसर्वेवश्याभवंतिहि॥अनेनचशरीरेणराजानोवश्यतांमियुः॥स्त्रियोवश्याभवं
त्यत्रपुत्रामात्याश्चसर्वदा॥विवाहार्थीजपेन्मंत्रंमासमष्टसहस्रकम्०॥रासमंडलमध्यस्थंकृष्णं ध्यात्वाव्रजेस्थितं॥विवाहयेदुत्तमांगींकन्यां
सर्वैसुशोभनां॥पुत्रंमेरक्षरक्षेतिद्विजेनप्रार्थितोहरिः॥हतपुत्रंसमाहृत्यददोमूलंविचिंतयेत्॥पुत्रकामोलभेत्पुत्रंमासेनैकेननसुंदरं॥दीर्घा

गुणोज्वलामितिप्रत्यंतरे १

१ यस्त्वमितिप्रत्यंतरे॥

२ अर्थवानिति पुस्तकांतरे

सुरप्रतिहतबलवीर्य्यसमन्वितं ॥ कुंदपुष्पैः समाराध्य कृष्णं ध्यायेच्च कन्यका ॥ मासद्वयं तथा मंत्रं जपेदष्टसहस्रकं ॥ मनोरथपतिं लब्ध्वा दीर्घकालं च
क्रीडति ॥ अंजनं कुसुमं वस्त्रं ताम्बूलं चंदनं तथा ॥ अन्यानि चोपभोग्यानि स्पृष्ट्वा मंत्रशतं जपेत् ॥ दीयते यस्य यस्यैतत्सोचिराद्दासवद्भवेत् ॥ स्त्रियो वस्या
अवेनैव भवंति मुनिसत्तम ॥ पुरुषं वशयेन्नारी अनेनैव विधानतः ॥ अन्नाद्य कामः श्रीपुष्पैः सिततंदुलमिश्रितैः ॥ अष्टोत्तरसहस्रं तु जुहुयाद्दैवं वा
न्नभवेत् ॥ विश्वरूपधरं ध्यात्वा शतमष्टोत्तरं जपेत् ॥ समाहितमना मंत्री यशस्वी कीर्तिमान्भवेत् ॥ भूतप्रेतपिशाचादिस्कंदादिग्रहपीडितः ॥ पूतना
स्तनपानारं ध्यात्वा मंत्रशतं जपेत् ॥ प्रणश्यंति महादुष्टाः पलायंते इतस्ततः ॥ सर्पमंडलदष्टश्च मूषिकाद्यैश्च दंशितः ॥ कृष्णं कालीयदमनं चिंत
यित्वा जपेन्नरः ॥ तर्जयंतं विषं घोरं हुंकारेण विनाशयेत् ॥ अत्राप्यमुं मंत्रं वक्ष्ये हुंबीजाद्यं शृणु तत्वतः ॥ कालीयस्य फणामध्ये दिव्यनृत्यं करोति
तं ॥ नमामि देवकीपुत्रं नृत्यराजानमच्युतं ॥ ज्वरार्तोभ्यर्चयेन्मंत्रं जपेदष्टशतं तथा ॥ स्तवेन संस्तुतं कृष्णं बलप्रद्युम्नसंयुतं ॥ दहंतं बाणनगरी
गरुडोपरि संस्थितं ॥ निजज्वरेण संस्तुतं ध्यात्वा नाशयते क्षणात् ॥ शीतलाकामलादीनि तथा चातुर्थिकोद्भवान् ॥ प्लीहगुल्मजठराद्यायुमपस्मा
रभवं तथा ॥ नाशयेन्नात्र संदेहो दृष्टिमात्रेण मांत्रिकः ॥ गोपालं यत्नपालं च वेणुमादाय संस्थितं ॥ ध्यात्वा कृष्णं जपेन्मंत्रं पञ्चमासांस्तु मासतः ॥
राज्ञः पुरोधा भवितुमिति यस्य मतिर्भवेत् ॥ मधुसिक्तैः सितैः पुष्पैर्हुत्वा तन्मंडलाद्भवेत् ॥ महैश्वर्यमथ प्राप्य विश्वख्यातो भवेद्ध्रुवं ॥ गोवर्धन
धरं कृष्णं ध्यात्वा मंत्रं जपेन्नरः ॥ वातवर्षादिभिर्घोरैर्भये समुपस्थिते ॥ भयमाशु विनश्येत नात्र कार्या विचारणा ॥ वृंदावनगते कृष्णं वृष्टिका
मो विचिंतयन् ॥ जपेदष्टसहस्रं तु वृष्टिमाप्नोत्यसंशयम् ॥ एवं च मनसा ध्यात्वा वृष्टिं वर्षासु माहरेत् ॥ एवं जलाशये ध्यात्वा जपेदष्टसहस्रकं ॥ वृ
ष्टिर्भवति कालेपि महती नात्र संशयः ॥ गायंतं वेणुना कृष्णं गानकामो विचिंतयन् ॥ आज्यमष्टशतं हुत्वा किन्नरैः सह गीयते ॥ जयकामो जपेद्यस्तु

१रक्तकरवीरेणेतिपुस्तकांतरे॥१

हरंतेकल्पकद्रुमं॥संस्तुतंदेवताभिश्चगरुडारूढमच्युतं॥ध्यात्वाचकरवीरेणसमिद्भिर्जुहुयाद्दशी॥अष्टोत्तरसहस्रंतुपक्षात्पराजितोरिपुः॥राजादिभ
यमापन्नेसंशयेदुर्गसंसदि॥हुत्वादशसहस्रंतुतत्क्षणान्नाशयेद्ध्रुवं॥नीलोत्पलादिभिर्हुत्वाअष्टोत्तरसहस्रकं॥शंखादिनिधिसंयुक्तंद्वारकामध्य
गंहरिं॥ध्यात्वातंदुलदूर्वाभिर्हुत्वाशांतिकमाचरेत्॥कदंबमूलेगायंतंगोपालंवनमालिनं॥कदंबपुष्पैःसंस्पृष्टंचिंतयित्वाजनार्दनं॥अपामार्गश
तैर्हुत्वाजपेद्दशसहस्रकं॥सर्वांल्लोकान्वशीकृ[illegible]आशुविज्ञोभविष्यति॥राजद्वारेसभायांचव्यवहारेचमंत्रवित्॥मंत्रमष्टशतंजप्त्वाप्रथमंवाक्य
मुच्चरेत्॥अनेनैवविधानेनसर्वत्रविजयीभवेत्॥मोक्षकामोजपेद्यस्तुपुंडरीकाक्षमव्ययं॥सनकादिस्तुतंकृष्णंशुक्लांबरधरंपरं॥शंखचक्र
धरंध्यात्वामंत्रंलक्षंजपेन्नरः॥तारसंपुटितंकृत्वाविधिवत्स्थानमाश्रितः॥चंद्रार्कमण्डलेकृष्णंपूजयेद्भक्तिमावहन्॥संसारसागरात्सद्योमुच्य
तेनात्रसंशयः॥दधिवामनस्य॥पायसाज्येनजुहुयात्सहस्रंश्रियमाप्नुयात्॥धान्यहोमेनधान्याप्तिःशतपुष्पसमुद्भवैः॥बीजैस्सहस्र
संख्यातैर्होमोभयविनाशनः॥दध्योदनेनशुद्धेनहुत्वामुच्येतदुर्गतः॥स्मृत्वात्रैविक्रमंरूपंजपेन्मंत्रमनन्यधीः॥मुक्तोबंधाद्भवेन्म॰
र्त्योनात्रकार्याविचारणा॥अथहयग्रीवस्य॥बिल्वैःफलैःकृतोहोमःश्रीप्रदःपरिगीयते॥कुंदपुष्पाणिजुहुयादिच्छन्वाक्श्रियम
व्ययां॥मनुनानेनसंजप्तं घृतंब्राह्मीरसेश्रितं॥कवितामावहेत्सुसामनर्गलविजृंभिणीं॥वचामनेनसंजप्तांभक्षयन्मानरस्त्वहो॥सर्ववेदाग
मादीनांव्याख्याताजायतेऽचिरात्॥अथनृसिंहस्य॥श्रीपुष्पैर्जुहुयान्मंत्रीबिल्वकाष्ठैधितेऽनले॥सहस्रंश्रियमाप्नोतिपत्रैर्वाबिल्वसं॰
भवैः॥श्रीपुष्पंलवंगपुष्पं॥प्रसूनैर्बकुलैस्तद्वद्दूर्वाहोमादरोगताम्॥॥दुःस्वप्नेनिशिसंजातेस्नात्वामंत्रमिमंजपेत्॥अनिष्टेमंत्रविन्म॰
श्चान्तुस्वप्नस्तस्यजायते॥व्या[illegible]रमृगादिभ्योमहारण्येभयाकुले॥रक्षेन्मनुरयंजप्तोभयेष्वन्येषुमंत्रिणां॥अनेनमंत्रितंभस्मविषग्रह

२ चक्राब्जेतिप्रत्यंतरे॥२

महाभयान्॥ नाशयेदचिरेणैव मंत्रस्यास्य प्रभावतः॥ घोराभिचारे सोन्मादे महोत्पाते महाभये॥ जपेन्मंत्रं स्मरेद्देवं दुःखमुक्तो भवेन्नरः॥ सिंहरूपं महाभीमं नखदंष्ट्रातिभीषणं॥ स्मृत्वात्मानं विभुं पश्चाद्ध्यायेन्मृगशिशुं रिपुं॥ गृहीत्वा गलदेशे तं पुनर्दिक्षु क्षिपेद्द्रुतं॥ पुत्रमित्रकलत्राद्यैरुच्चाटो जायते द्विषः॥ पूर्वं मृत्युपदे साध्यनाम कृत्वा स्वयं हरिः॥ निशितैर्नखदंष्ट्राग्रैः खाद्यमानं रिपुं स्मरन्॥ नित्यमष्टोत्तरशतं जपेन्मंत्रमतंद्रितः॥ जायते मंडलादर्वाक्शत्रुर्वैवस्वतप्रियः॥ यत्नं कुर्वीत विधिवत् शत्रुसेनानिवारणे॥ बिभीतकाष्ठैर्ज्वलिते पावके रिपुमर्दनं॥ विचिंत्यहैवं नृहरिं संपूज्य कुसुमादिभिः॥ समूलचूतं जुहुयाच्छरैर्दशशतावधिं॥ रिपुं खादन्निव जपेन्निर्भिन्नमिव निःक्षिपेत्॥ हुत्वा सप्तदिने मंत्री सेनामिष्टां महीपतेः॥ प्रस्थापयेत् शुभे लग्ने पराष्ट्रजयेच्छया॥ तस्याः पुरस्तान्नृहरिं निघ्नंतं रिपुमंडलं॥ स्मृत्वा प्रयोगं कुर्वीत यावदायाति सा पुनः॥ विजित्य निखिलाञ्छत्रून्सर्ववीरश्रिया युतः॥ आगत्य विजयी राजा ग्रामक्षेत्रधनादिभिः॥ प्रीणयेन्मंत्रिणं सम्यग्विभवैः प्रीतिमानसः॥ मंत्री यदिन संतुष्येद्दनर्थः स्यान्महीपतेः॥ अथ वराहस्य॥ रवौ सिंहगतेऽष्टम्यां शुक्लपक्षे सितां शिलां॥ पंचगव्येषु निःक्षिप्य स्पृष्ट्वा तामयुतं जपेत्॥ उत्तराभिमुखो भूत्वा तां शिलां निखनेद्भुवि॥ शत्रुचोरमहाभूतकृतां बाधां विनाशयेत्॥ भानूदये भौमवारे साध्यक्षेत्रात्समाहरेत्॥ मृत्तिकां संजपेन्मंत्रं तां पुनर्विभजेत्त्रिधा॥ चुल्ल्यामेकां समालिंप्य पाकपात्रे तथापरां॥ गोदुग्धे परमालोड्य शोधितांस्तंदुलान् क्षिपेत्॥ संस्कृतेऽग्नौ पचेत्सम्यक् चरुं मंत्री जपेन्मनुं॥ अवतार्य चरुं पश्चादग्नौ देवं यथाविधि॥ धूपदीपादिकैरिष्ट्वा पुनराज्यप्लुतं चरुं॥ जुहुयादेधिते वह्नौ यावदष्टोत्तरं शतं॥ एवं सप्तरविवारेषु जुहुयात् क्षेत्रसिद्धये॥ प्रातःकाले भृगोर्वारे मृदं साध्यमहीतलात्॥ आदाय हविरापाद्य जुहुयात्पूर्ववत्सुधीः॥ विरोधो न स्यात्क्षेत्रे सह चौराद्युपद्रवैः॥ राजवृक्षसमुत्थाभिः समिद्भिर्मनुनामुना॥ त्रिःसहस्रं प्रजुहुयात्तस्य स्युः सर्वसंपदः॥ शा

२ सायेतिप्रत्यंतरे॥ ६ ज्वरादिभिरितिप्रत्यंतरे॥ ५ गुरवे इति प्रत्यंतरे॥५

लिभिर्जुहुयान्मंत्री नित्यमष्टोत्तरं शतं॥ २ मृद्वैर्धान्यसंघातैः शोभनेतस्यमंदिरं॥ नावराज्येनजुहुयान्मंडलान्स्वर्णमाप्नुयात्॥ लाजैः कन्यामवाप्नोति मध्वक्तैर्निजवांछितं॥ मधुरत्रयसंयुक्तैर्जुहुयादुत्पलैर्नवैः॥ महतीं श्रियमाप्नोति मण्डलान्पूर्वसंख्यया॥ अथ मृत्युंजयस्य॥ दुग्धसिक्तैः सुधाखंडैर्मंत्री मासं सहस्रकं॥ आराधितेग्नौजुहुयाद्विधिवद्द्विजिमैर्द्वियः॥ सुधागुडूची॥ संतुष्टः शंकरस्तेन सुधाप्लावितविग्रहः॥ आयुरारोग्यसंपत्तिर्यशः पुत्रान्विवर्द्धयेत्॥ सुधाखंडतिलादूर्वापयःसर्प्पिः पयोहविः॥ इत्युक्तैः सप्तभिर्द्रव्यैर्जुहुयात्सप्तवासरं॥ क्रमाद्दशशतं नित्यमष्टोत्तरमंत्रितः॥ सप्ताधिकानद्विजान्नित्यं भोजयेन्मधुरान्वितं॥ विकारान्तुगुणंमंत्री वर्द्धयेद्धोमवासरान्॥ होतृभ्यो दक्षिणां दद्यादरुणागाः पयस्विनीः॥ गुरुं संपूज्य विधिवद्धनाद्यैर्वनाधिया॥ अनेनविधिनासाध्यः कृत्याद्रोहादिभिस्ततैः॥ विमुक्तः सुचिरंजीवेच्छरदांशतमंजसा॥ अभिचारेज्वरे तीव्रे घोरोन्मादेक्षिरोगदे॥ असाध्यरोगेस्वेडार्तेमोहेदाहेमहाभये॥ होमोयंशांतिदः प्रोक्तः सर्वसंपत्प्रदायकः॥ द्रव्यैरेतैः प्रजुहुयात्त्रिजन्मसु यथाविधि॥ भोजयेन्मधुरैर्भोज्यैर्ब्राह्मणान्वेदपारगान्॥ दीर्घमायुरवाप्नोति वांछितंविंदतेश्रियं॥ एकादशाहुतीर्नित्यं दूर्वाभिर्जुहुयाद्बुधः॥ अपमृत्युजिदेवस्यादायुरारोग्यवर्द्धनः॥ त्रिजन्मसुसुधावल्लीकाश्मरीबकुलोद्भवैः॥ समिद्वरैः कृतो होमः सर्वमृत्युगदापहः॥ सिद्धार्थैर्विहितोहोमोमहाज्वरविनाशनः॥ अपामार्गसमिद्धोमः सर्वामयनिषूदनः॥ अथदक्षिणामूर्तेः॥ भिक्षाहारोजपेन्मासमनुमेनंजितेन्द्रियः॥ नित्यंसहस्रमष्टार्द्धं वरां विंदति वाक्श्रियं॥ त्रिवारंजप्तमेतेन मनुनासलिलंपिबेत्॥ नित्यशोदक्षिणामूर्तिंध्यायेत्साधकसत्तमः॥ शास्त्रव्याख्यानसामर्थ्यं लभतेवत्सरांतरे॥ ब्राह्मीसैंधवसिद्धार्थवचाकुष्ठकणोत्पलैः॥ सुगंधिसंयुतैः कल्कैः शृतं ब्राह्मीरसे घृतं॥ मनुनानेन संजप्तमयुतंसाधुसाधितं॥ निपीतंक[illegible]िनाकांतिरक्षायुः श्रीर्धृतिप्रदं॥ अथभैरव्याः॥ जुहुयादरुणांभोजैर्विदोषैर्मधुरान्वितैः॥ लक्षसंख्यंतदर्द्धं

१ वश्यइतिप्रत्यंतरे॥१

वा प्रत्यहं भोजयेद्द्विजान्॥ वनितास्तुवती रम्या प्रीणयेद्देवताधिपा॥ होमांते धनधान्याद्यैस्तोषयेद्गुरुमात्मनः॥ एवं कृते जराहूं द्यौरसापापभवनं भवेत्॥
॥ रक्तोत्पलैस्त्रिमध्वक्तैररुणैर्वा हयारिजैः पुष्पैः पयोक्तैः सघृतैर्होमो विश्वं वशं नयेत्॥ वाक्सिद्धिं लभते मंत्री पलाशकुसुमैर्हुतात्॥ कर्पूरागु
रुसंयुक्तं गुग्गुलुं जुहुयात्सुधीः॥ ज्ञानं दिव्यमवाप्नोति तेनैव सत्कविर्भवेत्॥ क्षीराक्तैरमृताखंडैर्होमः सर्वापमृत्युजित्॥ दूर्वाभिरायुषे होमः क्षीरा
क्ताभिर्दिनत्रयं॥ गिरिकर्णीभवैः पुष्पैर्नृणान्वशयेद्धुतात्॥ कल्हारैः पार्थिवान्पुष्पैस्तद्वधूः कर्णिकारजैः॥ मल्लिकाकुसुमैर्हुत्वा राजपुत्रान्वशं न
येत्॥ कौरंटकुसुमैर्वैश्यान्वृषलान्पाटलोद्भवैः॥ अनुलोमविलोमांतस्थितसाध्याक्षरान्वितं॥ मंत्रमुच्चार्य जुहुयान्मंत्री मधुरलोडितैः॥
सर्षपैः कटु   संमिश्रैर्वशयेत्पार्थिवान्क्षणात्॥ अनेनैव विधानेन तत्पत्नीस्तत्सुतानपि॥ जातीबिल्वफलैः पुष्पैर्मधुरत्रयलोडितैः॥ नरनारीर्नरप
तीन्होमतो वशयेद्ध्रुवं॥ मालतीबकुलोद्भूतैः पुष्पैः स्वंरनलोडितैः॥ जुहुयात्कवितां मंत्री लभते वत्सरांतरे॥ मधुरत्रयसंयुक्तैः फलैर्बिल्वसमु
द्भवैः॥ जुहुयाद्दर्शयेल्लोकं श्रियमाप्नोति वांछितां॥ पाटलैः कुसुमैः कुंदैरुमलैर्नागचंपकैः॥ नंद्यावर्तैर्विकसितैः कृतमालैर्जुहोति यः॥ जा
यते वत्सरात्सर्वाकृश्रिया विजितपार्थिवः॥ साज्यमन्नं प्रजुहुयाद्वत्सरात्स समृद्धिमान्॥ कस्तूरीकुंकुमोपेतं कर्पूरं जुहुयाद्वशी॥ कंदर्पादधि
कसंयुक्तः सौंदर्यमधिगच्छति॥ लाजान्प्रजुहुयान्मंत्री दधिक्षीरघृतप्लुतान्॥ विजित्य रोगानखिलान्स जीवेच्छरदां शतम्॥ पादद्वयं मलयज
पादं कुंकुमकेसरं॥ पादं गोरोचनायाश्च[illegible]नि पिष्ट्वा हिमांभसा॥ विदध्यात्तिलकं भाले यान्पश्येद्येन वीक्ष्यते॥ यान्स्पृशेत्स्पृशते ये वै वश्याः स्यु
स्तस्य ते चिरात्॥ कर्पूरकपिचोराणि समभागानि कल्पयेत्॥ चतुर्भागा जटामांसी तावती रोचना मता॥ कुंकुमं सप्तभागं स्याद्द्विभागं चंदनं
मतं॥ अगुरुर्नवभागं स्यादिति भागक्रमेण च॥ हिमाद्रिः कंन्यया पिष्टमेतत्सर्वं सुसाधितं॥ आदाय तिलकं कुर्याद्भाले भूमिपतीन्नरान्॥ वनि

त्तांमदगर्भाढ्यांमदोन्मत्तोमतंगजान्॥सिंहव्याघ्रान्महासर्पान्भूतवेतालराक्षसान्॥दर्शनादेववशयेत्तिलकंधारयेन्नरः॥अथसुंदर्याः॥ज्ञानार्णवे॰॥मालतीमल्लिकाजातीकुसुमैर्मधुमिश्रितैः॥घृतपूर्णैर्हुनेद्देविवागीशत्वंप्रजायते॥मूकस्यापिहिमूढस्यगिलारूपस्यचान्यथा॥जवापुष्पैराज्ययुक्तैःकरवीरैस्तथाविधैः॥हवनान्मोहयेन्मंत्रीलोकत्रयनिवासिनः॥कर्पूरकुंकुमैर्देविमिश्रमृगमदेनहि॥हवनान्मदनोदेविमंत्रेणविजितोभवेत्॥सौभाग्येनविलासेन सामर्थ्येनापिसुव्रते॥चंपकैःपाटलैर्हुत्वाश्रियंप्रोल्लासितांवरां॥प्राप्नोतिमंत्रीमहतींस्तंभयेज्जगतीमिमां॥श्रीखण्डगुग्गुलंचन्द्रमगुरुंहोमयेत्ततः॥नागेंद्रासुरदेवानांपुरंध्रीर्वशमानयेत्॥सर्वेलोकावशास्तस्यभवंत्येवनसंशयः॥लक्षहोमाल्लभेद्राज्यंदारिद्र्यभयपीडितः॥दुर्गोपशमनेदेविलभेत्त्रिमधुहोमतः॥रुधिरक्तेनछागस्यमांसेननिशिहोमतः॥मधुरत्रययुक्तेनगुरुणोक्तविधानतः॥परराष्ट्रमहादुर्गंसमस्तंस्ववशंनयेत्॥क्षीरंचमधुदध्याज्यंपृथक्हुत्वावरानने॥आयुर्धनमथारोग्यंसमृद्धिर्जायतेनृणां॥क्रमेणशैलजेक्षीरमधुभ्यांमृत्युनाशनं॥दधिमाक्षिकहोमेनसौभाग्यंधनमाप्नुयात्॥सितयाकेवलंहोमोवैरिस्तंभनकारकः॥होमाद्दधिमधुक्षीरलाजैश्चवीरवंदिते॥रोगहंताकालहंतामृत्युहंतानसंशयः॥कमलैररुणैर्होमःसम्यक्संपत्तिदायकः॥रक्तोत्पलैर्जगद्वश्यंराजानोवशगाःक्षणात्॥नीलोत्पलैर्महादुष्टावशमायांतितत्क्षणात्॥श्वेतोत्पलैःश्रियंवाचंलभतेहवनात्प्रिये॥तथा॥अक्षमालांप्रपूज्याथचंदनेनप्रपूजिता॥सप्तत्रिमजपेद्विद्यांलक्षमात्रंयदाशुचिः॥योषितोमंत्रमयंत्येवमनस्तस्यसुनिश्चितं॥तदाद्वितीयलक्षंतुपूजयेत्साधकोत्तमः॥पातालतलनागेंद्रकन्यकाःक्षोभयंतितं॥नासाकटाक्षजालेस्तनमोहयंतिसाधकं॥तदालक्षत्रयंकुर्यात्साधकःस्थिरमानसः॥तृतीयलक्षेसंजप्ते[illegible]यंतिसुरांगनाः॥अभिमानेनसौंदर्यसौभाग्यमदकारिणा॥साधकंमंत्रमयंत्येवतत्रासौस्थिरमानसः॥तदाल

क्षत्रयं साधु सर्वपापनिकृंतनं ॥ एवं लक्षत्रये जप्ते साधकः स्वस्थमानसः ॥ संक्षोभयति स्वर्लोकं भूलोकं तलवासिनः ॥ पुरुषा योषितो वश्याश्च
लाचलमपि प्रिये ॥ गोरोचनादिभिर्द्रव्यैश्चक्रराजं समालिखेत् ॥ अतीवसुंदरं रम्यं तन्मध्ये प्रतिमां वरां ॥ ज्वलंती नाम सहितां महाबीजविदर्भि
ताम् ॥ चिंतयेत्तु ततो देवि योजनानां सहस्रशः ॥ अदृष्टपूर्वा देवेशि श्रुतमात्रापि दुर्ल्लभा ॥ राजकन्याथवा भार्य्या भयलज्जाविवर्ज्जिता ॥ आयाति
साधकं सम्यक् मंत्रमूढा सती प्रिये ॥ चक्रमध्यगतो भूत्वा साधकश्चिंतयेत्सदा ॥ तदा सूर्य्यसहस्राभमात्मानमरुणं तथा ॥ साध्यमप्यरुणी
भूतं चिंतयेत्परमेश्वरि ॥ अनेन क्रमयोगेन स्वयं कंदर्प्परूपवान् ॥ सर्वसौभाग्यसुभगः सर्वलोकवशंकरः ॥ सर्वरक्तोपचारैश्च मुद्रासहितविग्रहः
॥ चक्रं संपूजयेद्यस्तु न तस्य[illegible]विजृंभितम् ॥ स भवेद्दासवद्देवि धनाढ्यो वापि भूपतिः ॥ चक्रमध्यगतं कुर्य्यान्नाम यस्यास्तु योषितः ॥ अदृष्टा च
महेशानि योनिमुद्राधरो बुधः ॥ हठादानयते शीघ्रं यक्षिणीं राजकन्यकां ॥ नागकन्यामप्सरसां खेचरीं वा सुरांगनां ॥ विद्याधरीं दिव्यरूपां ऋषि
कन्यां रिपुस्त्रियं ॥ मदनोद्भवसंतापस्खलज्जघनमण्डलां ॥ कामबाणप्रभिन्नांतःकरणां लोलचक्षुषीं ॥ महाकामकलाध्यानयोगात्तु सुरव
दिते ॥ क्षोभयेत्स्वर्गभूर्लोकपातालतलयोषितः ॥ रोचनाभागमेकं तु भागमेकं च कुंकुमं ॥ अष्टभागत्रयं देवि चंदनं मर्दयेत्समं ॥ एकत्रति
लकं कुर्य्यात्त्रैलोक्यवशकारिणम् ॥ अष्टोत्तरशतं विद्यां मंत्रयित्वा वशं नयेत् ॥ राजानं नगरं ग्रामं येन यद्यत्र दृश्यते ॥ मंत्रिणा पर
मेशानि तत्सर्वं तस्य वश्यगं ॥ तांबूलं धूपमुदकं पत्रं पुष्पं फलं दधि॰ दुग्धं घृतं चूर्णमात्रं वस्त्रं कर्पूरमेव च ॥ कस्तूरीं घुसृणं चैव लवंगं जा
तिपत्रकं ॥ जलं वा वस्तु सकलं यद्यत्र परमेश्वरि ॥ अष्टोत्तरशतं जप्त्वा यस्मै यस्मै प्रयच्छति ॥ स वश्यो जायते देवि नात्र कार्य्या विचारणा ॥
स्त्रियस्तु सकला वश्या दासीभूता भवंति हि ॥ हठाकर्षणमेतत्तु कथितं नान्यथा भवेत्॰ अथ वक्ष्ये महेशानि महापातकनाशकं ॥

शिवांसंपूजयेद्देविसुगंधैःकुसुमैःप्रिये।महापातकयुक्तात्मानिष्पापोजायतेक्षणात्॥शमीदूर्वांकुराश्वत्थपल्लवैरथवार्कजैः॥मासेनहंति
कलुषंसप्तजन्मकृतंनरः॥मुद्रासन्नद्धयोगःसन्पूर्वोक्तध्यानयोगतः॥लक्षमात्रंजपेद्यस्तुमहापापैःप्रमुच्यते॥लक्षद्वयेनपापानिसप्त
जन्मभवान्यपि॥महापातकसंख्यानिनाशयेन्नात्रसंशयः॥ततोलक्षत्रयंजप्त्वामंत्रमेतत्कुलेश्वरि॥महापातककोटीस्तुनाशयेन्नात्रसंशयः
॥चतुर्लक्षंजपेद्देविमहावागीश्वरोभवेत्॥कुबेरइवदेवेशिपंचलक्षान्नसंशयः॥षड्लक्षजपमात्रेणमहाविद्याधरोभवेत्॥सप्तलक्षजपान्मं
त्रीखेचरीमेलकोभवेत्॥अष्टलक्षजपान्मंत्रीदेववपूज्योभवेन्नरः॥अणिमाद्यष्टसिद्धीनांनायकोभवतिप्रिये॥वशगास्तस्यराजानोयोषितस्त
विशेषतः॥नवलक्षप्रमाणानिजपेद्देवीसुसुंदरी॥रुद्रमूर्तिःस्वयंकर्त्ताहर्त्तासाक्षान्नसंशयः॥सर्वैर्वंद्यःसदास्वस्थःसर्वसौभाग्यवान्भवेत्
॥अथछिन्नमस्ता॥श्रीफलानांपलाशानांतथैवोदुंबरस्यच॥सर्वसिद्धिप्रदोहोमःकर्त्तव्योतिप्रयत्नतः॥शतमष्टोत्तरंजप्त्वाहुत्वाकुर्यान्नतिंततः॥मालती
कुसुमैर्होमःकर्त्तव्योमधुसंयुतैः॥घृतेनसहितोवापिवागीशत्वप्रदायकः॥आज्ययुक्तेनभक्तेनबलिर्देयःसदामिषैः॥षण्मासंदधिसंयुक्तोलक्ष्मीस्तस्य
स्थिराभवेत्॥छागमांसंसरक्तंचघृतेनाप्लावितंतथा॥प्रजुहोत्ययुतंदेवीराजातस्यवशोभवेत्॥श्वेतेनकरवीरेणहोमंसम्यक्करोतियः॥लक्षमा
त्रप्रदानेनसजीवेच्छरदांशतं॥जुहुयात्तिलपुष्पेणमधुनाक्तेनसाधकः॥लक्षसंख्यानियोदेविसिद्धिस्तस्यनसंशयः॥कर्णिकारसहस्राणियोजुहो
तिघृतैःसह॥सप्राप्नोतिपरांसिद्धिमीप्सितांहरवंदिते॥त्रिसंध्यंमासमात्रंतुवागीशत्वमवाप्नुयात्॥अथश्यामादेः॥ ॥कालीतंत्रे॥ ॥अथकाम्यवि
धिंवक्ष्येयेनसर्वत्रपारगाः॥साधकःसाधयेत्सिद्धिंदेवानामपिदुर्लभां॥कुलागारंपुष्पितायादृष्ट्वायोजयतेनरः॥अयुतैकप्रमाणेनसाधकःस्थि
रमानसः॥केवलंतुप्रभावेनसतुविद्यानिधिर्भवेत्॥संस्कृताःप्राकृताःशब्दालौकिकावैदिकास्तथा॥वशमायांतितेसर्वेसाधकस्यनचान्य

३त्रिलक्षमितिपुस्तकांतरे॥

था॥ अथवा मुक्तकेशश्च हविर्भुक्ता सुसंयतः॥ प्रजपेदयुतं प्राप्तस्तत्तदेवफलं लभेत्॥ नग्नः परलतां पश्यन्नयुतं यस्तु साधकः॥ प्रजपेत्स भवेच्छीघ्रं विद्याया वल्लभः स्वयं॥ तस्य दर्शनमात्रेण वादिनः कुंठतां गताः॥ गद्यपद्यमयी वाणी सभायां तस्य जायते॥ तस्मान्मंत्रात्सुधियः सर्वे प्रणमंति मुदान्विताः॥ तस्य वाक्यपीयूषा जडा भवंति वाग्मिनः॥ कुलचूडामणौ०॥ रजोयुक्तां समासाद्य तत्क्षेत्रेष्विष्टदेवतां॥ पूजयित्वा महारात्रौ त्रिदिनं प्रजपेन्मनुं॥ लक्षपीठफलं देवि लभते नात्र संशयः॥ वेतालपादुकासिद्धिं खड्गसिद्धिं च भैरव॥ अंजनं तिलकं गुह्यं साधयेत्साधकोत्तमः॥ प्रजपेत्प्रतिदिनमष्टोत्तरसहस्रमित्यर्थः॥ यत्र जापे च होमे च संख्या नोक्ता मनीषिभिः॥ तत्रैव गणना प्रोक्ता गजांतकसहस्रकमिति॥ विद्याकामेषु होतव्यं पद्मैर्मधुसमन्वितैः॥ धनकामेन होतव्यं तिलाज्यमधुसंयुतं॥ बंधूकपुष्पहोमेन दासं च कुरुते नृपं॥ सर्पिर्लवणहोमेन सदाकर्षति कामिनी॥ बकुलैर्होममात्रेण सौभाग्यं लभते नरः॥ मल्लिकाजातिपुंनागकदंबैः पुष्टिमाप्नुयात्॥ स्त्रीराज्यनगरे होमान्महतीं श्रियमाप्नुयात्॥ चंदनागुरुकर्पूरकाश्मीरहोमतः पुनः॥ मंत्री नीलसरस्वत्याः सर्वाभीष्टमवाप्नुयात्॥ नीलसरस्वतीपदमुपलक्षणं॥ कर्पूरहोमतो मंत्री सर्वाभीष्टानि साधयेत्॥ संपूज्य मूलमंत्रेण बिल्वपत्रैर्घृतान्वितैः॥ सहस्रं प्रत्यहं हुत्वा प्राप्नोति परमां गतिं॥ प्रतिदिनमिति मंडलपरं॥ घृताक्तमालतीपुष्पहोमाद्द्रुतकविर्भवेत्॥ अत्र यत्र यत्र होमसंख्या नोक्ता तत्र तत्रायुतसंख्या बोद्धव्या॥ तदुक्तं तत्रैव॥ सर्वस्यैव तु होमस्य नियमोयुतसंख्यकः॥ अथ तर्पणं॥ तत्स्वसूक्ते॥ मधुना तर्पणं कृत्वा सर्वकामप्रपूरकं॥ मंत्रसिद्धिकरं साक्षान्महापातकनाशनं॥ नीलतंत्रे॰ कर्पूरमिश्रितैस्तोयैर्मासमात्रं प्रतर्पयेत्॥ वशीकुर्यान्नृपान्सर्वान्भोगी स्याद्यावदायुषं॥ घृतैः पूर्णायुषः सिद्ध्यै दुग्धैरारोग्यसिद्धये॥ अगुरुमिश्रितैस्तोयैः सर्वकालं सुखी भवेत्॥ नारिकेलोदके मिश्रैस्तोयैः सर्वार्थसिद्धये॥ मरीचमिश्रितैस्तोयैस्तथा शत्रून्विनाशयेत्॥ केवलैरु

कवितां लभेदिति ग्रंथांतरे॥

नयेदिति प्रत्यंतरे॥१

क्षतोयैश्च शत्रुमुच्चाटयेत्क्षणात्॥ ज्वरविध्वं भवेत्तेन दुग्धसेकात्समं भवेत्। सिद्धिसारस्वते। शताभिजप्तमात्रेण रोचनातिलकं नरः॥ कृत्वा पश्य
ति यं मंत्री तं कुर्य्याद्दासवत्सुधीः॥ फेत्कारीये० उपचारविशेषेण राजपत्नीवशं नयेत्॥ राजानं जपमात्रेण बलिना सकलं जगत्॥ उपचारविशेषेणे
ति अधिकारिभेदाद्बोद्धव्यं॥ जपमात्रेणेति पूजाभावेनेत्यर्थः॥ बलिद्रव्यं तु मत्स्यसूक्ते॥ ॥रंभाजातीबीजपूरं सुगंधिपरिमिश्रितं॥ मिश्रीकृत्य ब
लिं दद्यात्कृष्णायां च विशेषतः॥ बलिमंत्रस्तु॥ प्रणवं पूर्वमुद्धृत्य उग्रतारे ततः परं॥ विकटदंष्ट्रे परपक्षं मोहय द्वयमुच्चरेत्॥ मारय खादयेत्येवप
चद्वयं वदेत्ततः॥ ये मां हिंसितुमुद्यता योगिनीचक्रैस्तान्दारय हुंफट्स्वाहा॥ परविद्यामाकर्षय छेदय फट्द्वयं त्रुटद्वयं कपालेयकृद्गृह्ण
स्वाहेति॥ अयं तु ताराविषये॥ कालिकादौ तु तत्तत्कल्पोक्तबलिसंभारो बोद्धव्यः॥ अथ निग्रहाद्युपायाः॥ उक्तं च वीरतंत्रे॥ श्मशानांगारमादाय
मंगले वासरे निशि॥ कृष्णवस्त्रेण संवेष्ट्य बध्नीयाद्रक्ततंतुना॥ शताभिमंत्रितं कृत्वा निःक्षिपेद्वैरिवेश्मनि॥ सप्ताहाभ्यंतरे तस्य उच्चाटनमिदं
महत्॥ एतदुक्तं फेत्कारीये॰ नरास्थिनि लिखेन्मंत्रं क्षारयुक्तहरिद्रया॥ सहस्रं परिसंजप्य निशायां शनिवासरे॥ निःक्षिपेद्यस्य चागारेस
सुतस्सहिमासतः॥ क्षेत्रे तु सस्यहानिः स्याज्जवहानिस्तुरंगमे· धनहानिर्धनागारे ग्राममध्ये तु तत्क्षयः॥ क्षारस्तु श्येनविट्युक्तं लवणं
॥ हल्लेखाधोगतं रेफमध्येऽमुकामुकयोर्महद्द्वेषं कुरु २ इत्यस्यांते मंत्रमुच्चार्य्य सहस्रं जपेत्तदुक्तं॥ द्वेषं तु विलिखेन्मंत्रं प्रेतकर्पटके
सुधीः॥ द्वेष्यद्वेषकयोर्नाम्ना नेयो द्वेषो महान्भवेत्॥ लिखेन्मंत्रमिति मंत्रं लिखित्वा हल्लेखा रेफमध्येऽमुकामुकयोर्द्वेषं कुरु २ अमु
कं मारय २ इत्यादि साध्यसहितमित्यर्थः॥ अथवा साध्यं लिखित्वा तदंते मंत्रं लिखेत्॥ सहस्रं परिजप्येति अमुकं मारय २ इति अंते
मंत्रजपः॥ द्वेषं त्वमुकयोर्महद्द्वेषं कुरु २ इत्यस्यांते मंत्रमुच्चार्य सहस्रं जपेत्॥ अथ वेतालादिसिद्धिः॥ तदुक्तं भावचूडामणौ॥ भैरव उवाच·

६ श्येनविट्लवण॥

वेतालादिमहासिद्धिः कथं भवति चंडिके ॥ तन्मे कथय देवेशि यदि स्नेहोस्ति मां प्रति ॥ देव्युवाच॰ निंबवृक्षोद्भवं काष्ठं श्मशाने साधकोत्तमः ॥ भौमवारे मध्यरात्रौ गत्वा कुलयुगान्वितः ॥ खनित्वा चाष्टलक्षं वै जपेन्महिषमर्दिनीं ॥ तत्सहस्रं हुनेद्दत्स तत्रैव पितृकानने ॥ काष्ठमुद्धृत्य तस्मिन्वै दण्डपादुकं विह्नितं ॥ कृत्वा दुर्गाष्टमीरात्रौ श्मशाने निःक्षिपेत्ततः ॥ तस्योपरि शवं कृत्वा पूजयित्वा यथाविधि ॥ शवासनगतो धीरो जपेदष्टसहस्रकं ॥ ततो मातृबलिं दत्वा काष्ठमामंत्रयेत्ततः ॥ स्फें स्फें दृढ महाभाग योगिनीहृदयप्रिय ॥ मम हस्तगतो नाथ ममाज्ञां परिपालय ॥ एवमामंत्र्य वेतालं यत्र यत्र प्रयुज्यते ॥ तत्तच्चूर्णीविधायाथ पुनरायाति कौलिकं ॥ गच्छ २ दृढं तं गच्छ पादुके वरवर्णिनि ॥ मत्पादस्पर्शमात्रेण गच्छ त्वं शतयोजनं ॥ अथ लोहं समासाद्य पंचाशदंगुलाकृतिं ॥ खड्गं कृत्वा तत्र मंत्रं लिखित्वा प्रजपेन्मनुं ॥ तत्सहस्रं ततो हुत्वा महाशवकलेवरे ॥ खनित्वा जीवदृक्षाग्रे वह्नास्तु पंतु भावयेत् ॥ कुलाष्टम्यामर्द्धरात्रौ चितामध्ये समाहितः ॥ प्रीतिपूर्वं समामंत्र्य हुनेत्पितृवने ततः ॥ मधुरत्रयसंयुक्तं बिल्वपत्रेण संयुतं ॥ पादादिमूर्द्धपर्यंते होमांते बलिमाहरेत् ॥ बल्यंते परमामायादेवी महिषमर्दिनी ॥ त्वायाति बलिपूर्णास्या वरहस्ता हसन्मुखी ॥ गृह्ण वत्सेति शब्दं वै खड्गमुत्तोल्य धारयेत् ॥ घोरदंष्ट्रे महाकालि करवालस्वरूपिणी ॥ आं ग्रां ग्रीं ग्रूं ग्रैं ग्रौं ग्रः ईं ऊं कुरु २ मम कल्याणं विपक्षच्छेदविस्तरं ॥ एवमामंत्र्य खड्गं तु यमुद्दिश्य क्षिपेन्नरः ॥ छित्वा २ पुनश्छित्वा गच्छ साकर्षयेत्पुनः ॥ अथवा कृष्णमार्जारमेकघातेन घातयेत् ॥ कुजे चतुर्थ्यां रात्रौ निखनेन्मंत्रितं ततः ॥ तत्र मौञ्जीं समारोप्य यावल्लतात्र प्रजायते ॥ तावद्भक्षाद्धविष्यान्नं प्रतिरात्रं जपेद्धिभीः ॥ अष्टोत्तरसहस्रं तु एकाकी दीपवर्जितः ॥ उत्पन्नं पत्रमालोक्य छित्वा निष्छिद्रमानयेत् ॰ तत्र भुक्त्वा हविष्याशी तद्दिने तटिनीतटे ॥ तमानीय सुहृत्संगः क्षालयेन्मंत्रमुच्चरन् ॥ ततः स्रोतोमुखं वत्स पदस्थिप्रति गच्छति ॥ तदानीय जपेत्तत्र कालिकां घोरनिस्वनां ॥ अभिमंत्र्य सहस्रं तु कालीमंत्रं प्रयत्नतः ॥ सिद्धांजनो भवेन्मंत्री नात्र का

र्य्याविचारण॥ चंदनागुरुकस्तूरीमिश्रितंचास्थिघर्षितम्॥ कृत्वातिलकमादायसर्वंजयतिसाधकः॥ कुलमीनंकुलान्नंचकुलमद्यंकुलेश्व
रः॥ कुलस्थानेसमानीयदत्त्वादेव्यै प्रयत्नतः॥ अष्टोत्तरसहस्रंतुजप्त्वाभूमितलेस्थितः॥ भूमौफूत्कारमात्रेणविवरंतत्रजायते॥ शतयोजनदूरे
वायत्रसाध्यस्थितिर्भवेत्॥ तत्रैवगमनंतस्यभूतलांतःप्रसर्पिणः॥ एवंविवरमध्येतुगत्वास्यकुहरेपिवा॥ कायसंकोचमासाद्यगच्छत्यविकलो
नरः॥ दुर्गामंत्रंविनावत्सकालीमंत्रंतथैवच॥ सिद्धयःकुलनाथेशजायंतेनकथंचन॥ ॰ अथबालक संस्कारोयथा॰॥ मधुलाजाभ्यांना
डीछेदात्प्राक्स्वर्णशलाकया यज्ञदारुशिखयावाश्वेतदूर्वयावाबालकस्यजिह्वाग्रोष्ठंवादक्षिणपाणिना त्रिवारंसंमार्ज्यतत्रपितापंचाक्ष
रेणमूलमंत्रंविलिख्यदेवींपूजयेत्॥ तदुक्तमन्यसूक्ते॰ अथवामधुलाजाभ्यांजिह्वायांबालकस्यच॥ नाडीछेदात्प्राग्यथापूर्वंलिखेत्स्वर्णशला
कया॥ मूलमंत्रंलिखेन्मंत्रीयस्रोष्ठश्वेतदूर्वया॥ वाक्योच्चारण तोबालोवाग्मीद्रुतकविर्भवेत्॥ महोग्रतारांकल्पेतु॰ नैमित्तिकसंस्कारा
नंतरमेवमंत्रलिखनंकार्य्यं॥ तदुक्तमहोग्रे॥ जन्मसंस्कारकंनामपुत्रेजातेप्रशस्यते॥ जिह्वायांतुलिखेन्मंत्रंयज्ञदारुकुशेनवा॥ वार
त्रयंतुसंमार्ज्यदक्षिणेनैवपाणिना॥ मूलमुच्चार्य्यप्रत्येकंपंक्तिंकुर्य्यात्सुशोभनां॥ आदौसंस्कारःकर्त्तव्यस्तदंतेविलिखेन्मनुं॥ गंधचंदन
पुष्पैश्चपूजयेत्तारिणींशिवां॥ उत्तराभिमुखोभूत्वास्थापयेत्पीठमुत्तमं॥ पूजयेत्तारिणींदेवींबलिभक्ष्यैःसुशोभनैः॥ कविर्वाग्मीभवेत्पुत्रःस
त्यवादीजितेंद्रियः॥ अत्रतारिणीपदमुपलक्षणम्॥ देवीमात्रमेवबोद्धव्यं॥ बृहत्श्रीक्रमादितंत्रेबालकसंस्कारदर्शनात्तदुक्तम्॥ तत्रैव॰ बाल
कस्यतुजिह्वायांत्रिदिनाभ्यंतरावधिः॥ मधुनाश्वेतदूर्वाभिर्लिखेत्स्वर्णशलाकया॥ अमुंवाग्भवकूटंचलिखेद्वैजननांतरम्॥ एतेनाशौ
त्रिदिनाभ्यंतरमितिसूचितं॥ अमुमितिभैरव्यावाग्भवकूटमित्यर्थः॥ [illegible]कारदशाहेदेवतांसंपूज्यमंत्रंलिखेदितिकश्चित्॥ अथयदिपिता

दूरस्थोभवतितदापितृभ्योमातृतोवामंत्रंलिखेदिति॥तदुक्तंमहोग्रे।पितृभ्योनामलिखेन्मंत्रंमातृभ्योनामतथैवच॥पित्राएवलिखेन्मंत्रंनान्यएवकदाचन॥मातुःक्रोडेपिसंस्थाप्यदर्भानास्तीर्य्ययत्नतः॥शांतिंकुर्य्यात्तुबालस्यब्राह्मणैःसहसाधकः॥अथशांतिमंत्रोयथा॥इदंमंत्रंकामयन्तःकामयानाइहैवेतिदेवेभ्यःपुरस्तात्सर्वमिदंमज्जननं॥शिवशांतिस्तारायेकेशवेभ्यस्तारायैरुद्रेभ्यस्तारायैशिवायशिवयशसे॥इत्यनेनकुशोदकाभ्यांशांतिंकुर्य्यात्॥अथछागादिबलिः॥मुंडमालायां॥छागेदत्तेभवेद्वाग्मीमेषेदत्तेकविर्भवेत्॥महिषेधनसमृद्धिःस्यान्मृगेमोक्षफलंलभेत्॥पक्षिदानेमहासिद्धिर्गोधिकायांमहाफलं॥नरेदत्तेमहर्द्धिःस्यादष्टसिद्धिरनुत्तमाः॥एवंजानन्बलिंदद्यात्तस्योहिपरमेश्वरि॥सिंहव्याघ्रनरान्दत्वाब्राह्मणोनरकान्व्रजेत्॥इतिवचनाद्ब्राह्मणानांनरबलिदानेनाधिकारः॥तद्यथा॥चांडालबलिदानेनमहासिद्धिःप्रजायते॥ततःसुलक्षणंपशुंदेव्यग्रेसंस्थाप्य अर्घ्योदकेनसंप्रोक्ष्यअस्त्रेणसंरक्ष्यकवचेनावगुंठ्यधेनुमुद्रयामृतीकृत्यगंधपुष्पाक्षतैःपशुंसंपूज्यकर्णेइमंमंत्रंपठेत्॥ॐपशुपाशायविद्महेविश्वकर्म्मणेधीमहि॥तन्नोजीवःप्रचोदयात्॥ततोह्रींकालि२वज्रेश्वरिलोहदंडायैनमः इतिमंत्रेणखड्गंपूजयेत्॥ततःखड्गस्याग्रमध्यमूलक्रमेणपूजयेत्॥यथाह्रूंवागीश्वरीब्रह्मभ्यांनमः॥ह्रूंलक्ष्मीनारायणाभ्यांनमः॥ह्रूंउमामहेश्वराभ्यांनमः॥ततोब्रह्मविष्णुशिवशक्तियुक्तायखड्गायनमः इतिसर्वत्रपूजयेत्॥ॐखड्गायखरनाशायशक्तिकार्य्यार्थतत्पर॥पशुश्छेद्यस्त्वयाशीघ्रंखड्गनाथनमोस्तुते॥ततोमहावाक्यंकृत्वा॥अमुकदेवताप्रीतिकामोऽमुकदेविइमंपशुंतुभ्यमहंसंप्रददे ततोनिवेदयेत्॥यथोक्तेनविधानेनतुभ्यमस्तुसमर्पितं॥ततोबलिंदद्यात्॥ततोरुधिरंसमांसंदेव्यैदद्यात्॥रुधिरदानेस्थाननियमःकालिकापुराणे॥छागंतुवामतोदद्यान्महिषंतुभवेत्पुरः॥दक्षिणेवाततोदद्यादग्रतोदेहशोणितं॥तथा॥सौवर्णेराजतेताम्रेकांस्याधारेतथै

तं॰सा॰
२३२

वच॥ निधाय देव्यै दद्यात्तु तद्रक्तं मंत्रपूर्वकं॥ ततोऽवशिष्टं बटुकादिभ्यो बलिं दद्यात्॥ यथा॥ ह्रे ह्रूं वां बटुकाय नमः इति गंधादिभिः संपूज्य पूर्वमं
त्रेण वायव्ये बलिं दद्यात्॥ ह्रूं यां योगिनीभ्यो नमः इति संपूज्य ईशाने पूर्वमंत्रेण बलिं दद्यात्॥ ह्रूं क्षां क्षेत्रपालाय नमः इति संपूज्य आग्नेये पूर्वमं
त्रेण बलिं दद्यात्॥ ह्रूं गां गणपतये नमः इति संपूज्य नैर्ऋते पूर्वमंत्रेण बलिं दद्यात्॥ गात्ररुधिरदाने तु॥ नाभेरधस्ताद्रुधिरं पृष्ठभागस्य च
प्रिये॥ स्वगात्ररुधिरं दद्यान्न कदाचित्तु साधकः॥ ओष्ठस्य चिबुकस्यापि नेंद्रियाणां तथैव च॥ कंठाधो नाभितश्चोर्ध्वं हृद्भागस्य प्रयत्नतः॥ पार्श्वयो
श्चापि रुधिरं दुर्गायै च निवेदयेत्॥ न च रोगादि संभूतं नान्यघाताच्च भैरव॥ फलं तु कुमारीकल्पे॥ गृहीत्वा शोणितं पात्रे स्वकीयहृदयोद्भवं॥ पूजयेत्त्रि
पुरां देवीं सर्वसौभाग्यहेतवे॥ तथा॥ स्वगात्ररुधिरं दत्वा नीत्वा राजत्वमाप्नुयात्॥ यः स्वहृदयसंजातं मांसं मा षप्रमाणतः॥ तिलमुद्गप्रमाणं वा
दद्याद्भक्तियुतो नरः॥ षण्मासाभ्यंतरे तस्य काममिष्टमवाप्नुयात्॥ अन्यच्च॥ मद्यं दत्वा महादेव्यै ब्राह्मणो नरकं व्रजेत्॥ स्वगात्ररुधिरं दत्वा आ
त्महत्यामवाप्नुयात्॥ इति बलिविधिः॥ अथ कुलाचारो निरूप्यते॥ कालीतंत्रे०॥ अथाचारं प्रवक्ष्यामि यत्कृतेऽमृतमश्नुते॥ सर्वभूतहिते युक्तः स
मयाचारपालकः॥ अनित्यकर्मसंत्यागी नित्यानुष्ठानतत्परः॥ मंत्राराधनमात्रेण शिवभावेन तत्परः॥ परस्यां देवतायां तु सर्वकर्मनिवेद
कः॥ कुलस्त्रीवीरनिंदां च तद्द्रव्यमपहारणं॥ स्त्रीषु रोषं प्रहारं चैव वर्जयेन्मतिमान्सदा॥ स्त्रीमयं च जगत्सर्वं स्वयं तावत्तथा भवेत्॥ पेयं च
वीर्यं तथा चोष्यं भक्ष्यं लेह्यं गृहं सुखं॥ सर्वं च युवतीरूपं भावयेन्मतिमान्सदा॥ कुलजां युवतीं वीक्ष्य नमस्कुर्यात्समाहितः॥ यदि भाग्यवशा
द्देवि कुलदृष्टिः प्रजायते॥ तदैव मानसीं पूजां तत्र तासां प्रकल्पयेत्॥ तासां भगादि देवीनां॥ नास्तु॥ भगिनी भगजिह्वा च भगास्या भगमालिनी
॥ भगरेता भगाक्षी च भगकर्णा भगात्वचा॥ भगनासा भगस्तनी भगस्था भगभूषणी॥ संपूज्य नाम्नो गंधाद्यैर्मानसैर्गुरुमेव च॥ नमस्कृत्य प्रमानेवं सम

रम
२३२

स्वेतिननः सुधीः॥ बालांवायौवनोन्मत्तांवृद्धांवासुंदरींतथा॥ कुत्सितांवामहादुष्टांनमस्कृत्यविभावयेत्॥ तासांप्रहारंनिंदांचकौटिल्यमप्रि
यंतथा॥ सर्वथाचनकर्तव्यंचान्यथासिद्धिरोधकृत्॥ स्त्रियोदेवाःस्त्रियःप्राणाःस्त्रियश्चैवविभूषणं॥ स्त्रीसंगिनासदाभाव्यमन्यथास्वस्त्रिया
मपि॥ विपरीतरतासातुभाविताहृदयोपरि॥ तद्धस्तरचितंपुष्पंतद्धस्तरचितंजलं॥ तद्धस्तावचितंभोज्यंदेवताभ्योनिवेदयेत्॥ स्त्रीद्वेषोनैवक
र्तव्योविशेषात्पूजनेमहत्॥ जपस्थानेमहाशंखवन्निवेश्योर्द्धंजपंचरेत्॥ स्त्रियंगच्छन्स्पृशन्पश्यन्विशेषात्कुलजांशुभां॥ भक्षन्तांबू
लमन्नाद्यंभक्ष्यद्रव्याण्यथारुचीन्॥ भक्ष्याद्यशेषभक्ष्याणिभुक्त्वाशेषंजपंचरेत्॥ वीरतंत्रे॰ दिक्कालनियमोनात्रस्थित्यादिनियमोनच॥ ज
पेनकालनियमोनार्चादिषुबलिष्वपि॥ स्वेच्छानियमउक्तश्चमहामन्त्रस्यसाधने॥ वस्त्रासनेदेहगेहसंस्पर्शादिनिवारितः॥ शुद्धिंनचा
चरेत्तत्रनिर्विकल्पंमनश्चरेत्॥ कुलार्णवेपि॥ कुलाचारगृहंगत्वाभक्त्यापापविशुद्धये॥ याचयेदमृतंकौलंतदभावेजलंपिबेत्॥ कु
लाचारेणयत्कृत्वादत्तंपात्रंतुभक्तितः॥ नमस्कृत्यतुगृह्णीयादन्यथानरकंव्रजेत्॥ अन्यत्रापि॰ नवृथागमयेत्कालंद्यूतक्रीडादिना
सुधीः॥ गमयेद्देवतापूजाजपयागस्तवादिना॥ वीराणांजपयागस्तुसर्वकालेप्रशस्यते॥ सर्वदेशेसर्वपीठेकर्तव्योनात्रसंशयः॥ प्रत्यक्षे
वापरोक्षेवाप्रत्यहंप्रणमेद्गुरुं॥ नवदेच्छ्रीगुरोर्नामजपादन्यत्रतुप्रिये॥ श्रीनाथदेवस्वामीतिविवादेसाधनेवदेत्॥ शिवागमे॰ शिवःशक्तिः
शक्तिःशिवःशक्तिर्ब्रह्माजनार्दनः॥ शक्तिरिंद्रोरविःशक्तिःशक्तिश्चंद्रोग्रहाध्रुवं॥ शक्तिरूपंजगत्सर्वंयोनजानातिपातकी॥ वीरतंत्रे॥ स्नानादि
मानसंशौचंमानसःप्रवरोजपः॥ पूजनंमानसंदिव्यंमानसंतर्पणादिकं॥ सर्वएवशुभःकालोनाशुभोविद्यतेक्वचित्॥ नविशेषोदिवारात्रौ
नसंध्यायांमहानिशि॥ सर्वदापूजयेद्देवीमस्नातःकृतभोजनः॥ महानिश्यशुचौदेशेबलिमंत्रेणदापयेत्॥ यत्तु॥ रात्रावेवमहापूजाकर्तव्या

वीरवंदिते॥नदिनेसर्वथाकार्य्याशासनान्ममसुव्रते॥तत्कुलपूजाविषयं॥महानिशातुतत्रैव॥अर्द्धरात्रात्परंयच्चमुहूर्त्तद्वयमेवच॥सामहारात्रिरुद्दिष्टातत्कृतंचाक्षयंभवेत्॥गांधर्वे॥पृथ्वीऋतुमतींवीक्ष्यसहस्रंयदिनित्यशः॥तदावादीसुसिद्धांतहतःक्षितितलेव्रजेत्॥नित्यइतिषोडशदिनंयावत्॥पर्वतेहस्तमारोप्यनिर्भयोयतमानसः॥कवितांलभतेसोपिअमृतत्वंचगच्छति॥अत्रापिसहस्रमितिसंबंधः॥पृथ्वीकुलपर्वतस्तंभ॥अन्यच्चनीलतंत्रे॥पद्मंदृष्ट्वातथाबिंबखंजनंशिखरंतथा॥चामरंरविबिंबंचतिलपुष्पंशिरोरुहं॥त्रिशूलंवीक्ष्यजप्त्वाचशतशःशुद्धभावतः॥सुखप्रसादंसुमुखंसुलोचनंसुहास्यकं॥सुवेशंसुगतिंगंधंसुगंधंसुखमेवच॥लभतेचयथासंख्यंशृणुपार्वतिसादरं॥पद्मसुखंतन्त्रधरंचक्षुर्मस्तककेशंसिंदूरंनासिकानाभिंत्रिवलीमितिबोद्धव्यं॥भावचूडामणौ॥एकाकीनिर्जनेदेशेश्मशानेविजनेवने॥शून्यागारेनदीतीरेनिःशंकोविहरेत्सदा॥महाचीनद्रुमेदेवींध्यात्वातत्रप्रपूजयेत्॥तद्द्रुमोत्थितपुष्पेणपूजयेद्भक्तिभावतः॥सभवेत्कुलदेवस्यकुलक्रमगतःशुचिः॥ब्रह्मतरोर्म्महापद्मेदेवींध्यात्वायथाविधि॥तत्सुधारसधारेणतर्प्पयेत्मातृकानने॥महाचीनद्रुमलतावेष्टितःसाधकोत्तमः॥रात्रौयदिजपेन्मंत्रंसेवकस्यलताभवेत्॥तिथिक्रमेणसंख्याभिर्लताभिर्वेष्टितोयदि॥तदामासेनसिद्धिःस्यात्सहस्रजपमानतः॥अष्टम्यांचचतुर्दश्यांद्विगुणंयदिदृश्यते॰तत्रैवमहतीसिद्धिर्देवतानांसुदुर्लभा॥कुलचूडामणौ॥शृणुपुत्ररहस्यंमेसमयाचारसंभवं॥येनहीनानसिद्ध्यंतिजन्मकोटिसहस्रशः॥मनवःकुलशास्त्राणांकुलचर्यानुचारिणां॥उदारचित्तःसर्वत्रवैस्वाचाररतःपरः॥परनिंदासहिष्णुःस्यादुपकाररतस्तथा॥पर्वतेविपिनेवापिनिर्जनेशून्यमंडपे॥चतुष्पथेजनशून्येयदिदैवाद्गतिर्भवेत्॥क्षणंध्यात्वामनुंजप्त्वानत्वागच्छेद्यथासुखं॥गृध्रंवीक्ष्यमहाकालींनमस्कुर्य्याद्दलक्षितः॥क्षेमं

करीं तथा वीरस्यजंबुकीं यमदूतिकां॥कुररं श्येनभूकाकौ कृष्णमार्जारमेव च॥कृशोदरि महाचंडे मुक्तकेशि बलिप्रिये॥कुलाचारप्रसन्नास्ये नमस्ते शंकरप्रिये॥श्मशाने च शवं दृष्ट्वा प्रदक्षिणमनुव्रजन्॥प्रणम्यानेन मंत्रेण मंत्री सुखमवाप्नुयात्॥घोरदंष्ट्रे करालास्ये किटिशब्दप्रनादिनि॥घोरे घोररवास्फाले नमस्ते चितिवासिनि॥रक्तवस्त्रं तथा पुष्पं विलोक्य त्रिपुरात्मिकां॥प्रणमेद्दंडवद्भूमौ इमं मंत्रं पठेन्नरः॥बंधूकपुष्पसंकाशे त्रिपुरे भयनाशिनि॥भाग्योदयसमुत्पन्ने नमस्ते वरवर्णिनि॥कृष्णवस्त्रं तथा पुष्पं राजानं राजपुत्रकं॥हस्त्यश्वरथशस्त्राणिकं नकान्वीरपुरुषान्॥महिषं कुलदेवं च दृष्ट्वा महिषमर्दिनीं॥प्रणम्य जयदुर्गां वा स च विघ्नैर्न लिप्यते॥जयदे वि जगद्धात्रि त्रिपुराद्ये त्रिदेवते॥भक्तेभ्यो वरदे देवि महिषघ्नि नमोस्तु ते॥मद्यभांडं समालोक्य मत्स्यमांसं वरस्त्रियं॥दृष्ट्वा च भैरवीं देवीं प्रणम्य विसृजन्मनुम्॥घोरविघ्नविनाशाय कुलाचारसमृद्धये॥नमामि वरदे देवि मुंडमालाविभूषिते॥रक्तधारासमाकीर्णवदने त्वां नमाम्यहं॥सर्वविघ्नहरे देवि नमस्ते हरवनाशाय कुलाचारसमृद्धये॥नमामि वरदे देवि मुंडमालाविभूषिते॥रक्तधारासमाकीर्णवदने त्वां नमाम्यहं॥सर्वविघ्नहरे देवि नमस्ते हरवल्लभे॥एतेषां दर्शने नेतु यदि नैवं प्रकुर्वते॥शक्तिमंत्रं पुरस्कृत्य न तस्य सिद्धिर्न जायते॥एतेषां चैव दुष्टात्मा मारणोच्चाटनादिषु॥कुरुते यदि पापात्मा मद्भक्तः सकष्टं भवेत्॥तथा कुलचूडामणौ॰ कुलवारे कुलाष्टम्यां चतुर्दश्यां विशेषतः॥योगिनीपूजनं चैव प्रधानं कुलपूजनं॥यथा विष्णुतिथौ विष्णुः पूजितो वांछितप्रदः॥तथा कुलतिथौ दुर्गा पूजिता वरदायिनी॥कुलवारादिनियमस्तु यामले॰ रविश्चंद्रो गुरुः शौरिश्चत्वारश्चाऽकुला इमे॥भौमशुक्रौ कुलाख्यौ तु बुधवारः कुलाऽकुलः॥द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम्॥विषमाश्चाकुलाः सर्वाः शेषाश्च तिथयः कुलाः॥वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतं॥कुलानि समयुग्मानि शेषाण्येवाकुलानि च॥तिथिवारे च नक्षत्रे अकुले स्थापिनोऽजयः॥कुलाख्ये जयिनो नित्यं साम्यं चैव कुलाकुले॥एवं कुलवारादिकं ज्ञात्वा साधकः कर्म कुर्यात्॥अथ शिवाबलिः॥ कुलचूडामणौ॰॥बिल्वमूले प्रांतरे वा श्मशाने वापि साधकः॥मांसप्रधानं नैवेद्यं संध्याकाले निवे

२ भयमितिप्रत्यंतरे॥

दयेत्॥ कालि कालीति वक्तव्ये न त्रोमा शिवरूपिणी॥ पशुरूपधरा याति परिवारगणैः सह॥ भुक्त्वा रौति यदैशान्यां मुखमुन्नोल्य सुस्वरं॥ तदैव मंगलं तस्य नान्यथा कुलदूषणं॥ अवश्यमन्नदानेन नियतं तोषयेच्छिवां॥ नित्यश्राद्धं तथा संध्यावंदने पितृतर्प्पणे॥ तथैव कुलसेव्यानां नित्यता कुलपूजने॥ पशुरूपां शिवां देवीं यो नार्चयति निर्जने॥ शिवारावेण तस्याशु सर्वं नश्यति निश्चितं॥ जपपूजाविधानानि यत्किंचित्सुकृतानि च॥ गृहीत्वा शाधुमादाय शिवा रोदिति निर्जने॥ एकया भुज्यते यत्र शिवया यदि भैरव॥ तत्रै सर्वशक्तीनां प्रीतिः परमदुर्लभा॥ पशुशक्तिः पक्षिशक्तिर्नरशक्तिर्यथाक्रमात्॥ पूजनाद्द्विगुणं कर्म सगुणं साधयेद्यतः॥ तेन सर्वप्रयत्नेन कर्त्तव्यं पूजनं महत्॥ राजादिभयमापन्ने देशांतरभयादिके॥ शुभाशुभानि कर्म्माणि विचिंत्य बलिमाहरेत्॥ गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि॥ शुभाशुभफलं व्यक्तं ब्रूहि गृह्ण बलिं नव॥ एवमुक्त्वार्घ्यदानं यो बलिः कुलजनप्रियः॥ यदि नो भुज्यते वत्स न दानेव शुभं भवेत्॥ शुभं यदि भवेत्तत्र भुज्यते तेन रशेषतः॥ एवं ज्ञात्वा महादेवि शांतिस्वस्त्ययनं चरेत्॥ इति शिवाबलिः॥ कुलवर्त्म सर्वत्र गोपनीयं॥ तथा तंत्रे॥ निर्जने चैव कर्त्तव्यं न चैव जनसन्निधौ॥ किंवा पक्षिपतंगादिदर्शने नैव कारयेत्॥ पातालमंडपे वापि गह्वरेषु नियंत्रिते॥ निश्छिद्रमंडपे वापि कर्त्तव्यं न च सन्निधौ॥ कुलपुष्पं कुलद्रव्यं कुलपूजा कुलं जपं॥ कुलं कुलपतिं चैव कुलमालाकुलाकुलं॥ कुलचक्रं कुलध्यानं सर्वं यानं प्रकाशयेत्॥ प्रकाशात्सिद्धिहानिः स्यात्प्रकाशान्निधनादिकं॥ प्रकाशान्मंत्रनाशः स्यात्प्रकाशात्कुलहिंसनं॥ प्रकाशान्मृत्युलाभः स्यान्न प्रकाश्यं कदाचन॥ पूजाकाले च देवेशि यदि कोप्यत्र तिष्ठति॥ दर्शयेद्वैष्णवीमुद्रां विष्णुन्यासं ततः परम्॥ प्रकाशाद्यदि गुप्तिः स्यात्तत्प्रकाशान्न दूषणं॥ गोपनेयदि व्यक्तिः स्यान्न गुप्तिः सा विधीयते॥ कदाचिदिह हानिस्तु न च[illegible]ः कदाचन॥ वरं पूजा न कर्त्तव्या न च व्यक्तिः कदाचन॥ इति कु

४ देवेति ग्रन्थांतरे॥

२ गच्छतीति ग्रंथांतरे॥

लाचारः॥अथप्रातःकृत्यं॥साधकःप्रातरुत्थायकुलवृक्षंप्रणम्यच॥कुलवृक्षायथा॥पादाघातादशोकोवदनमदिरयाकेशरःकर्णि-
कारःश्रीचूतोवीक्ष्यदोर्भ्यांतिलकतरुतमेतुपीनसारश्लगीत्या॥संलापोत्कर्णिकारःकुरुवककतरुरालिंगनात्सिंधुवारःकादंबःकामिनीनांमु-
दृपत्तिनिपतनस्पर्शनाच्चपशाखं॥तथाचश्रुतिः॥दशकुलवृक्षाणामनुपल्लवः॥श्लेष्मातककरंजौचबिल्वाश्वत्थकदंबकाः॥निंबोवटोदु-
बरोचधात्रीचिंचादशस्मृताः॥मूलादिब्रह्मरंध्रांतंकुलध्यात्वागुरुंस्मरेत्॥प्रह्लादानंदनाथाख्यंसनकानंदमेवच॥कुमारानंदनाथा-
ख्यंवशिष्ठानंदनायकं॥क्रोधानंदसुखानंदौज्ञानानंदस्ततःपरं॥बोधानंदमथाभ्यर्च्यध्यायेत्कुलमुखोपरि॥महारससरोल्लाससहृद-
यानंदलोचनाः॥कुलालिंगननिर्भिन्नघूर्णिताशेषतामसाः॥कुलशिष्यैःपरिवृताःपूर्णान्तःकरणोद्यताः॥वराभयोद्यतकराःकुलतंत्रा-
र्थवेदिनः॥एवंकुलगुरून्ध्यात्वाविमृश्यकुलनायिकां॥कुलस्थानंसमासाद्यस्नानार्थंतीर्थमाश्रयेत्॥कुलस्नानम्॥कुलचूडामणौ॥
आचांतःकुलदर्भेणसदर्भैःकुलपुंड्रकः॥कुलपात्रंसदूर्वंहिसतिलंसजलंततः॥गृहीत्वाकुलदेव्याश्चप्रीतयेस्नानमाचरेत्॥कृतसं-
कल्पएवासौकुलचक्रंजलेन्यसेत्॥कुलस्थानात्समानीयकुलमुद्रांकुशेनच॥कुलतीर्थानितत्रैवसमावाह्यशिवात्मकं॥ततोयंचद्विधाकृ-
त्वात्रिधाचप्रोक्षणंततो॥स्वतंत्रेपि॥मूलंपठन्मूर्द्धितोयंमुद्रयाकुंभसंज्ञया॥सिद्धाचारत्रयंदेविस्नानाचामेत्साधकाग्रणीः॥आत्मविद्या-
शिवेस्नात्वैस्नातोन्यच्चसमाचरेत्॥प्रायश्चित्तंभृगोःपातंसन्यासंव्रतधारणं॥तीर्थयात्राभिगमनंकौलःपंचविवर्जयेत्॥ज्ञानार्णवे॥कुलसूर्याय-
देवायत्रिरर्घ्यंतुप्रदापयेत्॥देवानृषीन्पितॄंश्चैवतर्प्पयेत्कुलवारिणा॥अथद्वितीयायामोनिरूप्यते॥तत्रादौविजयास्वीकारः॥तथाचविजया-
कल्पे॥संविदासवयोर्मध्येसंविदेवगरीयसी॥संवित्प्रयोगस्तेनेहपूजादौसाधकोत्तमैः॥कर्तव्याचमहापूजाकरणीयासुनिश्चितैः॥अयं

८ चूर्णितेतिप्रत्यंतरे॥८

प्रयोगः पूजादौ कुलीनैः सर्वत्र कर्तव्यः॥ अन्यत्रापि॥ आनंदेन विनाशोधेन न तृप्यंति देवताः॥ सा च ब्राह्मणी क्षत्रिया वैश्या शूद्रा॥ शुक्ला रक्त
पीतकृष्णा पुष्पभेदैः स्तासां शुद्धिस्तत्रैव॰ ॐ संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे॥ भैरवाणां च तृप्त्यर्थं पवित्रा भव सर्वदा॥ ॐ ब्राह्मण्यै नमः स्वा
हा॥ इति शोधयेत्॥ ॐ सिद्धिमूलकरे देवि मूलबोधप्रदायिनि॥ राजपुत्रि वशंकरि शत्रुकंठत्रिशूलिनि॥॥ ऐं क्षत्रियायै नमः स्वाहा शोधयेद
परां ततः॥ ॐ अज्ञानेंधनदीप्ताग्निज्ञानाग्निज्वलरूपिणि॥ आनंदाज्याहुतिप्रीतिसम्यग्ज्ञानप्रयच्छ मे॥ ह्रीं वैश्यायै नमः स्वाहा वै
श्यां च शोधयेत्॥ ॐ नमस्यामि महामाये योगमार्गप्रवर्तिनी॥ त्रैलोक्यविजये मातः समाधिफलदा भव॥ क्लीं शूद्रायै नमः स्वाहा शूद्रां च शोधयेत्त
तः॥ अमृते अमृतोद्भवेमृतवर्षिणि परं ततः॥ अमृतमाकर्षय हूं हूं सिद्धिं देहि ततः परम्॥ अमुकं मे ततो ब्रूयाद् वशमानय ततः परम्॥ हृदंतोयं मनुः प्रो
क्तः सर्वासामिह शोधने॥ प्रत्येकेन तु मंत्रेण शोधयेद्वानेन समुदायं शोधयेत्॥ उत्तरतंत्रे॥ मूलमंत्रं सप्तवारं तस्योपरि नियोजयेत्
॥ध्यायेद्यथा॥ कालिंदीजलसंदोहकान्तिसन्तापहारिणी॥ वराभयसमायुक्तां सव्येतरभुजद्वयं॥ नानारोगहरां रौद्रीं सर्वसौख्यप्रदा
यिनीं॥ विजयां तामहं वंदे दुर्गां दुर्गार्तिहारिणीं॥ आवाहनादिमुद्रां च धेनुयोनिं ततः परं॥ दिग्बंधनं छोटिकाभिस्तालत्रयपुरःसरं॥ दि
व्यदृष्ट्या पार्ष्णिघातैः सर्वान् विघ्नान्निरस्य च॥ सम्प्रधान तर्प्पयेद्ब्रह्मरंध्रे मूलं जपेन्मनुं॥ गुरुं पद्मे सहस्रारे तथा संकेतमुद्रया॥ त्रिवारं
तर्प्पयेद्धृत्वा साधकः सिद्धिहेतवे॥ मूलमिष्टदेवतामंत्रमुच्चार्यामुकदेवतां तर्प्पयामि॥ एवं गुरुं च॥ ततः संकेतमुद्रया तत्त्वमुद्रया वा तत् २३५
त्स्वीकुर्यात्॥ ॥ तथा च ऐं वद२ परं ब्रूयाद्वाग्वादिनि पदं ततः॥ मम जिह्वाग्रे स्थिरीतिभव सर्वपदं ततः॥ सर्वसत्त्ववशंकरि स्वाहा

ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतमाकर्षयाकर्षय सिद्धिं देहि देहि श्रीमदमुकदेवताइदं मे वशमानय स्वाहा॥ इति तदुपरि सप्रधा मूलं च जप्त्वा धेनुयोनिं प्रदर्श्य॥ ८॥

॥ऐंवद्वद्वाग्वादिनीममजिह्वाग्रेस्थिरीभवसर्वसत्ववशंकरिस्वाहा१ ॥कापालि कीतिप्रत्यंतरे॥६

मंत्रेणंजुहुयान्मुखे॥तंत्रचूडामणौ॰विनाहेतुकमासाद्यक्षोभयुक्तोमहेश्वरः॥नपूजांमानसंकुर्यान्नध्यानंनापिचिंतनं॥तस्माद्भुक्त्वाचपीत्वा
चपूजयेत्परमेश्वरीं॥पीत्वेतिविजयामेवप्रकरणात्॥ओंसुमिद्रस्फूलिंनीदेवीविजयाचर्चितापरा॥अमृतातुलसीतुंगातेजोमयीसुरेश्वरी॥ए
तानिदशनामानिविजयाहस्तगःपठेत्॥दुःखदारिद्रनाशंचभवेत्तस्यवदाम्यहं इतिनमेत्॥अथयजनप्रकारः॥तत्रादौरात्रिप्रहरेगते
तांबूलपूरितमुखःसत्कुलनायिकांपूजयेत्॥उत्तरतंत्रे॰॥याममात्रेगतेरात्रौकुलगेहंततःपुमान्॥तांबूलपूरितमुखोधूपामोदसुगंधितः
॥रक्तचंदनदिग्धांगोरक्तमाल्यानुलेपितः॥रक्तवस्त्रपरीधानोलास्यरसगृहेगतः॥रक्तमाल्येनसंवीतोरक्तपुष्पविभूषितः॥पंचीकरणसंकेतैः
पूजयेत्कुलनायिकां॥कुलनायिकायथा॥तदुक्तंतंत्रेव॥नटीकपालिनीवेश्यापुष्पशीनापितांगना॥रजकीरंजकीचैवसैरंध्रीचसुवासिनी॥घ
टिकारवटिकाचैवतथागोपालकन्यका॥विशेषवैदग्ध्ययुताःसर्वाएताकुलांगनाः॥गुरुभक्तादेवभक्ताघृणालज्जाविवर्जिताः॥संगोप
नरताःप्रायस्तरुण्यःसर्वसिद्धिदाः॥अस्तताचारसंपन्नांशीलसौभाग्यशालिनीं॥सदानुष्ठाननिरतांसात्विकींभक्तिसंयुतां॥कालुष्यरहि
तांकुर्यात्स्वभार्यांभक्तवत्सलां॥चातुर्य्यौदार्य्यदाक्षिण्यकरुणादिगुणान्वितां॥रूपयौवनसंपन्नांशीलसौभाग्यशालिनीं॰सदापरिगृही
तांवायद्वासंकेतमागतां॥अथवातत्क्षणेयातांमदनानलतापितां॥विलिप्तांरक्तगंधेनरक्तांबरविभूषितां॥सुगंधिरक्तकुसुमांसर्वाभ
रणभूषितां॥सुधूपधूपितांतन्वींदूतीकर्मसुयोजयेत्॥कुमारीतंत्रे॥नटींकपालिनींवेश्यांरजकींनापितांगनांब्राह्मणींशूद्रकन्यांचतथा
गोपालकन्यकां॥मालाकारस्यकन्यापिनवकन्याःप्रकीर्तिताः॥ब्राह्मणीतुब्राह्मणविषयम्॥आनीयचैवयजेत्तांतुप्रसूनतूलिकोपरि॥चार्वंगीं
विकृतांगींवासविकल्पकमानसीं॥वर्षीयसीपापरतांहूंकारीमद्यलोलुपा॥अभक्तामलसांदीनांवर्जयेत्साधकोत्तमः॥अथोद्वाकामतोवा

२ एवंभूतामिति प्रत्यंतरे॥ २ यंगांगीमिति प्रत्यंतरे॥

पिबेत्स्याद्पिचयोनरः॥लिंगयोनिरतोमंत्रीरौरवान्ननिवर्तते॥उपदिष्टायदादेविनदासुत्रीतुकन्यका॥पूजार्होचपदादेवीतदामातानसंशयः
॥एवंविधंकुलमानीयउद्वर्तनादिकंविधायप्रसूनतूलिकोपरिनियोजयेत्॥अथोतरतंत्रे॥तदानीयकुलंसम्यगुद्वर्तनमनंतरम्॥स्ना
नंशुक्लदुकूलादिअनुलेपेनशोभितं॥अलंकृतंसमानीयस्वागतंचासनंतथा॥निवेश्यतूलिकामध्येनानापुष्पसुगंधिना॥चंदनागुरुकर्पूरक
स्तुरीकुंकुमादिभिः॥समाकीर्णेनिवेश्याथपूजयेत्कुलनायिकां॥ततोभूतशुद्ध्यादिकंविधायतत्तत्कुलांगन्यासंकुर्यात्॥यथा॥अंगन्या
सकरन्यासौप्राणायामस्ततःपरं॥विधायमातृकान्यासंकुलांगेपिप्रविन्यसेत्॥ततःपंचमकारमानीयशोधनंकुर्यात्॥अथदेवद्रव्य
स्यशोधनं॥प्रोक्षणादिकंकृत्वाहंसःइतिजप्त्वाततः॥एकमेवपरंब्रह्मस्थूलसूक्ष्ममयंध्रुवं॥कचोद्भवांब्रह्महत्यांतेनतेनाशयाम्यहं॥
सूर्यमण्डलसंभूतेवरुणालयसंभवे॥अमाबीजमयेदेविशुक्रशापाद्विमुच्यतां॥वेदानांप्रणवोबीजंब्रह्मानंदमयंयदि॥तेनसत्येन
तेदेविब्रह्महत्यांव्यपोहतु॥ॐवांवींवूंवैंवौंवःब्रह्मशापविमोचितायैसुरायैदेव्यैनमः॥इतितदुपरिदशधाजपेत्॥ॐह्रींश्रींक्रांक्रींक्रूं
क्रैंक्रौंक्रः कृष्णशापंविमोचयअमृतंश्रावयस्वाहा इतिदशधाजपेत्॥ॐशांशींशूंशैंशौंशःशुक्रशापविमोचितायैसुरादेव्यैनमः इति
दशधाजपेत्॥ततोमूलमंत्रंतदुपरिअष्टधाजपेत्देवतामयंविभावयेत्॥इतिद्रव्यशुद्धिः॥एतद्द्रव्यदानंतुशूद्रस्यैव॥तथाचश्रीक्रमे०
नदद्याद्ब्राह्मणोमद्यंमहादेव्यैकथंचन॥वामकामोब्राह्मणोपिमद्यंमांसंनभक्षयेत्॥देव्यास्तुदक्षिणेभागेचक्रपार्श्वेनिवेदयेत्॥एतद्द्र
व्यंतुशूद्रस्यनान्येषांतुकदाचन॥वैश्यस्यमाक्षिकंशुद्धंक्षत्रियस्यतुसाज्यकं॥ब्राह्मणस्यगवांक्षीरंताम्रेवाविसृजेन्मधु॥नारिकेलोदकंकांस्ये
सर्वेषांद्रव्यशोधनं॥क्षत्रियवैश्ययोस्तुगौडीमाध्वीचदातव्येतत्रतयोरधिकारात्तदभावेऽनुकल्पविधानं॥तथाच० गोक्षीरंब्राह्मणोदद्या

ह्रांह्रींह्रूंह्रैंह्रौंह्रःइतिपुस्तकांतरे॥५॥

धा
धा

२पैष्ट्यमितिप्रत्यंतरे॥ १पौष्ट्या दिकमितिप्रत्यंतरे॥१ २मादकंकर्मसंभेदाद्वर्ज्यमासीत्सुलोचने इतिप्रत्यंतरे पाठः॥२

द्रव्यमाज्यंचबाहुजः॥वैश्यस्यमाक्षिकंद्रव्यंशूद्रःपैष्ट्यादिकंपुनः॥तेनशूद्रस्याप्यनुकल्पः॥कुलार्णवे०जलक्षीरघृतंभद्रेमधुमैरेय
मैक्षवं॥पौष्टंतरुभवंधान्यसंभवंचक्रनिर्मितं॥सहकारभवंदेवित्रिविधंबहुभेदकं॥मादकंसर्वदावर्ज्यंमद्यंमांसंसुलोचने॥ज्ञानेनसंस्कृतंतन्न
तुमहापानकनाशनं॥ तदृतेपानकाभावोद्रव्यभावविषयंवा॥ ॥माकंदफलजंरसंद्रव्यंसेव्यंद्विजातिभिः॥अमादकत्वाद्देवेशिऐक्षवंसेव्य
नैर्बुधैः॥एतेनक्षत्रियादिभिरमादकंसेव्यमादकस्यपाप हेतुकत्वमुक्तम्॥भैरवतंत्रे० मद्यंमांसंविनायस्तुयत्किंचित्कुलसाधकः॥श
क्त्यैदत्वाततःशेषंगुरवेतन्निवेदयेत्॥ तदनुज्ञांमूर्ध्निकृत्वाशेषमात्मनियोजयेत्॥तेनक्षत्रियादीनांमुख्यस्यदानेधिकारः॥नपानेऽयतु
पीत्वापीत्वापुनःपीत्वायावत्पततिभूतले॥उत्थायचपुनःपीत्वापुनर्जन्मनविद्यते॥भैरवतंत्रे॥पानेभ्रांतिर्भवेद्यस्यघृणास्याद्रक्तरेतसोः
॥शुचौचाशुद्धताभ्रांतिःपापशंकाचमैथुने॥सभ्रष्टःपूजयेद्देवींचंडीमंत्रकथंजपेत्॥तथा॥मदिरायांमैथुनेचजातिंवृत्तिंनचाचरेत्॥एत
नुचतुर्थाश्रमिपरं॥तद्द्रव्यकरणेजातिवृत्तिचिंतांनकारयेत्॥एतेषांशोधनस्यचावश्यकत्वात्॥तथाच॥संशोधनमनाचर्यस्त्रीषुमध्ये
षुसाधकः॥आचार्यसिद्धिहानिःस्यात्क्रुद्धाभवतिसुंदरी॥मध्येषुमुख्यानुकल्पेषुतथाकुलपूजायामस्यावश्यकत्वं॥तथाच॥मधुमांसं
